1st Elective
Phalita Jyotisha

Sastri Ist Year
Part : II, Paper - 2

# BṚHAJJĀTAKAM

*(1-10 Adhyāyāḥ)*

## Directorate of Distance Education

Rashtriya Sanskrit Vidyapeetha
Accredited at 'A' level by NAAC
Tirupati - 517 507 (A.P.)

## बृहज्जातकम्

1.1 प्रस्तावना।

1.2 उद्देश्यम्।

1.3 मङ्गलाचरणम्।

1.4 ग्रन्थवैशिष्ठ्यम्।

1.4.1ग्रन्थकर्तुः परिचयः।

1.5 होराशब्दस्य व्युत्पत्तिः।

1.6 सारांशः।

1.7 शब्दावली।

बोधप्रश्नोत्तराणि।

अभ्यासप्रश्नाः।

## प्रस्तावना।

**प्रिय अध्येता!।**

विश्वेस्मिन् विश्वे ज्ञानम् अत्यन्तं पवित्रम् अमूल्यञ्च विद्यते। ज्ञानं वाङ्मयं रूपेण विकसितम्। प्रपञ्चवाङ्मये भारतीयवाङ्मयम् अत्यन्तप्राचीनम्, विशालम्, विकसितश्च वर्तते।भारतीयवाङ्गमयेषु चतुर्दशविद्याः प्रसिद्धाःवर्तन्ते।ताः च, चत्वारो वेदाः, षड्वेदाङ्गानि,मीमांसा, न्यायः, धर्मशास्त्रम्, पुराणञ्चेति, एवमाहत्य चतुर्दशविद्याः वर्तन्ते। तथा हि-

**"अङ्गानि वेदाः चत्वारो मीमांसोन्यायविस्तरः।धर्मशास्त्रं पुराणञ्च विद्याह्येताः चतुर्दश।"**

एतादृशी चतुर्दशविद्यासु षड्वेदाङ्गेषु ज्योतिश्शास्त्रं नेत्ररूपेण मन्यते।ज्योतिश्शास्त्रस्य प्राचीनेषु ग्रन्थेषुबृहज्जातकम्आधारभूतमिति विद्वानसः भावयन्ति। ग्रन्थोऽयंवराहमिहिरेण लिखितमस्ति।अयमेकः ग्रन्थः जातकविषयमखिलं विभावयति। ग्रन्थस्यास्याध्यनेन भवान् त्रिकालज्ञानमाप्नोति।प्रत्येकस्यापि विषयस्य पितामहः इति भवति।अस्यापि ज्यौतिश्शास्त्रस्य अष्टादशप्रवर्तकाः वर्तन्ते। ते च–

**"सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिपराशरः।कश्यपो नारदो गर्गो मरीचिर्मनुराङ्गिराः।।**

**लोमशः पुलिशश्चैव च्यवनो यवनो भृगुः।शौनकोष्टादशश्चैते ज्योतिश्शास्त्रःप्रवर्तकाः।।"**

**ज्योतिषशब्दनिष्पत्तिः।**

**"ज्योतींषि अधिकृत्य कृतं शास्त्रं ज्योतिषम्"**इति प्रसिद्धम्। द्युतदीप्तौ इति धातोः कर्त्रर्थे 'द्युतेरिसुन्नादेशात् अजः' इति, उणादिसूत्रेण 'इसुन्' प्रत्ययः, आदिवर्णस्य च कारस्य **ज**

कारदेशश्च,'पुगन्तलघूपदस्य च' इति सूत्रेण उपधागुणः 'इणः षः' सूत्रेण सकारस्य षकारे सति ज्योतिषम् इति शब्दोन्निष्पन्नः। 'ज्योतींषि प्रतिपादने यस्मिन्' इत्यर्थे आर्ष आदिभ्यश्च इति सूत्रेण अच् प्रत्यये सतिज्योतिषं शब्दनिष्पत्तिः भवति।

पाठेऽस्मिन् मङ्गलाचरणं,ग्रन्थवैशिष्ठ्यता, ग्रन्थकर्तुः परिचयः, होराशब्दस्य व्युत्पत्तिः च विशदीक्रियते।अस्य ग्रन्थस्य अर्थान् व्यञ्जयितुं नैकाः टीकाः उट्टङ्किताः सन्ति। तेषु उत्पलभट्टस्य विवृत्तिटीका,गोविन्दसोमयाजिविरचितदशाध्यायी, श्रीरुद्रकृतहोराविवरणटीका, नौकाटीका, श्रीमत् शङ्कराचार्यप्रणीता जयमङ्गलाटीका, चन्द्रिका इति काचिद् व्याख्या, मिताक्षरी इत्यपरा व्याख्या, पारमेश्वरी इति एका संस्कृतव्याख्या, श्रीनिवासमहोदयेन विरचिताअपूर्वार्थप्रकाशिका इति काचिद्याख्या, इत्यादयः प्रसिद्धाः सन्ति। अप्रकाशितटीकाः मातृकायाम् उपलभ्यन्ते।नैकासु भाषासु ग्रन्थस्यास्य टीकाः अनेकाः एव। प्रत्येकं शास्त्रे अनुबन्धचतुष्टयमिति वर्तन्ते। तानि च **अधिकारी-सम्बन्ध-विषय-प्रयोजननि** भेदात् चतुर्विधम्।

**अधिकारी।**

'अस्य शास्त्रस्य अध्ययनाय को वा अधिकारी?' इति विजिगीषायाम्,तत्र स्मरतु वारहमिहिराचार्योक्तिः।यथा-

**"म्लेञ्छा हि यवनास्तेषु सम्यक्-शास्त्रमिदं स्थितम्।ऋषिवत्तेपि पूज्यन्ते किं पुनर्दैवविद्विजः ।। "**

यदि म्लेच्छादयः अस्य शास्त्रस्याध्ययनेन ऋषिवत् पूज्यन्ते तर्हि किं पुनः दैवविद्विजः? इति वराहमिहिराचार्यः स्वयमेव स्वीये बृहत्संहितायाम् उल्लिखति।ज्योतिषशास्त्रम् अध्येतुं, सामान्यनरो अपि समर्थः इतिप्रदर्शयामि अत्र।

भट्टोत्पलेन उक्तं यथा -**"द्विजस्य एव"** इति।यतः तेन द्विजेन षडङ्गो वेदो अध्येतव्यो ज्ञातव्यश्च। अनेन यो द्विजः सः अनिवार्यतया अध्येतव्यमिति ज्ञायते।

**सम्बन्धः।**

शास्त्रेऽस्मिन् कः सम्बन्धः वर्तते?इति जिज्ञासायां तदाह भट्टोत्पलेन; वाच्यं वाचकलक्षणसम्बन्धः। वाच्यः ग्रन्थस्य अर्थः, वाचकः शब्द इति। उपायः उपेयः लक्षणसम्बन्धः। शास्त्रमिदम्उपायं, अस्य शास्त्रस्य विज्ञानम् एव उपेयं भवति। अथवा शास्त्रमिदम् आब्रह्मादि विनिसृतं वेदाङ्गमिति सम्बन्धः।नौकाटीकायां क्रियाकारकसम्बन्ध उक्तः।स रविर्वाचं विदधाति इति क्रियाकारकसम्बन्ध उदितः।

**विषयः।**

'शास्त्रस्यास्य **विषयः** कः?' इति विजिगीषायां **याजुषज्योतिषे दृश्यते यथा-**

**'पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्।दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः।।**

याजुषज्योतिषानुसारं **पञ्चसंवत्सरात्मिकादिन-ऋतु-अयनमासादीनां** कालगणनमेवविषयः आसीत्। अस्तु **अथर्वज्योतिषे** मुहूर्तानां ज्ञानम् अर्थात् सूक्ष्मगणनप्रक्रियाविषयः प्रारब्धा। सा च **अथर्वज्योतिषे-**

**"अथ ब्रह्माणं स्वयंभुवंगुरुं लोकपितामहम्। ब्रह्मलोके सुखासीनं काश्यपः परिपृच्छति।।1।।**

**किं प्रमाणं मुहूर्तानां रात्रौ वा यदि वा दिवा। चन्द्रादित्यगतं सर्वं, तन्मे ब्रूहि पृच्छतः।।2।।**

**तस्य सुश्रूषमाणस्य काश्यपस्य महात्मनः। प्रोवाच भगवान् सर्वं मुहूर्तज्ञानमुत्तमम्।।3।।**

एकदा ब्रह्मलोके ब्रह्माणं काश्यपः परिप्रश्नेन सेवितवान्। मुहूर्तानां दिवारात्रीनां चन्द्ररव्यादीनां ग्रहाणां प्रमाणविचारे ज्ञातुकामोऽस्मिरिति। तदानीं ब्रह्मणा उक्तमिदं सूक्ष्मगणनाप्रक्रिया सा चकाश्यपेन प्रारब्धा वर्तते। वराहमिहिराचार्येण शास्त्रमिदं त्रिधा विभक्तः। वराहमिहिराचार्यस्य उक्तिरियं बृहत्संहितायाम्-

**"ज्योतिश्शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्।"**

सिद्धान्तासंहिताहोरा इति अस्य त्रयः स्कन्धाः भवन्ति। तत्र सिद्धान्तेषु पञ्चसिद्धान्ताः वर्तन्ते। अपि च ज्योतिषमहाशास्त्रस्य **जातक-गोल-निमित्त-प्रश्न-मुहूर्त-गणिते**ति षडङ्गानि वर्तन्ते।

**"जातकगोलनिमित्तप्रश्नमुहूर्तगणितनामानि। अभिदधतीह षडङ्गन्याचार्या ज्योतिषे महाशास्त्रे।।"**

**प्रयोजनम्**शास्त्रेऽस्मिन् अनुबन्धचतुष्टयेषु अन्तर्गते किं प्रयोजनम्? इति विजिगीषायांयाजुषज्योतिषे द्वितीयेश्लोकेउक्तञ्च-

**"ज्योतिषमयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः। सम्मतं ब्रह्मणेन्द्राणां यज्ञकालार्थसिद्दये।।"**

ज्योतिषामयनं पुण्यं सम्मतं ब्रह्मणेन्द्राणां यज्ञकालार्थसिद्धये अनुपूर्वशः प्रवक्ष्यामि। अर्थात् यज्ञाय कालं कथ्यते, शास्त्रमिदमिति प्रयोजनं भवति। शास्त्रस्यास्य अध्यनेन प्रयोजनम्, लघुजातकानुसारम् आचार्योक्तिःअग्रे वक्ष्ये। अन्यजन्मनि यदुपचितं शुभाशुभं वा कर्मार्जितं सञ्चितं, तस्य कर्मणः प्राप्तिम्, शास्त्रमिदं व्यञ्जयति प्रकटीकरोति वा। तद्यथा- दीपः तमसि द्रव्याणि व्यञ्जयति, तथैव शास्त्रमिदं, कदा शुभाशुभं फलं प्राणिः अनुभवति इति व्यञ्जयति। तच्च-

**"यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्। व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।"**

तथा हि भट्टोत्पलः–

**"लोकानां प्राक्कर्मविपाकव्यञ्जकत्वं प्रयोजनम्",**

**"सत्पात्र शुभाशुभकथनादिइहलोकपरलोकसिद्धिरिति प्रयोजनम्"** इति।

तथा च भास्करेण सिद्धान्तशिरोमणौ-

**"वेदस्तावत् यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्ताः ते तु कालाश्रयेण ।**

**शास्त्रादस्मात् कालबोधो यतः स्यात्,वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।**

**शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ ।**

**या तु शिक्षास्य वेदस्य सा नासिकापादपद्मद्वयम् छन्द आदैर्बुधः ।।**

**वेदः चक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्ये अस्य तेनोच्यते।**

**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषांङ्गेन हीनो न किञ्चिन्नरः।।**

**तस्मात् द्विजैः अध्ययनीयम् एतत्पुण्यंरहस्यं परमं च तत्त्वम्।**

**यो ज्योतिषं वेत्ति नरः स सम्यग्धर्मार्थमोक्षाल्लभते यशश्च ।।"**

यो नरो ज्योतिषम् अध्येति सः चतुर्विधपुरुषार्थानि आप्नोति। प्रश्नमार्गकारःअस्य शास्त्रस्य महत्वमेवम् अवर्णयत-

**"आयुश्च लोकयात्रा च द्वे शास्त्रेऽस्मिन् प्रयोजने। निश्चेतुं कोनुश्नोति वसिष्ठः वा बृहस्पतिः।।"**

आयुर्निरूपणं, लोकयात्रा परिज्ञानं च शास्त्रस्यास्य महत्तरप्रयोजने भवतः इति। साम्प्रतं शास्त्रस्यास्य परिचयमवलोक्य पाठोद्देश्यान् ज्ञास्यामः।

**उद्देश्यम्।**

- पाठस्यास्य अध्यनेन मङ्गलाचरणचिन्तने पटुः भविष्यति।
- पाठस्यास्य अध्यनेन ग्रन्थवैशिष्ठ्यता निरूपणे निष्णातो भवति।
- पाठस्यास्य अध्यनेन ग्रन्थकर्तुः परिचयः ज्ञातुं शक्तो भविष्यति।
- पाठस्यास्य अध्यनेन होराशब्दस्य व्युत्पत्तौ विवेचनेच दक्षो भविष्यति।
- पाठस्यास्य अध्यनेन मानवानां जीवने सूर्यस्य माहात्म्यं ज्ञास्यति।
- पाठस्यास्य अध्यनेन होराशब्दस्य निष्पत्तिं ज्ञास्यति।
- पाठस्यास्य अध्यनेन चन्द्रस्य प्रकाशस्य कारणम् अभिज्ञास्यति।
- पाठस्यास्य अध्यनेन रवेः महत्त्वं ज्ञास्यति।

### 1.3 मङ्गलाचरणम्।


प्राचीनकाले लोकोपकारार्थं ग्रन्थान् रचयन्ति स्म।पञ्चमे शताब्दे वराहमिहिरचार्यः लोकोपकाराय त्रिकालज्ञानप्रदायकविज्ञानात्मकज्योतिषं होराशास्त्रं रचयामास। होराशास्त्रस्य प्रारम्भे निर्विघ्नतापूर्वकपरिसमाप्तये मङ्गलाचरणम् अकरोत्। मङ्गलाचारणे कृतान् नैकान् विशेषान् प्रबन्धेऽस्मिन् विव्रीयन्ते।मङ्गलाचरणं त्रिविधम्। आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम् इति।प्रसङ्गेऽस्मिन् ग्रन्थकारः इष्टदेवतायाः सवितायाः अशीर्मुखेन मङ्गलाचरणमकरोत्।तथा हि-


**"मूर्तित्वेपरिकल्पितःशशभृतोवर्त्मापुनर्जन्मनाम् ।**
**आत्मेत्यात्मविदांक्रतुश्चयजतांभर्तामरज्योतिषाम् ।।**

**लोकानां प्रलयोदयस्थितिविभुश्चानेकधा यः श्रुतौ ।**
**वाचं नः स दधात्वनेककिरणस्त्रैलोक्यदीपो रविः।।"**

☞ शशभृतो मूर्तित्वेपरिकल्पितः,अपुर्जन्मानाम् वर्त्मा, आत्मविदाम् आत्मा इति, अमरज्योतिषां यजतांक्रतुश्चभर्ता, लोकानां प्रलयोदयस्थितिः अनेकधाविभुः च, रविः अनेककिरणः(वशात्) त्रैलोक्यदीपो यः श्रुतौ, स नः(वक्तुं पारयेत) वाचं दधातु इति वाच्यार्थः। ग्रन्थेऽस्मिन् अनेकार्थाः वर्तन्ते। तान् अर्थान् ज्ञास्यामः।

स रविः अस्मभ्यं वाचं प्रयच्छतु। कीदृशो रविः? इति प्रश्नमुदेति,अतःविशेषणमुक्तम्। यथा अनेककिरणवानिति, अनेककिरणात्मकोरविः, अस्माकं वाचं ददातु इति तात्पर्यः।त्रैलोक्यदीपात्मको रविः, अस्मभ्यं वाचं प्रयच्छतु। अत्र त्रैलोक्यदीपात्मकः नाम, भू–भुव-स्वः इति त्रैलेक्याः भवन्ति। एषां त्रिलोकानां दीपात्मकः रविः वाचं ददातु इत्याशयः। एवं त्रिलोकदीपात्मकः रविः वाचं ददातु इति अर्थः।शशम् अर्थात् प्राणिविशेषं, धारयति इति अर्थे शशभृत् इति शब्दः। शशभृत् शब्दस्यार्थः चन्द्रमा।चन्द्रस्य शरीरत्वेरविणा परिकल्पितः। चन्द्रःस्वप्रकाशशून्यत्वात् सूर्यकिरणस्य प्रतिफलनात् किरणविस्तारंकरोति। अनेन सूर्यकिरणवशात् चन्द्रस्य मूर्तिरूपं दृश्यते।




सूर्यः अपुनर्जन्मनां वर्त्मा भवति। अपुनर्जन्मानां नाम केषाम्? इति प्रश्नमुदेति। न पुनर्जन्मं विद्यते येषां, ते अपुनर्जन्मिनः। तेषां वर्त्मा, अर्थात् मोक्षम् इच्छुकानां मार्गः सूर्यः भवति। सूर्यमण्डलं भित्वा एव मोक्षगामिनः भवन्ति। अनेन कारणेन सूर्यः मोक्षगामिनां मार्गः भवति।द्वावेव भवतःसूर्यमण्डलं भित्वा मोक्षगामिनौ। एकः परिव्राट्, अपरश्च रणे अभिमुखो हतः योद्धा। तच्च कथितं यथा-

**“द्वावेव पुरुषौ लोके सूर्यमण्डलभेदिनौ।परिव्राट् योगयुक्ताश्च रणे चाभिमुखो हतः।“**

यःआत्मेत्यात्मविदाःसः नः वाचं ददातु इति अर्थः। आत्मानं ये जनाः जानन्ति ते आत्मविदाः भवन्ति। यः आत्मानं वेत्तिसः आत्मविद् भवति। आत्मविदाम् आत्मा, रविः अस्ति। यजतां क्रतुः यज्ञः भवति। स यज्ञः, रविः वर्तते। इति अर्थः। ग्रहनक्षत्राणि ज्योतींषि पदेन व्यवह्रियन्ते। देवा अमरा इत्यभिधीयन्ते। अमरज्योतिषां भर्ता अर्थात् ग्रहनक्षत्राणां देवतानां भर्ता रवि अस्ति। लोकानां प्रलयः, उद्भवः, स्थितिः, विभुः रविः अस्ति। भू-भुव-स्वः इति त्रिलोकाः भवन्ति। एतेषाम् त्रियाणां लोकानां सृष्टिस्थितिलयः रविणा क्रियते इत्यर्थः। अनेकधाश्रुतौ रविः स्तुतोभवति। अनेकधाप्रकारैः वेदे पठ्यते स रविः वर्तते।एवं वाच्यार्थः

भवति। वराहमिहिराचर्येण विरचितग्रन्थेऽस्मिन् अनेकार्थाः निगूहिताः भवन्ति। तदर्थं प्रागुक्तटीकाः परिप्रेक्षणीयाः। अतः मुख्याःटीकानुसारम्अर्थान् अवगच्छामः।

अत्र अवधेयाः अंशाः-

- चन्द्रः सूर्यप्रतिफलितकिरणेन मूर्तिरूपं प्राप्नोति।
- अनेककिरणवान् त्रिलोकदीपात्मवान् चन्द्रस्य शरीरत्वंपरिकल्पितः, मोक्षमिच्छुकानां मार्गः सूर्यः भवति।

**श्रीरुद्रेण विरचितविवरणटीकायाः अभिप्रायानुसारमधः लिख्यते।**

रविः वाचं नः ददातु। रवि शब्दस्य मूलं 'रु शब्दायते' इति धातुः। 'रौति अवति चेति' रविः। शब्दब्रह्मस्वरूपम् त्रयीमयम् भगवान् आदित्य-रविशब्देन उच्यते। तच्च उक्तं यथा-

**"महाशून्ये घुण्यमानो यतः शब्दायते भृशम्।अवति च सौरलोकं ततः स रविरुच्यते।।"**

शब्दब्रह्मात्मकरविः अस्मान् 'कालप्रातिभानप्रतिहतत्त्वं,सत्यत्वं, श्रोत्रुमनोहरत्वम्', वाचंददातुइति अन्तर्निहित भावः। अनेककिरणवान्रवि अर्थात् शीतकिरणाः, उष्णकिरणाः, शीतोष्णकिरणाः, इति युक्तः रविः भवति।यानि प्रकाशकत्वयुक्तानि वस्तूनि रत्नादीनि तेषां प्रकाशकत्वाद् दीपभूतः रविः इत्यर्थः।




मूर्तित्वे शब्देन अमूर्तव्यावृत्तिः उच्यते। चन्द्रस्य मूर्तरूपं रविणा परिकल्पितः। चन्द्रस्य दृश्यत्वं रविणा कल्पितः। अपुनर्जन्मानां वर्त्मा इत्यस्य अर्थः मुक्तानां गमनभूमिः रविः भवति इति। आत्मेत्यात्मविदाम् इत्यस्य आत्मविदां निवृत्तिमार्गानुष्ठानां वैदान्तिकानां सिद्धान्तरूपेण प्रतिपाद्यो यः आत्मा तत्स्वरूपं रविः वर्तते। यः यजतां क्रतुः कर्मकाण्डनिष्ठानां गृहस्थानां क्रतुश्च भवतीति सम्बन्धः। यजमानानाम् अभीष्टफलप्रदायिकक्रतुदेवतास्वरूपं रविः वर्तते, इति आशयः। अमरज्योतिषां भर्ता, हविर्भागभुजांक्रतुसम्पादनसाधनभूतधनधान्यवर्धनकत्वद्वारेण भर्ता भरणशीलः रविःअस्ति इति। पालनस्य, उदयस्य, सृष्टेः, विभुः रविः इत्यर्थः। अस्मिन् श्लोके आशीर्वादः तन्मुखेन इष्टदेवतारूपेण मङ्गलं प्रदर्शितः।

कटपयादि अक्षरसंख्यागणनाक्रमेण मूर्तित्वे शब्देन, अक्षरसंख्यायां पञ्चषष्ट्यधिकानि चतुश्शतानि 465 भवन्ति। तानि च-म इत्यस्य 5, त इत्यस्य (6)षट्, व इत्यस्य 4, एवं विधः भवति। (कादि नव टादि नव पादि पञ्च इति सूत्रवशात् क वर्णात् आरभ्य क्रमशः सङ्ख्यां गणयेत्।) परिकल्पित इतिसंख्यायाम् अक्षरसंख्यावशात् प इत्यस्य 1, र इत्यस्य 2,क इत्यस्य 1, प इत्यस्य 1, त इति संख्या 6 अक्षरसंख्याः भवन्ति। संख्यानां वामतो गतिः इति सूत्रवशात् 61121 इति सिध्यति। ततः गणना विधानः अधः दश्यते।

465-

<u>121</u>

-344संशोधयितुं न अर्हति इत्यतः344-16 = 328 भवति स च राशिः शशभृतः अर्थात् **श** वर्णस्य अक्षरसंख्या(5),पुनः शवर्णस्य अक्षरसंख्या(5) इति पञ्चपञ्चाशता पूरितः (55), 328+55 = 383 आत्मा भवति अस्य श्लोकसंख्यारूपं शरीरं भवति इत्यर्थः। मूर्तित्त्वे (465) सल्लापशोधनेन (137)-(387–137=328 प्राप्स्यते) शशक्षेपेण(55) 328+55=383 आत्मभूतश्लोकप्रमाणभूतानि भवन्ति।

अस्मिन् श्लोके,ग्रन्थे विद्यमानश्लोकसंख्यानयनप्रकारे तिस्रः क्रमाः निर्दिष्टाः।

तत्र प्रथमे **मूर्तित्त्वे**(465) इति। अत्र संख्यानां योगे 4+6+5= 15 भवति।

द्वितीया **परिकल्पितरहित मूर्तित्त्वजरागौ**(328)इति ।

ज-8

र-2

ग-3

अर्थात् ज इत्यस्य 8 संख्या, र वर्णस्य “2”, ग इति वर्णस्य अक्षरसंख्या 3 इति।

**तृतीयापरिकल्पितरहितं शशयुक्तं गोजालम् इ**ति(383 = 13) भवति। गो वर्णस्य त्रयमिति(3), जा वर्णस्य अष्टमिति(8), ल वर्णस्य 3 वर्णसंख्याः भवन्ति।इत्थं गोजालशब्दस्य 383 वर्णं भवति।

एवं द्वितीयसंख्यास्थानात् त्रयस्थानम् अष्टकद्विकत्रिकाणां (3 + 2 + 8) तथा तृतीयसंख्यागतानां, (3 + 8 + 3= 14) त्रिकाष्टकत्रिकाणांच योगः(13 + 14 = 27) सप्तविंशतिः भवति। तस्मात् पञ्चदशघटिकात्मको नवांशात्मको भवति। इत्यर्थः उपलभ्यते। एवं मूर्तित्वे इत्यादि श्लोकस्य अर्थबाहुल्यात् अतिविस्तरभयात् विरम्यते।

**अथ अपूर्वार्थप्रकाशिककारस्य अभिप्रायानुसारम् उच्यते।**

परमात्मास्वरूपस्यसूर्यस्य सङ्कल्पएव जीवात्मस्वरूपस्य चन्द्रस्य मूर्तित्वे कारणं भवति। अत्र सूर्यंपरमात्मत्वेन,चन्द्रं जीवत्मस्वरूपत्वेन, च वर्ण्यते। सर्वेषां ग्रहाणां रविरेव दृश्यत्व-अदृश्यत्वकारणम्। तेषां शुभत्वसूचकम्, अशुभत्वसूचकं रविरेव। सूर्यमण्डलं भित्वैव परमपदः प्राप्तिः भवति, तस्मात् पुनरावृत्तिरहितानाम् अर्चिः आदि मार्गेण मोक्षगामिनां मार्गः अस्ति। आत्मविदाम् आत्मारूपेण स्वं प्रदश्यं प्राणभूतः प्रियो रविः वर्तते। यजतां क्रतुः इत्यस्मात् कर्मकाण्डनिष्ठानां क्रतुः यज्ञरूपेण वर्तते। स च रविः इति। प्रलयोदयस्थितिविभुः सृष्टिस्थितिसंहारकारकः रविः भवति। अनेन टीकाकारः राशिचक्रस्यापि प्रलयोदयस्थितिं अभिप्रैति। **मेष-वृषभ-मिथन-कर्कोः** इति राशिचतुष्टयं **सृष्टिकाण्डः**, **सिंह-कन्या-तुला-वृश्चिकाः** इति राशि चतुष्टयं **स्थितिकाण्डः**, **धनु-मकर-कुंभ-मीनाः** इति **चतुष्टयं प्रलयकाण्डः**, भवति। टीकाकारः अक्षरसंख्याधारेण चिन्तयति। न अङ्कस्य 0, क अङ्कस्य 1, अतः नैक इत्यस्मात् 10 संख्यायां प्राप्ते, रवेः दशरश्मिसंख्याः इति अभिप्रैति। एषा संख्या रश्मिजायुगणना समये उपयुक्तंच अभिप्रैति।

अनेकधा वेदेषु स्तुतः सः रविः इति। त्रैलोक्यदीपः भू–भुव-स्वः इति त्रयाणां लोकानां प्रकाशकः। अथवा भूः-भुवः-स्वः स्वरूपाणां महाव्याहृतीनां दीपभूतः वर्तते। रविः शब्देन षड्विंशति पदानि स्वीक्रियन्ते। पञ्चविंशतितत्त्वातीतं गायत्रीप्रतिपादितं परं ब्रह्मा अत्र रविशब्देन निर्दिष्टः। 'रु शब्दे' इत्यस्मात् धातोः निष्पन्नः रविःशब्दः।अनेन वागर्थयोः सिध्यै रविं स्तुतः इति।श्लोकेऽस्मिन् पञ्चविंशं पदम् अस्ति **"त्र्यैलोक्यदीपः"**इति। तेन टीकाकारेण उक्तं यत् पञ्चविंशतत्त्वजीवव्यञ्जकत्वम् इति। चतुर्विंशं पदं नैककिरणः इति। अनेककिरणद्योतकत्वात् **"अजामेकां लोहितशुक्लकृष्णाम्"** इत्युक्तमोहनपिञ्छिकास्वरूपप्रकृतिव्यञ्जकम्।

नः वाचं ददातु इत्यस्य अर्थः टीकाकारः अक्षरसंख्यानुसारेण वर्णयति।यथा- "**वाचम्**"इत्यस्य चतुःषष्ठिः 64. (कटपयादि अक्षरसंख्याद्वारा च इत्यस्य षट्(6),"**व**" इत्यस्य चतुर्थमिति(4)) अतः चतुष्षष्ठिकलानां ज्ञानं ददातु इत्यस्य अर्थव्यञ्जयति। **वाश्च चाश्च** समाहारः इति अर्थे क्रियेतचतुर्वेदानां षडङ्गानां चोपलक्षणम्। साङ्गवेदज्ञानं ददातु इति अर्थः। अर्थात् षडङ्गानां वेदानां ज्ञानं ददातु इति अर्थः।आशीरूपेण मङ्गलाचरणं, तन्मुखेन नमस्क्रिया च वस्तुनिर्देशः च अत्र दृश्यते।

अस्मिन् श्लोके टीकाकारः शब्दानां लक्ष्यार्थवशात् लग्नं-नवग्रहाणां च संज्ञाः कल्पयति। तदित्थं **"मूर्तित्त्वे"** इति शब्देन लग्नं, रविः इति सूर्यभगवन्तं सूचितः। शशभृतः शब्देन चन्द्रभगवन्तम्, **"वर्त्मा अपुनर्जन्मनाम्"**इति शब्देन सूर्यमण्डलभेदकसत्त्वभूतो **भौमः** सूचितः। **"आत्मा"** इत्यात्मशब्दसूचितविष्णुदेवताको **बुधः** सूचितः।"**आत्मविदाम्**"यशब्देन गुरुग्रहस्य

टीकाकारः चिन्तनं करोति।" **क्रतुश्च यजतां**"इति यजुर्वेदाधिपः शुक्रः सूचितः।**"भर्तामरज्योतिषाम्"**इति ग्रहाणां मध्ये ईश्वरबिरुदाङ्कितः शनिश्चरेति लग्नयुक्तसप्तात्मकाष्टवर्गः सूत्रितः।**"शशभृतः"** शब्दःटीकाकारः नक्षत्रमण्डलं, **वर्त्मा** इति ग्रहाणां भ्रमणमार्गं द्वादशराशिचक्रं सूचयति इति। त्रैलोक्यशब्देन पूर्व-इह-परलोक ज्ञानहेतुकम्।मूर्तित्त्वे पदेन सिद्धान्तसंहिताहोरा इति स्कन्धत्रयात्मकज्योतिश्शास्त्रस्य मूर्तिरूपं कल्पितमिति। श्लोके आहात्य षड्विंशतिपदानि वर्तन्ते। एतानि पदानि अध्यायसंख्यां सूचयति इति टीकाकारः अभिप्रैति।

होराशास्त्रस्य अनेकासु टीकासु नौकाटीका अन्यतमा वर्तते। तया टीकया परिप्रेक्ष्य लिख्यते। श्लोके रविः शब्दः निर्दिष्टः। रविः इति शब्दः 'ऋशब्दे' इत्यस्मात् धातोः निष्पन्नत्वात् शब्दब्रह्मात्मकत्रयीमयः भगवान् आदित्यः इति टीकायां लिखितं वर्तते। अतः सूर्यदेवस्य आदेशप्रधाने जातकशास्त्रे समुचितेष्टादेवतात्वं ध्वन्यते। नःविशिष्टां वाचम्इत्यस्य अर्थं टीकाकारः एवं विवृणोति यथा–'**यथाकालप्रतिभानम्,अप्रतिहतत्वम्, सत्यत्वम्, श्रोत्रमनोहारित्वम्**'इति। भौमः अग्निकारकः। वर्त्मा अपुनर्जन्मनाम् इति वाक्यस्य अर्थ अग्रे लिख्यते। योगसाधनत्वेन अपवर्गस्य मूलत्वाद् अपवर्गविषयेण भौमः सूच्यते। तच्च उक्तम्-

**"मूलाधारोद्गतो वह्निः द्वादशान्तम् उपाश्रितः।पीयूषवर्षपूर्णात्मा कामदो न तु मोक्षदः।**
**स हि चोर्ध्वं गततस्माद् अपवर्गाय संभवेत्।"**

क्रतुश्च यजतां वाक्येन गुरोः सूचनंदृश्यते इति। तच्च **क्रतूपयोग्यानि तपस्विनश्च** इति द्रेष्काणाध्याये उक्तानुसारेणमीनादिद्रेष्काणसम्बन्धवशात् धर्मक्रियावान् गुरुः सूचितः। त्रैलोक्यदीपः शब्दस्य टीकाकारः गतजन्मनः लोकस्य,इह जन्मनः लोकस्य आगामीजन्मनः लोकस्य, इति अर्थं व्यञ्जयति।होराशास्त्रे अर्थबाहुल्यत्वात् अनेकार्थाः वर्तन्ते एव। अस्य ग्रन्थस्य अर्थाः स्वयम् अनुसरन्ति। ऋषिप्रणीतग्रन्थस्य अध्ययनम् एव भाग्यम् इति ज्ञातव्यम्। साम्प्रतम् अतिविस्तरभयात् विरम्यते।

**पदच्छेदः**=मूर्तित्वे परिकल्पितः शशभृतो वर्त्मा अपुनः जन्मनाम् आत्मा इति आत्मविदां क्रतुः च यजतां भर्ता अमरज्योतिषाम् ।लोकानां प्रलय-उद्भव-स्थितिः विभुः च अनेकधा यः श्रुतौ वाचं नः स ददातु अनेककिरणः त्रैलोक्यदीपो रविः।

**अन्वयः**=शशभृतो मूर्तित्वेपरिकल्पितः,अपुर्जन्मानाम् वर्त्मा, आत्मविदाम् आत्मा इति, अमरज्योतिषां यजतांक्रतुश्चभर्ता, लोकानां प्रलयोदयस्थिति अनेकधा विभुः च, रवि अनेककिरणः(वशात्) त्रैलोक्यदीपो यः श्रुतौ , स नः(वक्तुं पारयेत) वाचं दधातु।

**अन्वयार्थः**-शशभृतो= चन्द्रः, मूर्तित्वे परिकल्पितः= दृश्यत्वे परिकल्पितः,अपुनर्जन्मनाम्= न पुनर्जन्मनो येषां ते अर्थात् मुक्ताः,वर्त्मा = मार्गः, आत्मविदाम् = आत्मज्ञानपरायणाम्, आत्मा = आत्मा,अमरज्योतिषां = देवाः ज्योतिष ग्रहनक्षत्रादीनि तेषां भर्ता प्रभुः; देवाः ग्रहानक्षत्रायाः दिव्याः तेषाम् अर्थात् देवतानां प्रभुः, यजतांक्रतुश्च = यजमानानां स एव क्रतुः,भर्ता = पतिः, लोकानां=त्रिलोकानां, प्रलयोदयस्थितिः = सृष्टिस्थितिप्रलयकारणकर्ता, अनेकधा = बहुधा, विभुः = विष्णुः, यः श्रुतौ = वेदे रविः, वाचं = नः(वक्तुं पारयेत) स रविः = सः सूर्यः, अनेककिरणः(वशात्)= न एक किरणवान्, त्रैलोक्यदीपो = भूः भुवः स्वः इति लोकत्रयाणां दीपः भवति।

**भावः** = शशभृतो मूर्तित्वेपरिकल्पितः,अपुनर्जन्मनाम् वर्त्मा, आत्मविदाम् आत्मा इति, अमरज्योतिषां यजतांक्रतुश्चभर्ता, लोकानां प्रलयोदयस्थितयः अनेकधा विभुः च, रविः अनेककिरणः(वशात्) त्रैलोक्यदीपो यः श्रुतौ , स नःवाचं दधातु इति भावः।

**बोधप्रश्नाः-**

1. ज्योतिषशास्त्रस्य अधिकारी कः?
2. ज्योतिषशास्त्रस्यवेदाङ्गत्वं कथम्?
3. ज्योतिषशास्त्रस्यविषयः कः?
4. ज्योतिषशास्त्रस्यप्रयोजनं किम्?
5. ज्योतिषशास्त्रस्य प्रवर्तकाः के?
6. चतुर्दशविद्याःकाः?
7. बृहज्जातकग्रन्थस्य कति टीकाः प्रसिद्धाः वर्तन्ते?
8. वराहमिहिराचार्येण लिखिताः ग्रन्थाः के?
9. ज्योतिषशास्त्रस्य प्रधानदेवः कः?
10. मङ्गलश्लोकस्य वाच्यार्थः कः?
11. चन्द्रस्य मूर्तिरूपं केन प्रदत्तम्?
12. **अपुनर्जन्मनाम् वर्त्मा** इति शब्दस्यार्थः कः?
13. आत्मेत्यात्मविदां शब्दस्य कोऽर्थः?
14. रविः शब्दस्य कोऽर्थः?
15. कटपयादि अक्षरसंख्यागणनाक्रमेण मूर्तित्वे शब्दस्यविशेषाः के?
16. त्र्यैलोक्यदीपः शब्दस्यार्थः कः?

17. अस्मिन् श्लोके टीकाकारस्यमतानुसारं शब्दानां लक्ष्यार्थवशात् लग्नग्रहयोः च संज्ञाः लिखत।
18. वाचम् इत्यस्य अक्षरसंख्यावशात् चिन्तनं कथं क्रियते?

1.4 **ग्रन्थवैशिष्ट्यम् ।**

प्राचीनकाले लोकोपकाराय ग्रन्थान् लिखन्ति स्म। तादृशेषु ग्रन्थेषु अयमपि अन्यतम भवति।ग्रन्थेऽस्मिन् वराहमिहिराचार्यो लिखति यत् 'अहं बहुभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये, बहुशः शास्त्रेषु दृष्टेषु सत्स्वपि होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानां पटुधियां स्वल्पं वृत्तविचित्रम् अर्थबहुलं होराशास्त्रप्लवं प्रारभे।' पटुबुद्धिभिः इति उक्तं ननु, बुद्धिः अदृश्यत्वात् कथमस्य गुणज्ञानम् इति प्रश्नः समुत्पाद्यते। तदर्थम् उच्यते-

**"शुश्रूषा श्रवणं ज्ञानम् ग्रहणं धारणं तथा।ऊहापोहार्थविज्ञानं तत्त्वज्ञानं तु धीगुणाः।।"**

अनेन पटुबुद्धिभिरिति आचार्याणां निर्देशने होरातन्त्रनिर्वहणे ऊहापोहपटुत्वं विशेषेण अपेक्षते। यथोचितम्-

**"स्वस्थचित्तो विविक्तस्थः पञ्चसिद्धान्तकोविदः।ऊहापोहपटुः सिद्धमन्त्र जानाति जातकम्।।"**

होराफलज्ञानं महत्कार्यं भवति।सुदुष्करं कार्यमिदम्श्रुतिमूलात् पराशरवराहमिहिरेत्यादिभिः आचार्यैः साक्षात्कृतेषु होराशास्त्रज्ञानम्। अतः इदं माहर्णवरूपम् अर्थात् महान् समुद्रमिव गभीरः विशालः इति लक्ष्यार्थः। समुद्रे यात्रिकस्य दिक्ज्ञानं नष्टे सतिमहान् क्लेशः समुत्पद्येत यतः सर्वत्र जलमेव दृश्यते। होराशास्त्रनाम्ना समुद्रसदृशशास्त्रप्रतरणाय एकां नौकामिव ग्रन्थोऽयं,कर्षितः इतिअभिप्रायः। पूर्वशास्त्राणां मीमांसादीनां शब्दन्यायसमन्वयकथनेन अर्थः प्रकाश्यते। शास्त्रेऽस्मिन् शब्दन्यायव्यतिरेकेणापि कुत्रचित् अर्थविशेषसूचनं ध्वन्यते। स्वल्पमिति सारसङ्ग्रहरूपत्वात् सुखध्येयमिति भावः। ग्रन्थेऽस्मिन्लिखितानां विषयानाम् अर्थबहुल्यं भवति। स्वशास्त्रस्य जातकविषयः, प्रश्नशास्त्रे अपि उपयोक्तुं शक्यन्ते।पूर्वेषां होराशास्त्राणाम् अभिधायकःअभिधेययोः शब्दार्थयोः बाहुल्याद् दुर्ग्रग्वेन पटुधियामपि भग्नोद्यमत्वं भवति। शास्त्रेऽस्मिन्स्वल्पैः पदैः बह्वर्थान् विवक्षति। विचित्रैः वृत्तैः लिखिष्ये इति ग्रन्थकर्ता लिखति। अनेन स्वल्पशब्दत्वाद् विचित्रवृत्तवशात् होरातन्त्रप्रतरणे सुकरं जायते। तच्च उक्तं यथा-

**भूयोभिःपटुबुद्धिभिःपटुधियांहोराफलज्ञप्तये।शब्दन्यायसमन्वितेषुबहुशःशास्त्रेषुदृष्टेष्वपि।।**
**होरातन्त्रमहार्णवप्रतरणेभग्नोद्यमानामहम्।स्वल्पंवृत्तविचित्रमर्थबहुलंशास्त्रप्लवंप्रारभे ।।**

**-(शार्दूलविक्रीडिता)**

**पदच्छेदः**-भूयोभिःपटुबुद्धिभिःपटुधियांहोराफलज्ञप्तयेशब्दन्यायसमन्वितेषुबहुशःशास्त्रेषु दृष्टेषु अपि होरा-तन्त्र-महा- अर्णव-प्रतरणे भग्नोद्यमानाम् अहं स्वल्पं वृत्तविचित्रम् अर्थबहुलं शास्त्रप्लवं प्रारभे।

**अन्वयः** = (अहं) भूयोभिःपटुबुद्धिभिः पटुधियां होराफलज्ञप्तये, बहुशःशब्दन्यायसमन्वितेषु शास्त्रेषु दृष्टेषु सत्स्वपि अपि होरातन्त्र महार्णवप्रतरणे भग्नोद्यमानांपटुधियां स्वल्पं वृत्तविचित्रम् अर्थबहुलं होराशास्त्रप्लवं प्रारभे।

**अन्वयार्थः** -भूयोभिः = बहुभिः,पटुबुद्धिभिः = पटुत्वं गुणसमग्रता तद्युक्त बुद्धिभिः,शब्दन्यायसमन्वितेषु = व्याकरणन्यायमीमांसादिषु शास्त्रेषु, बहुशः=प्रायशः,शास्त्रेषुदृष्टेषु=शास्त्रेषु परामृष्टे, अपि होराफलज्ञप्तये = होराफलम् अधिगन्तुम्, पटुधियां = धीया पटुत्वं, भग्नोद्यमानां= होराफलावगमनकार्ये भग्नप्रवृत्तीनां, होरातन्त्रमहार्णवप्रतरणे = होराशास्त्रस्य माहसागरप्रतरणे, स्वल्पं = लघुकायैः, वृत्तविचित्रम् = अनेकविचित्रवृत्तात्मकम्,अर्थबहुलम् = अर्थ बाहुल्यम्,शास्त्रप्लवं= शास्त्रस्य प्लवत्वरूपम्, अहम्=आदित्यदासः,वराहमिहिराचार्यः, प्रारभे=प्रारम्भं करोमि।

**भावः** = भूयोभिःपटुबुद्धिभिः शब्दन्यायसमन्वितेषु बहुशःशास्त्रेषु दृष्टेषु अपि होराफलज्ञप्तये पटुधियां भग्नोद्यमानां होरातन्त्रमहार्णवप्रतरणे स्वल्पं वृत्तविचित्रम् अर्थबहुलं शास्त्रप्लवम् अहं प्रारभे इति भावः।

### 1.4.1 ग्रन्थकर्तुः परिचयः।

अस्य ग्रन्थस्य कर्ता वराहमिहिराचार्यः वर्तते। स्वग्रन्थे अष्टाविंशतितमे अध्याये स्वपरिचयं इत्थं विद्धाति। यथा-

**आदित्यदासतनयः तदवाप्तबोधः कापित्थके सवितृलब्धवरप्रसादः।**
**आवन्तिको मुनिमतान्यवलोक्यसम्यग् होरां वराहमिहिरो रुचिरां चकार।।**

अहं गर्गवसिष्ठपराशरादि मुनिमतानि सम्यग् अवलोक्य रुचिरां होराम्अकरवम्, इति वराहमिहिराचार्यःग्रन्थेऽस्मिन् अन्ते अवादीत्।आदित्यदासतनयः आदित्यदासाख्या तदवाप्तबोध इति। अनेन ज्ञायते यत् साम्प्रदायिकं जातकविषयकं ज्ञानं पित्रा प्रदत्तम् इति। तेन स्वगोत्रादिविचारंलिखतं यथा कापिष्ठलगोत्रोद्भवः इति। सवितृलब्धवरप्रसादः अर्थात् परमकारुणिकः आदित्यदेवात् लब्धवरप्रसादः।आवन्तिकः देशः लोकानुग्रहकाम्यया सम्प्रदायसिद्धानि प्रदर्शितानि।आगममूलमिदंशास्त्रमिति। अस्य कृतयः पञ्चसिद्धान्तिका, बृहत्संहिता, बृहज्जातकम्, लघुजातकम्, विवाहपटलं, योगयात्रा, लग्नवाराही इत्यादयः ग्रन्थाः भवन्ति। आचार्योऽयं 427 मितशकवर्षभिमतःस्थितवानिति मतः। कथ्यते, यत्स हि शकगत

407 मितवर्षे जातः, 509मितशकवर्षे दिवङ्गतेति। स्वयंतेन स्वस्थिकालविषये न किमपि उक्तम्। स हिपञ्चसिद्धान्तिकायां आर्यभटकरणं स्मरतीति 421 मितशकाब्धएव तस्य स्थितकालस्य पूर्वसीमा तथैवमध्यममेषसङ्क्रान्तिगणनाधारेण पञ्चसिद्धान्तिकाप्रणयनं न कथमपि 437 मितशकाब्दादर्वागिति तदन्तरालेव तस्य स्थितिकालो मतः। भट्टोत्पलानुसारेण अयम् मगधद्विजः वर्तते।अन्येषां मते तु भगद्विजः वर्तते।आचार्येऽयं धृतविग्रहा सरस्वत्येव। अस्य महत्वपूर्णं योगदानं त्रिषु स्कन्धेषु वर्तते। अस्य व्याख्यासु भट्टोत्पलस्य महीधरस्य गेविन्दस्य महादेवस्य च ताः प्रसिद्धाः।

**बोधप्रश्नाः-**

19. पटुबुद्धेः गुणाः के?
20. आचार्यः स्वग्रन्थवैशिष्ट्यविषये कथं प्रतिपादयति?
21. वराहमिहिराचार्यस्य प्रदेशः कः आसीत्?
22. वराहमिहिरचार्यस्य गुरुः कः आसीत्?
23. वराहमिहिराचार्येण विरचिताः कृतयः के?

### 1.5 होराशब्दस्य व्युत्पत्तिः-

होरा शब्दस्य कोऽर्थः?, व्युत्पत्तिः च का? इति जिज्ञासा भवति एव। तदर्थमुच्यते-अहश्च रात्रिश्च इति शब्दद्वयेन अहोरात्रम् इति समासपदंजातम्। केचन आचार्याः अभिप्रयन्ति यत् अहोरात्रशब्दस्य विकल्पे होराशब्दः व्युत्पद्यते। मेषादयो द्वादशलग्नराशयो अहोरात्रे अन्तर्भवति।लग्नस्य कालवशात् ज्ञानं भवति। अतः लग्नवशात् शुभाशुभाज्ञानं भवति। अहोरात्रम् शब्दस्य पूर्ववर्णः अपरवर्णः अनयोः लोपात् होरेति शब्दः निष्पन्नो भवति। तद्विधिम् अग्रे लिखिष्ये। अहोरात्रशब्दे पूर्ववर्णः **अ**, अपरवर्णः **त्र**। एवम् अनयोः लोपवशात् होरा इति शब्दं निष्पादितमिति। मतमिदम् आचार्यस्य सम्मतम् अस्ति।अत्र आचार्येण लिखितं यत् "विकल्पम्" इति। विकल्पं नाम विशिष्टः कल्पः विकल्पः।वैशिष्ट्यं नाम जननेन वा प्रश्ने वा?जननेन उपलक्षितम्, प्रश्नेन उपलक्षितं वा,तात्कालिक अहोरात्रावयवं होराशब्देन निर्दिशन्ति। अनेन होराशास्त्रेन किं प्रयोजनम्? इति जिज्ञासायां सा होरा पूर्वभवे आर्जितं सद् आदि कर्मानुसारेण, यत् जातस्य जीवने, पंक्तिं सम्भाव्यमानं व्यनक्ति इति सम्बन्धः। पूर्वजन्मनि अर्जितं सत् आदि। आदिशब्देन सदसच्च गृह्येते।ननु शुभस्य अशुभं वा अवश्यं भाविनः होरा किं व्यनक्तिः?तच्चउच्यते। द्विविधं शुभाशुभं दृढकर्मोपार्जितम् अदृढकर्मोपार्जितं च तत्र दृढकर्मोपार्जितस्य दशाफलं पाकक्रमेण व्यनक्तिः। अशुभं दशाफलं ज्ञात्वा यात्रादेः व्यवहारः

कर्तव्यः।शुभं ज्ञात्वा यात्रादेः, अतिशयेन दानं कर्तव्यम्। अदृढकर्मोपार्जितस्य अष्टकवर्गेण फलव्यक्तिः भवति। तच्चाशुभं ज्ञात्वा शान्त्यादि उपशमं नयेत्।

**"होरेत्यहोरात्रविकल्पमेके।वाञ्छन्ति पूर्वापरवर्णलोपात् ।।**

**कर्मार्जितं पूर्वभवे सदादि।यत् तस्य पङ्क्तिं समभिव्यनक्ति । ।**

**पदच्छेदः** = होरा इति अहोरात्रविकल्पम् एके वाञ्छन्ति पूर्वापरवर्णलोपात्।कर्मार्जितं पूर्वभवे सद् आदि यत् तस्य पङ्क्तिं समभिव्यनक्तिः ।(इन्द्रवज्रा)

**अन्वयः** = पूर्वापरवर्णलोपात् होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वभवेकर्मार्जितं प्रगजन्मनि यत् सदादि तस्य पंक्तिं समभिव्यनक्ति।

**अन्वयार्थः** = पूर्वापरवर्णलोपात् =पूर्ववर्णः एवम् अपरवर्णः, होरेत्यहोरात्रम्=होरा इति अहोरात्रम्,विकल्पमेके = विशिष्टं कल्पना एके आचार्यः, वाञ्छन्ति =इच्छन्ति,पूर्व = प्राग्,भवे = जन्मे,कर्मार्जितं = स्वकर्मोचितम्, प्रग्जन्मनि = पूर्वजन्मनि, यत् = यत्, सदादि = सत् आदि, तस्य = जातकस्य कर्मस्य, पंक्तिं = परिपाकं, समभिव्यनक्तिः = सम्यग् अभिव्यनक्तिः।

**भावः** = पूर्वापरवर्णलोपात् होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वभवेदकर्मार्जितं प्रागजन्मनि यत् सदादि तस्य पंक्तिं समभिव्यनक्तिः।

**बोधप्रश्नाः**

24. होराशास्त्रस्य प्लवः कः?
25. शुभाशुभं कतिविधम्?
26. होराशब्दस्य व्युत्पत्तिः कथं निष्पन्नः?
27. स्वप्राग्जन्मकर्मक्षयार्थं किं कर्तव्यम्?

**ग्रन्थस्यमूलपाठः।**

**"मूर्तित्वेपरिकल्पितःशशभृतोवर्त्मापुनर्जन्मनाम् ।**

**आत्मोत्यात्मविदांक्रतुश्चयजतांभर्तामरज्योतिषाम् ।।**

**लोकानां प्रलयोदयस्थितिविभुश्चानेकधा यः श्रुतौ ।**

**वाचं नः स दधातु नैककिरणस्त्रैलोक्यदीपो रविः।।"**

**भूयोभिःपटुबुद्धिभिः पटुधियां होराफलज्ञप्तये। शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि।**

**होरातन्त्रमहार्णवप्रतरणेभग्नोद्यमानामहम्। स्वल्पंवृत्तविचित्रमर्थबहुलंशास्त्रप्लवंप्रारभे । ।**

**"होरेत्यहोरात्रविकल्पमेकेवाञ्छन्ति पूर्वापरवर्णलोपात्।कर्मार्जितं पूर्वभवे सदादि।यत्तस्य पङ्क्तिं समभिव्यनक्तिः। ।**

## 1.6 सारांशः।

शशभृतोमूर्तित्वेपरिकल्पितः, अपुर्जन्मानाम् वर्त्मा, आत्मविदाम् आत्मा इति, अमरज्योतिषां यजतांक्रतुःभर्ता च, लोकानां प्रलयोदयस्थितयः अनेकधा विभुः च, रवि अनेककिरणः(वशात्) त्रैलोक्यदीपो यः श्रुतौ, स नः(वक्तुं पारयेत) वाचं दधातु इति वाच्यार्थः। ग्रन्थेऽस्मिन् नैकार्थाः वर्तन्ते। चन्द्रस्य शरीरत्वेरविणा परिकल्पितः।चन्द्रः स्वप्रकाशशून्यत्वात् सूर्यकिरणस्य प्रतिफलनात् किरणविस्तारंकरोति। अनेन सूर्यकिरणवशात् चन्द्रस्य मूर्तिरूपं दृश्यते। सूर्यः अपुनर्जन्मनां वर्त्मा भवति।अर्थात् मोक्षेच्छुकानां मार्गः सूर्यः भवति। ग्रहनक्षत्राणां देवतानां भर्ता रविः अस्ति। लोकानां प्रलय-उद्भव-स्थितिविभुः रविः अस्ति अर्थात् भू-भुवः-स्वः इति त्रिषुलोकानां सृष्टिस्थितिलयः रविः एव करोति। शब्दब्रह्मात्करविः रविः अस्मान् '**यथाकालप्रतिभानम्,अप्रतिहतत्वम्,** सत्यत्वं श्रोतृमनोहरत्वं वाचं ददातु। शीतकिरणाः, उष्णकिरणाः, शीतोष्णकिरणाः, यानि प्रकाशकतत्त्वयुक्तानि वस्तूनि रत्नादीनि तेषां प्रकाशकत्वाद् दीपभूतः, किरणानां जनकः रविः नः विशिष्टांवाचं ददातु इति। हविर्भागभुजां क्रतुसम्पादनसाधनभूतधनधान्यवर्धनकत्वद्वारेण भर्ता भरणशीलः रविः अस्ति। अस्मिन् श्लोके आशीर्वादः तन्मुखेन इष्टदेवतारूपेण मङ्गलः प्रदर्शितः।कटपयादि अक्षरसंख्यागणनाक्रमेण मूर्तित्वे शब्देन अक्षरसंख्यायां पञ्चषष्ठ्यधिकानि चतुःश्शतानि 465 भवन्ति। परिकल्पितसङ्ख्यायां61121शोधिते**344 अवशिष्यते।ततः 16 शोधिते344-16 = 328 एवं प्राप्स्यते। शशभृतः अर्थात् **शश(55)** योगे 328 + 55 = 383 आत्मा भवति अस्य श्लोकसंख्यारूपं शरीरं भवति।होरातन्त्रं प्रतरणं दुष्करत्वात् प्रतरणे भग्नोद्यमानां शास्त्रप्लवं ग्रन्थं लेखिष्यामि इति वराहमिहिराचार्यः लिखति।चतुरबुद्धीनां होराफलज्ञप्तये वृत्तविचित्रं स्वल्पाकारकं लघुग्रन्थं अर्थबहुलात्मकं ग्रन्थं रचयामि। पूर्वविरचितशास्त्रापेक्षया एषः ग्रन्थः बह्वर्थविदायकत्वात् ग्रन्थमिदं पूज्यत्वम् इति जानीहि। यदि पूर्वाचार्यैः उक्तमेव लिखिते तर्हि पुनरुक्तिदोषाः भवन्ति। वराहमिहिराचार्यस्य अभिप्रायोऽयं अर्थबहुलात्मकं स्वल्पकारैः वृत्तविचित्राकारकं ग्रन्थमिदं लिखिष्ये इति । प्रागुक्तहोराविचारात्मकशास्त्रेषु महत् विस्तारात् पटुबुद्धयः जनाः अपि भग्नोद्यमाः स्यात्। ग्रन्थोऽयं स्वल्पैः वृत्तविचित्रैः कृतम् इत्यतः भग्नोद्यमानां होराशास्त्रप्रतरणे प्लवमिव भवति। प्लवः यथा अण्डाकार-आयत-वृत्तादि विचित्रैः भवति तथा एव ग्रन्थेऽस्मिन् नैकाः वृत्ताः भवन्ति येन अध्येतुः सुखमन्वभवतु इति।मेषादयो द्वादशलग्नराशयो अहोरात्राम् अन्तर्भवति। लग्नस्य च कालवशात् ज्ञानं भवति। अतः लग्नवशात् शुभाशुभज्ञानं भवति। अहोरात्रम् इति पदस्य पूर्ववर्णः अपरवर्णः अनयोः लोपात् होरा इति शब्दः निष्पन्नो भवति। होरा पूर्वभवे आर्जितं सत् आदि कर्मानुसारेण यत् जातस्य जीवने पंक्तिं सम्भाव्यमानं व्यनक्ति। पूर्वे

जन्मनि अर्जितं कर्मानुसारजन्यभावीफलान् सूचयति। पूर्वजन्मनि अर्जितं सत् आदि इति। आदिशब्देन सदसच्च गृह्येते। ननु शुभस्य अशुभं वा अवश्यं भाविनः होरा किं व्यनक्तिं? तदुच्यते। द्विविधं शुभाशुभं दृढकर्मोपार्जितं अदृढकर्मोपार्जितं च तत्र दृढकर्मोपार्जितस्य दशाफलं पाकक्रमेण व्यनक्तिः। अशुभं दशाफलवारणाय यात्रादेः व्यवहारः कर्तव्यः। शुभकर्म क्षयर्थं अतिशयेन दानं कर्तव्यम् इति।


1.7 **शब्दावली**

**शशभृतो** = शशं नाम आङ्गलभाषायां rabbit इति उच्यते। शशं प्राणिविशेषं बिभर्ती इति शशभृत्। अर्थात् पृथिवीतः दृश्यमाने चन्द्रे शशस्य चिह्नं दृश्यते। अतः शशभृत् इति चन्द्रस्य नाम भवति।

**वर्त्मा** = मार्गम्। **अपुनर्जन्मनाम्** = न पुनर्जन्मनाम्। **आत्मेत्यात्मविदाम्** =आत्मविदाम् आत्मा। **भर्तामरज्योतिषाम्** =अमरज्योतिषाम् भर्ता। **लोकानां** =त्रिलोकानाम्। **प्रलयः**=विनाशः। **उदयः = उत्पत्तिः। स्थितिः** = पालनम्।

**विभुः = प्रभुः। अनेकधा** = विविधप्रकारकाः। **यः श्रुतौ**=यः वेदे। **ऋषयो मन्त्रदृष्टारः न तु** सृष्टारः। श्रुतिः नाम वेदः।

**वाचं** = गिराम्, वाग्। **ददातु** =प्रयच्छतु। **नैककिरणः** = **न** एककिरणः। अर्थात् अनेककिरणवान् इति अर्थः। प्रभूतरश्मिः। ऋतुकारणकर्ता अपि रविः एव अत उष्णकिराणादि भेदाः कथिताः। सूर्यपृथिव्याः अन्तरेण एव ऋतूना कारणम्




भवति।

नवरत्नेषु विद्यमान किरणमपि सूर्याद् एव। **त्रैलोक्यदीपः** = त्रिलोकस्य दीपः त्रैलोक्यदीपः। **रविः** = सूर्यः। **भूयोभिः** = बहुभिः। **पटुबुद्धिभिः**=निष्णातबुद्धिभिः। **पटुधियां** =पटुबुद्ध्याम्। **होराफलज्ञप्तये** = होराशास्त्रस्य फलज्ञानाय। **शब्दन्यायसमन्वितेषु** = व्याकरणन्यायशास्त्रादीनाम् अध्ययनात् परम् ज्यौतिषम् अध्येतव्यमिति भावः। **बहुशः** =प्रायशः। **शास्त्रेषु**=अस्मिन् प्रसङ्गे होराशास्त्रेषु इति। **दृष्टेष्वपि** =

अवलोक्येषु।**होरातन्त्रमहार्णवप्रतरणे**=होरायाः तन्त्रं होरातन्त्रम्।अथवा होरा एव तन्त्रम्। होरातन्त्रमेव महर्णवः तस्य प्रतरणे इति। **भग्नोद्यमानाम्**= भग्नोत्साहिः। समुद्रमिव विस्तारात्मके महाशास्त्रे तरणे भग्ने उद्यमे जातानाम्।**स्वल्पं**=लघुप्रमाणकम् इति ।(होराशास्त्रे 25 अध्यायाः 328 श्लेकाः वर्तन्ते)**वृत्तविचित्रमर्थबहुलम्**=चित्रविचित्रवृत्तान् उपयुज्य।**शास्त्रप्लवंप्रारभे** = शास्त्रस्य प्लवं, शास्त्रप्लवं।

**होरेति** =होरा +इति ।**अहोरात्रम्** = अहश्च रात्रिश्च।**विकल्पम्** = विशिष्टम् कल्पम्।**वाञ्छन्ति** = **इच्छन्ति**।**पूर्वभवे** = पूर्वस्मिन् जन्मनि।**सदादि** = सत् आदि।**पङ्क्तिं** =पाकम्।**समभिव्यनक्तिः**=सम्यग् अभि-व्यनक्तिः।

**बोधप्रश्नोत्तराणि ।**

1. ज्योतिश्शास्त्रस्य अध्येतुं सामान्यनरोऽपि समर्थ इति प्रतिभाति। ज्योतिश्शास्त्रस्य अधिकारी "**द्विजस्य एव**",यतः तेन द्विजेन षडङ्गो वेदे अध्येतव्यो ज्ञातव्यश्च। अनेन यः द्विजः तेन अनिवार्यरूपेण अध्येतव्यमिति ज्ञायते।
2. ज्योतिषशास्त्रस्यवेदाङ्गत्वं – यज्ञकालार्थसिद्ये, ज्योतिषशास्त्रम् उपयुक्तत्वाद् अस्य वेदाङ्गत्वं प्राप्तम् इति। तच्च-

   **"वेदस्तावत् यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्ताः ते तु कालाश्रयेण ।**

   **शास्त्रादस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।**
3. ज्योतिषशास्त्रस्यविषयः याजुषज्योतिषानुसारं **पञ्चसंवत्सरात्मिकादिनऋतु अयनमासादीनां** कालगणनमेव विषयः आसीत्। अस्तु **अथर्वज्योतिषे** मुहूर्तानानम् अर्थात् सूक्ष्मगणनप्रक्रिया विषयः प्रारब्धा। सिद्धान्तासंहिताहोरा इति अस्य विषयः। ज्योतिषमहाशास्त्रस्य जातक-गोल-निमित्त-प्रश्न-मुहूर्त-गणितानि इति षडङ्गानि वर्तन्ते।
4. ज्योतिषशास्त्रस्यप्रयोजनमन्यजन्मनि यदुपचितं शुभाशुभं वा कर्मार्जितं सञ्चितं तस्य कर्मणः प्राप्तिम् एतत् शास्त्रम् व्यञ्जयति।यथा दीपः तमसि द्रव्याणि प्रकटीकरोति। तथा शास्त्रमिदं कदा शुभाशुभं फलं प्राणिः अनुभवति इति व्यञ्जयति। आयुर्निरूपणं लोकयात्रा परिज्ञानं शास्त्रस्यास्य महत्तरप्रयोजनं भवति।
5. ज्योतिषशास्त्रस्य अष्टादशप्रवर्तकाः वर्तन्ते। तदुक्तं यथा-

   **"सूर्यः पितामहो व्यासो वसिष्ठोत्रि पराशरः।काश्यपो नारदो गर्गो मरीचिर्मनुराङ्गिराः।।**

   **लोमशः पुलिशश्चैव च्यवनो यवनो भृगुः।शौनकोष्टादशश्चैते ज्योतिश्शास्त्रप्रवर्तकाः।।"**
6. चतुर्दशविद्याःचत्वारः वेदाः, षड् वेदाङ्गानि,मीमांसा, न्यायः, धर्मशास्त्रं, पुराणम् इति चतुर्दशविद्याः वर्तन्ते।

7. बृहज्जातकग्रन्थस्य ज्ञाताः टीकाः अग्रे लिखिष्ये-अस्य ग्रन्थस्यार्थान् व्यञ्जयितुम् उत्पलभट्टस्य विवृत्तिटीका, गोविन्दसोमयाजि विरचितः दशाध्यायी, श्रीरुद्रकृत होराविवरणटीका, नौकाटीका, श्रीमत् शङ्कराचार्यप्रणीता जयमङ्गलाटीका, चन्द्रिका इति काचिद् व्याख्या, मिताक्षरी इत्यपरा व्याख्या, पारमेश्वरी इति एका संस्कृत व्याख्या, श्रीनिवासमहोदयेन विरचित अपूर्वार्थप्रकाशिका इति काचिद् व्याख्या, आदयः वर्तन्ते। ग्रन्थस्यास्य नैकासु भाषासु नैकाः टीकाः उपलभ्यन्ते।
8. वराहमिहिराचार्येण लिखिताः ग्रन्थाः पञ्चसिद्धन्तिका, होराशास्त्रम्(बृहज्जातकम्), बृहत्संहिता, लघुजातकम्, विवाहपटलम्, योगयात्रा, दैवज्ञवल्लभा इति।
9. ज्योतिषशास्त्रस्य प्रधानदेवः रविः भवति।
10. शशभृतो मूर्तित्वेपरिकल्पितः, अपुनर्जन्मानाम् वर्त्मा, आत्मविदाम् आत्मा इति, अमरज्योतिषां यजतांक्रतुश्चभर्ता, लोकानां प्रलयोदयस्थिति अनेकधा विभुः च, रवि अनेककिरणः(वशात्) त्रैलोक्यदीपो यः श्रुतौ , स नः(वक्तुं पारयेत) वाचं दधातु इति वाच्यार्थः।
11. चन्द्रस्य शरीरत्वेरविणा परिकल्पितः। चन्द्रः स्वप्रकाशशून्यत्वात् सूर्यकिरणस्य प्रतिफलनात् किरणविस्तारंकरोति। अनेन सूर्यकिरणवशात् चन्द्रस्य मूर्तिरूपं दृश्यते।
12. न पुनर्जन्मं विद्यते येषां ते अपुनर्जन्मिनः। तेषाम् वर्त्मा अर्थात् मोक्षम् इच्छुकानां मार्गः सूर्यः भवति।
13. आत्मं ये जनाः जानन्ति ते आत्मविदाः भवन्ति। यः आत्मानम् वेत्ति सः आत्मविद् भवति। आत्मविदाम् आत्मा, रविः अस्ति।
14. रविशब्दस्य अर्थः रविशब्दस्य मूलं ऋशब्द इति धातुः।"**महाशून्ये घुण्यमानो यतः शब्दायते भृशम्।अवति च सौरलोकं ततः स रविरुच्यते।।**"
15. कटपयादि अक्षरसंख्यागणनाक्रमेण मूर्तित्वे शब्देन अक्षरसंख्यायां पञ्चषष्ट्यधिकानि चतुःश्शतानि 465 भवन्ति। तच्च म इत्यस्य 5, त इत्यस्य (6)षट् व इत्यस्य 4, एवं विधानि भवन्ति। (कादि नव टादि नव पादि पञ्च इत्यादि सूत्रेण क वर्णात् आरभ्य क्रमशः संख्यां गणयेत्। )परिकल्पित संख्यायां अक्षरसंख्यावशात् प इत्यस्य 1, र इत्यस्य 2 ,क इत्यस्य 1, प इत्यस्य 1, त इति संख्या 6 अक्षरसंख्याः भवन्ति। संख्यानां वामतो गतिः इति सूत्रवशात् 61121 इति सिद्ध्यति ।

(00)465-

(61)121

**344संशोधयितुं न अर्हति इत्यतः344-16=328 भवति स च राशिः शशभृतः अर्थात् **श** वर्णस्य अक्षरसंख्या(5),पुनः शवर्णस्य अक्षरसंख्या(5) इति पञ्चपञ्चाशता पूरितः (55), 328 + 55 = 383 आत्मा भवति अस्य श्लोकसंख्यारूपं शरीरं भवति इत्यर्थः। मूर्तित्त्वे (465)सल्लापशोधनेन (137)-(387-137 = 328 प्राप्स्यते) शशक्षेपेण(55) 328+55=383 आत्मभूतश्लोकप्रमाणभूतानि भवन्ति।

16. त्रैलोक्यदीपः भूः –भुवः- स्वः इति त्रिषुलोकानां प्रकाशकः इति। नौकाटीकायां त्रैलोक्यदीपः शब्दस्य टीकाकारः गतजन्मनः , इह जन्मस्य आगमीजन्मनः, इति अर्थं व्यञ्जयति।
17. **"मूर्तित्त्वे"** इति शब्देन लग्नं, शशभृता चन्द्रं, **वर्त्मा अपुनर्जन्मनामेति भौमां, "आत्मा" इति शुक्रं च** सूचितः।**"भर्तामरज्योतिषाम्"**इत्यादिभिः शनिः सूचितः।
18. "**वाचम्**"इत्यस्य चतुःषष्ठिः 64.(कटपयादि अक्षरसंख्याद्वारा च इत्यस्य षट्(6),"**व**" इत्यस्य चतुर्थमिति(4)) अतः चतुष्षष्ठिकलानां ज्ञानं ददातु इत्यस्य अर्थम् वर्णयति। **वाश्च चाश्च** समाहारः इति अर्थे चतुर्वेदानां षडङ्गानां चोपलक्षणम्।
19. शुश्रूषाश्रवणं ज्ञानम् ग्रहणं धारणं तथा ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च एते धीगुणाः भवन्ति।
20. अस्मिन् शास्त्रे शब्दन्यायव्यतिरेकेणापि क्वचित् क्वचिद् अर्थविशेषसूचनं ध्वन्यते। स्वल्पमिति सारसङ्ग्रहरूपत्वात् सुखध्येयमिति भावः। अस्मिन् ग्रन्थे लिखितानां विषयानाम् अर्थबाहुल्यं भवति। अस्मिन् शास्त्रे स्वल्पैः पदैः बह्वर्थान् विवक्षति । 'विचित्रैः वृत्तैः लिखिष्ये' इति ग्रन्थकर्ता लिखति। अनेन स्वल्पशब्दविचित्रवृत्तवशात् होरातन्त्रप्रतरणे सुकरं भवति।
21. वराहमिहिराचार्यस्य प्रदेशः अवन्तिका आसीत्।
22. वराहमिहिरचार्यस्य गुरुः आदित्यः आसीत्।
23. वराहमिहिराचार्येण विरचिताः कृतयः पञ्चसिद्धान्तिका, बृहत्संहिता, बृहज्जातकम्, लघुजातकम्, बृहद्यात्रा, योगयात्रा।
24. होराशास्त्रस्य प्लवः बृहज्जातकम्।
25. द्विविधं शुभाशुभं दृढकर्मोपार्जितं अदृढकर्मोपार्जितं च तत्र दृढकर्मोपार्जितस्य दशाफलं पाककमेण व्यनक्ति ।
26. अहोरात्रम् शब्दस्य पूर्वापरवर्णयोः लोपात्, होरेति शब्दः निष्पन्नः भवति।

27. अशुभं दशाफलं ज्ञात्वा यात्रादेः व्यवहारः कर्तव्यः।शुभं ज्ञात्वा यात्रादेः अतिशयेन दानं कर्तव्यः। अदृढकर्मोपार्जितस्य अष्टकवर्गेण फलव्यक्तिः भवति। तच्चाशुभं ज्ञात्वा शान्त्यादि उपशमं नयेत्।

**अभ्यासप्रश्नाः।**

1. इतरहोराग्रन्थानां नामानि लिखत।
2. होराशास्त्रस्य इतरटीकान् सङ्ग्रहणं कुरुत।
3. इतरग्रन्थेषु विद्यमान मङ्गलाचरणम् अमुष्मिन् ग्रन्थस्य मङ्गलाचरणेन1 तुलनां कुरुत।
4. वराहमिहिरसम्बन्धविषयसङ्ग्रहणं कुरुत।
5. आचार्यवराहमिहिरविरचितग्रन्थानां सङ्गृह्य पठत।

***

# राशिप्रभेदाध्यायः।

2.1 प्रस्तावना।

2.2 उद्धेश्यम् ।

2.3 कालपुरुषस्यय अङ्गविभागः।

2.4 राशिपर्यायाः।

2.5 राशिस्वरूपम् ।

2.6.1 राशिनवांशद्वादशांशाधिपाःश्लोकस्य व्याख्या।

2.6.2 नवांशाधिपाः को नाम नवांशः कति नवांशाःकुतश्च नवांशगणना इति विविच्य उदाहरणप्रदर्श्यम्।

2.6.3 द्वादशांशाधिपाः(को नाम द्वादशांशाः?, कति द्वादशांशाः?, द्वादशगणनारम्भः कुतः? इति कथनम् उदाहरणप्रदर्शनं च।

2.7 त्रिंशांशाधिपाः।

2.8 मेषादीनां संज्ञाविशेषाः।

2.9 षड्वर्गनिरूपणम्।

2.10 होराशब्दस्य अर्थविशेषौ-

2.11 राशीनां दिनरात्रिसंज्ञा पृष्ठोदयादिसंज्ञा च(श्लोकः व्याख्या कोष्ठकद्वार स्पष्टीकरणं च)।

2.12 राशीनां क्रूरसौम्यादि संज्ञाः।

2.13 राशीनां दिशाधिपत्यम्।

2.14 द्रेष्काणविचारः सोदाहरणम्।

2.15 होराविचारे मतान्तरम् सोदाहरणम्।

2.16 द्रेष्काणाविचारे मतान्तरम्।

2.19 शब्दावली।

2.20 बोधप्रश्नोत्तराणि।

2.21 अभ्यासप्रश्नाः।

2.22 अभ्यासप्रश्नाः।

2.1प्रस्तावना।

**प्रिय अध्येता!**

द्वितीयपाठाय भवते स्वागतम्!गते पाठे होराशास्त्रस्य महत्त्वं, मङ्गलाचरणं,ग्रन्थकर्तुः वैशिष्ट्यं, भवान् अधीतवान्। वराहमिहिराचार्यस्य विचाराः, तस्य कृतयः, कालः देशादिविचारः अधिगतवान् च।होराशास्त्रस्य महत्त्वं ज्ञातवान्, होराशब्दस्य व्युत्पत्तिः, ज्योतिषशास्त्रस्य विचारश्च अधिगतवान्।

भवान् पाठादस्मात्कालपुरुषस्य अङ्गविभागम्अध्येष्यति, राशिपर्यायः ज्ञास्यति, राशिस्वरूपम् अवगमिष्यति, राशिनवांशद्वादशांशाधिपान् अवगमिष्यति। राश्यधिपान्, नवांशाधिपान्, द्वादशांशाधिपान्, त्रिंशांशाधिपान्, एवं षड्वर्गाणां बलाबलविचारान् ज्ञास्यति।मेषादीनां संज्ञाविशेषान्, षड्वर्गनिरूपणम्, होराशब्दस्य अर्थविशेषान्, राशीनां दिनरात्रिसंज्ञाःपृष्ठोदयादिसंज्ञाः च, राशीनां क्रूरसौम्यादि संज्ञाः, द्रेष्काणविचारान् अवगमिष्यति।

**2.2 उद्देश्यम् ।**

- अस्य पाठस्य अध्ययनेन भवान्कालपुरुषस्य अङ्गविभागं ज्ञास्यति।
- अस्य पाठस्य अध्ययनेनभवान् जन्मकाले शिशोः आरोग्यविचारं परामर्शयितुं शक्नोति।
- अस्य पाठस्य अध्ययनेन राशिपर्यायान् राशिस्वरूपम् इत्यादिषु विषयेषु निपुणो भविष्यति।
- अस्य पाठस्य अध्ययनेनराशिनवांशद्वंदशांशाधिपान् इत्यादीनां गणने समर्थो भविष्यति।
- अस्य पाठस्य अध्ययनेन राश्यधिपानांनिश्चये परिणतिः प्राप्स्यति।
- अस्य पाठस्य अध्ययनेननवांशाधिपान्, द्वादशांशाधिपान्, त्रिंशांशाधिपान्, षड्वर्गनिरूपणे समर्थो प्रभविष्यति।
- अस्य पाठस्य अध्ययनेन मेषादीनां संज्ञाविशेषान् ज्ञास्यति।
- अस्य पाठस्य अध्ययनेनहोराशब्दस्य अर्थविशेषं, वेत्ति।

अस्य पाठस्य अध्ययनेनराशीनां दिनरात्रिसंज्ञा पृष्ठोदयादिसंज्ञा च, राशीनां क्रूरसौम्यादि संज्ञाः, द्रेष्काणविचारान् अवगच्छति।

अस्य पाठस्य अध्ययनेनकालपुरुषस्य अङ्गविभागं ज्ञास्यति।

**2.3 कालपुरुषस्यय अङ्गविभागः।**

जननसमये प्रश्नसमये वा कालपुरुषस्य अवयवे ग्रहाणां स्थित्यानुसारं शुभाशुभनिर्देशः भवता कर्तव्यः। अतः प्रथमं कालपुरुषस्यदेहस्य अवयवभूतान् राश्यंशकान्

उपदिशति।प्रतिराशिः त्रिंशद् अंशात्मकं भवति। अस्मिन् द्वादशराशिचक्रे सप्तविंशतिः(27) नक्षत्राणि व्यवस्थितानि सन्ति। प्रतिनक्षत्रस्य नवपादाः भवन्ति। अतः चत्वारः पादाः (*)x सप्तविंशतिः नक्षत्राणि 27=108 पादाः भवन्ति। 108 पादाः द्वादशराशौ व्यवस्थापनीयाः।अष्टोत्तरशतं(108) द्वादशसंख्यया विभक्ते 9 नवपादाः प्रत्येकस्मिन् राशौ भवन्ति। (108पादाः/12राशयः=9पादाः)। मेषराशितः आरभ्येनक्षत्राणां पादाः स्थिताः सन्ति। तच्च **"द्वे द्वे सपादे भवनं गते"**।अर्थात् एकस्मिन् राशौ नक्षत्रद्वयं सपादनक्षत्रमेकंभवन्ति।

मेषराशौ अश्विनीभरणीनक्षत्रयोः चत्वारः पादाः कृत्तिकानक्षत्रस्य एकः पादः, एवं नव पादाः व्यवस्थिताः भवन्ति। वृषभराशौ कृत्तिकानक्षत्रस्य पादत्रयं, रोहिणी नक्षत्रस्य चत्वारः पादाः मृगशिरानक्षत्रस्य द्वे पादे च व्यवस्थिताः सन्ति। मृगशिरनक्षत्रस्य पादद्वयं,आर्द्रानक्षत्रस्य पादचतुष्टयं, पुनर्वसुनक्षत्रस्य पादत्रयं मिथुनराशौ सुव्यवस्थिताः। पुनर्वसुनक्षत्रस्य पादमेकं,पुष्यनक्षत्रस्य पादचतुष्टयम्, आश्लेषानक्षत्रस्य पादचतुष्टयं कर्कराशौ अन्तर्गतः भवति।मघानक्षत्रस्यपादचतुष्टयं, पूर्वाफल्गुणीनक्षत्रस्य पादचतुष्टयम्,उत्तराफल्गुणीनक्षत्रस्य पादमेकं, सिंहराशौ अन्तर्भवति। उत्तराफाल्गुणीनक्षत्रस्य पादत्रयं, हस्तानक्षत्रस्य पादचतुष्टयं, चित्रानक्षत्रस्य पादद्वयं कन्याराशौ अन्तर्भवति। चित्रानक्षत्रस्य पादद्वयं, स्वातीनक्षत्रस्य पादचतुष्टयं, विशाखानक्षत्रस्य पादत्रयं,तुलाराशौ अन्तर्भवति।विशाखानक्षत्रस्य पादमेकम्, अनुराधानक्षत्रस्यपादचतुष्टयं, ज्येष्ठानक्षत्रस्य पादचतुष्टयं, वृश्चिकराशौ अन्तर्भवति। मूलानक्षत्रस्यपादचतुष्टयं, पूर्वाषाढानक्षत्रस्यपादचतुष्टयं, उत्तराषाढानक्षत्रस्यपादमेकं धनुराशौ अन्तर्भवति।उत्तराषाढानक्षत्रस्य पादत्रयं, श्रवणनक्षत्रस्य पादचतुष्टयं, धनिष्ठानक्षत्रस्य पादद्वयं मकररशौ अन्तर्भवति। धनिष्ठानक्षत्रस्यपादद्वयं, शतभिषज् नक्षत्रस्य पादचतुष्टयं, पूर्वाभाद्रपदानक्षत्रस्य पादत्रयं, कुंभराशौ अन्तर्भवति। पूर्वाभाद्रपदानक्षत्रस्य पादमेकं, उत्तराभाद्रपदानक्षत्रस्यपादचतुष्टयं रेवतीनक्षत्रस्य पादचतुष्टयं मीनराशौ अन्तर्भवति। एवं नक्षत्राणां पादविभागः वर्तते।

| नक्षत्राणि। | | | राशिः। |
|---|---|---|---|
| **अश्विनी4** | भरणी4 | कृत्तिका1 | मेषः |
| **कृत्तिका3** | रोहिणी4 | मृगशिरा2 | वृषभः |
| **मृगशिरा2** | आर्द्रा4 | पुनर्वसु3 | मिथुनः |
| **पुनर्वसु1** | पुष्य4 | आश्लेषा4 | कर्काटकः |
| **मघा4** | पूर्वा4 | उत्तरा1 | सिंहः |
| **उत्तरा3** | हस्ता4 | चित्रा2 | कन्या |
| **चित्रा2** | स्वाती4 | विशाखा3 | तुला |
| **विशाखा1** | अनुराधा4 | ज्येष्ठा4 | वृश्चिकः |
| **मूला4** | पूर्वाषाढा4 | उत्तराषाढा1 | धनुः |
| **उत्तराषाढा3** | श्रवण4 | धनिष्ठा2 | मकरः |
| **धनिष्ठा2** | शतभिषज्4 | पूर्वाभाद्रपदा3 | कुंभः |
| **पूर्वाभद्रपदा1** | उत्तराभाद्रपदा4 | रेवती4 | मीनः |

तत्र गर्गः-


**अश्विनीभरणीमेषः कृत्तिका पाद एव च।तत्पादत्रितयं ब्रह्म वृषः सौम्यदलं तथा।।**

**सौम्यार्द्धमार्द्रा मिथुनं त्वदित्याश्चरणत्रयम्।तत्पादाः पुण्यमाश्लेषा राशिः कर्कटकः स्मृतः।।**

**पित्र्यं भाग्यमथार्यम्णःपादःसिंहः प्रकीर्तितः।तत्पादत्रितयं कन्या हस्ताश्चित्रार्द्धमेव च।।**

**तुला चित्रादलं स्वातिर्विशाखाचरत्रयम्।तत्पादं मित्रदैवतव्यं ज्येष्ठा वृश्चिक उच्यते।**

**मूलमाप्यं तथा धन्वीपादो विश्वेश्वरस्य च।तत्पादत्रितयं कन्या हस्तश्चित्रार्द्धमेव च।**



**तुला चित्रदलं स्वातिरिवशाखचरत्रयम्।**

**तत्पादं मित्रदैवतव्यं ज्येष्ठा वश्चिक उच्यते।**

**मूलमाप्यं तथा धन्वी पादो विश्वेश्वरस्य च।**

**तत्पादत्रितयं श्रोतं मकरो वासवं दलम्।**

**तद्दलं वारुणं कुंभस्यथाजाचराणत्रयम्।**

**तत्पाद एको मीनः स्याद् अहिर्बुध्यं रेवती।।**

स्थिरचक्रं-चरचक्रं इति नाम्ना राशिचक्रं द्विविधं भवति।चरचक्रंतु-

**"मेषादेः कन्यान्तं समम् उदङ्मण्डलार्द्धमुपयान्तम्।**

**तौल्यादेः मीनान्तं शेषार्द्धं दक्षिणेनैव।"**

चक्रस्थिताः राशयः प्रश्नेषु आरूढज्ञानार्थम् उपयुज्यन्ते। चक्रस्थिताः राशयः जातके लग्नानयनाय गृह्यन्ते। द्वादशराशीनां संस्थानमेतेषां प्रदर्शितं भवति। एते द्वादशराशयः कालपुरुषस्य अङ्गानि भवन्ति। कालपुरुषस्य वराङ्गं मेषः भवति।मुखं वृषभः, उरः मिथुनं,हृदयं कुलीरः,क्रोडं सिंहः, कटिः कन्या, वस्तिः नाभिः अनयोः अन्तरम् एव तुलातः ज्ञातव्यं भवति। व्यञ्जनं वृश्चिकः,ऊरुयुगलं धन्वी,जानुयुगलं मकरः,जंघे कुंभे,पादयुगलं मीनः।अस्य प्रयोजनं ज्ञातव्यं भवति। जन्मकाले या राशिः पापग्रहाक्रान्तः स कालाख्यस्य पुरुषस्य यस्मिन्नङ्गे स्थितः तत्राङ्गे जातस्यः उपघातो वक्तव्यः। यस्मिन् भावे सौम्यः स्थितः तस्मिन् भावे पुष्टिः भवति।

**अत्रस्मर्तव्याः अंशाः-**

- ☞ शीर्षमुखबाहुहृदय-उदरकटिवस्तिगुह्य-ऊरूजानुजंघेचरणाः इति मेषादिराशीनाम् अङ्गविभागः भवति।
- ☞ प्रतिनक्षत्रस्य चत्वारःपादाः भवन्ति।प्रतिराशौ नवपादाः भवन्ति।
- ☞ राशि-क्षेत्र-गृह-ऋक्ष-भम्-भवनानि राशेः पर्यायपदानि भवन्ति।

**कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासो भृतोवस्तिर्व्यञ्जनमूरुजानुयुगुलेजङ्घे ततो अङ्घ्रिद्वयम् ।।**

**मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रस्थिता राशयो राशि क्षेत्रगृहर्क्षं भानि भवनं चैकार्थं सम्प्रत्ययाः । ।**

**पदच्छेदः** –काल-अङ्गानिवर-अङ्गम्आननम्-उरोहृत्-क्रोड-वासो-भृतोवस्ति- व्यञ्जनम्ऊरु-जानुयुगुले जङ्घे ततो अङ्घ्रि-द्वयम् ।

मेष-अश्वि-प्रथमा नव-ऋक्ष-चरणाः चक्रस्थिता राशयो राशि-क्षेत्र-गृह-ऋक्ष-भानि भवनं च एक-अर्थ-सम्प्रत्ययाः । ।(शावि)

**आन्वयः**=वराङ्ग-शिरम् आननम् ऊरो हृत् क्रोडवासोभृतो कटिः वस्तिः व्यञ्जनम् ऊरूजानुयुगलं जंघे ततो अङ्घ्रिद्वयं कालाङ्गानि। मेषादि राशयो अश्विन्यादि प्रथमनवर्क्षचरणाः चक्रस्थिताः। राशि-क्षेत्र-गृह-ऋक्ष-भानि भवनं च एकार्थसम्प्रत्यया।

**अन्वयार्थः**=वराङ्गम्=शिरम्, आननम्=मुखम्, ऊरो=वक्षः,हृत्=हृदयं, क्रोड=उदरम्,वासोभृतो=कटिः, वस्तिः=नाभिव्यञ्जनयोः अन्तरम्,व्यञ्जनम्=येन पुंस्त्वं व्यञ्ज्यते लिङ्गं तत्,अङ्घ्रिद्वयं=पादद्वयम्, कालाङ्गानि=कालपुरुषस्य अङ्गानि।अश्विन्यादिप्रथमः=अश्विन्यादि नक्षत्राणि। नवर्क्षचरणाः=नवनक्षत्रपादाः,चक्रस्थिताः=राशिचक्रस्थिताः, राशिः=क्षेत्रम्=गृहम्=भवनम्, ऋक्षः=भानिभवनं=राशिः च एकार्थः=सम्प्रत्ययाः।

**भावः**= वराङ्गं शिरम् आननम् ऊरो हृत् क्रोडवासोभृतो कटिवस्तिव्यञ्जनम् ऊरूजानु युगलं जंघे ततो अङ्घ्रिद्वयं कालाङ्गानि। मेषादि राशयो अश्विन्यादि प्रथमनवर्क्षचरणाः चक्रस्थिता। राशि-क्षेत्र-गृह-ऋक्ष-भानि भवनस्य एकार्थाभिधायकः (पर्यायः) इति भावः।

**बोधप्रश्नाः-**

1. कतिनक्षत्राणि सन्ति?
2. एकस्मिन् नक्षत्रे कति पादाः भवन्ति?
3. राशिचक्रं कति विधम्?
4. कालपुरुषस्य अङ्गविभागं लिखत?
5. कालपुरुषस्य अङ्गविभागज्ञानेन किं प्रयोजनम्?

**2.4 राशिपर्यायाः**-राशिक्षेत्रगृहेति श्लोकपादस्य विवेचनम्। राश्यादीनां पर्यायवाची शब्दाःराशि-क्षेत्र-गृह-ऋर्क्ष-भ-भवनानि भवन्ति।

**"राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थ सम्प्रत्ययाः।।"**

राशिपर्यायाणां षड्वया षट्राशिचिन्त्याः जातकेषु लग्नराशिरेकः,अपरचन्द्राधिष्ठितः, तयोःअधिपस्थितराशिः चन्द्रलग्नांशराशी चेति। प्रश्नादौ तु एकः तावत् उदयः। अपरःआरूढः। तृतीयः उद्यन्नवांशराशिः। चतुर्थः चन्द्रराशिः। पञ्चमः पृष्ठांशराशिः।षष्ठः चन्द्राधिष्ठितराशिः। षड्भिः एतैः फलं निरूप्यते। एकस्य जातकस्य निरूपणप्रसङ्गे षड्विषयानां चिन्तनीयमिति भावः।

**बोधप्रश्नः-**

6. **राशीनां पर्यायपदानि लिखत।**

2.5 **राशिस्वरूपम् ।**

कालपुरुषाङ्गीभूत द्वादशराशीनां फलविशेषज्ञानहैतुकं स्वरूपं प्रदर्शितम् अस्ति। तत् अग्रे लिख्यते। मीनराशेः मत्स्यौ, अर्थात् अन्योन्यं मुखपुच्छप्रतिवद्धमत्स्यद्वयम् आकारः

भवति। कस्मात् मीनात् प्रारम्भःकृतः? इति पृच्छायाम्; उच्यते**उभयोदयत्वात्** इति। स्कन्धन्यस्तरिक्तघटाधारी पुरुषः कुम्भराशेः स्वरूपं भवति। स्त्रीपुमांसौ मिथुनात्मकंस्वरूपं मिथुनराशेः स्वरूपं भवति। पुमान्सहितः गदाधारी भवति, स्त्री च वीणाधारी भवति। चापः इत्यस्यार्थः धनुः इति। धनुराशेः निसर्गः नरः अश्वजघनश्च भवति, अर्थात् नरस्य मुखम्, हस्ते गृहीतधनुः,तुरगस्य जघनः पादं यस्य स अश्वजघनः, चतुष्पाद इत्यर्थः। मकरो मृगास्यः अर्थात् मकरस्य शरीरम्, हरिणस्य मुखं भवति। मकरः मृगमुखः इति। तौलि इत्यादि। तुला गृहीतपुरुषः। कन्याराशिः नौकास्था कुमारी ससस्यदहना गृहीता तादृक् स्वरूपं भवति। सस्यं दहनं च उभौ एकत्र एव भवति।शेषाः, अर्थात्मेषवृषकर्कटसिंहवृश्चिकाः स्वनामसदृशाः भवन्ति। यथा- मेषः मेषाकृतिः, वृषः वृषाकृतिः, कर्किः कुलीराकृतिः, वृश्चिकः वृश्चिकाकृतिः, भवन्ति।स्वभावश्च नामसदृशाः सर्वे स्वप्रदेशेषु चरन्ति। चरशब्दः चरगतिभक्षणयोः इति धातोः निष्पन्नः। अनेन स्वचराः इत्यस्य भक्षणविचारे अपि चिन्तनीयः। मेषः तावत् कटुकोष्णादिभक्षणम्। वृषः तृणभक्षणम्। मिथुनराशिः अन्नपानादिलेह्यादिभक्षणम्। कुलीरो मत्स्यादिभक्षणम्।सिंहो मृगमांसादिभक्षणम्। इत्यादि आकृतिसदृशानि भक्ष्याणि कल्पनीयानि।स्वभावश्च तद्वत्। मेषः तावत् सञ्चारशीलः, शीघ्राशनः, कुनखः, तोयभीरुः इत्यादि।मेषवृषभौ अरण्यौ ग्राम्यौ, मिथुनं ग्रम्यौ कर्कः जलचरः, सिंहः अरण्यः, कन्या दर्शितदेशविभागा तुलापण्यवीथिस्थः,वृश्चिकः श्वभ्रचारी धन्वी ग्राम्यः, मकरस्य पूर्वभागः आरण्यः, अन्यः जलचरः,कुम्भोग्राम्यः, मीनो जलचरः इति।अश्वजघन इत्युक्तत्वात् धनुषःअन्त्यार्धस्य साश्वत्वाच्चतुष्पदत्वं ज्ञायते।मकरराशेः पूर्वार्धःमृगमुखत्वात् चतुष्पादत्वं न भवति। मिथुनकन्याचापाद्याः अर्धकुंभानां युक्ताकृति विशेषात् मनुष्यत्वम् अवगन्तव्यम्। कर्कस्य कुलीरत्वात्, कीटस्य वृश्चिकत्वात्, अन्यस्य मीनत्वाच्च सरीसृपत्वम् ऊह्यम्। कर्कमकरान्त्यअर्द्धमीनानाजलनिलयत्वात् जलराशिः भवति। तुलाराशिः वणिक्, कन्याराशेः नौस्थत्वात्, धनुराशिः धनुर्धरत्वात् पौरत्वम्, उक्तम्।

**अत्र अवधेयः अंशः।**

- मीनराशिः मुखपुच्छप्रतिवद्धमत्स्यद्वयम् आकारः,स्कन्धान्यस्तरिक्तघटाधारी पुरुषः कुम्भराशिस्वरूपम्, स्त्रीपुमांसौ मिथुनात्मकं, पुमान्सहितः गदाधारी, स्त्री च वीणाधारीस्वरूपं मिथुनराशेःभवति। धनुराशिः नरः अश्वजघनः,मकरस्य शरीरः मृगमुखं भवति। कन्या राशिः नौकास्था कुमारी ससस्यदहना गृहीता भवति।

अधुना राशीनां स्वरूपविज्ञानं**वसन्ततिलकच्छन्दसि विवृतमिदं लिख्यते।-**

**"मत्स्यौ घटी नृमिथुनं सगदं सवीणम्। चापी नरो अश्व जघनो मकरो मृगास्यः।।**

**तौली ससस्यदहनाप्लवगा च कन्या। शेषाः स्वनामसदृशाः स्वचराश्च सर्वे ।।"**

**पदच्छेदः**="मत्स्यौ घटी नृमिथुनं सगदं सवीणं चापी नरो अश्व-जघनो मकरो मृगास्यः ।तौली ससस्य-दहना-प्लवगा च कन्या शेषाः स्व-नाम-सदृशाः स्व-चराश्च सर्वे । ।(वसन्ततिलका)"

**अन्वयः**=मत्स्यौ-घटी-नृमिथुनं-सगदं-सवीणं चापी-नरोश्वजघनो-मकरो-मृगास्य-तौलि-ससस्यदहनाप्लवगा च कन्या शेषाः सर्वे खचराश्च स्वनामसदृशाः भवन्ति।

**अन्वयार्थः**=मत्स्यौ=मीनराशिः अन्योन्यं मुखपुच्छाभिमुखम्, घटी=कुंभः, नृमिथुनम्=नरमिथुनम्, सगदम्=गदसहितं सवीणं=वीणासहितम्, चापी=धनुः,नरोश्वजघनो=नरः तुरगजघनः, मकरो=मकरराशिः, मृगास्य=मृगमुखम्, तौलिससस्यदहनाप्लवगा=तुलासस्यदहना सहिता, च कन्या=कन्याराशिः, शेषाः=इतरराशयः, सर्वे स्वचराश्च=स्वस्वभावसदृशाः भवन्ति। स्वनामसदृशाः=स्वराशेः नामसदृशस्वरूपम् इति।

**भावः**=मत्सद्वयोः अन्येन्यं पुच्छाभिमुखम्,घटी-नृमिथुनं-सगदं-सवीणं चापी-नरोश्वजघनो-मकरो-मृगास्य-तौलि-ससस्यदहनाप्लवगा च कन्या शेषाः सर्वे स्वचराश्च स्वनामसदृशाः भवन्ति इति भावः।

**बोधप्रश्नाः**

7. मीनराशिस्वरूपं लिखत।
8. मीनराशितः वराहमिहिराचार्येण प्रारम्भहेतुः कः?
9. कुंभराशिस्वरूपं लिखत।
10. मिथुनराशिस्वरूपं कीदृशं भवति।
11. तुलाराशिस्वरूपं लिखत।

**2.6.1 राशिनवांशद्वादशांशाधिपाःश्लोकस्य व्याख्या।**

द्वादशराशयः एकस्मिन् राशिचक्रे वर्तन्ते। एकं राशिचक्रात्मकवृत्तं षष्ठ्युत्तरत्रिशतम्(360)वर्तते। अस्य द्वादशधाः विभज्यते चेत् 30 अंशात्मकं भवति। राशिचक्रमपि 360 अंशात्मकं विद्यते। अस्य द्वादशधा विभक्तान् द्वादशराशयः भवन्ति। प्रतिराशिः अपि 30 अंशात्मकं भवति। प्रतिराशेः राश्यधिपः भवति। प्रत्येकमपि गृहे यथा यजमानः भवति तथैव क्षितिजादयो ग्रहाः मेषादीनां राशीनां पतयः भवन्ति। तत्प्रकारमथ वक्ष्यते। मेषराशेः अधिपः कुजः, वृषभराशेः शुक्रः, मिथुनराशेः अधिपः बुधः, ज्ञो बुधो मिथुनस्य, चन्द्रः कर्कटराशेः, रविः सिंहराशेः, सौम्यो अर्थात् बुधः कन्यायाः, सितःअर्थात् शुक्रः तुलायाः, अवनिजः अर्थात् अङ्गारकः वृश्चिकस्य, धन्विनः सुरगुरुः, शनिः-मकरकुंभयोः,गुरुः

मीनराशेःभवति।अस्य प्रयोजनं किम्? इति प्रश्नं समुदेति। तदर्थमुच्यते-"**होरास्वामिदृष्टा राशिः बलवान् भवति।**"अर्थात् लग्नाधिपस्य दृष्टिः यस्मिन् राशौ वर्तते स राशिः बलवान् भवति।

कथमिदं ज्ञातुं शक्यम् इति जिज्ञासा भवति एव तदुच्यते उदाहरणार्थं रविस्फुटं 0-10-10-00 विद्यते। अर्थात् मेषराशौ दशमे अंशे रविः वर्तते। मेषराशेः अधिपः कुजः, अतः राश्यधिपः कुजः, इति अवगच्छेत्। 4-10-10-00 एवं रूपेण कल्पितोदाहरणं विद्यते सति आदौ राशिः लिखितः भवति। अतः चतुर्थराशिः अतीतमिति ज्ञातव्यम्। अर्थात् पञ्चमराशिः सिंहराशिः इति ज्ञातव्यम्।सिंहराशौ दशमे अंशे दशमकलायां वर्तते।एवमेव अन्यस्फुटानमपि ज्ञातव्यम्।

अत्रस्मर्तव्यः तथ्यः-

- कुजशक्रबुधचन्द्ररविबुधशुक्रकुजगुरुशनिशनिगुरुः इतिद्वादशराशीनाम् अधिपाः भवन्ति।

| स्वक्षेत्रम्। | | | |
|---|---|---|---|
| **गुरुः** | **कुजः** | **शुक्रः** | **बुधः** |
| **शनिः** | **क्षेत्रम्** | | **चन्द्रः** |
| **शनिः** | | | **रविः** |
| **गुरुः** | **कुजः** | **शुक्रः** | **बुधः** |

**श्लोकः-क्षितिजसितज्ञचन्द्ररविसौम्यसितावनिजाः ।**

**सुरगुरुमन्दसौरिगुरवश्च गृहांशकपः ।।**

**पदच्छेदः-**

क्षितिज-सित-ज्ञ-चन्द्र-रवि-सौम्य-सित-अवनिजाःसुर-गुरु-मन्द-सौरि-गुरवश्च गृहांशकपाः अजमृगतौलिचन्द्रभवनादि नवांशविधिःभवनसमांशकाधिपतयः स्वगृहात्क्रमशः ।।

**अन्वयः**=क्षितिज-सितज्ञ-चन्द्र-रवि-सौम्य-सित-अवनिजाःसुरगुरु–मन्द-सौरि-गुरवश्च एते गृहांशकपाः। अजमृगतौलि चन्द्रभवनादि नवांशविधिः भवनसमांशकाधिपतयः क्रमशः भवन्ति।

**अन्वयार्थः=** क्षितिजः=क्षितेः जातः क्षितिजः, सितः=शुक्रः,ज्ञः=बुधः, चन्द्रः=शशी, रविः=सूर्यः, सौम्य=बुधः, सित=शुक्रः, अवनिजाः=कुजः, सुरगुरुः=बृहस्पतिः, मन्दः=शनिः, सौरिः=सूर्यस्य अपत्यं पुमान्, गुरुः=बृहस्पतिः, एते गृहांशकपाः ।

**भावः**=कुज-शुक्र-ज्ञ-चन्द्र-रवि-बुध-शुक्र-कुज-गुरु-शनि-शनि-गुरवः एते क्रमशः द्वादशराशीणाम् अधिपाः भवन्ति। मेष-मकर-तुला-कर्काः इति नवांशानां प्रारम्भ विधिमुच्यते इति भावः।

**बोधप्रश्नाः**

12. एकं वृत्तं (कियन्)कति अंशात्मकं भवति?
13. प्रतिराशौ कति अंशात्मकं भवति?
14. मेषादिराशीनाम् अधिपाः के?
15. राश्यधिपानां ज्ञानेन किं प्रयोजनम्?

### 2.6.2 नवांशाधिपाः को नाम नवांशः कति नवांशाःकुतश्च नवांशगणना इति विविच्य उदाहरणप्रदर्श्यम्।

नवांशं नाम किम्? इति जिज्ञासाभवति एव। राशेःनवमोभागः नवांशः। प्रतिराशित्रिंशत् अंशात्मकः इति ज्ञातं खलु। प्रत्येकमपि अंशं षष्ठिकलात्मिका भवति।अतः त्रिंशत् अंशः xषष्ठिकलाः (60) अर्थात् 1800 कलाः सम्पूर्णराशौ कलाः भवन्ति। प्रतिराशेः नवविभागः क्रियते तर्हि अंशत्रयं विंशतिकलाः प्राप्स्यन्ते। तच्च 1800/9=200 कलाः भवन्ति।अर्थात् 200/60=3अंशाः। विंशति अंशाः भवन्ति।अत्र भवति स्मर्तव्यतथ्यः-

- एकस्मिन् नवांशे अंशत्रयं विंशतिकलाः भवन्ति।

यथा द्वादशराश्यधिपाः वर्तन्ते तथैव नवांशाधिपाः अपि भवन्ति।मेषनवांशस्य अधिपः कुजः, वृषभनवांशस्य शुक्रः, मिथुननवांशस्य अधिपः बुधः, बुधो मिथुनस्य, चन्द्रः कर्कटनवांशस्य, रविः सिंहनवांशस्य, बुधः कन्यायाः, शुक्रः तुलायाः, अवनिजः अङ्गारकः वृश्चिकस्य, धन्विनः सुरगुरुः, शनिः मकरकुंभयोः,गुरुः मीननवांशस्य अधिपः भवति।

कः ग्रहः कस्यनवांशे वर्तते? ते च नवांशकाः कथं भवन्ति? तद्विज्ञानं कथम्? इति ज्ञातव्यं भवति।शून्य(0)अंशात् -अंशत्रयम् विंशतिकलाः(3-20)यावत् प्रथमो नवांशं भवति। 3अंशम्20′कलात् , 6अंशं.40′कलां यावत् द्वितीयनवांशोभवति।6.40′-10.00′यावत् तृतीयनवांशम्।10 .00′ तः 13अंश.20′कलां यावत् चतुर्थनवांशं भवति।13.20′ तः 16.40′ अंशं यावत् पञ्चमनवांशं भवति।16.40′ तः 20.00′षष्ठनवांशं भवति।20.00′ तः 23.20′ सप्तमनवांशं भवति। 23.20′-26.40′अष्टमनवांशं भवति ।26.40′-30.00′ नवमनवांशं

भवति।नवांशाधिपतयः कथं भवन्ति? नवांशव्यवस्था कथम् इति विधिम् उल्लिख्यते।आदौ मेषराशौ प्रथमनवांशः मेषनवांशः, अधिपश्च कुजः भवति। मेषराशौ द्वितीयनवांशः वृषभनवांशः, अधिपश्च शुक्रः भवति। एवं क्रमशः नवमनवांशः धनुनवांशः अधिपश्च गुरुः भवति। इत्थं मेषराशेः नवनवांशाः समाप्ताः। ततः वृषभराशेः अंशान् प्रारप्स्यते। मेषराशेः नवमनवांशः धनुः आसीत्, अतः वृषभस्य आदिमनवांशःधनुः,ततः तदनन्तरराशिः मकरः भवति। वृषभस्य द्वितीय नवांशः कुंभनवांशः भवति। तस्य अधिपः नवांशाधिपः शनिः भवति।इत्थं वृषभराशौ मकरात् प्रारभ्य नव अंशाः क्रमेण मकर-कुंभ-मीन-मेष-वृषभ-मिथुन-कर्क-सिंह-कन्या इति नवांशाः भवन्ति। एतेषाम् अधिपाः नवांशाधिपतयः भवन्ति। अग्रिमराशिः मिथुनराशिः भवति। मिथुनराशौ प्रथमनवांशः तुलाराशीतः प्रारप्स्यते।मिथुनराशौ द्वितीयनवांशः वृश्चिकनवांशः भवति। वृश्चिकस्य अधिपः कुजः, मिथुनराशौ द्वितीयनवांशाधिपः भवति। मिथुनराशौ तृतीयनवांशः धनुराशिः भवति। तस्य अधिपश्च गुरुः नवांशाधिपः भवति। एवं क्रमशः नव नवांशाः तुलातः प्रारभ्य नवराशयः भवन्ति। अर्थात् मिथुनराशिः नवम नवांशः भवति। तस्य अधिपश्च बुधः भवति। मिथुनराशौ अन्तिमनवांशः मिथुनम् आसीत्,अतः कर्कराशौ आद्यनवांशः कर्कः एव।अग्रे कर्काटकराशौ द्वितीयनवांशः सिंहः भवति। सिंहराशेः अधिपः रविः द्वितीयनवांशाधिपः भवति। एवं क्रमशः कर्कात् आरभ्य नवराशयःकर्क-सिंह-कन्या-तुला-वृश्चिक-धनु-मकर-कुंभ-मीना इति नवनवांशाः भवन्ति। अतः राशीनां नवांशाधिपानां गणनाविधिः द्वादशराशिषु, क्रमशः मेष-मकर-तुला-कर्क इति क्रमेण अनुवर्तते। अत्र अवबोधनीयः अंशः-

- अजमकरतुलाकर्क इति राशीनाम् अधिपतेः गणना प्रारभ्यते।

उदाहरणं - कल्पितं गुरुस्फुटं 3-10-10′-10″ एवं वर्तते। अत्र आदौ राशित्रयम् अतीतम् अर्थात् कर्कराशौ विद्येत। कर्कराशौ दशमे अंशम् अतीत्यदशमकलायां गुरुः अस्ति इति। दशम-अंशात् त्रयोदशअंशः विंशतिकलां यावत् चतुर्थनवांशः।

अत्रस्मर्तव्यः अंशः-

- अजमकरतुलाकर्कक्रमेणद्वादशराशीनां नवांशाः प्रारम्भिताः भवन्ति।

तदुक्तं यथा-

**"अजमृगतौलिचन्द्रभवनादि नवांशविधिः।।"**

**अन्वयः** =अजमृगतौलिचन्द्रभवनादि नवांशविधिः भवनसमांशकाधिपतयः क्रमशः भवन्ति।

**अन्वयार्थः**=अजः=मेषराशिः,मृगः=मकरराशिः, तौलि=तुलाराशिः, चन्द्रभवनादि=कर्कराशिः आदिपदेन पुनः मेषमेवग्राह्यम्, नवांशविधिः=नवांशविधानं, भवन्ति।

**भावः**-मेषमकरतुलाकर्का इति नवांशानां गणनारम्भः भवति इति भावः।

**बोधप्रश्नाः**

16. **नवांशं नाम किम्?**

17. **नवांशकाः कथं भवन्ति?**

**2.6.3 द्वादशांशाधिपाः(को नाम द्वादशांशः?, कति द्वादशांशाः?, द्वादशगणनारम्भः कुतः? इति कथनम् उदाहरणप्रदर्शनं च।**

प्रतिराशिं यदा द्वादशधा विभज्यते तदा द्वादशांशः भवति। राशेः द्वादशतमो भागः एकः द्वादशांशः भवति। यथा- प्रतिराशिम् 30 अंशः, अर्थात् षष्ठ्या हते (30*60′=1800)तदित्थम् 1800′ कलाः प्रतिराशिषु भवन्ति। अष्टदशशतात् द्विशतम् विभक्ते(1800′कलाः/12) =150′कलाःप्राप्स्यन्ते। अर्थात् 150′/60=(2)अंशद्वयम् 30′ कलाः भवन्ति। शून्यांशतः अंशद्वयम् त्रिंशत् कलां यावत्प्रथमद्वादशांशः (0-2.30′),द्वितीयद्वादशांशः2.30′-5.00′,तृतीयद्वादशांशः5.00′-7.30′,चतुर्थद्वादशांशः7.30′-10.00′,पञ्चमद्वादशांशः 10.00′-12.30′,षष्ठद्वादशांशः12.30′-15.00′,सप्तमद्वादशांशः15.00′-17.30′,अष्टमद्वादशांशः17.30′-20.00′,नवमद्वादशांशः20.00′-22.30′,दशमद्वादशांशः22.30′-25.00′,एकादशतमद्वादशांशः25.00′-27.30′,द्वादशतमद्वादशांशः27.30′-30.00′ एवं द्वादशांशाः भवन्ति।द्वादशांशस्य अधिपतयः कथम् भवन्ति? इति जिज्ञासा। तदुच्यते- ग्रहस्थितराशिमारभ्य द्वादशराशेः अधिपाः क्रमशः द्वादशांशाधिपतयः भवन्ति। ग्रहः यस्मिन् राशौ व्यवस्थितः ततः प्रारभ्य गणयेत्। यथा प्रथमद्वादशांशस्य अधिपःग्रहस्थितराशेः अधिपः एव भवति।द्वितीयद्वादशांशस्य अधिपः ग्रहस्थितराशितः द्वितीयभावाधिपः भवति।एवं क्रमेण द्वादशराश्यधिपाः भवन्ति। उदाः 1-2-45′-00″(उदाहरणं कल्पितम्)राशिस्थाने एकम् इति लेखनत्वाद् प्रथमराशिः अतीतम् इति ज्ञातव्यम्। अंशद्वयम्पञ्चचत्वारिंशत्कलाः (2.45′) भवन्ति।2.30′तः 5.00′ पर्यन्तंद्वितीयद्वादशांशः भवति। वृषभराशितः द्वितीयभावः मिथुनः भवति। अतः बुधः द्वितीयभावाधिपः द्वादशांशाधिपः भवति।

अत्र भवति ज्ञातव्यः तथ्यः-

☞ **राशेः द्वादशतमो भागः एकः द्वादशांशः भवति। तच्च ग्रहस्थानात्क्रमशः गणनारम्भः भवति।**

**प्रयोजनम्-**

होराशास्त्रे द्वादशांशविधिमुक्तं यथा-"**स्तेन भोक्ता पण्डिताद्याः। भवनसमांशकाधिपतयः स्वगृहात्क्रमशः।**"

**अन्वयः**=स्वगृहात्क्रमशः भवनसमांशक अधिपतयः भवन्ति।

**अन्वयार्थः**=स्वगृहात् क्रमशः=स्वभवनात्क्रमशः, भवनसमांशकः=द्वादशांशः, अधिपतयः=द्वादशांशाधिपाः भवन्ति।

**भावः**= प्रत्येकं राशे द्वाशतमः भाहः द्वादशांशः। ग्रहः यस्मिन् द्वादशांशे भवति, ग्रहस्थितराशिमारभ्य क्रमशः गणयेत्।

**बोधप्रश्नाः-**

18. **द्वादशांशाः कथं भवन्ति?**
19. **द्वादशांशः कति कलात्मकं भवति?**
20. **द्वादशांशस्य प्रयोजनं किम्?**

**2.7 त्रिंशांशाधिपाः-**

खेटैःस्फुटैः एव फलस्फुटत्वंजायते। स्फुटफलनिर्देशनाय सूक्ष्मफलचिन्तानाय षड्वर्गाः उपयुज्यन्ते। तेषु षड्वर्गेषु त्रिंशांशोऽपि अन्यतमः। त्रिंशाशानाम् विचारान् अधुना वर्णयामि। पञ्चताराग्रहाः एव त्रिंशांशाधिपाः भवन्ति। केच ते?,ते कुजः, रविजः, गुरुः, ज्ञः, शुक्रः एते त्रिंशांशपतयः भवन्ति। सूर्यचन्द्रौ त्रिंशांशपती न भवतः। तेषां ज्ञानविधिम् उच्यते।

आदौ, ग्रहः व्यवस्थितराशौविषमे समे वाइति, निर्णेतव्यः। ततः यदि ग्रहः विषमे सति एषः क्रमः अनुसर्तव्यः। यथा- आदौ पञ्च अंशानां कुजः, ततः पञ्च अंशानां शनिः, ततः अष्टाशं यावत् गुरुः,ततः सप्तांशं यावत् बुधः,ततः पञ्च अंशं यावत् शुक्रः अधिपः भवति। स्पष्टार्थबोधनायाँ कोष्टत्वेन प्रदर्श्यते।

| | | | | | |
|---|---|---|---|---|---|
| अंशः | 0-5 | 5-10 | 10-17 | 17-25 | 25-30 |
| विषमः | कुजः | शनिः | गुरुः | ज्ञः | सितः |
| अंशः | 0-5 | 5-12 | 12-20 | 20-25 | 25-30 |
| समः | सितः | बुधः | गुरुः | शनिः | कुजः |

समराशौ प्रथमपञ्चांशाः शुक्रस्य, ततः सप्तबुधस्य, ततो अष्टौ गुरोः, ततः पञ्चांशानाः शनेः, ततः पञ्चांशाः कुजस्यभवन्ति। यस्य त्रिंशांशः उदितः तद्वशाद् अवकाशः अवगन्तव्यः।

कल्पितोदाहरणम्-गुरुः-3-10-10′-00″। अस्मिन् गुरुस्फुटे ग्रहः कर्कराशौ एकादशे अंशे दशमे कलायां स्थितः इति ।कर्काटकराशिः समराशिः तत्रप्रथमपञ्चांशकानाम् अर्थात्

शून्यादारभ्य पञ्चाशं यावत् अधिपः शुक्रः भवति। ततः सप्तअंशानाम् अर्थात् द्वादशांशं यावत् बुधः अधिपः भवति।दशमाशं परिसमाप्य ग्रहःएकादशे अंशे दशमकलायां स्थितः। तस्य अधिपःबुधः इत्यतः बुधः अधिपः भवति।

अत्र ध्यातव्यौ अंशौ-

- कुजशनिगुरुज्ञशुक्राः विषमराशिषु क्रमशः पञ्च-पञ्च-अष्ट-सप्त-पञ्चाशानाम् अधिपाः भवन्ति।
- समराशिषु व्युत्क्रमेण त्रिंशांशक्रमः भवति। अर्थात् सितवित्गुरुसौरिरिनतनयः क्रमशःपञ्चसप्ताष्टपञ्चपञ्चांशानाम् अधिपतयः भवन्ति।

**कुजरविजगुरुज्ञशुक्रभागाःपवनसमीरणकौर्पिजूकलेयाः ।।**

**अयुजियुजि तु भे विपर्ययस्थाःशशिभवनालिझषान्तं ऋक्षसंधिः । ।**

**पदच्छेदः-कुज-रविज-गुरु-ज्ञ-शुक्रभागाः पवन-समीरण-कौर्पि-जूक-लेयाः अयुजि युजि तु भे विपर्ययस्थः शशिभवन-अलि-झष-अन्तम् ऋक्ष संधिः।(पुष्पिताग्रा)**

**अन्वयः=** कुज-रविज-गुरु-ज्ञ-शुक्रभागाः (क्रमशः) पवन-समीरण-कौर्पि-जूक-लेयाः अयुजि; युजि-भे विपर्ययस्थाः(ज्ञेयाः); शशी- भवन-अलि-झष-अन्तम् ऋक्ष-संधिः ज्ञेया।

**अन्वयार्थः=** कुजः=अवनिजः, रविजः=शनिः, गुरुः=जीवः, ज्ञः=बुधः, शुक्रः=सितः, भागाः(क्रमशः) पवनः=पञ्चमः, समीरणः=पञ्चमः, कौर्पि=अष्ट, जूकः=तुला, लेयाः=सिंहः, अयुजि=विषमराशिषु; युजि=समे, भे=राशिषु, विपर्ययस्थाः(ज्ञेयाः); शशिभवन-अलि-झषः=कर्कवृश्चिकमीनाः अन्तम्=अन्त्यम्, ऋक्षः=नक्षत्रम्, संधिःज्ञेया।

**भावः**=त्रिंशांशस्य विचारम् उक्तम् अस्ति।**कुज-शनि-गुरु-ज्ञ-शुक्रभागाः**पञ्च-पञ्च-अष्ट-सप्त-पञ्चांशानाम्विषमराशिषु, समराशिषु विपर्ययस्थाःत्रिंशांशाधिपाः भवन्ति।कर्क-वृश्चिक-मीनान्तं राशि-नक्षत्र-सन्धिः प्रारम्भः भवति।

**बोधप्रश्नाः।**

21. त्रिंशांशाः कथं भवन्ति?
22. विषमराशिषु त्रिंशांशानाम् अधिपाः के भवन्ति?
23. समराशिषु त्रिंशांशानाम् अधिपाः के भवन्ति?

### 2.8 मेषादीनां संज्ञाविशेषाः-

जनाः राशीनां पर्यापपदानि लोकव्यवहार्थम् उपयोगं कुर्वन्ति।क्रियः इति शब्दःमेषराशेः पर्यायः भवति। तावुरिवृषभराशेः, जितुमामिथुनस्य, कुलीरः कर्कस्य,लेयः इति सिंहस्य, पाथोनः

कन्यायाः, जूकः तूलायाः, कौर्प्या इतिवृश्चिकस्य पर्यायाः मन्यन्ते।तौक्षिकः धनुषः, आकोकेरोमकरस्य, हृद्रोगः कुम्भस्यअन्त्यभ इतिमीनस्य च पर्यायपदं भवति। '**गोसिंहौ जितुमाष्टमौ क्रियतुले**' इत्थं प्रयोजनं भवति।

अत्र अवधेयः अंशः-

- **क्रिय-तावुरि-जितुम-कुलीर-लेय-पाथोन-कौर्पि-जूक-तौक्षिक-आकोकेरो-हृद्रोगः च अन्त्यभं च इत्थं क्रमशः मेषीदीनां पर्यायाः भवन्ति।**

**श्लो-**

| **संज्ञाः।** | | | |
|---|---|---|---|
| **अन्त्यभम्।** | **क्रियः।** | **तावुरिः।** | **जितुम।** |
| **हृद्रोगः।** | **क्षेत्रः** | | **कुलीरः।** |
| **आकोकेरः।** | | | **लेयः।** |
| **तौक्षिकः।** | **कौर्पी।** | **जूकः।** | **पाथोनः।** |

**"क्रियातावुरिजितुमकुलीरलेयपाथोन जूककौर्प्या आख्याः ।**
**तौक्षिक आकोकेरो हृद् रोगश्च अन्त्यभं च इत्थम् । ।(आर्या)"**

**पदच्छेदः=** क्रिय-तावुरि जितुम-कुलीर-लेय-पाथोन-जूक-कौर्प्या आख्याः तौक्षिक आकोकेरो हृद्-रोगः च अन्त्य भं च इत्थम् ।(आर्या)

**अन्वयः=**क्रियः तावुरि-जितुमा-कुलीर-लेय-पाथोन-जूक-कौर्प्या- तौक्षिक-आकोकेर-मकर-हृद्रोगाः अन्त्यभं च इत्थंपर्यायपदानि आख्याः।

**अन्वयार्थः=** क्रियः=मेषः, तावुरि=वृषभः जितुमी=मिथुनः, कुलीरः=कर्काटकः, लेयः=सिंहः, पाथोनः=कन्या, जूकः=तुला, कौर्प्या=वृश्चिकः, तौक्षिकः=धनुः, आकोकेरः= मकरः, हृद्रोगः=कुंभम्, अन्त्यभम्=मीनम्, च इत्थम् पर्यायपदानि आख्याः।

**भावः=** क्रिय-तावुरि-जितुम-कुलीर-लेय-पाथोन-कौर्पि-जूक-तौक्षिक-आकोकेरो-हृद्रोगः च अन्त्यभम् च इत्थम् क्रमशः मेषीदीनां राशीनां पर्यायपदानि भवन्ति इति भावः।

**बोधप्रश्नः-**

24. **मेषादिराशीनां पर्यायपदानि कानि?**

**2.9 षड्वर्गनिरूपणम्-**

यात्राविवाहोत्सवादिषु निर्दुष्टेन ग्रहस्फुटेन फलस्फुटत्वं प्राप्यते।अतः निर्दिष्टग्रहस्य निर्दुष्टफलकथनेषड्वर्गाः आपेक्षन्ते।प्रत्येकं राशेः क्षेत्र-होरा-द्रेष्काण-नवांश-द्वादशभाग-

त्रिंशद्भागानां वर्गसंज्ञा ज्योतिषग्रन्थेषु विवृतं वर्तते। द्रेष्काण-होरा-नवभागाधिपाःसंज्ञाः त्रिंशांशकाः च क्षेत्रं-चैतेषु षड्ड यद्यस्य स तस्य ग्रहस्य वर्गो भवतीति। होरेति लग्नं भवनस्य अर्धमिति।

अत्र धारणीयः अंशः-

**षड्वर्गाः** -1.**क्षेत्रम्** 2.**होरा** 3.**नवांशः** 4.**त्रिंशांशकाः** 5.**द्वादशांशः** 6.**द्रेष्काणः।**

एवं प्रयोजनञ्च-

**"होरास्वामिगुरुज्ञवीक्षितयुता।"**

**श्लो-**

**द्रेष्काणहोरानवभागसंज्ञाः त्रिंशांशकद्वादशसंज्ञिताश्च ।**

**क्षेत्रं च यद्यस्य सतस्य वर्गो होरा इति लग्नं भवनस्य चार्धम् । ।(इन्द्रवज्रा)**

**उदाहरणम्-**

**रविस्फुटम्-** 2-5-00 **रवेः षड्वर्गाः।**

**द्रेष्काणः-प्रथमद्रेष्काणः–बुधः।होरा-प्रथमहोरा-रविः।नवांशाः-द्वितीयनवांशाः-कुजः। त्रिंशांशाः-पवनांशाः-कुजः।**

**द्वादशांशः-द्वितीयः-चन्द्रः।क्षेत्रम्- बुधस्य क्षेत्रम्।**

**पदच्छेदः**= द्रेष्काण-होरा-नव-भाग-संज्ञाः त्रिंश-अंशक-द्वादश-संज्ञिताः च । क्षेत्रं च यदि अस्य सतस्य वर्गो होरा इति लग्नं भवनस्य च अर्धम् ।(इन्द्रवज्रा)

**अन्वयः**=द्रेष्काणः होरा-नवभागसंज्ञा- त्रिंशांशक-द्वादशसंज्ञिताश्च क्षेत्रं च, यद्यस्य गृहं स तस्य वर्गो भवति लग्नं भवनस्य च अर्द्धम् होरेति कथितम्।

**अन्वयार्थः**=द्रेष्काण=राशेः त्रिभागः,होरा=राश्यर्धं होरा, नवभागसंज्ञाः-नवांशः, त्रिंशांशकः=त्रिंशांशः,द्वादशांशः=द्वादशांशः अर्थात् 2.30′, संज्ञिताश्च क्षेत्रं च, यद्यस्य गृहं स तस्य वर्गो भवति लग्नं भवनस्य=राशेः च अर्द्धं=अर्धभागात्मिकाम्, होरा='राश्यर्धं होरा' इति कथितम्।

**भावः**=दृक्काण-होरा-नवांश-त्रिंशांश-द्वादशांश–राशयः एते ग्रहाणां षड्वर्गाः भवन्ति। लग्नभवनस्य अर्धं होरा इति कथितम्।

**बोधप्रश्नाः-**

25. **राशीनां षड्वर्गान् लिखत।**
26. **षड्वर्गाणां प्रयोजनं लिखत।**
27. **चन्द्रस्फुटं-6-19-14 अस्य षड्वर्गान् लिखत।**

## 2.10 होराशब्दस्य अर्थविशेषौ-

| | | | |
|---|---|---|---|
| च र | रविः चन्द्रः | च र | र च |
| चन्द्रः<br>र | क्षेत्रः | | चन्द्रः<br>रविः |
| र<br>चन्द्रः | | | रविः<br>चन्द्रः |
| चन्द्रः<br>र | र चन्द्रः | चन्द्रः रविः | रविः चन्द्रः |

द्वादशराशयः 24 घंटासु, एकं राशिचक्रं भ्रमन्ति। यदि द्वादशराशीनां घंटा चतुर्विंशतिः स्यात्, तर्हि एकस्याः राशेः किम्? इति विज्ञातुम्, अनुपातेन एकराशिः अर्थात् 24/12=2घंटात्मकम् भवति। राश्यर्धं होरा इत्यनेन एकस्याः रशेः अर्धः भागः अर्थात् 2/2=1घंटात्मकं भवति।15 अंशाः =1 घंटां यावत् भवति।तस्य अधिपतयः उक्तः त्रिंशांशेषु पञ्चताराग्रहाणाम् आधिपत्यम्। परन्तु होरायां सूर्यचन्द्रयोः एवाधिपत्यम्। तद्विज्ञानमुच्यते-विषमराशिषु सूर्यः प्रथमहोराधिपः, चन्द्रः द्वितीयहोराधिपःभवति।अस्य व्युत्क्रमेण समराशिषु चन्द्रः प्रथमहोराधिपः, सूर्यः द्वितीयहोराधिपः भवति इति ज्ञेयम्।

होराशब्दस्य अर्थमुच्यते-**मार्ताण्डेन्द्वोःअयुजिसमभे चन्द्रभान्वोश्च होरे।**

**होरायाः सुलभावगमनाय कोष्टकम्।**

| मेषः | | वृषभः | | मिथुन | | कर्कोटकः | | सिंहः | | कन्या | | तुला | | वृश्चिकः | | धनुः | | मकरः | | कुंभः | | मीनः | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| सूर्य | चन्द्रः | च | सू | सू | च | च | सू | सू | च | च | सू | सू | च | च | सू | सू | च | च | सू | सू | च | च | सू |
| 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 | 0-15 | 15-30 |

**अत्र स्मर्तव्यः तथ्यः-**

**प्रयोजनम्।**

**“सूर्यहोरायां जाताः तेजस्विनः चन्द्रहोरायां जाताः मृदुस्वभावाः भवन्ति।“**

| | | |
|---|---|---|
| **ओजराशिषु ।** | 0-15 | **रविहोरा।** |
| | 15-30 | **चन्द्रहोरा ।** |
| **युग्मराशिषु ।** | 0-15 | **चन्द्रहोरा।** |
| | 15-30 | **रविहोरा।** |

**बोधप्रश्नाः**

28. होरा कतिअंशात्मकं भवति?
29. होरा कति घंटात्मिका भवति?
30. समराशिषु होराधिपतेः व्यवस्था कीदृशीअस्ति?
31. विषमराशौ होराधिपतेः व्यवस्था कीदृशी अस्ति?

2.11 **राशीनां दिनरात्रिसंज्ञा पृष्ठोदयादिसंज्ञा च(श्लोकः व्याख्या कोष्ठकद्वार स्पष्टीकरणं च)।**

राशीनां दिनरात्रिसंज्ञाः वर्तन्ते। शिरसा ये राशयः उदयं यान्ति ते शीर्षोदयाः। ते राशयः दिवा बलिनः भवन्ति। ये राशयः पृष्ठेन उदयं यान्ति ते पृष्ठोदयाः भवन्ति। वृषः, मेषः, कर्काटकः, मिथुनः, मकरः षड्राशयो रात्रिबलसंज्ञाः भवन्ति। सिंह-कन्या-तुला-वृश्चिक-कुम्भाः एते राशयःदिवाबलिनः राशयः भवन्ति। सिंह-कन्या-तुला-वृश्चिक-कुम्भाः एते राशयःशीर्षोदयराशयः भवन्ति। मेष,वृष, कर्काटकः,धनुः, मकरः राशयः एव पृष्ठोदयसंज्ञाः वर्तन्ते। मीनराशिः उभयोदयःभवति।

| | | |
|---|---|---|
| मेषः | रात्रिबली | पृष्ठोदयः |
| वृषभः | रात्रिबली | पृष्ठोदयः। |
| मिथुन | रात्रिबली | शीर्षोदयः। |
| कर्कः | रात्रिबली | पृष्ठोदयः। |
| सिंहः | दिवा बली | पृष्ठोदयः। |
| कन्या | दिवा बली | शीर्षोदयः। |
| तुला | दिवा बली | शीर्षोदयः। |
| वृश्चिकः | दिवा बली | शीर्षोदयः। |
| धनुः | रात्रिबली | पृष्ठोदयः। |
| मकरः | रात्रिबली | पृष्ठोदयः। |
| कुम्भः | दिवा बली | शीर्षोदयः। |
| मीनः | उभयकलबली | उभयोदयः। |

| | | | |
|---|---|---|---|
| **दिवा** | **निशा** | **निशा** | **निशा** |
| **दिवा** | **निशा-दिवाराशयः** | | **निशा** |
| **निशा** | | | **दिवा** |
| **निशा** | **दिवा** | **दिवा** | **दिवा** |

| | | | |
|---|---|---|---|
| **उभयोदयः।** | **पृष्ठोदयः।** | **पृष्ठोदयः।** | **शीर्षोदयः।** |
| **शीर्षोदयः।** | **क्षेत्रः।** | | **पृष्ठोदयः।** |
| **पृष्ठोदयः।** | | | **शीर्षोदयः।** |
| **पृष्ठोदयः।** | **शीर्षोदयः।** | **पृष्ठोदयः।** | **पृष्ठोदयः।** |

अस्य प्रयोजनं भट्टोत्पलेन उक्तः। यथा-

**"स्थिरराशौ लग्नगते स्थानप्राप्तिं वदेन्न गमनं च।रोगोपशमो नाशो द्रव्याणां स्यात् पराभवो नात्र।।**
**चरराशौ विपरीतं मिश्रं वाच्यं द्विमूर्त्युदये।स्थिरवत् प्रथमेर्धे स्यादवरं चरराशिवत् सर्वम्।।"**

संज्ञाः श्लोकाः ग्रन्थकारोक्तिरियम्।

**"गोजाश्विकर्किमिथुनाः समृगानिशाख्याःपृष्ठोदया विमिथुनाः कथितास्त एव।।**
**शीर्षोदया दिनबलाश्च भवन्ति शेषाःलग्नं समेत्युभयतः पृथुरोमयुग्मम्।।"**

**पदच्छेदः।**

गो अज-अश्वि-कर्कि-मिथुनाः समृगा निशाख्याः पृष्ठ-उदया विमिथुनाः कथिताः त एव।

शीर्षोदया-दिनबलाः च भवन्ति शेषा-लग्नं समेति उभयतः पृथुरोमयुग्मम्।।(वसन्ततिलका)

**अन्वयः=** गोजाश्विकर्किमिथुनाः समृगाः निशाख्याः विमिथुनाः पृष्ठोदयाः त एव कथिताः। शेषाः सिंह-कन्या-तुला-वृश्चिक-कुम्भ-मीनाः दिनबलाः शीर्षोदयश्च भवन्ति।लग्नं मिथुनं पृथुरोमयुग्मं मीनसमेति उभयतः दिवा रात्रौबली शीर्षोदयपृष्ठोदयश्च।

**अन्वयार्थः=**गो=वृषभः,अजः=मेषः,अश्वि=धनुः,कर्किः=कर्काटकः,मिथुनाः=मिथुनराशिः,समृगाः=मकरेणसहितम्,शाख्याः=रात्रिबलीराशयः,विमिथुनाः=विगतः मिथुनाः,

पृष्ठोदयाः=पृष्ठभागोदयः, ते=प्रागुक्तराशयः एव कथिताः। शेषाः सिंह-कन्या-तुला-वृश्चिक-कुम्भ-मीनाः दिनबलाः शीर्षोदयश्च भवन्ति।लग्नं=भवनम्, मिथुनं=मिथुनराशिम्, पृथुरोम=मत्स्य, युग्मम्=द्वयम्, मीनः=मत्स्यः, समेति=उभयतः= दिवा रात्रि बली शीर्षोदयः पृष्ठोदयश्च।

**भावः**=वृष-मेष-धनु-कुलीर-मिथुन-मकराः निशाबलिनः राशयः भवन्ति। मिथुनवर्जिताः एते राशयः पृष्ठोदयराशयः भवन्ति। अर्थात्वृष-मेष-धनु-कुलीर-मकराः एते राशयः, पृष्ठोदयराशयः भवन्ति। पृष्ठेन उदयं यान्ति इति अर्थः। मिथुनः पुनः शीर्षोदयः। सिंहकन्यातुलावृश्चिककुम्भाः शीर्षोदयाः भवन्ति। एते राशयः दिवाबलिनः भवन्ति। मीनराशिः उभयोदयं भवति।

**बोधप्रश्नाः।**

32. दिवाबलीराशयः के?
33. रात्रिबलिनः राशयः के?
34. उभयोदयराशिः कः?
35. शीर्षोदयराशयः के?

## 2.12 राशीनां क्रूरसौम्यादि संज्ञाः।

द्वादशराशीनां क्रूर-सौम्य-पुरुष-स्त्रियः इति संज्ञाः वर्तन्ते।क्रूरः,सौम्यः, इति क्रमेणमेषादीनां राशीनां संज्ञा भवति। पुरुष-वनिता इति द्वादशराशीनां क्रमशः मेषादि आरभ्य संज्ञाः भवन्ति। मेषः क्रूरसंज्ञः, पुरुषसंज्ञः च। वृषः सौम्यसंज्ञा, स्त्रीसंज्ञा च भवन्ति।मिथुनः,सिंहः,तुला, धनुः,कुंभः, क्रूर-पुरुषसंज्ञात्मकराशयःच भवन्ति।

| | | | |
|---|---|---|---|
| स्त्री | पुरुषः | स्त्री | पुरुषः |
| पुरुषः | **क्षेत्रम्** | | स्त्री |
| स्त्री | | | पुरुषः |
| पुरुषः | स्त्री | पुरुषः | स्त्री |

वृषभः,कर्काटकः, कन्या,वृश्चिकः,मकरः,मीनः, सौम्यः,च स्त्रीसंज्ञात्मकाःराशयः भवन्ति। मेष-सिंह-कुंभराशयः निसर्गतः क्रूराः भवन्ति।मिथुन-तुला-धन्विनः क्रूरेषु सौम्याः। वृषभमीनौ निसर्गसौम्यौ भवतः। अन्ये सौम्येषु क्रूराः। राश्यधिपानां बलहीनत्वे राशयः फलदाः भवन्ति। अनेन ओजराशिषु जाताः क्रूराः भवन्ति।युग्मराशिषु जाताः पुरुषाः सौम्याः भवन्ति। प्रयोजनं पुरुषराशिषु जाताः तेजस्विनः, स्त्रीराशिषु, जाताः मृदवो भवन्ति।

| | | | |
|---|---|---|---|
| **सौम्यः।** | **क्रूरः।** | **सौम्यः।** | **क्रूरः।** |
| **क्रूरः।** | **ओजराशयः** | | **सौम्यः।** |
| **सौम्यः।** | **सौम्यराशयः** | | **क्रूरः।** |
| **क्रूरः।** | **सौम्यः।** | **क्रूरः।** | **सौम्यः।** |

चर-स्थिर-उभयसंज्ञाः कथिताः।मेषादिराशीनां क्रमशः चर-स्थिर-उभयसंज्ञाः भवन्ति। मेषस्यचरसंज्ञा, वृषभस्य स्थिरसंज्ञा,मिथुनस्य उभयसंज्ञा भवन्ति।कर्कस्य चरसंज्ञा, सिंहस्य

स्थिरसंज्ञा, कन्यायाः उभयसंज्ञाः, भवन्ति। तुलायाः चरसंज्ञा,वृश्चिकस्य स्थिरसंज्ञा, धनुराशेः उभयसंज्ञाः भवन्ति। मकरस्य चरः, कुंभः स्थिरः, मीनस्य उभयसंज्ञाः च भवन्ति।

**प्रयोजनम्**।-चरराशिषु जाताः चरस्वभावाः स्थिरेषु,द्विस्वभावेषु मिश्रस्वभावाः भवन्ति। तथाहि सत्यचार्यस्य मतम्। -**चरसंज्ञास्थिरसंज्ञा द्विप्रकृतिरिति राशयः क्रमशः ।राशिस्वभावतुल्य जायन्ते प्रकृतयः प्रसूतानाम्।।**

**2.13 राशीनां दिशाधिपत्यम्।**

| | | | |
|---|---|---|---|
| **द्विस्वभावः।** | **चरः।** | **स्थिरराशिः।** | **द्विस्वभावः।** |
| **स्थिरराशिः।** | **क्षेत्रम्** | | **चरः।** |
| **चरः।** | | | **स्थिरराशिः।** |
| **द्विस्वभावः।** | **स्थिरराशिः।** | **चरः।** | **द्विस्वभावः।** |

क्रिय-वृष-नृयुक्-कर्कटाः त्रिकोणाः सहिताः प्रागादीशाःभवन्ति। क्रियः इत्यस्य अर्थः मेषः,वृषःअर्थात् वृषभराशिः, नृयुक् अर्थात् मिथुनम्, कर्काटकः, एते राशयः त्रिकोणसहिताः प्रागादीशाः भवन्ति। आदिपदेनदक्षिण-

| प्राग् | दक्षिण | पश्चिम | उत्तर |
|---|---|---|---|
| मेषः | वृषः | मिथुन | कर्काटकः |
| सिंहः | कन्या | तुला | वृश्चिकः |
| धनुः | मकरः | कुंभः | मीनः |

| | | | |
|---|---|---|---|
| **उत्तरा।** | **पूर्वा।** | **दक्षिणा।** | **पश्चिमा।** |
| **पश्चिमा।** | **क्षेत्रः।** | | **उत्तरा ।** |
| **दक्षिणा।** | | | **प्राग्।** |
| **पूर्वा।** | **उत्तरा।** | **पश्चिमा ।** | **दक्षिणा ।** |

पश्चिम-उत्तरदिशाम् ईशान्यस्यापि ग्रहणं कर्तव्यम् । सत्रिकोणाः इति शब्देन त्रिकोणसहितम् इति अर्थात् पञ्चमभावानां–नवमभावानामपि ग्राह्यम्। मेषस्य पञ्चमभावः सिंहः वृषभस्य नवमभावः धनुः च भवति। मेषसिंहधनुः प्राग्दिशायाः राशयः भवन्ति। वृषकन्यामकराःदक्षिणदिशायाः भवन्ति। मिथुनतुलाकुंभाः पश्चिमायां व्यवस्थिताः। कर्काटकवृश्चिकमीनाः उत्तरस्यां भवन्ति।

प्रयोजनम्-

**“हृतनष्टादौचौरद्रव्यस्य वा दिग्विज्ञानम्।“**

**अपि च -**

**“द्रेष्काणसदृशः चोरः लग्नांशसदृशं धनम्”**

**“यातव्यदिङ्मुखगतस्य सुखेन सिद्धिर्वर्थोश्रमो भवति दिक् प्रतिलोमलग्ने।“**

विषमराशौ प्रथमहोरा मार्ताण्डःअर्थात् सूर्यः भवति, द्वितीयाहोरा इन्दुःअर्थत् चन्द्रःभवति। समराशौ प्रथमहोरा चन्द्रस्य, द्वितीयहोरा रवेः भवति। होरा शब्देन राशेः अर्धम् उच्यते। राशिः नाम त्रिंशद् अंशकः,होराशब्देन तस्य अर्धं पञ्चदशात्मकः(15) अंशः भवति। अर्थात् प्रायशः एकघंटात्मकः कालः होराशब्देन उच्यते। तदुक्तं च-

**"मार्ताण्डेन्द्वोः अयुजि समभे चन्द्रभान्वोश्च होरे।"**

अस्य प्रयोजनम्।

**"सूर्यहोरायां जाताः तेजस्विनः चन्द्रहोरायां जाताः मृदुस्वभावा भवन्ति।"**

**श्लो-**

**"क्रूरसौम्यः पुरुषवनिते ते चरागद्विदेहाः।प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः।।**
**मार्ताण्डेन्द्वरयुजि समभे चन्द्रभान्वोश्च होरे।द्रेष्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्।।"**

**पदच्छेदः=** क्रूरः सौम्यः पुरुष-वनिते ते चरः अगः द्वि-देहाः प्राग्-आदि-ईशाः क्रिय-वृष-नृयुक् कर्कटाः स-त्रिकोणाः ।

मार्तण्ड-इन्द्वोः अयुजि-समभे चन्द्रभान्वोश्च होरे द्रेष्काणाः स्युः स्वभवन सुत-त्रि-त्रिकोण-अधिपानाम् ।

**अन्वयः**=क्रूरः सौम्यः पुरुष वनिते ते चरः अगः द्विदेहा क्रिय-वृष-नृयुक्-कर्कटाः सत्रिकोणाः सह प्रागादीशाः। मार्ताण्डेन्दोः अयुजि समभे चन्द्रभान्वोश्च होरे स्वभवनसुतत्रित्रिकोणाधिपनां द्रेष्काणाः स्युः।

**अन्वयार्थः=**क्रूरः=कठिणस्वभावः, सौम्यः=मृदुस्वभावः, पुरुषः=पुं, वनिता=स्त्री, ते=राशयः चरः=चलनशीलः, अगः= द्विदेहाः=उभयः, क्रियः=मेषः, वृषः=वृषभः, नृयुक्=मिथुनम्,कर्कटाः=कर्कटकः, सत्रिकोणाः=सहितत्रिकोणः, सह प्रागादीशाः=। मार्ताण्डः=रविः,इन्दोः=चन्द्रः, अयुजि=विषमे, सम=समराशौ,भे=राशौ चन्द्रः=इन्दु, भान्वोश्च=रविः च, होरे=सूर्यहोरायां, स्वभवन=ग्रहस्थितराशिः,सुतः=अत्र पञ्चमभवनम् इति यतः पञ्चमभावनात् सुतचिन्तनं क्रियते। त्रि=त्रिकोणाधिपनां=द्रेष्काणाः=राशेः त्रिभागः स्युः।

**भावः=**क्रूरः सौम्यः पुरषः स्त्री चरस्थिरोभयम् इति क्रमशः द्वादशराशीनां संज्ञाः भवन्ति। मेषवृषभमिथुनकर्कटकाः इति चत्वारः राशयः, तेषां त्रिकोणराशयः पूर्व-दक्षिण-पश्चिम-उत्तराः अष्टदिक्षु अधिपतयः भवन्ति इति भावः।

**बोधप्रश्नाः**

36. क्रूरसौम्यसंज्ञाः कथं व्यवस्थिताः भवन्ति।

37. चरराशयः के?

38. स्थिरराशयः के?

39. . उभयराशयः के?

40. पुरुषराशयः के?

41. स्त्रीराशयः के?

42. समराशिषु होराधिपतिव्यवस्था कीदृशी भवति?

43. विषमराशिषु होराधिपतिव्यवस्था कीदृशी भवति?

**2.14द्रेष्काणविचारः सोदाहरणम्।**

द्रेष्काणः राशेः तृतीयभागः भवति।द्रेष्काणस्य मानकं दशांशः भवति। तद्यथा त्रिंशदंशाः/3=दशांशाः(10)भवन्ति। शून्यातः दशमांशं यावत् प्रथमद्रेष्काणः भवति। दशमांशतः विंशति अंशं यावत्, द्वितीयद्रेष्काणः भवति। विंशत्यंशतः त्रिंशदंशं यावत् तृतीयद्रेष्काणः भवति।अग्रे द्रेष्काणविभाजनं लिख्यते।उदाहरणं गुरुस्फुटे 1-1-12′-33′′। वृषभराशौ प्रथमे अंशे द्वादशकलायांत्रयस्त्रिंशत्विकलायांगुरुः विद्यते। शून्यतः दशमांशपर्यन्तं प्रथमद्रेष्काणः वर्तते। प्रथमद्रेष्काणस्य अधिपः ग्रहस्थितराशेः अधिपः भवति। अतः शुक्रः अधिपः भवति।

**अत्र ध्यातव्यः तथ्यः-**


- द्रेष्काणः राशेः त्रिभागः भवति । क्रमशः ग्रहस्थित राशितः स्व-पञ्चम-नवमभवननाम् अधिपतयः, द्रेष्काणाधिपतयः भवन्ति।

| | | |
|---|---|---|
| प्रथमद्रेष्काणाधिपः। | 0-10। | ग्रहस्थित/स्वभवनाधिपः। |
| द्वितीयद्रेष्काणाधिपः। | 10-20 | पञ्चमभवनाधिपः। |
| तृतीयद्रेष्काणाधिपः। | 20-30 | नवमाभवनाधिपः। |

**द्रेष्काणानाम् अधिपतिविभागः।**

प्रथमद्रेष्काणाधिपतेः अधिपतिः स्वराश्यधिपतिः भवति।द्वितीयद्रेष्काणाधिपतिः स्वराशितः पञ्चमभावाधिपतिः भवति। तृतीयद्रेष्काणाधिपः नवमराशेः अधिपः भवति।तदुक्तं यथा-**"स्वभवन-सुत-त्रित्रिकोणाधिपानां द्रेष्काणाः स्युः।**"प्रथमद्रेष्काणाधिपः स्वभवनाधिपः, द्वितीयद्रेष्काणाधिपः पञ्चमभवनाधिपः, तृतीयद्रेष्काणाधिपः नवमभवनाधिपः भवति। अनेन एवं सिद्धं भवति। मेषस्य प्रथमो द्रेष्काणः भौमः, द्वितीयः पञ्चमस्थानसिंहाधिपतिः अर्कः तृतीयो नवमस्थानस्य अधिपतिःगुरुःइति।

वृषभस्य प्रथमद्रेष्काणाधिपतिः स्वभवनपतिः शुक्रः, द्वितीयद्रेष्काणाधिपतिः पञ्चमभवनकन्यायाः अधिपः बुधः, तृतीयद्रेष्काणाधिपतिः मकरस्याधिपःशनिः भवति। एवम् अन्यराशीनाम् अपि ज्ञातव्यम्।




**अत्र स्मर्तव्यः अंशः।**

- राशेः तृतीयः भागः द्रेष्काणः 10 अंशात्मकः भवति। स्वभवन-पञ्चमभवन-नवमभवनाधिपाः क्रमशः द्रेष्काणाधिपाः भवन्ति।

प्रायः एकस्य राशेः उदयात् परं घंटाद्वयात्मककालं परं द्वितीयराशेः उदयः भवति।

60(मिनिट्)*2 घंटाः=120निमेषाः (मिनिट्)/3=40 निमेषाः(मिनिट्) द्रेष्काणः भवति। एवं समयवशादपि ज्ञातुं शक्यम्।

द्रेष्काणविचारे ग्रन्थकारोक्तिः-

**"द्रेक्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्।।"**

**बोधप्रश्नाः ।**

44. **कति द्रेष्काणाः भवन्ति?**
45. **द्रेष्काणःकति अंशात्मकः भवति?**

## 2.15 होराविचारे मतान्तरम् सोदाहरणम्।

मययवनमणित्थशक्तिः, सत्यः, देवस्वामिः, सिद्धसेनः, विष्णुगुप्तः,जीवशर्मा,इत्यादयः आचार्याः वराहमिहिरस्य प्राक्काले आसन्। अतः केचित्तु आचार्याणां मतानुसारंहोराधिपतेः विचारंग्रन्थकारंव्यञ्जयति। होरायां सूर्य-चन्द्रयोः एव आधिपत्यम्।होरायाम् इतरग्रहाणाम् अपि अधिपतित्वम् अनेन विधानेन प्राप्यते। तद्विधिम् उच्यते।प्रथमां होरां राश्यधिपम् इच्छन्ति।द्वितीयां होरां लाभाधिपतिम् अर्थात् एकादशाधिपतिम् इच्छन्ति।यथा-मेषस्य प्रथमहोराधिपतिः निजभवनाधिपः अतः कुजः प्रथमहोराधिपःभवति। द्वितीयहोराधिपतिः एकादशाधिपतिः, अर्थात् कुम्भराशेः शनिः भवति।कदाऽयं विधिः उपयोक्तव्यः इति पृच्छायांरुद्रः लिखति यत् रविचन्द्रयोः दौर्बल्ये अयं विधिः प्रयोक्तव्यः। वराहमिहिराचार्यः सत्याचार्यस्य मतं परम् इति आमनन्ति। सत्याचार्यः अस्मिन् विषये रविचन्द्रयोः एव होराधिपतित्त्वम्, न अन्येषाम् इति उल्लिखति। तच्च-

**"ओजेषु रवेर्होरा प्रथमा युग्मेषु चोत्तरा शेषाः।इन्दुः क्रमशोः ज्ञेया जन्मनि चेष्टौ स्वहोरस्थौ।। "**

**अस्मिन् विचारे स्मर्तव्यः अंशः।**

- प्रथमहोरां राश्याधिपतेः, द्वितीयहोराम् एकादशाधिपतेः इतिकेचन आचार्याणां मतम्।

## 2.16 द्रेष्काणविचारे मतान्तरम्।

प्राचीनकाले यवनाचार्याः मययवनमणित्थशक्तजीवशर्माश्रुतकीर्तयः आदयः आचार्याणाम् अभिप्रायं वराहमिहिराचार्यः स्वीये होराशास्त्रे उल्लिखति। तादृशरूपेण केचन आचार्यः होरा-द्रेष्काणयोः मतान्तरम् आदिशति। तत्र द्रेष्काणे मतान्तरम् एवं वर्तते, प्रथमद्रेष्काणः राश्यधिपस्य, द्वितीयं द्वादशाधिपतेः, तृतीयम् एकादशाराश्याधिपतेः भवति। वराहमिहिराचार्यः त्रिकोणस्थानानाम् अर्थात् ग्रहस्थितराशिः, ततः पञ्चमराश्यधिपः, ततः नवमराश्यधिपः (1-5-9)एवं क्रमशः द्रेष्काणपतयः भवन्ति इति अभिप्रैति । परम् अत्र तावत् स्व-द्वादश-एकादशराशिपानां नाथाः भवन्ति इति अभिप्रैति। यथा मेषस्य प्रथमो द्रेष्काणाः भौमस्य, द्वितीयोद्वादशाधिपतेः जीवस्य, तृतीयम् एकादशराश्यधिपतेः मकरः सौरस्य भवति। एवमेव अन्येषां राशीनां चिन्तनीयम्।

- ग्रहस्थितराश्यधिपः प्रथमद्रेष्काणाधिपतिः भवति।
- तस्मात् द्वादशराश्याधिपः द्वितीयद्रेष्काणाधिपःभवति।
- एकादशराश्याधिपः तृतीयद्रेष्काणाधिपः भवति।

**वराहमिहिराचार्योक्तिः होराशास्त्रेश्लो-**

**"केचित्तु होरां प्रथमां भपस्य वाञ्छन्ति लाभाधिपतेः द्वितीयाम्।द्रेष्काणसंज्ञामपि वर्णयन्ति स्वद्वादशाधिपतेः द्वितीयम्।।"**

**अन्वयः=** केचित्तु प्रथमां होरां भपस्य वाञ्छन्ति।द्रेष्काणसंज्ञामपि स्व-द्वादश-एकादश-राशिपानम् वर्णयन्ति।12।

**अन्वयार्थः**=केचित्तु=यवनेश्वरादयः प्रथमां होरां=राश्यां प्रथमहोराम् भपस्य=राश्यधिपस्य वाञ्छन्ति=इच्छन्ति।।द्रेष्काणसंज्ञामपि=द्रेष्काणविचारम्, द्वादश-एकादशराशिपानम्=द्वादशभावः एकादशभावाधिपं,वर्णयन्ति=वर्णयन्ति।

**भावः=**प्रथमहोराराश्यधिपस्य, द्वितीयहोरा एकादशाधिपतेः होरा द्वितीयत्वेन केचन दैवज्ञाः प्रायः यवनाचार्यः अभिप्रयन्ति। प्रथमद्रेष्काणधिपः राश्यधिपः भवति। द्वितीयद्रेष्काणाधिपः द्वादशाधिपतेः, तृतीयद्रेष्काणाधिपतिः द्वितीयाधिपतेः भवति।

**बोधप्रश्नाः।**

46. प्रथमद्रेष्काणाधिपः कः भवति?
47. द्वितीयहोराधिपः कः भवति?
48. तृतीयहोराधिपः कः भवति?

**ग्रन्थस्य मूलपाठः।**

कालाङ्गानि वराङ्गमाननमुरो हृत्क्रोडवासो भृतो।वस्तिर्व्यञ्जनमूरुजानुयुगुलेजङ्घे ततो अङ्घ्रिद्वयम् ।।

मेषाश्विप्रथमा नवर्क्षचरणाश्चक्र स्थिता राशयो ।राशिक्षेत्रगृहर्क्षभानि भवनं चैकार्थ सम्प्रत्ययाः । ।

मत्स्यौ घटीनृमिथुनं सगदं सवीणं चापी नरो अश्वजघनो मकरो मृगास्यः ।

तौलीससस्यदहनाप्लवगा च कन्या शेषाः स्वनामसदृशाः स्वचराश्च सर्वे । ।"

क्षितिज सितज्ञचन्द्ररविसौम्यसितावनिजाः ।सुरगुरुमन्दसौरि गुरवश्च गृहांशकपः ।

अजमृगतौलिचन्द्रभवनादिनवांशविधिः। भवनसमांशकाधिपतयः स्वगृहात्क्रमशः । ।

कुजरविजगुरुज्ञशुक्रभागाः।पवनसमीरणकौर्पिजूकलेयाः ।

अयुजियुजितुभे विपर्ययस्थाः।शशि-भवन-अलि-झष-अन्तमृक्षसंधिः । ।

क्रियतावुरिजितुमकुलीरलेयपाथोनजूककौर्प्या आख्याः ।

तौक्षिकआकोकेरो हृद्रोगश्चान्त्यभं चेत्थम् ।।

द्रेष्काण-होरा-नवभागसंज्ञाः त्रिंशाशकद्वादशसंज्ञिताश्च ।

क्षेत्रं च यद्यस्य सतस्य वर्गो होरेति लग्नं भवनस्य च अर्धम् । ।(इन्द्रवज्रा)

गोजाश्विकर्किमिथुनाः समृगानिशाख्याः।पृष्ठोदया विमिथुनाः कथितास्त एव ।।

शीर्षोदया दिनबलाश्च भवन्ति शेषाः। लग्नं समेत्युभयतः पृथुरोमयुग्मम् ।।(वसन्ततिलका)

क्रूरसौम्यः पुरुषवनिते ते चरागद्विदेहाः।प्रागादीशाः क्रियवृषनृयुक् कर्कटाः सत्रिकोणाः।।

मार्ताण्डेन्द्वरयुजि समभे चन्द्रभान्वोश्च होरे।द्रेक्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्।।

केचित् तु होरां प्रथमां भपस्य वाञ्छन्ति लाभाधिपतिः द्वितीयाम्।द्रेष्काणसंज्ञामपि वर्णयन्ति स्वद्वादशेकादशराशिपानाम् । ।

अजवृषभमृगाङ्गनाकुलीरा।झषवणिजौ च दिवाकरादि तुङ्गाः।।

दशशिखिमनुयुक्तिथीन्द्रियाशैः। त्रिनवकविंशतिभिश्च तेऽस्तनीचाः । ।

**सारांशः।**

शीर्षमुखबाहुहृदय-उदरकटिवस्तिगुह्य-ऊरू-जानुजंघेचरणेति मेषादिराशीनाम् अङ्गविभागः भवति।प्रतिनक्षत्रं चत्वारः पादाः भवन्ति। प्रतिराशौ नवपादाः भवन्ति।राशि-क्षेत्र-गृह-ऋक्ष-भ-भवनानि राशिपर्यायपदानि भवन्ति।मीनराशिः मुखपुच्छप्रतिवद्धमत्स्यद्वयम् आकारः, स्कन्धान्यस्तरिक्तघटाधारी पुरुषः कुम्भराशिस्वरूपं, स्त्रीपुमांसौ मिथुनात्मकंस्वरूपं मिथुनराशेः, पुमान्सहितः गदाधारी, स्त्री च वीणाधारी, भवति। धनुराशिः नरः अश्वजघनः मकरस्य शरीरः मृगमुखं भवति। कन्या राशिः नौकास्था कुमारी ससस्यदहना गृहीता भवति।

कुजशक्रबुधचन्द्ररविबुधशुक्रकुजगुरुशनिशनिगुरवेति द्वादशराशीनामाधिपाः भवन्ति।एकः नवांशमानम् अंशत्रयं विंशतिकलाः यावत् भवन्ति।अजमकरतुलाकर्केति राशीनामधिपतेः गणना प्रारभ्यते।अजमकरतुलाकर्कक्रमेणद्वादशराशीनां नवांशाः प्रारम्भिताः भवन्ति।राशिद्वादशभागाः द्वादशांशाः भवन्ति। तच्च ग्रहस्थानात्क्रमशः गणनारम्भः भवति।

**2.19 शब्दावली।**

वराङ्गम्=मुखम् वररूपेण विद्यमान अङ्गम्।वराङ्ग (पुलिङ्ग) + अम्, द्वितीया, एकवचन]सं० वराङ्ग] १. मस्तक । १०. मुख्य भाग । उत्कृष्ट अंश (को०) । ११. सुंदर रूप (को०)

हृत्=चित्हृत् [हृत् (पुलिङ्ग) + सु, प्रथमा, एकवचन] }अमरकोशः-वुक्काग्रमांसं हृदयं हृत् मेदस्तु वपा वसा ।।२-६-६४।। ->पश्चाद्ग्रीवाशिरा ( २. ६.) मनस् इत्यर्थः।

क्रोड=ज्वलतु जलधि-क्रोड-क्रीडत्कृपीडभव-प्रभा-प्रतिभट-पटु-ज्वालामालाकुलो जठरानलः।

भृतो=[भृत् (पुलिङ्ग) + सु, प्रथमा, एकवचन

पवन=वायुः[पवन (पुलिङ्ग) + सु, प्रथमा, एकवचन]-5

समीरणः=वायुः[समीरण्+जस्/शस्/ङसि/ङस्,प्रथमा/द्वितीया बहुवचन/पञ्चमी/षष्ठी एकवचन-5

कौर्पि = [कौर्पि+सु, प्रथमा, एकवचन-8

जूकः=कः [जूक (पुल्लिङ्ग) + सु, प्रथमा, एकवचन]-7

लेयाः = [लेि (पुल्लिङ्ग) + ङसि पञ्चमी/षष्ठी एकवचन] }-5

अयुजि =[अयुज्+ङि, सप्तमी, एकवचन]

युजि=[युज्+ङि, सप्तमी, एकवचन]

ऋक्ष =ऋक्ष (पुल्लिङ्ग) + सु, प्रथमा, एकवचन अत्र राशि इतिअर्थः

स्वः=[स्व+सु , प्रथमा एकवचन।

शिखिः=[शिखि (पुल्लिङ्ग) + सु, प्रथमा, एकवचन] त्रीणि इति अर्थः।

मनुयुक्=14*2=28 अष्टाविंशतिः। मनु शब्देन चतुर्दशमनूनां गृह्यन्ते। युक् नाम युगलम् अर्थात् 14*2 =28 भवति।

तिथिः=तिथि (पुल्लिङ्ग) + सु, प्रथमा, एकवचन]

इन्द्रियांशैः।

**2.20 बोधप्रश्नोत्तराणि।**

1. सप्तविंशतिनक्षत्राणि सन्ति।
2. नवपादात्मकां भवति।
3. राशिचक्रं द्विविधम्। स्थिरचक्रं चरचक्रम् च इति
4. शीर्षमुखबाहुहृदय-उदरकटिवस्तिगुह्य-ऊरुजानुजंघेचरणेति मेषादिराशीनाम् अङ्गविभागः भवति।
5. कालपुरुषस्य अङ्गविभागेन सद्यो जातबालस्य आरोग्यं ज्ञायते।
6. राशि-क्षेत्र-गृह-ऋर्क्ष-भ-भवनानि, एते राशीनां पर्ययवाची शब्दाः भवन्ति।
7. मीनराशिः मुखपुच्छप्रतिवद्धमत्स्यद्वयम् आकारः भवति।
8. मीनराशिः उभयोदयराशिः अपि च श्रीहरेः प्रथमावतारः मत्स्यावतारः आसीत्।
9. स्कन्धान्यस्तरिक्तघटाधारी पुरुषः कुम्भराशिस्वरूपं भवति।
10. स्त्रीपुमांसौ मिथुनात्मकं स्वरूपं मिथुनराशेः स्वरूपं भवति। पुमान्सहितः गदाधारी, स्त्री च वीणाधारी, भवति।
11. कन्या एव कन्यारशेः स्वरूपम् अस्ति।तुलाराशेः स्वरूपं नौकास्था कुमारी ससस्यदहना गृहीता भवति।
12. एकं वृत्तं 360 अंशात्मकं भवति।
13. प्रतिराशिः 30 अंशात्मकं भवति।

14. मेषादिराशीनाम् अधिपाः कुजशक्रबुधचन्द्ररविबुधशुक्रकुजगुरुशनिशनिगुरवः द्वादशराशीनाम् अधिपाः भवन्ति।
15. राश्यधिपस्य दृष्टिः यस्मिन् राशौ वर्तते सः राशिः बलवान् भवति।
16. राशेः नवमो भागः नवांशः। अर्थात् अंशत्रयम् विंशतिकलात्मिकाः भवन्ति।
17. अजमकरतुलाकर्कक्रमेणद्वादशराशीनां नवांशाः प्रारम्भिताः भवन्ति।
18. राशेः द्वादशतमो भागः एकः द्वादशांशः भवति।
19. 1800 कलाः भवन्ति।
20. चोरप्रश्ने द्वादशांशः उपयुज्यते।
21. **कुज-शनि-गुरु-ज्ञ-शुक्रभागाः**पञ्च-पञ्च-अष्ट-सप्त-पञ्चांशानाम्विषमराशिषु, समराशिषु विपर्ययस्थाःत्रिंशांशाधिपाः भवन्ति।
22. **कुज-शनि-गुरु-ज्ञ-शुक्रभागाः**पञ्च-पञ्च-अष्ट-सप्त-पञ्चंशानाम्विषमराशिषु त्रिंशांशाधिपाः भवन्ति।
23. समराशिषु त्रिंशंशानाम् अधिपाः पञ्च-सप्त-अष्ट-पञ्च-पञ्च अंशानाम् क्रमशः शुक्र-बुध-गुरु-शनि-कुजाः एते क्रमशः भवन्ति।
24. क्रिय-तावुरि-जितुम-कुलीर-लेय-पाथोन-कौर्पि-जूक-तौक्षिक-आकोकेरो-हृद्रोगाः च अन्त्यभं च इत्थं क्रमशः मेषीदीनां पर्यायाः भवन्ति।
25. राशीनां षड्वर्गाः -1.क्षेत्रम् 2.होरा 3.नवांशः 4.त्रिंशांशकाः 5.द्वादशांशः 6.द्रेष्काणःएवं विधः भवति ।
26. स्फुटफलादेशाय षड्वर्गाणाम् उपयोगः कर्तव्यः।
27. द्रेष्काणः प्रथमद्रेष्काणः–बुधः,होरा प्रथमहोरा रविः,नवांशाः द्वितीयनवांशः कुजः,त्रिंशांशः पवनांशः बुधः,द्वादशांशः बुधः, क्षेत्रम्- बुधः।
28. होरा त्रिंशद् अंशात्मकम् भवति।
29. होरा एकघंटात्मकं भवति।
30. समराशिषु चन्द्रः प्रथमहोराधिपः, सूर्यः द्वितीयहोराधिपः भवति।
31. विषमराशिषु सूर्यः प्रथमहोराधिपः, चन्द्रः द्वितीयहोराधिपःभवति।
32. सिंह-कन्या-तुला-वृश्चिक-कुम्भाः एते राशयः दिवाबली राशयः भवन्ति।
33. वृषः, मेषः, कर्काटकः, मिथुनः, मकरः च षड्राशयो रात्रिबलसंज्ञाः भवन्ति।
34. उभयोदय राशिः सिंहः भवति।
35. सिंह-कन्या-तुला-वृश्चिक-कुम्भ-मीनाः दिनबलाः शीर्षोदयश्च भवन्ति।

36. क्रूरः, सौम्यः, इति क्रमेण मेषादीनां राशीनां संज्ञाः भवन्ति। पुरुष-वनिता इति द्वादशराशीनां क्रमशः मेषादि् आरभ्य संज्ञाः भवन्ति।
37. चरराशयः मेष-कर्क-तुला-मकराः राशयः भवन्ति।
38. स्थिरराशयः वृषभ-सिंह-वृश्चिक-कुंभाः राशयः भवन्ति।
39. उभयराशयःमीन –मिथुन-कन्या-धन्विनः राशयः भवन्ति।
40. पुरुषराशयः विषमराशयः भवन्ति।
41. स्त्रीराशयः समराशयः भवन्ति।
42. समराशौ प्रथमहोरा चन्द्रस्य, द्वितीयहोरा रवेः भवति।
43. विषमराशौ प्रथमहोरा मार्ताण्डः अर्थात् सूर्यः भवति, द्वितीय होरा इन्दुःअर्थात् चन्द्रः भवति।
44. त्रयः द्रेष्काणाः भवन्ति।
45. द्रेष्काणाः दशांशात्मकः भवति।
46. ग्रहस्थितराश्यधिपः प्रथमद्रेष्काणाधिपतिः भवति।
47. तस्मात् द्वादशराश्याधिपः द्वितीयद्रेष्काणाधिपःभवति।
48. एकादशराश्याधिपः तृतीयद्रेष्काणाधिपः भवति।

**2.21 अभ्यासप्रश्नाः-**

1. राशीनां पर्यायानां मूलम् अन्विषत।
2. उच्चस्थे ग्रहे फलम् ग्रन्थेषु अन्विषत।
3. नीचस्थे ग्रहे जातस्य फलम् ग्रन्थेषु अन्विषत।
4. दशांशः कथं भवन्ति?
5. दशांशः कति कलात्मकं भवति?
6. द्वादशांशस्य प्रयोजनम् किम्?
7. .षोडशवर्गे अस्य महत्त्वं किम्?
8. लेय इति पदस्य आङ्ग्ले leo इत्यस्य च कः सम्बन्धः?
9. क्रियादिपदानाम् निष्पत्तिः कथम्?
10. होरा कति घंटात्मिका भवति?
11. समराशिषु होराधिपतेः व्यवस्था कीदृशी अस्ति?
12. विषमराशौ होराधिपतेः व्यवस्था कीदृशी अस्ति?
13. किमर्थं होरायां रविचन्द्रयोः एव आधिपत्यम्?

14. नभसि होरा कुत्र भवति?
15. किमर्थम् फलितज्योतिषस्य होराशास्त्रेति कथ्यते?
16. किमर्थम् मीनः उभयोदयः भवति?
17. फलप्रवचने अस्योपयोगः कस्मिन् सन्दर्भे भवति?
18. किमर्थम् समविषमेति भेदः? ग्रहाः राशिवशात् बलिनः भवन्ति किम्?
19. पुरुषग्रहाः कस्मिन् राशौ कति बलवत्तराः भवन्ति?
20. त्रिंशांशेषु किमर्थम् ताराग्रहाणाम् एव स्थानम्?
21. किमर्थम् त्रिंशांशानाम् कुजशनिगुरुज्ञशुक्राः इति क्रमशः अधिपतयः भवन्ति।
22. यद्यपि सूर्यचन्द्रौ त्रिंशांशपती न भवतः तथापि तेषाम् महत्त्वम् त्रिंशांशे अस्ति। तत् किम्?
23. षड्वर्गान् लिखत ।


    रविस्फुटम् -2-5-00।

    चन्द्रस्फुटम् 6-19-14।

***

# तृतीयः पाठः

## राशिप्रभेदाध्यायस्य पूर्वार्धम्




**उच्चस्थानानि।**

| | | | |
|---|---|---|---|
| शुक्रः27 | रविः10बुधः | | |
| | श्रीः | | गुरूः 5लग्नम्<br>चन्द्रः |
| कुजः 28 | | | |
| | | शनिः 20 | |

1 प्रस्तावना।

3.2 उद्धेश्यम् ।

3.3 ग्रहाणाम् उच्चस्थानानि ।

3.4. वर्गोत्तमनवांशाः ।

3.5. मूलत्रिकोणस्थानानि ।

3.6. लग्नादिभावानां संज्ञाः।

3.7. उपचयभावाः।

3.8. संज्ञाविशेषाः।

3.9. कण्टकादिसंज्ञाः तासां राशिबलञ्च ।

3.11.1. भावानां पणफरत्रिकोणसंज्ञाविशेषाः ।

3.11.2. बलविचारः ।

3.11.3. होराबलम् ।

3.11.4. राशिबलम् ।

3.12. राशीनां प्रमाणम् ।

3.13. पुनः भावानां संज्ञाः विशेषाः ।

3.14. राशीनां वर्णाः।

3.15. प्लवत्वं वेशिस्थानञ्च ।

3.16. सारांशः ।

3.17. शब्दावली ।

3.18. बोधप्रश्नोत्तराणि ।

3.19. अभ्यासप्रश्नाः ।

**3.1. प्रस्तावना।**

**प्रिय अध्येता!**

बृहज्जातकस्य तृतीयपाठाय भवते स्वागतम्। गतपाठे भवान्,कालपुरुषस्य अङ्गविभागः ज्ञातवान्, राशिपर्यायाः राशिस्वरूपम् अधिगतवान्, राशिः, नवांशः, द्वादशांशाधिपाः, नवांशाधिपाः, त्रिंशांशाधिपाः,एतेषां षड्वर्गनिरूपणे निपुणो जातः।होराशब्दस्य अर्थविशेषौ अवगतवान्।राशीनां दिनरात्रिसंज्ञाः, पृष्ठोदयादिसंज्ञाः च, राशीनां क्रूरसौम्यादि संज्ञाः, द्रेक्काणविचारः इत्यादिविचारान् अधिगतवान्। गते पाठे संज्ञामात्रप्रयोजन्मिकाः संज्ञाः अधीतवान्।

पाठेऽस्मिन् संज्ञाः कथ्यन्ते। काश्चनसंज्ञाः फलमात्रप्रयोजनात्मिकाःच भवन्ति। तां संज्ञान् अमुष्मिन् पाठे विव्रीयन्ते। तान् ज्ञास्यति। पाठोऽयम् अतीव प्रधानः वर्तते। पाठेऽस्मिन् ज्योतिषशास्त्रस्य आधारभूतसिद्धान्ताः विशदीकृताः वर्तन्ते। ते च वर्गोत्तमनवांशः,मूलत्रिकोणस्थानम्, उपचयभावाः, कण्टकादिसंज्ञाः,पणफरत्रिकोणसंज्ञाविशेषाः,बलविचाराः,होराबलराशिबलयोः गणनाक्रमाः वर्तन्ते।पाठादस्मात् नवांशेषु उत्तमनवांशविचारं ज्ञास्यति। यथा- ग्रहाणां त्रिकोणस्थानं वर्तते, तथैव मूलत्रिकोणस्थानम् अपि वर्तते एव।अस्य पाठस्य अध्ययनेनमूलत्रिकोणविचारे ज्ञास्यति।सूक्ष्मतमफलप्रवचने उपयज्यमान स्थानसंज्ञाः, भावासंज्ञाःपाठेऽस्मिन् विवृतमस्ति। न केवलं संज्ञाः अपि च ग्रहाणां बलविचारः, राशेः उदयमानानि, राशीणां दिक्, वर्णाः इत्यादीनां विषयाणां विशदितमस्ति। वराहमिहिराचार्यः,"**होराशास्त्रम्**"सूर्यप्रसादेन प्राप्तवान् इति स्वयमेव ग्रन्थान्ते उल्लिखति। तादृशः पूज्यग्रन्थादौ दशाध्यायाः अत्यन्तं प्रधानमस्ति। तेषु दशाध्यायेषु अध्यायद्वयं मुकुटसदृशं भवति। सूर्येण प्रदत्तज्ञानमिदम् एकाग्रतया अन्यचिन्तां विहाय अध्ययनं करोतु। अध्यायेऽस्मिन् उक्तमूलश्लोकानां मनसि स्मर्तुं प्रयासः करोतु।

3.2 **उद्देश्यम्।**

**ग्रहाणाम् उच्चस्थानानि ।**

- ☞ अस्य पाठस्य अध्ययनेन **वर्गोत्तमनवांशानां** गणने निपुणो भविष्यति।
- ☞ अस्य पाठस्य अध्ययनेन **मूलत्रिकोणस्थानानि** ज्ञातुं प्रभवति।
- ☞ अस्य पाठस्य अध्ययनेन **लग्नादिभावानां** संज्ञाः ज्ञास्यति।
- ☞ अस्य पाठस्य अध्ययनेन **उपचयभावानाम्**अवगमिष्यति।
- ☞ अस्य पाठस्य अध्ययनेन **संज्ञाविशेषानाम्**अवबोधः भविष्यति।
- ☞ अस्य पाठस्य अध्ययनेन **कण्टकादिसंज्ञाः तत् राशिबलानां ज्ञाने समर्थो भविष्यति।**
- ☞ अस्य पाठस्य अध्ययनेन **भावानां पणफरत्रिकोणसंज्ञाविशेषानाम्**ज्ञास्यति।
- ☞ अस्य पाठस्य अध्ययनेन **बलविचाराणां ज्ञाने समर्थो भविष्यति।**
- ☞ अस्य पाठस्य अध्ययनेन **होराबलराशिबलानां गणने समर्थो भविष्यति।**
- ☞ अस्मात् पाठात् **राशीनां प्रमाणम्ज्ञातुं समर्थो भविष्यति।**
- ☞ अस्मात् पाठात् **भावानां संज्ञाः विशेषाःज्ञातुं प्रभविष्यति।**
- ☞ अस्मात् पाठात् अध्ययनात्**राशीनां वर्णः ज्ञास्यति।**
- ☞ अस्मात् पाठात् अध्ययनात्**प्लवत्वं वेशिस्थानञ्च ज्ञास्यति।**


### 3.3 ग्रहाणाम् उच्चस्थानानि।

**ग्रहाणाम् उच्चनीचविभागमाह।**

आदौ उच्चं नामकिम्? इति ज्ञातव्यम्। ग्रहाः सूर्यं परितः भ्रमन्ति। जनाः पृथिव्यां स्थित्वा परिवीक्षयन्ति। अनेन सामान्यतया ग्रहाः भुवं परितः भ्रमन्ति इतिजनाः भ्रान्तिमनुभवन्ति।परन्तु ग्रहाः सूर्यं परितः भ्रमन्ति। भूमौ स्थित्वा ग्रहाणां वेधः कुर्मः। एवं सति, भुवः अपेक्षया अत्यन्तदूरतमःग्रहस्थानप्रदेशः एव उच्चमिति सिद्धान्तज्योतिषग्रन्थेषु मन्यन्ते।

**उच्चस्थानस्य परिभाषा-**

**"यो हि प्रदेशो अपमण्डलस्य दूरे भुवस्तस्य कुतोच्चसंज्ञा।**
**सोऽपि प्रदेश्चलतीव तस्मात् प्रकल्पिता तुङ्गातिर्गातिज्ञैः।।"**




उच्चं हि ग्रहभ्रमणवृत्तस्य भुवः अपेक्षया दूरतरः प्रदेशः।तथा- तस्मात् भार्धे 180 अंशे परिमिते नीचं, तद्भुवो निकटवर्तीति कथितम्। तद्यथा-"**उच्चस्थितो व्योमचरःसुदूरे नीचस्थितःस्यान्निकटे धरित्र्या**"इति भास्करोक्तेः वशात्।

राशीनां ग्रहवशेन विशेषविचारमुच्यते। रव्यादीनाम् सप्तग्रहाणाम् उच्चस्थानानि क्रमशः अग्रे कथितानि। रवेः मेषः, चन्द्रस्य वृषभः, कुजस्य मकरः, बुधस्य कन्यायाम्, गुरोः कर्काटकः, शुक्रस्य मीनः, शनेः कुम्भः,एवम् उच्चस्थानानि भवन्ति। एषु सप्तराशिषु परमोच्चस्थाने अंशानि च कथितानि। तद्यथा- रविः मेषराशौ दशभिः अंशैः उच्चस्थानं भवति। वृषभराशौ तृतीये अंशे चन्द्रः उच्चस्थः भवति। मकरराशौअष्टाविंशतितमे अंशे कुजः उच्चस्थानकः भवति। कन्याराशौ पञ्चदशे अंशे बुधः उच्चस्थः भवति। कर्कराशौ पञ्चमे अंशे गुरुः उच्चस्थानीयकं भवति।मीनराशौ सप्तविंशतितमे अंशे शुक्रः उच्चस्थानीयकः भवति। तुलाराशौ विंशतितमे अंशे शनेः उच्चांशकं भवति।

**उच्चस्थानानि।**

| | | | |
|---|---|---|---|
| शुक्रः27 | रविः10 | चन्द्रः3 | |
| | उच्चस्थानानि | | गुरुः 5 |
| कुजः 28 | | | |
| | | शनिः 20 | बुधः20 |

अत्र ज्ञातव्यः तथ्याः -

**नीचस्थानानि।**

| | | | |
|---|---|---|---|
| बुधः 15 | शनिः 20 | | |
| | **नीचस्थानानि** | | कुजः 28 |
| गुरु- 5 | | | |
| | चन्द्रः3 | रविः 10 | शुक्रः 27 |

❖ मेष-वृषभ-मकर-कन्या-कर्क-मीन-वणिक्-आदीनांक्रमशः दश-त्रीणि-अष्टाविंशति-पञ्चदश-पञ्च-सप्तविंशति-विंशतयःअंशाः रव्यादिग्रहाणां परमोच्चांशकाः भवन्ति।

❖ उच्चस्थानात् सप्तमभावः नीचराशिः भवति। रविः मेषराशौ दशमे अंशे उच्चः ततः सप्तमराशिः तुलायां दशमे अंशे नीचस्थानं भवति।एवं चन्द्रः वृश्चिकराशौ तृतीये अंशे, बुधः मीनराशौ विंशतितमे अंशे, गुरुः मकरराशौ पञ्चमे अंशे, शुक्रः कन्यायां सप्तविंशतितमे अंशे ग्रहाणां नीचस्थानानि भवन्ति।अस्य सुलभावगमनाय कोष्ठकमिदं लिखितम्।

❖ तुला-वृश्चिक-कर्क-मीन-मकर-कन्या-मेषाः एषु राशिषु रव्यादिग्रहाणां क्रमशः नीचस्थानानि भवन्ति।

| ग्रहाः | परमोच्चांशकाः। | परमनीचांशकाः। |
|---|---|---|
| सूर्यः | मेषे 10। | तुलायां 10। |
| चन्द्रः | वृषे 3। | वृश्चिके 3। |
| कुजः | मकरे 28। | कर्के 28। |
| बुधः | कन्यायां 15। | मीने 15। |
| गुरुः | कर्के5। | मकरे 5। |
| शुक्रः | मीने 27। | कन्यायां 27। |
| शनिः | तुलायां 20। | मेषे 20। |

**नीचस्थानस्य प्रयोजनम्-**

**"अन्धं दिगम्बरं मूर्खं परपिण्डोपजीविनम्। कुर्वीतमतिनीचस्थौ पुरुषं शशिभास्करौ।।"**

तथा हि वराहमिहिराचार्योक्तिः होराशास्त्रे -

**अजवृषभमृगाङ्गनाकुलीराः।झषवणिजौ च दिवाकरादितुङ्गाः।।**

**दशशिखिमनुयुक्तिथीन्द्रियाशैः।त्रिनवकविंशतिभिश्च तेऽस्तनीचाः।।(पुष्पिताग्रा)**

अस्यप्रयोजनञ्च-चत्वारः ग्रहाः उच्चस्थे जातः राजा भविष्यति। तादृशानि उन्नतफलानि होराशास्त्रे कथितानि सन्ति। तच्च-

**"एकद्वित्रीचतुर्भिर्जायन्ते राजानः सोच्चकैरतः परं दिव्याः।"**

पञ्चसु ग्रहेषु तुङ्गगतेषु जातो दिव्यो भवति। होराकृष्णीये उक्तमिदम्-

**"सुखिनः प्रकृष्टकार्या राजप्रतिरूपकाश्च राजानः। एकद्वित्रिचतुर्भिर्जायन्तेऽतः परंदिव्याः।।"**

**पदच्छेदः-**अज-वृषभ-मृग-अङ्गना-कुलीराः झष-वणिजौ च दिवाकर-आदि तुङ्गाः। दश-शिखि-मनु-युक्-तिथि-इन्द्रिय- अंशैः त्रि-नवक-विंशतिभिः च ते अस्तनीचाः ।

**अन्वयः**-अजवृषभमृगाङ्गना कुलीराझषवणिजौ च दिवाकरादितुङ्गाः उच्चाः दशशिखिमनुयुक्-तिथीन्द्रियत्रि-नवकविंशतिभिश्च अंशाः ते अस्त नीचाः सन्ति।

**अन्वयार्थः-** अजः=मेषः, वृषभः=वृषभराशिः, मृगः=मकरराशिः, अङ्गना=कन्याराशिः, कुलीरा=कर्कः, झषः=मीनः, वणिजौ=तुला, च दिवाकरः=रविः, आदि=चन्द्रः, कुजः, बुधः,गुरुः,शुक्रः,शनिः च एवम् इतरग्रहाणां ग्रहणीयम्। तुङ्गाः=उच्चाः,दश=दशांशाः, शिखि=त्रयांशाः, मनुयुक्=चतुर्दशमनवः द्विगुणिताः, तिथिः=पञ्चदशः, इन्द्रियः=पञ्च, त्रि-नवक=त्रीणि नवभिः गुणिते(3*9) सप्तविंशतिः। विंशतिभिश्च=विंशतिअंशाः,ते=उच्चस्थानात्, अस्त=सप्तमराशिः अर्थात् 180 अंशात्मिका दूरे, नीचाः=नीचस्थानानि सन्ति।

**भावः-**मेष-वृषभ-मकर-कन्या-कर्क-मीन-वणिक्-आदीनां क्रमशः दश-त्रीणि-अष्टाविंशति-पञ्चदश-पञ्च-सप्तनिंशति- विंशतयः अंशाः रव्यादिग्रहाणामुच्चांशकाः भवन्ति। उच्चांशात् सप्तमभवनं समान अंशके नीचस्थानं भवति इति भावः।

**उदाहरणम् –उच्चस्थे ग्रहपञ्चके श्रीरामस्य जन्मअभवत् इति चम्पूरामयणे उल्लिखितः स च श्लोकः-**

**"उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवाम्यां तिथौ ।लग्ने कर्कटके पुनर्वसुयुते मेषंगतेपूषणि।"**

**बोधप्रश्नाः-**

1. रवेः उच्चांशकाः कतिभवन्ति?
2. चन्द्रस्य उच्चांशकाः कति भवन्ति?
3. रव्यादिसप्तग्रहाणाम् उच्चराशयः के?
4. उच्चस्थानस्य प्रयोजनं किम्?

### 3.10. वर्गोत्तमनवांशाः।

स्फुटफलप्रवचनाय नैकाः समाग्र्यः ज्योतिश्शास्त्रे उपयुज्यन्ते। तेषु वर्गोत्तमनवांशोऽपि अन्यतमः। वर्गेषु उत्तमाः वर्गोत्तमाः भवन्ति। चरगृहादिषु; चर-स्थिर-द्विस्वभावादिराशिषु इत्यर्थः। पूर्वमध्यपर्यन्ततः प्रथम-मध्यम(पञ्चम)-अन्तिमाः(नवमः) नवांशाः वर्गोत्तमनवांशाः भवन्ति। तत्रादौ चरगृहाणि कानि इति? तस्मात् मेष-कर्क-तुला-मकराः एते चरगृहाणि भवन्ति। एषु चरगृहेषु प्रथमनवांशः वर्गोत्तमनवांशः भवति। वृष-सिंह-वृश्चिक-कुंभाएते स्थिरराशयः भवन्ति। एषु राशिषु पञ्चमनवांशः वर्गोत्तमनवांशः भवति। मिथुन-कन्या-तुला-धन्विनः एषु राशिषु अन्तिमनवांशः अर्थात् (नवमनवांशः)वर्गोत्तमनवांशः भवति। वर्गोत्तमनवांशे

राशिकुण्डल्यां ग्रहस्थानं यत्र भवति, तत्रैव नवांशकुण्डल्याम् अपि भवति। यथा कर्क-मकरादि चरराशिषु प्रथमनवांशः ग्रहस्थितस्थानात् एव प्रारम्भं भवति।वृषभ-सिंह-कुम्भाःएते सर्वेराशयः स्थिरराशयः भवन्ति।वृषभराशेः मकरात् नवांशगणनारम्भः। अनेन पञ्चमनवांशः मकरात् पञ्चमराशिः वृष एव भवति।तस्मात् नवांशाधिपः, ग्रहस्थितराश्यधिपः एक एव जायते अतः वर्गोत्तमः भवति। एवं सिंहराशेः मेषात् नवांशगणनारम्भः भवति। मेषात् पञ्चमस्थानं सिंहः भवति।तस्मात् नवांशाधिपः, ग्रहस्थितराश्यधिप एक एव जायते अतः वर्गोत्तमः भवति। इतरत्र गणनावशात् ज्ञातव्यः।

उभयराशिषु नवमनवांशः वर्गोत्तमः भवन्ति। मिथुनराशिः उभयराशिः। मिथुनराशेः तुलातः नवांशगणनारम्भः भवति। तुलातः नवमोनवांशः मिथुनो भवति।तस्मात् नवांशाधिपः, ग्रहस्थितराश्यधिपः एकः एव जायते अतः वर्गोत्तमः भवति।अत्रस्मर्तव्यः अंशाः-

- वर्गे उत्तमाः वर्गोत्तमाः भवन्ति। राशिकुण्डल्यां ग्रहः यत्र स्थितः नवांशकुण्डल्यां ग्रहः तत्रैव स्थितो सः वर्गोत्तमः भवति। तदुक्तं यवनेश्वरेण-

**"स्वे स्वे गृहेषु गृहांशका ये वर्गोत्तमास्ते यवनैर्निरुक्ता।"**

- चर-स्थिर-द्विस्वभावादिराशिषु पूर्वमध्यपर्यन्ततः प्रथम-मध्यम(पञ्चम)-अन्तिमाः(नवमः) वर्गोत्तमनवांशाः इत्युच्यन्ते।

वर्गोत्तमनवांशः।

| | | | |
|---|---|---|---|
| 9 | 1 | 5 | 9 |
| 5 | **वर्गोत्तमाः** | | 1 |
| 1 | | | 5 |
| 9 | 5 | 1 | 9 |

ग्रहस्य तेषु राशिषु तत्राशिसंख्या समाना नवांशराशिसंख्या विद्यते चेत् ग्रहः वर्गोत्तमनवांशे वर्तते इति निर्णयः।

**अस्य प्रयोजनम्-**

**"वर्गोत्तमाप्रदिष्टाः तेषु इह जाताः कुले मुख्याः।"**

**श्लोकः-**

**वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यन्तगाः शुभफलानवभागसंज्ञाः ।**

**सिंहोवृषप्रथमषष्ठहयाङ्गतौलिकुम्भास्त्रिकोणभवनानि भवन्तिसूर्यात्।।(वसन्ततिलका)**

**पदच्छेदः**-वर्ग-उत्तमाः चर-गृह-आदिषु पूर्व-मध्य-पर्यन्ततः शुभफलानवभागसंज्ञाः।सिंहो-वृष-प्रथम-षष्ठ-हय-अङ्ग तौलिकुम्भाः त्रिकोणभवनानि भवन्ति सूर्यात् ।।(वसन्ततिलका)

**अन्वयः-** चरगृहादिषु पूर्वमध्यपर्यन्तगाः नवभागसंज्ञाः वर्गोत्तमाः संज्ञाः शुभफलाः भवन्ति। सूर्यात् सिंहोवृषप्रथमषष्ठहयाङ्गतोलिकुम्भाः राशयः त्रिकोणभवनानि भवन्ति।

**अन्वयार्थः**=चरगृहादिषु=चरगृहम् आदिपदेन स्थिर-उभयराशीनामपि ग्रहणम् अतः चरः स्थिरः उभयः च इत्यादि भवनेषु, पूर्वमध्यपर्यन्तगाः=प्रथम-पञ्चम-नवमनवांशाः, नवभागसंज्ञाः=नवांशाः, वर्गोत्तमाः=षड्वर्गेषु उत्तमाः, संज्ञाः= शुभफलाः=उत्तमशुभफलाः भवन्ति। सूर्यात्=रव्यादि सप्तग्रहाणां, सिंहः=सिंहराशिः, वृषः=वृषभराशिः, प्रथमः=मेषराशिः, षष्ठः=कन्याराशिः, हयाङ्गः=धनुराशिः, तौलि=तुलाराशिः, कुम्भः=कुम्भराशिः,त्रिकोण=मूलत्रिकोणभवनानि,भवनानि=राशयः, भवन्ति।

**भावः**=चरराशिषु आदिनवांशो वर्गोत्तमः, स्थिरराशिषु मध्यनवांशः अर्थात् पञ्चमनवांशः, उभयराशिषु अन्तिमनवांशः नवमनवांशः वर्गोत्तमाः भवन्ति।

**बोधप्रश्नाः**

5. वर्गोत्तमशब्दस्य अर्थः कः?
6. चरराशिषु कः नवांशः वर्गोत्तमः भवति?
7. स्थिरराशिषु कः नवांशः वर्गोत्तमः भवति?
8. उभयराशिषु कः नवांशः वर्गोत्तमः भवति?

### 3.11. मूलत्रिकोणस्थानानि ।

सिंहादिराशीनां यथाक्रमेण सूर्यादीनां ग्रहाणां त्रिकोणभवनानि मूलत्रिकोणभवनानि भवन्ति। सिंह-वृष-प्रथम-षष्ठ-हयाङ्ग-तौली-कुम्भाः क्रमेण सूर्यादीनां त्रिकोणभवनानि अर्थात् मूलत्रिकोणराशयः भवन्ति। सिंहः आदित्यस्य मूलत्रिकोणसंज्ञाः भवति। वृषः चन्द्रस्य मूलत्रिकोणसंज्ञा भवति। प्रथमः अर्थात् मेषराशिः कुजस्य मूलत्रिकोणसंज्ञा भवति। षष्ठः अर्थात् कन्याराशौ बुधस्य मूलत्रिकोणस्थानं भवति।गुरोः धनुराशौ मूलत्रिकोणस्थानं भवति।शुक्रस्य तुलामूलत्रिकोणस्थानं भवति। सौरस्य कुम्भराशिः मूलत्रिकोणसंज्ञा भवति। अत्र विशेषः चन्द्रं विहाय अन्येषां ग्रहाणां स्वस्थानेषु एव मूलत्रिकोणस्थानं भवति।

- सिंह-वृष-प्रथम-षष्ठ-हयाङ्ग-तौली-कुम्भाः क्रमेण सूर्यादीनां त्रिकोणभवनानि मूलत्रिकोणराशयः भवन्ति।

  प्रयोजनम्-त्रिकोणस्थाने त्रयः अधिकग्रहाः बलवत्तराः सति नरेन्द्राः भवन्ति।

  "**उच्चस्वत्रिकोणगैबलस्थैस्त्र्याद्यैभूपतिवंशजाः नरेन्द्राः।**"

**मूलत्रिकोणस्थानानि।**

| | | | |
|---|---|---|---|
| | कुजः। | चन्द्रः। | |
| शनिः। | मूलत्रिकोणस्थानानि। | | |
| | | | रविः। |
| गुरुः। | | शुक्रः। | बुधः। |

**श्लोकः -सिंहो वृषप्रथमषष्ठहयाङ्गतौलिकुम्भास्त्रिकोणभवनानि भवन्तिसूर्यात् ।**

**अन्वयः**-सूर्यात्प्रारभ्य सप्तग्रहाणां क्रमशः सिंह-वृष-प्रथम-षष्ठ हयाङ्ग-तौलि-कुम्भाः राशयः मूलत्रिकोणभवनानि भवन्ति।

**अन्वयार्थः**=सिंहो=सिंहराशिः;वृषः=वृषभः; प्रथमः=मेषः; षष्ठः=कन्या; हयाङ्ग=धनुः; तौलि=तुला; कुम्भा=कुम्भराशिः; त्रिकोण=मूलत्रिकोणभवनानि भवन्तिसूर्यात्=रव्यादितः ।

**भावः**=सूर्यादितःसप्तग्रहाणां मूलत्रिकोणसंज्ञाः कथिताः। तेषु सूर्यस्य सिंहः, चन्द्रस्य वृषभः, कुजस्य मेषः, बुधस्य कन्या, गुरो-धनुः, शुक्रस्य तुला, शनेः कुम्भः च मूलत्रिकोणस्थानम् भवति।

**भावाः।**

| | | | |
|---|---|---|---|
| लग्नम् तनुः | कुटुम्बम् | सहोदरः | बन्धुः |
| रिःफम् | भावाः | | पुत्रः |
| आयाः | | | अरिः |
| आस्पदः कर्म | शुभः | मरणम् | पत्नी |

प्राचीनकालेषु जलयन्त्रवशात् छायायन्त्रवशात् वा स्पष्टग्रहस्फुटं जानन्ति स्म। साम्प्रतमस्मिन् युगे सङ्गणकादीनां वशात् लग्नस्फुटंग्रहाणां स्पष्टग्रहस्फुटम् ज्ञातुम् शक्यते। एवं लग्नस्फुटं सम्यग् ज्ञात्वा फलादेशयै लग्नादि द्वादशभावानां संज्ञाः कथिताः। ताः संज्ञाः लग्नाधारेण चिन्त्याः। होरादयःअर्थात् लग्नादयः, द्वादशभावाः तनु-कुटुम्ब-सहोत्थ-बन्धु-पुत्र-अरि-पत्नी-मरणानि-शुभ-आस्पद-आयाः-रिःफाख्यानांभवन्ति। लग्नस्य तनुः, द्वितीयभावस्य कुटुम्बम्, तृतीयभावस्य सहोदरः इति, चतुर्थभवास्य बन्धुः, पञ्चमभावस्य पुत्रः, षष्ठभावस्य शत्रुः,सप्तमभावस्य पत्नी, अष्टमभावस्य मृत्युः, नवमभावस्य शुभः इति संज्ञाः भवन्ति।दशमभावस्य कर्मः,एकादशभावस्य आयः, द्वादशभावस्य रिःफं, व्ययम् वा, इति च संज्ञाः भवन्ति। एते संज्ञाधारेण भावीफलानि चिन्त्यानि भवन्ति।

अरिकर्मलाभादुश्चिक्यसंज्ञितगृहाणि उपचयानि भवन्ति। लग्नात् तृतीय-षष्ठ-दशम-एकादशभावाः उपचयभावाः इति संज्ञायुक्ताः भवन्ति।

**भावसंज्ञाः**

| | | | |
|---|---|---|---|
| लग्नम्, कल्पम् | स्वम् | विक्रमः | गृहम् |
| व्ययः | भावाः | | प्रतिभा |
| भवः | | | क्षतम् |
| मानः | गुरुः | रन्ध्रः | चित्थोत्था |

**श्लोकः -**

**होरादयस्तनुकुटुम्बसहोत्थबन्धुपुत्रारिपत्नीमरणानिशुभाऽस्पदायाः।**
**रिःफाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञित गृहाणि च न नित्यमेके।।(वसन्ततिलका)**

**पदच्छेदः**=होरा-आदयः तनु-कुटुम्ब-सहोत्थ-बन्धु-पुत्र-अरि-पत्नी-मरणानि शुभ-आस्पद-आयाःरिःफा-आख्यम्इति उपचयानि अरि-कर्म-लाभ-दुश्चिक्य-संज्ञितगृहाणि न नित्यम् एके ।।

**अन्वयः**=होरादयः प्रथमभावतः तनु-कुटुम्ब-सहोत्थ-बन्धु-पुत्र-अरि-पत्नि-मरणानि शुभ-आस्पद-आय-रिष्पाख्यमितिसंज्ञाः भवन्ति। अरि-कर्म-लाभ-दुश्चिक्य-तृतीयाः उपचयान् गृहाणि संज्ञितः, न नित्यमेके।

**अन्वयार्थः**=होरादयः=लग्नादयः,प्रथमभावतः=लग्नभावतः, तनुः=शरीरः अर्थात् शरीरचिन्तनम्,कुटुम्बः=कुटुम्बचिन्तनम्, सहोत्थः=भ्रातृचिन्तनम्, बन्धुः=बन्धुचिन्तनम्, पुत्रः=उत्तराधिकारीचिन्तनम्, अरिः=शत्रुः, पत्नि=शयनचिन्तनम्; मरणानि =मृत्युचिन्तनम्, शुभः=भाग्यचिन्तनम्, आस्पदः=कर्मचिन्तनम् आजीविका चिन्तनम्, आयः=प्राप्तिः, रिष्पाख्यमिति=व्ययमिति संज्ञाः भवन्ति। अरिः=शत्रुः स्थानम् षष्ठभावः, कर्मः=दशमभावः, लाभः=एकादशभावः, दुश्चिक्यः= तृतीयभावः, एतेषां भावानाम् उपचयसंज्ञाः भवन्ति।न नित्यमेके=एके आचार्याः उपचयस्थानं नित्यम् इति न आमनन्ति।

**भावः**=लग्नात् प्रारभ्य द्वादशभावानां संज्ञाः कथिताः। ते तनुः कुटुम्बः सहोत्थः बन्धुःपुत्रः अरिः पत्नी मरणम् शुभम्आस्पदः आयः रिष्पाख्यमिति संज्ञाः यथाक्रमं भवन्तिइति भावः।

**बोधप्रश्नाः**

9. होरादिभावानां संज्ञाः लिखत।
10. रव्यादिग्रहाणां मूलत्रिकोणस्थानानि लिखत।

### 3.12. लग्नादिभावानां संज्ञाः।

प्रागुक्तवत् द्वादशभावानां द्वादशसंज्ञाः कथिताः। लोकव्यवहारार्थं प्रागुक्तद्वादशभावानां पर्यायाः कथिताः।लग्नं कल्पमिति ज्ञेयम्। कल्पःअर्थात् तनुः लग्नात् चिन्त्यः।लग्नं कल्पाख्यम्।

कल्पः शक्तिवाची। द्वितीयभवनात् स्वम् अर्थात् विद्या,सम्पत्, धनम् इत्यादि चिन्तनीयम् । तृतीयभवनात् विक्रमं चिन्तनीयम्। चतुर्थभवनात् गृहं चिन्तनीयम्।पञ्चम भवनात् प्रतिभा, विद्या,सन्तानः, उत्तराधिकारी,इत्यादिविचारान् विचिन्तयेत्। षष्ठभावेन शत्रुः क्षतिः इत्यादि चिन्तयेत्।सप्तमभावेन चित्तोत्था, इष्टं,शयनं, सुखञ्च चिन्तनीयम्। अष्टमभावेन रन्ध्रः, मरणं, मृत्युः, चिन्तनीयम्। नवमभावेन गुरुः, शुभम् इत्यादि विचिन्तयेत्। दशमभावेन मानः, कर्म, आजीविकाविचारं चिन्तनीयम्। एकादशभावेन भवः प्राप्तिः चिन्तनीया। द्वादशभावेन व्ययः गतजन्मविचाराः चिन्तनीयाः। अत्र स्मर्तव्यः तथ्यः-

- कल्प-स्व-विक्रम-गृह-प्रतिभा-क्षतानिचित्तोत्थ-रन्ध्र-गुरु-मान-भव-व्ययानि इति लग्नादिद्वादशभावानां संज्ञान्तराणि कथितानि।

लग्नात् चतुर्थनिधने "**चतुरस्र**"संज्ञे भवतः। सप्तमं गृहं **द्यूनम्** इति कथ्यते। दशमर्क्षम् **आज्ञा** इति कथ्यते। लग्नात् चतुर्थभवनम्, निधनभवनम् अर्थात् अष्टमभवनम् अनयोः चतुरस्रम् इति कथ्यते। सप्तमभवनम् द्यूनम् इति संज्ञा भवन्ति। दशमगृहम् आज्ञा इति संज्ञा भवति।

**संज्ञाः।**

| | | | |
|---|---|---|---|
| **लग्नम्** | | | **चतुरस्रम्** |
| | | | |
| | | | |
| **आज्ञा** | | **चतुरस्रम्** | **द्यूनम्** |

**श्लोकः-"कल्पस्वविक्रमगृहप्रतिभाक्षतानिचित्तोत्थरन्ध्रगुरुमानभवव्ययानि । लग्नात्चतुर्थनिधनेचतुरस्रसंज्ञेद्यूनंचसप्तमगृहंदशमर्क्षमाज्ञा।।(वसन्ततिलका)** "

**पदच्छेदः**-कल्प-स्व-विक्रम-गृह-प्रतिभा-क्षतानि चित्तोत्थ-रन्ध्र-गुरु-मान-भव-व्ययानि लग्नात् चतुर्थनिधने चतुरस्रसंज्ञे द्यूनं च सप्तम-गृहं दशम ऋक्षम् आज्ञा ।

**अन्वयः**= कल्पस्वविक्रमगृहप्रतिभाक्षतानि चित्तोत्थरन्ध्रगुरुमानभवव्ययानि द्वादशसंज्ञा । लग्नात् चतुर्थनिधने चतुरस्रम्,सप्तमगृहं द्यूनं दशमं च खम् आज्ञासंज्ञम्।

**अन्वयार्थः**=कल्य=**शरीरम्**, स्व=**सम्पत्**, विक्रम=पराक्रमः, गृहम्=भवनम्, प्रतिभा=नवनवोन्मेषशालिनी प्रतिभा, क्षतानि=कष्टानि, चित्तोत्थ=इष्टम्,रन्ध्रम्=नाशम्,गुरुः=धर्मः,शुभः, मानः=अभिमानः, भव= व्यय= द्वादशतम भावस्य संज्ञा । लग्नात्=लग्नभावात्, चतुर्थनिधने=चतुर्थाष्टमभावे, चतुरस्र=चतुरस्रनाम्नसंज्ञा,सप्तमगृहं=सप्तमभवनम्, द्यूनं=सप्तमभवनस्य संज्ञा, दशमं=दशमभावम्, च खम्=आकाशम् इति संज्ञा,आज्ञा=दशमभवनस्य संज्ञा भवति।

**भावः**=लग्नादिद्वादशभावानां क्रमशः संज्ञाः कथिताः। प्रथमभावस्य कल्पेति, द्वितीयभावस्य स्वम् इति तृतीयभावस्य विक्रममिति, चतुर्थभावस्य गृहमिति, पञ्चमभावस्य प्रतिभा इति, षष्ठभावस्य शत्रुः इति, सप्तमभावस्य जाया इतिसंज्ञाः वर्तन्ते।मरणम्-धर्म-मान-आय(प्राप्तिः)-व्ययाः इति

सप्तमभवनात् क्रमशः द्वादशभावाः भवन्ति। लग्नात् चतुर्थभावः, अष्टमभावः, अनयोः चतुर्थसंज्ञया मन्यन्ते। सप्तमभावं द्यूनमिति अभिधीयन्ते। दशमभावम् आज्ञा संज्ञया मन्यन्ते इति भावः।

**बोधप्रश्नाः।**

11. लग्नादि द्वादशभावेषु आजीविका निर्णयः कस्मात् भावात् क्रीयते?
12. उत्तराधिकारी केन भावेन चिन्त्यते?
13. लग्नादीनां भावानां संज्ञानि लिखत?
14. द्यूनम् इति कस्य भावस्य संज्ञा भवति?
15. चतुरस्रमिति कस्य भावस्य संज्ञा भवति?
16. आज्ञा इति कस्य भावस्य संज्ञा भवति?

### 3.13. उपचयभावाः।

अरिकर्मलाभाः दुश्चिक्यसंज्ञितगृहाणि उपचयानि भवन्ति। लग्नात् तृतीय-षष्ठ-दशम-एकादश-भावाः "**उपचय**भावाः" इति संज्ञायुक्ताःभावाः भवन्ति।इतरभावाः अपचयभावाः इति कथ्यन्ते। एते उपचयस्थानानि न नित्यानि इति एके (केचन) आचार्यः अभिप्रयन्ति। उपचयस्थानम् अनित्यम् इति न वराहमिहिराचार्येणाभिप्रेतं मतम्। तच्च अनित्यम् इति वचनम्-

**उपचयसंज्ञाः।**

| | | | |
|---|---|---|---|
| **लग्नम्।** | अपचयः। | **उपचयः 3।** | अपचयः। |
| अपचयः। | **भावाः** | | अपचयः। |
| उपचयः11। | | | **उपचयः6।** |
| उपचयः10। | अपचयः। | अपचयः। | अपचयः। |

**"अथोपचयसंज्ञाः स्यात्**
**त्रिलाभरिपुकर्मणाम्।**
**न चेत् भवन्ति ते दुष्टाः पापैः**
**स्वस्वामिशत्रुभिः।।"**

अत्रस्मर्तव्याः अंशाः-

- लग्नात् तृतीय-षष्ठ-दशम-एकादश-भावाः "**उपचय**भावाः" इति संज्ञायुक्ताःभावाः भवन्ति।
- एते भावाः न नित्यम् इति एके केचन दैवज्ञाः वदन्ति। एते भावाः पापग्रहैः स्व स्वामिशत्रुभिः दृष्टाः चेत् उपचययत्वं परित्यजन्ति इति केचन दैवज्ञानाम् आशयः एतन्मतं वराहमिहिराचार्यस्य नाभिप्रेतम्।

**बोधप्रश्नाः-**

17. उपचयसंज्ञा भावाः के?
18. उपचयभावविषये इतराचार्यानांमतानां विशदयत।

### 3.14. संज्ञाविशेषाः।

राशिचक्रस्य पूर्वक्षितिजे लग्नं भवति। सप्तमगृहं पश्चिमस्यां दिशि भवति। दशमभवनं खमध्ये भवति। एवं संज्ञा विशेषाः भवन्ति। एवं विद्यमाने राशिचक्रमाधृत्य संज्ञाः कथिताः। ताः विव्रीयन्ते। लग्नात् चतुर्थनिधने ***"चतुरस्र"*** संज्ञा भवति। सप्तमं गृहं **द्यूनमि**ति कथ्यते। दशमर्क्षम् **आज्ञा** इति कथ्यते। लग्नात् चतुर्थभवनं, निधनभवनम् अर्थात् अष्टमभवनम् अनयोः चतुरस्रम् इति कथ्यते। सप्तमभवनम् द्यूनम् इति संज्ञा भवन्ति। दशमगृहम् आज्ञा इति संज्ञा भवन्ति।

### 3.15. कण्टकादिसंज्ञाः तत् राशिबलञ्च।

केन्द्रादिभावानां संज्ञानि वर्तन्ते। तानि अग्रे विव्रीयन्ते।कण्टकं-केन्द्रं-चतुष्टयाः इति केन्द्रस्थानस्य संज्ञाः भवन्ति। तर्हि केन्द्रस्थानानि कानि? इति जिज्ञासायां, सप्तम-लग्न-चतुर्थ-खभानाम् अर्थात् प्रथमभावः ततः चतुर्थभावःसप्तमभावःदशमभावानाम् एवं केन्द्रसंज्ञितग्रहाणि भवन्ति। लग्नभावः चतुर्थभावः सप्तमभावः(आकाशः)दशमभावःकण्टकम् प्रथमासंज्ञा, केन्द्रम् इति द्वितीयसंज्ञा, चतुष्टयम् इति तृतीयासंज्ञा एवं तिस्रःसंज्ञाःभवन्ति।लग्ने नृराशयः बलिनः भवन्ति। चतुर्थभवने जलचरराशयः,सप्तमभवने कीटराशिः, दशमभवने चतुष्पादराशयः बलिष्ठाः भवन्ति।लग्ने नरराशयः मिथुन-कन्या-तुला-धनु-पूर्वार्ध-कुम्भाः बलिनः भवन्ति।चतुर्थजलचराःकर्कटकः, मकरराशेः अपरार्धः, मीनः च बलिनः भवन्ति। सप्तमे कीटराशिः वृश्चिकः बलाढ्यः भवति।दशमे मेषवृषसिंहधनुपरार्धमकरपूर्वार्धाः बलिनः भवन्ति। ख शब्दस्यार्थः आकाशम्।तदुक्तम् अमरकारेण**"नभोऽन्तरिक्षं गगनम् अनन्तम् सुरवर्त्मखम्"**। अतः ख शब्दः दशमभावं द्योतयति। अतः ख शब्देन आकाशे तत्काले विद्यमानराशिः ज्ञायते। अनेन खशब्देन उदयलग्नात् दशमभावं मन्यन्ते।

| *भावाः।* | *संज्ञाः।* | *राशयः।* |
|---|---|---|
| *प्रथमभावे* | *नराः* | *मिथुनम्, कन्या,तुला, धनुपूर्वार्धः,कुम्भः।* |
| *चतुर्थभावे* | *जलचराः* | *कर्काटकः,मकरपूर्वार्धः,मीनः।* |
| *सप्तमभावे* | *कीटः* | *वृश्चिकः।* |
| *दशमभावे* | *पशवः* | *मेषः,वृषः, सिंहः,धनुः ।* |

**कण्टकादिसंज्ञाः।**

| | | | |
|---|---|---|---|
| लग्नम् कण्टक/केन्द्र/चतुष्टयः। | | | कण्टक/केन्द्र/चतुष्टयः। |
| | | | |
| | | | |
| कण्टक/केन्द्र/चतुष्टयः। | | | कण्टक/केन्द्र/चतुष्टयः। |

**कण्टककेन्द्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानाम् ।**

**तेषु यथाभिहितेषु बलाढ्याः कीटनरांबुचराः पशवश्च ।।(दोधक)**

**अन्वयः**-केन्द्र-चतुष्टयसप्तमलग्नचतुर्थसंज्ञा, तेषु यथा अभिहितेषु बलाढ्यः कीटनराम्बुचराः पशवश्च।

**अन्वयार्थः**=केन्द्र- सप्तमलग्नचतुर्थदशमभवनानाम् केन्द्रेति संज्ञा। कण्टक चतुष्टय इति केन्द्रस्थानानां संज्ञे भवतः। सप्तम=सप्तमभवनम्।लग्नम्=लग्नभवनम्। चतुर्थसंज्ञा=चतुर्थभवनम्। तेषु यथा अभिहितेषु बलाढ्यः कीटनराम्बुचराः पशवश्च=प्रागुक्तस्थानेषु यथाक्रमं कीटनराजलचराः राशयः बलिनः भवन्ति।

**भावः**=सप्तमलग्नचतुर्थदशमराशीनां प्रत्येकस्य कण्टककेन्द्रचतुष्टयम् इति तिस्रः संज्ञाः कथिताः। तेषु स्थानेषु कीट-नर-अम्बुचराः पशवः च राशयः बलाढ्याः भवन्ति।

**बोधप्रश्नाः**

19. कीटराशयः के?
20. नरराशयः के?
21. जलचरराशयः के?
22. चतुष्पादराशयः के?

### 3.16. भावानां पणफरत्रिकोणसंज्ञाविशेषाः।

लग्नात् केन्द्रस्थानानि कथितानि। केन्द्रस्थानात् परं विद्यमानक्षेत्राणां संज्ञान् आचार्यः वक्ष्यति।केन्द्रात् परं द्वितीयस्थानं पणफरं, तस्मात् परतश्च सर्वम् आपोक्लीमस्थानं भवति। लग्नात् द्वितीयभावः, पञ्चमभावः, अष्टमभावः, एकादशभावः एते भावाः पणफरस्थानानि भवन्ति।लग्नात् तृतीयभावः, षष्ठभावः, नवमभावः, द्वादशभावः च एते भावः आपोक्लीमस्थानानि भवन्ति। मेषूरणं दशमस्थानस्य संज्ञा भवति। अत्र अस्मिन् दशमे स्थाने कर्म इति अपरासंज्ञा विद्यात्। हिबुकम्,

अम्बु, सुखम्, इति चतुर्थभावस्य संज्ञाः भवन्ति।उदयलग्नात् सप्तमस्थानम् अस्तम् इति उच्यते । सप्तमभवनस्य जामित्रम् अस्तभवनम् इत्यपि संज्ञाः वर्तन्ते। पञ्चमभावः सुतः, त्रिकोणसंज्ञा च भवतः।अत्रस्मर्तव्याः अंशाः-

- केन्द्रात् द्वितीयस्थानं पणफरस्थानं भवति। पणफरस्थानात् द्वितीयस्थानम् आपोक्लीमस्थानं भवति।
- हिबुकम् अम्बु सुखंच चतुर्थभवनस्य संज्ञाः भवन्ति। अस्तभवनं, जामित्रम् इति सप्तमस्थानस्य पर्यायपदानि भवन्ति। सुतः त्रिकोणम् इति पञ्चमभवनस्य संज्ञाः भवति। दशमस्थानस्य कर्मसंज्ञा भवति।

**केन्द्र-पणफर-आपोक्लीमसंज्ञाः।**

| | | | |
|---|---|---|---|
| **लग्नम् केन्द्रम्** | **पणफरम्** | **आपेक्लीमम्** | **केन्द्रम्** |
| **आपेक्लीमम्** | **भावाः** | | **पणफरम्** |
| **पणफरम्** | | | **आपेक्लीमम्** |
| **केन्द्रम्** | **आपेक्लीमम्** | **पणफरम्** | **केन्द्रम्** |

**लग्न-वेश्म-सुत-जामित्रम्।**

| | | | |
|---|---|---|---|
| **लग्नम्** | | | **अम्बु/वेश्म /सुखम्** |
| | | | **सुतभम्/ त्रिकोणम्** |
| | | | |
| **मेषूरणम्/ दशमम्/ कर्मम्** | | | **जामित्रम् /अस्तभवनम्** |

**केन्द्रात् परं पणफरं परतस्तु सर्वमापोक्लिमं हिबुकम् अम्बुसुखं च वेश्म ।**

**जामित्रम् अस्त भवनं त्रिकोणं मेषूरणं दशममत्र च कर्मविद्यात् ।।(वसन्ततिलका)**

**पदच्छेदः**-केन्द्रात् परं पणफरं परतः तु सर्वम् आपोक्लिमं हिबुकम् अम्बु सुखं च वेश्म ।जामित्रम् अस्तभवनं त्रिकोणं मेषूरणं दशमम् अत्र च कर्म विद्यात् ।

**अन्वयः**–केन्द्रात् परं पणफरं(2,5,8,11) परतश्च सर्वमापोक्लीमं(3-6-9-12), हिबुकम्-अम्बु-सुखं- च-वेश्म(चतुर्थभावं)-जामित्रम् अस्तभवनं(सप्तमं), सुतभं त्रिकोणं (संज्ञं)मेषूरणं दशममत्र कर्म च विद्यात्।।

**अन्वयार्थः**=केन्द्रात्=केन्द्रस्थानात्, परं=तदनन्तरम्, पणफरं(2,5,8,11)=पणफरसंज्ञा, परतश्च=तदनन्तरम् सर्वमापोक्लीमं(3-6-9-12)=तदनन्तरम्,हिबुकम्=चतुर्थम्,अम्बु=जलम्, सुखं=सप्तमस्थानम्, चवेश्म(चतुर्थभावं)=गृहम्, जामित्रम्=पत्नीस्थानम्, अस्तभवनं(सप्तमं)=सप्तमभवनम्, सुतभं= त्रिकोणं(संज्ञां)=मेषूरणं= दशममत्र= कर्म= च, विद्यात्=जानीयात्।।

**भावः**-वेश्म-हिबुकम्-अम्बु-सुखञ्चचतुर्थस्थानस्य पर्यायपदानि भवन्ति। अस्तभवनं जामित्रं सप्तमस्थानस्य पर्यायाःभवन्ति। सुतभं पञ्चमस्थानं त्रिकोणसंज्ञा भवति। दशमं मेषूरणम् इति संज्ञा भवति।दशमस्थानेन कर्मचिन्तनं जानीयात्।

**बोधप्रश्नाः-**

23. वेश्मसंज्ञा इति कस्य भावस्य संज्ञा भवति?
24. केन्द्रस्थानानि कानि?
25. पणफरस्थानानि कानि?
26. आपोक्लीमस्थानानि कानि?

### 3.17. बलविचारः।

सामान्यतया जनाः मित्रेण सहमेलनेन सन्तोषम् अनुभवन्ति। तथैव गुरुणा मार्गदर्शनेन कष्टप्रदकार्याणि अपि सरलतया स्वल्पैः कालैः साधयन्ति। तथैव ग्रहाः गुरुणा दृष्टाः भावाः ग्रहाः च बलवत्तराः भवन्ति। बुधेन युक्ते दृष्टे वा भावः बलवत्तरः भवति।षड्बलानि प्रसिद्धानि वर्तन्ते। तादृशं बलविचारं ज्ञास्यामः।

#### 3.19.1. होराबलम् ।

लग्नाधिपतिना, गुरुणा, बुधेन, स्वराशायधिपेन वा वीक्षितःसंयुताभावःवीर्योत्कटःअर्थात् बलवतः भवति। नान्यैः अर्थात् अन्यग्रहैः वीक्षिता युता वा न वीर्योत्कटःभवति। अन्यग्रहैः नाम केभिः? इति पूर्वपक्षः। तदुच्यते, होरास्वामिः(लग्नाधिपः)गुरुः,बुधः एभिः वर्जितैः इतरग्रहैः इति। गुरुबुधलग्नाधिपेन युतः दृष्टः वा भावः बलवत्तरः इति सुस्थापितः सिद्धान्तः। अस्य विपरीतेन अन्येन ग्रहेण दृष्टे संयुते बलवत्तरं न भवति, अर्थात् बलहीनं भवति इति अभावसिद्धान्तः। अनेन सिद्धं भवति यत् क्वचित् सन्दर्भेषु मिश्रिते अर्थात् गुरुबुधलग्नाधिपतिषु अन्यतमेषु यः कश्चित् दृष्टःयुतः वा अपि च इतरग्रहाणां संयुतः दृष्टः वा सति मध्यमबलम् इति ज्ञातव्यम्। एवं ग्रहाणां बलम् अनुपातेन ज्ञातव्यमिति लक्ष्यार्थः। यदि यः कश्चित् भावः येनकेनापि ग्रहेणः दृष्टः युतः वा न तर्हि किम् ? इति प्रश्नःस्वरूपे, तादृशः निर्बलः भावः भवति। तदुक्तं च आचार्याबादरायणेन -

"जीवस्वनाथशशिजैयुतदृष्टा बलवति भवति होरा।

मैषैर्बलहीना स्यात् एवं मिश्रैस्तु मध्यबला। बलहीना यदि सर्वै न वीक्षिता नैव युक्ता वा। "तथा चोक्तं प्रश्नमार्गकारेण –

**"यो यो भावः स्वामिदृष्टोयुतो वा।सौम्यैः वा स्यात्तस्या तस्याप्तिवृद्धिः।**

**पापैरेवं तस्य भावस्यहानिः। विज्ञातव्यो प्रश्नते जन्मतोवा।।"**

यः भावः, भावस्वामिनादृष्टः सः भावः बलवत्तरः भवति। यः भावः भावस्वामिना युतः सः भावः बलवत्तरः भवति। यस्मिन् भावे शुभग्रहाः भवन्ति, तस्मिन् भावस्य वृद्धिः भवति। पापैः तस्य भावस्य हानिः भवति। प्रश्नतः जन्मलग्नतः वा ज्ञातव्यःभवति। अस्मिन् सन्दर्भे भवतः स्मर्तव्याः अंशाः-

- यः भावः होरास्वामिना वीक्षिता सः भावः वीर्योत्कटः भवति। तथा एव यदि लग्नपतिना संयुता भावः तर्हि बलवत्तरः भवति।
- यः भावः गुरुणा बुधेन दृष्टः वीक्षिता स्यात् संयुता वा स्यात् सः भावः बलवत्तरः भवति।

**तच्च श्लोकम्-**

**होरा स्वामिगुरुज्ञवीक्षितयुतानान्यैश्च वीर्योत्कटा ।**

**केन्द्रस्था द्विपदादयो अह्निनिशि च प्राप्ते च संध्याद्वये ।**

**पूर्वार्धे विषयादयः कृतगुणा मानं प्रतीपं च तद्।**

**दुश्चिक्यं सहजं तपश्च नवमं त्र्याद्यां त्रिकोणं च तत् ।।(शा वि)**

**केन्द्रास्थाः** इति शब्दं प्रयुक्तं वर्तते। अनेन केन्द्रस्थिताः ग्रहाः बलिनः, पणफरस्थिताः मध्यबलिनः, आपोक्लीमस्थाः बलहीनाः इति लक्ष्यार्थः।**"द्विपदादयः"** द्विपदराशयः दिवसि बलवत्तराः भवन्ति। **चतुष्पदराशयः** मध्यमबलिनः निशि भवन्ति। **कीटराशयः**सन्ध्याद्वये बलहीनाः भवन्ति।एषः नियमः न केवलं लग्नभावस्यैव, अपि च सर्वेषां, भावानाम् अनुसरणीयः इति तात्पर्यः। दुश्चिक्यं, सहजम् इति तृतीयभावसंज्ञा भवति।तपः इति नवमभावसंज्ञा भवति। नवमस्थानं त्रित्रिकोणम् इति संज्ञा भवति।

**बलविचारः।**

| | | | |
|---|---|---|---|
| | **लग्नम्, गुरुः।** | | |
| | | | |
| | | | |
| | | **कुजः; बुधः।** | |

**"होरा स्वामिगुरुज्ञवीक्षितयुतान अन्यैश्च वीर्योत्कटा।**

**केन्द्रस्था द्विपदादयो अह्नि निशि च प्राप्ते च संध्याद्वये ।**

**पूर्वार्धे विषयादयः कृतगुणा मानं प्रतीपं च तत्।**

**दुश्चिक्यं सहजं तपश्च नवमं त्र्याद्यां त्रिकोणं च तत् ।।(शा वि)**

**पदच्छेदः**-होरास्वामि गुरु-ज्ञ-वीक्षित-युताः न अन्यैः च वीर्य-उत्कटा केन्द्रस्थाः द्वि-पद-आदयो अह्निनिशि च प्राप्ते च संध्याद्वये ।पूर्व-अर्धे-विषय-आदयः कृत-गुणा मानं प्रतीपं च तद् दुश्चिक्यं सहजं तपः च नवमं त्रि-आद्यां त्रि-कोणं च तत्।।

**अन्वयः** -(लग्नाधिप) होरास्वामिगुरुज्ञवीक्षितयुता नान्यैश्च (अन्येग्रहा न युता दृष्टा तदा) वीर्योत्कटाः द्विपदादयो (द्विपद-चतुष्पाद क्रमशः कीटाः) अह्निनिशिसंध्याद्वये च प्राप्ते तदा वीर्योत्कटा । विषयादयः 5-6-7-8-9-10 कृतगुणा मानं पूर्वार्द्धे (मेषादयः प्रतीपं ) च तत् (तुलादयः) दुश्चिक्यं सहजं तृतायं , तपश्च त्र्याद्यं त्रिकोणं च तत्।

**अन्वयार्थः**=होरा =लग्नम्, स्वामिः=अधिपतिः, गुरुः=जीवः,ज्ञः=बुधः, वीक्षितः=**दृष्टा**,युता=संयुता, नान्यैः च = अन्येग्रहा न युता दृष्टा तदा, वीर्योत्कटाः=बलवत्तराः, द्विपदादयो =द्विपद-चतुष्पाद क्रमशः कीटाः, अह्नि =**दिवाकाले**,निशिः=रात्रिः, संध्याद्वये =**दिवारात्रिसन्धिः रात्रिदिवासन्धिः एवं सन्ध्या द्वये**,च प्राप्ते=सम्प्राप्ते, तदा वीर्योत्कटा=बलवत्तराः । विषयादयः= 5-6-7-8-9-10, कृत=कृतशब्दस्य चत्वारः संख्याःभवन्ति। गुणाः=चतुर्विंशतिगुणाः, मानं =मानकम् । पूर्वार्द्धे=पूर्वभागेमेषादयः प्रतीपं, च तत्=तुलादयः, दुश्चिक्यं सहजं = तृतीयं भवनम्, भ्रातृसंज्ञा , तपः=नवमभावः।

**भावः**=लग्नं लग्नस्वामि-गुरु-बुधवीक्षितयुता बलवत्तरं भवति।अन्यैः विक्षितयुता न च बलवत्तरं भवति। द्विपदराशयः अहनि, चतुष्पदराशयः निशि कीटराशयः पूर्वपश्चिमसन्ध्यायांबलिनः भवन्ति इति।

**बोधप्रश्नाः-**

27. **होरास्वामिः नाम कः?**

28. **ज्ञ शब्दस्यार्थः कः?**

29. **लग्नपतिः कदा बलवान् भवति?**

3.19.2. **राशिबलम्।**

केन्द्रस्थिताः राशयः बलिष्ठाः भवन्ति। पणफरे स्थिताः राशयःमध्यबलाः भवन्ति। आपोक्लीमस्थाः राशयः हीनबलाः भवन्ति। **द्विपदराशयः** द्विपद-चतुष्पद-कीटराशयः क्रमेण अह्नि निशिः सन्ध्योदये प्राप्ते च बलिष्ठाः भवन्ति।अत्र कीटशब्देन वृश्चिकेन सहितः सर्वे जलराशयः अपिग्राह्यः। द्विपदराशयः नरराशयः अह्नि बलिष्ठाः भवन्ति।चतुष्पदराशयः पशुराशयः निशिबलिष्ठाः भवन्ति। कीटराशयः वृश्चिकजलचराः सन्ध्याद्वये बलिष्ठाः भवन्ति।

**सहजं तृतीयभावः-** दुश्चिक्यम् इति संज्ञां लभते।

**नवमभावः**-तपः याद्यं त्रिकोणं च त्रित्रिकोणम् इत्यपि कथ्यते।

**बोधप्रश्नाः**

30. **सन्ध्याकाले के राशयः बलिनःभवन्ति?**

31. **दुश्चिक्यसंज्ञा कस्य भावस्य भवति?**

32. **तपः संज्ञा कस्य भावस्य भवति?**

3.20. **राशीनां प्रमाणम्।**

राशीनां पूर्वचक्रम् अपरचक्रम् चेति चक्रद्वयं वर्तते। मेषादितः षड्राशयः पूर्वार्धराशयः भवन्ति। तुलादितः षड्राशयः अपरार्धराशयः भवन्ति। मेषादीतः मीनान्तं यावत् राशीनां बलगणनाक्रमः अत्र प्रस्तूयते। पञ्चेन्द्रयाणि पञ्चविषयाणां द्योतकानि भवन्ति। विषयशब्दस्यार्थः पञ्च इति अवगन्तव्यम्। राशिचक्रस्य पूर्वार्धे अर्थात् मेषादयः षड्राशयः भवन्ति। विषयादयः पञ्चप्रभृतयः 5,6,7,8,9,10 कृतगुणाः चतुर्भिर्गुणिताः पूर्वार्धे(राशिचक्रस्य पूर्वार्धे) मेषादिषड्राशिषु मानं प्रमाणं भवति। तदेव **प्रतीपम्** अर्थात् विलोमेन सितं तुलादीनांषण्णां राशीनां प्रमाणानि भवन्ति।

तुला,वृश्चिकः,धनुः,मकरः,कुम्भः,मीनःच इति राशिचक्रस्य अपरार्धस्थिताः षड्राशयः भवन्ति। राशिचक्रस्य अपरार्धस्थितानां ग्रहाणां प्रगुक्तक्रमात् विपरीतेन अर्थात् 10,9,8,7,6,5 इति संख्यानां चतुर्थसंख्यया गुणना करणीयम्। तदानीं राशेः प्रमाणानि प्राप्स्यन्ते। तानि तुलायाः 10*4=40, वृश्चिकस्य 9*4=36, धनुषः **8*4=32 मकरस्य 7*4=28,कुम्भस्य 6*4=24, मीनस्य5*4=20, एवं क्रमशः प्रमाणानि भवन्ति।**

**उपचयसंज्ञाः।**

| | | | |
|---|---|---|---|
| 20 | 5*4=20 | 6*4=24 | 7*4=28 |
| 24 | भावाः | | 8*4=32 |
| 28 | | | 9*4=36 |
| 32 | 36 | 40 | 10*4=40 |

**अत्र स्मर्तव्ये अंशे।**

- विंशतिः चतुर्योजिते, मेषादिआरभ्य राशिप्रमाणानि भवन्ति। यथा मेषस्य विंशतिः,वृषभस्य चतुर्विंशति इयादि। पुनः तुलादिषड्राशीनां प्रमाणानि , चत्वारिंशत् तः चतुर्न्यूनीकृते भवति।
- विंशतिः,चतुर्विंशतिः, अष्टाविंशतिः,द्वात्रिंशत्, षड्त्रिंशत्, चत्वारिंशत् इति मेषादीनां षड्राशीनां राशिप्रमाणानि भवन्ति।

**बोधप्रश्नाः-**

33. **मेषादिषड्राशीनां प्रमाणानि कानि?**
34. **राशिचक्रस्य पूर्वभागे स्थिताः राशयः के?**
35. **राशिचक्रस्य पश्चिमभागे स्थिताः राशयः के?**

3.21. **राशीनां वर्णः।**

दैवज्ञेन सुस्पष्टफलनिर्देशनाय निर्दोषत्वेन फलप्रवचनाय अनेकाः सामग्र्यः अपेक्षन्ते तेषु राशीनां वर्णविचारोऽपि अन्यतमः।द्वादशराशीनां कारकवर्णाः कथिताः। ते च लिख्यन्ते। मेषः रक्तवर्णः अर्थात् लोहितवर्णः, वृषः शुक्लवर्णःअर्थात् श्वेतवर्णः, मिथुनः शुकतनुःअर्थात् हरितवर्णः, कर्काटकः पाटलपुष्पवर्णःअर्थात् ईशत् कृष्णरक्तः इत्यर्थः,सिंहः धूम्रपाण्डुरः अर्थात् ईषत् शुक्लः,कन्या चित्रावर्णः नानवर्णाः इत्यर्थः, तुला कृष्णवर्णः, वृश्चिकः कनकसदृशःअर्थात् सुवर्णवर्णः, धन्वीपिङ्गलः पीतवर्णः मकरः कर्बुरः शुक्लकपिलव्यामिश्रवर्णः, कुम्भो बभ्रुः अर्थात् नकुलवर्णसदृशः,मीनः स्ववर्णः मत्स्यवर्णः इत्यर्थः।

**वर्णविचारः।**

| | | | |
|---|---|---|---|
| **स्वच्छः/मत्स्यवर्णः।** | **रक्तम्।** | **श्वेतः।** | **शुकतनुभिः।** |
| **बभ्रुः नकुलसदृशः।** | **मेषादिराशीनां वर्णाः।** | | **पाटलः।** |
| **खर्बुरः।** | | | **धूम्रपाण्डुः।** |
| **पिङ्गलः।** | **कनकसदृशः।** | **कृष्णः।** | **चित्रः।** |

**रक्तः श्वेतः शुकतनुनिभः पाटलो धूम्रपांडुः।**
**चित्रः कृष्णः कनकसदृशः पिङ्गलः कर्बुरश्च ।**
**बभ्रुः स्वच्छः प्रथमभवनाद्येषु वर्णाः प्लवत्वम्।**
**स्वाम्याशाख्यं दिनकरयुताद्भाद्वितीयं च वेशिः । ।(मं क्रां)१**

**पदच्छेदः**- रक्तः श्वेतः शुकतनुः निभः पाटलो धूम्रपांडुः चित्रः कृष्णः कनक सदृशः पिङ्गलः कर्बुरः च।बभ्रुः स्वच्छः प्रथमभवन-आद्येषु वर्णाः प्लवत्वं स्वामि-आशाख्यं दिनकरयुतात् भाद् द्वितीयं च वेशिः ।

**अन्वयः**- रक्तः श्वेतः शुकतनुभिः पाटले धूम्रपाण्डुः चित्रः कृष्णः कनकसदृशः पिङ्गलः कर्बुरश्च बभ्रु स्वच्छः प्रथमभवनादि एषु वर्णाः। स्वाम्याशाख्यं स्वामीदिशं प्लवत्वं दिनकरयुताद् सूर्यस्थानात् द्वितीयं च वेशि संज्ञा भवति।

**अन्वयार्थः**-रक्तः=लोहितवर्णः, श्वेतः=शुभ्रः, शुकतनुभिः=हरितवर्णः, पाटलः=ईशत् कृष्णरक्तः, धूम्रपाण्डुः=ईषत्शुक्लः, चित्रः=नानवर्णाः, कृष्णः= कनकसदृशः= पिङ्गलः=सुवर्णवर्णः,कर्बुरश्च= शुक्लकपिलव्यामिश्रवर्णः, बभ्रुः=नकुलवर्णसदृशः, स्वच्छः=मत्स्यवर्णः प्रथमभवनादि=मेषभवनादिषु एषु वर्णाः कथिताः । स्वाम्याशाख्यं=स्वामीदिशं= प्लवत्वं= दिनकरयुताद्= सूर्यस्थितस्थानात् , द्वितीयं=द्वितीयभवनम् च, वेशिसंज्ञा=वेशिनामयोगः भवति।

**भावः**=मेषादिषु राशिषु यथाक्रमम् एते वर्णाः भवन्ति। मेषः रक्तः, वृषः श्वेतः, मिथुनो शुकतनुभिः,कर्कः पाटलः, सिंहः धूम्रपाण्डुः, कन्या चित्रवर्णः, तुला कृष्णः, वृश्चिकः कनकसदृशः, धनुः पिङ्गलः, मकरः कर्बुरः, कुम्भः बभ्रुः, मीनः मत्स्यवर्णः भवति।

प्रयोजनम्-इतरप्राणीनां जन्मज्ञाने लग्नांशकेन फलकथने उपयोगः भवति।

**बोधप्रश्नाः**

36. मीनराशेः वर्णः कः?
37. द्वादशराशीनां वर्णाः लिखत।

### 3.22. **प्लवत्वं वेशिस्थानञ्च।**

राशिस्वामिसम्बन्धिता दिक् एव स्वाम्याशादिक् भवति। स्वाम्याशाख्यम् अर्थात् राशिस्वामेः सम्बन्धितदिशः इत्यर्थः।तस्मिन् दिशायां प्लवत्वं वदेत्।राशेः स्वामिनः अधिपतिः आशादिक् तदाख्यं राशेः प्लवत्वं ज्ञेयम्।राश्याधिपतेः दिशि राशेः निम्नता ज्ञेया।स्वजन्मराशिः, प्रश्नलग्नराशिः, वा यत् दिक् प्लवत्वं भवति, तां दिशं गतो राजः अचिरेण रिपून् जयति।तदुक्तं च सारावल्याम्-

**"भवनाधिपतिदिशातः प्लवेति यवनैः प्रयत्नतः प्रोक्तम्। तत्प्लवगो विनिहन्यादचिरेण महीपतिः शत्रून्।।"**

दिनकरयुतभात् द्वितीयस्थानं वेशिसंज्ञा भवति। रविस्थितराशितः द्वितीयराशिः वेशिंज्ञा भवति। ताराग्रहेषु यः कश्चित् तत्रस्थिते वेशिसंज्ञा योगः भवति। द्वादशं भवनं वासि इति संज्ञा निर्दिशन्ति। अस्मिन् सन्दर्भे चिन्तनीयः तथ्यः-

- राशिस्वामिना आशा यस्मिन् दिशि भवति तस्मिन् दिशि प्लवत्वं भवति अर्थात् जयः भवति।
- सूर्यात् द्वितीयस्थानं वेशिसंज्ञया ज्ञायते। सूर्यात् द्वादशस्थानं वासि इति संज्ञया ज्ञायते।अधः दिशः एवं राशिस्वामेः सम्बन्धं वर्तते।

**प्राची**-सिंहराशेः रविः अधिपतिः, तस्य पूर्वादिक् भवति।

**आग्नेय्या**- वृषभतुलयोः शुक्रः अधिपः, तस्य आग्नेयी दिक् भवति।

**दक्षिण**- मेषवृश्चिकयोः भौमः अधिपतिः, तस्य दक्षिणा दिक् तत्र प्लवसंज्ञा।

**नैऋत्य-राहुः भवति।**

**पश्चिमः**-मकरकुम्भयोःसौरः अधिपः, तस्य पश्चिमा दिक् भवति।

**वायव्या**-कर्काटकराशेः इन्दुः अधिपतिः, तस्य वायव्या दिक् भवति।

**उत्तर**दिक्-मिथुनकन्यायोः बुधः अधिपतिः, तस्य उत्तरादिक् भवति।

**ईशान्यदिक्**-धनुमीनयोः गुरुः अधिपतिः भवति। गुरोः दिक् ईशान्यदिक् भवति।

**बोधप्रश्नाः**

38. रवेः का दिक् भवति?
39. चन्द्रस्य दिशः का भवति?
40. बुधस्य का दिशा भवति?
41. गुरोः का दिशः भवति?
42. शुक्रस्य का दिशा भवति?

43. शनेः का दिशा भवति?

44. वेशिस्थानं किम्?

45. वेशियोगः कथं भवति?

### 3.23. ग्रन्थस्य मूलपाठः।

अजवृषभमृगाङ्गनाकुलीरा। झषवणिजौ च दिवाकरादितुङ्गाः।।
दशशिखिमनुयुक्तिथीन्द्रियांशैः। त्रिनवकविंशतिभिश्च तेऽस्तनीचाः।।
वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यन्तगाः शुभफलानवभागसंज्ञाः ।
सिंहो वृषप्रथमषष्ठहयाङ्गतौलिकुम्भास्त्रिकोणभवनानि भवन्तिसूर्यात् । ।
होरादयस्तनुकुटुम्बसहोत्थबन्धुपुत्रारिपत्नीमरणानिशुभाऽस्पदायाः।
रिःफाख्यमित्युपचयान्यारिकर्मलाभदुश्चिक्यसंज्ञितगृहाणि न नित्यमेके।।
कल्पस्वविक्रमगृहप्रतिभाक्षतानिचित्तोत्थरन्ध्रगुरुमानभवव्ययानि ।
लग्नात् चतुर्थनिधने चतुरस्रसंज्ञे द्यूनं च सप्तमगृहं दशमर्क्षमाज्ञा ।।
कण्टककेन्द्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानाम् ।
तेषु यथाभिहितेषु बलाढ्याः कीटनरांबुचराः पशवश्च ।।
केन्द्रात् परं पणफरं परतस्तु सर्वमापोक्लिमं हिबुकम् अम्बु सुखं च वेश्म ।
जामित्रम् अस्तभवनं त्रिकोणं मेषूरणं दशममत्र च कर्मविद्यात् ।।
होरा स्वामिगुरुज्ञवीक्षितयुतानान्यैश्च वीर्योत्कटा ।
केन्द्रस्था द्विपदादयो अह्निनिशि च प्राप्ते च संध्या द्वये ।
पूर्वार्धे विषयादयः कृतगुणा मानं प्रतीपं च तद्।
दुश्चिक्यं सहजं तपश्च नवमं त्र्याद्यं त्रिकोणं च तत् । ।
रक्तः श्वेतः शुकतनुनिभः पाटलो धूम्र पांडुः।
चित्रः कृष्णः कनकसदृशः पिङ्गलः कर्बुरश्च ।
बभ्रुः स्वच्छः प्रथमभवनाद्येषु वर्णाः प्लवत्वम्।
स्वाम्याशाख्यं दिनकरयुताद्धाद्वितीयं च वेशिः । ।

### 3.24. सारांशः।

अध्यायोऽयं संज्ञाध्यायः इति कथ्यते। अध्यायेऽस्मिन् द्विप्रकाराः संज्ञाः उक्ताः। कश्चित् संज्ञामात्राप्रयोजनः कश्चित् फलमात्रप्रयोजनः च भवति। तत्र इमाः, संज्ञाः मात्रप्रयोजनाः। यथा लग्नस्य कृते होरा इति, तृतीयस्य कृते दुश्चिक्यमिति।चतुर्थस्य हिवुकमिति संज्ञाः,पञ्चमस्य त्रिकोण इति संज्ञा, सप्तमस्य द्यूनमितिसंज्ञा, नवमस्य त्रिकोणमितिसंज्ञा, दशमस्य मेषूरणम् इति,

द्वादशस्य रिःफमिति, चतुर्थाष्टमयोःचतुरस्रमिति, पञ्चमनवमयोः त्रिकोणमिति, लग्न-चतुर्थ-सप्तम-दशमयोः कण्टककेन्द्रचतुष्टयसंज्ञाः इति संज्ञाः भवन्ति। तथा च द्वितीयपञ्चमाष्टमस्थानानां पणफरमिति संज्ञा भवति।

तृतीयषष्ठनवमभावनामापोक्लीमेति संज्ञा भवति।एता संज्ञामात्रप्रयोजनाः।

इतः परं फलमात्रप्रयोजनं लिख्यते। लग्नस्य तनुः,कल्पः इति संज्ञाः।तेनलग्नात् शरीरवृद्ध्यन्वेषण आरोग्यान्वेषणं च कार्यम्। द्वितीयस्य कुटुम्बसंज्ञा तेन तस्मात् भावात् सम्पत् ज्ञाति धनान्वेषणं कार्यम्। तृतीयस्य सहजसंज्ञा विक्रमसंज्ञा भवतः। तेन तस्मात् भावात् भ्रातृणां पुरुषार्थस्य अन्वेषणं कार्यम्। चतुर्थस्य बन्धुसंज्ञा वेश्मसंज्ञा सुखसंज्ञा च तेनतस्मात् भावात् बन्धुसुखगृहाणां च अन्वेषणं च कार्यम्। पञ्चमस्य बुद्धिसंज्ञा पुत्रसंज्ञा च तेनतस्मात् भावात् तस्माद् बन्धुसुखगृहाणां चान्वेषणं कार्यम्। षष्ठस्य अरिसंज्ञा क्षतसंज्ञा च अरिशब्दः,शत्रुवाची क्षतशब्दो व्रणवाची। तेन तस्मात् भावात् व्रणान्वेषणं कार्यम्। सप्तमस्य दारसंज्ञा चित्थोत्थसंज्ञा जामित्रसंज्ञा च दारशब्दः भार्यवाची तेन तस्मात् भावात् भार्यकामविवाहन्वेषणं करणीयम्। अष्टस्य मरणरन्ध्रसंज्ञा तेन तस्मात् भावात् मरणपापान्वेषणं करणीयम्। नवमस्य शुभसंज्ञागुरुसंज्ञा तपः संज्ञा तेन तस्मात् भावात् मातृपितृपूर्वकाणां गुरूणां तपसां च अन्वेषणं करणीयम्। दशमस्य आस्पदकर्मसंज्ञा। आस्पशब्दः कर्मवाची स्थानवाची वा कर्मास्पदसंज्ञे सुप्रसिद्धे तेन तस्मात् भावात् क्रियान्वेषणम् आजीविकान्वेषणं कार्यम्। एकादशभावस्य भव आय शब्दः। भव शब्दो ब्र विद्यदिगुणसम्पत् प्राप्तिवाची आयशब्दो अर्थवाची, तेन तस्मात् आयन्वेषणं करणीयम्। व्यय इति द्वादशस्याख्या तेन तस्मात् व्ययान्वेषणं कार्यम्। तृतीयभावः, षष्ठभावः, दशमभावः,एकादशभावः एतेषां भावानाम् उपचयसंज्ञा भवति। यतः उपचयकारकत्वात्। यदि पापग्रहः तत्रस्थः अशुभफलप्रदः भवति। उक्तं च *षष्ठस्थानं विना सौम्याः सर्वत्र भाववृद्धिकराः । षष्ठस्थाः पुनरारिहानिं न कुर्वन्ति क्षथिहानिः च।।*"पापग्रहाः उपचयस्थानस्थाः भावविवृद्धिकुर्वाणा अपि षष्ठमुपचयस्थानं तच्चिन्त्यदुष्टभावयोः अरिक्षतयोः अपि हानिं कुर्वन्ति। यतः तेषामुचयकरा इत्यन्वर्थसंज्ञा। उपचयस्ता एव पापदा भावहानि कुर्वाणा अपि अष्टमद्वादशस्थानं विचिन्त्यम् अनिष्टभावं भावस्य अनिष्टत्वात् स्थानस्य उपचयात्मकत्वात् वृद्धिं प्रापयन्ति। तथा हि श्रीदेवकीर्तिः-*"सौम्याः षष्ठे पापस्तन्वर्थसुखारिधर्मधीद्युनगाः।कुर्युर्भाविपत्तिं शेषोपगताश्च तत् बुद्धिम्"*एतत् विशेष वचनं विना सर्वत्र उपतिष्ठत इति।

### 3.25. शब्दावली।

1. तुङ्गाः=उच्चस्थानानि।वणिक्=व्यापारि।हयाङ्गः=अश्वाङ्गः।शुभः=नवमभावः।

### 3.26. बोधप्रश्नोत्तराणि-

1. रवेः उच्चांशकाः दशाशाः भवन्ति।
2. चन्द्रस्य उच्चांशकाः त्रयःअंशाः भवन्ति।
3. मेष-वृषभ-मकर-कन्या-कर्क-मीन-वणिगादीनांक्रमशः दश-त्रीणि-अष्टाविंशति-पञ्चदश-पञ्च-सप्तविंशति- विंशतयःअंशाः रव्यादिग्रहाणां परमोच्चांशकाः भवन्ति।
4. **उच्चस्थानस्य प्रयोजनं लिख्यते यथा** चत्वारः ग्रहाः उच्चस्थे जातः राजा भविष्यति। तादृशानि उन्नतफलानि होराशास्त्रे कथितानि सन्ति।
5. वर्गे उत्तमाः वर्गोत्तमाः भवन्ति। राशिकुण्डल्यां ग्रहः यत्र स्थितः नवांशकुण्डलायां ग्रहः तत्रैव स्थिते सः वर्गोत्तमः भवति।
6. चरराशिषु प्रथमनवांशः वर्गोत्तमः भवति।
7. स्थिरराशिषु पञ्चमनवांशः वर्गोत्तमः भवति।
8. उभयराशिषु नवमनवांशः वर्गोत्तमः भवति।
9. लग्नादयः द्वादशभावाः तनु-कुटुम्ब-सहोत्थ-बन्धु पुत्र-अरि-पत्नि-मरणानि-शुभ-आस्पद-आया-रिःफाख्यानां यदि भवन्ति।
10. सिंह-वृष-प्रथम-षष्ठ-हयाङ्ग-तौली-कुम्भाः क्रमेण सूर्यादीनां त्रिकोणभवनानि मूलत्रिकोणराशयः भवन्ति।
11. लग्नादिद्वादशभावेषु आजीविका निर्णयः दशमभावात् क्रीयते।
12. उत्तराधिकारी पञ्चमभावेन चिन्त्यते।
13. लग्नस्य तनुः, द्वितीयभावस्य कुटुम्बम्, तृतीयभावस्य सहोदरः इति, चतुर्थभावस्य बन्धुः, पञ्चमभावस्य पुत्रः, षष्ठभावस्य शत्रुः,सप्तमभावस्य पत्नी, अष्टमभावस्य मृत्युः, नवमभावस्य शुभः इति संज्ञाः भवन्ति। दशमभावस्य कर्मः, एकादशभावस्य आयः, द्वादशभावस्य रिःफम् व्ययम् वा, इति च संज्ञाः भवन्ति।
14. द्यूनमिति सप्तमभावस्य संज्ञा भवति।
15. चतुरस्त्रमिति चतुर्थाष्टमयोः भावयोः संज्ञे भवतः।
16. आज्ञा इति दशमभावस्य संज्ञा भवति।
17. लग्नात् तृतीय-षष्ठ-दशम-एकादश-भावाः "**उपचय**भावाः" इति संज्ञायुक्ताःभावाः भवन्ति।
18. उपचयस्थानानि न नित्यानि इति एके (केचन) आचार्याः अभिप्रैयन्ति।
19. कीटराशिःवृश्चिकः भवति।
20. नरराशयः मिथुनम्, कन्या,तुला, धनुपूर्वार्धः,कुम्भः च भवति।

21. जलचरराशयः कर्काटकः,मकरपूर्वार्धः,मीनः च भवति।
22. चतुष्पादराशयः मेषः,वृषः, सिंहः, धनुः च भवति।
23. वेश्मसंज्ञा इति चतुर्थ भावस्य संज्ञा भवति।
24. केन्द्रस्थानानि प्रथमचतुर्थसप्तमदशमभावाः भवन्ति।
25. पणफरस्थानानि द्वितीयपञ्चमअष्टमेकादशभावाः भवन्ति।
26. आपोक्लीमस्थानानि तृतीयषष्ठनवमद्वादशभावाः भवन्ति।
27. होरास्वामिः नाम लग्नाधिपः भवति।
28. ज्ञ शब्दस्यार्थः बुधः भवति।
29. लग्नपतिः बुधगुरुणा वा वीक्षिते युते वा बलवान् भवति।
30. सन्ध्याकाले कीटराशयः बलिनःभवन्ति।
31. दुश्चिक्यसंज्ञा तृतीयभावस्य भवति।
32. तपः संज्ञा नवमभावस्य भवति।
33. विंशतिः,चतुर्विंशतिः, अष्टाविंशतिः,द्वात्रिंशत्, षड्त्रिंशत्, चत्वारिंशत् चेति मेषादीनां षड्राशीनां राशिप्रमाणानि भवन्ति।
34. राशिचक्रस्य पूर्वभागे स्थिताः राशयः मेषादितः कन्यान्तं यावत् भवन्ति।
35. राशिचक्रस्य पश्चिमभागे स्थिताः राशयः तुलादितः मीनान्तं यावत् भवन्ति।
36. मीनराशेः वर्णः मत्स्यवर्णः भवति।
37. मेषः रक्तः, वृषः श्वेतः, मिथुनो शुकतनुभिः,कर्कः पाटलः, सिंहः धूम्रपाण्डुः, कन्या चित्रवर्णः, तुला कृष्णः, वृश्चिकः कनकसदृशः, धनुः पिङ्गलः, मकरः कर्बुरः, कुम्भः बभ्रुः, मीनः मत्स्यवर्णः भवति।
38. रवेः पूर्व दिशायाः पतिः भवति।
39. चन्द्रस्य दिशः वायव्या भवति।
40. बुधस्य उत्तरा दिशा भवति।
41. गुरोः ईशान्यदिशा भवति।
42. शुक्रस्य आग्नेय्यादिशा भवति।
43. शनेः पश्चिमदिशा भवति।
44. वेशिस्थानं सूर्यात् द्वितीयस्थानम् अस्ति।
45. सूर्यात् द्वितीयस्थाने यः कश्चित् ताराग्रहः स्थिते वेशियोगः भवति।

45.11. **अभ्यासप्रश्नाः।**

1. ग्रहाणामुच्चस्थानस्य जातकग्रन्थेषु उक्तफलम् अन्विषत।
2. उच्चस्थानेषु जातानां जातकसङ्ग्रहणं कुरुत।
3. मूलत्रिकोणस्थास्य जातकग्रन्थेषु उक्तफलम् अन्विषत।
4. राशीनां पर्यायपदानां सङ्ग्रहणं कुरुत।
5. भावानां बलविचारं विशदयत।
6. इतरजातकग्रन्थेषु उदित भावबलविचारसङ्ग्रहणं कुरुत।
7. उच्चस्थाने ग्रहाः कति बलवत्तराः भवन्ति?
8. नीचस्थाने कति बलवत्तराः भवन्ति?
9. चन्द्रं हित्वा सर्वेषां ग्रहाणां स्वस्थाने एव मूलत्रिकोणस्थानं भवति। चन्द्रस्य स्वस्थाने मूलत्रिकोणस्थानं नास्ति। किमर्थं चन्द्रस्य अयं विशेषः?

-ॐ-

# चतुर्थः पाठः

4. पाठसंरचना।
    - 4.1. प्रस्तावना।
    - 4.2. उद्धेश्यम्।
    - 4.3. कालपुरुषस्य आत्मादिविभागः।
    - 4.4. ग्रहाणां राजादिविभागः।
    - 4.5. रव्यादिग्रहाणां पर्यायाः 2-3 श्लोकः।
    - 4.6. ग्रहाणां वर्णः।
    - 4.7. ग्रहाणां वर्णाधिपत्यम्।
    - 4.8. ग्रहाणां देवताः।
    - 4.9. ग्रहाणां दिक्स्वामित्वम्।
    - 4.10. ग्रहाणां पापसौम्यत्वम्।
    - 4.11. ग्रहाणां महाभूताधिपत्यम्।
    - 4.12. ग्रहाणां ब्राह्मणादिवर्णाधिपत्यम्।
    - 4.13. ग्रहाणां सत्वादिगुणाः।
    - 4.14. ग्रहाणां स्वरूपम्।
        - 4.14.1. रवेः स्वरूपम्।
        - 4.14.2. चन्द्रस्य स्वरूपम्।
        - 4.14.3. कुजस्य स्वरूपम्।
        - 4.14.4. बुधस्य स्वरूपम्।
        - 4.14.5. गुरोः स्वरूपम्।
        - 4.14.6. शुक्रस्यस्वरूपम्।
        - 4.14.7. शनेः स्वरूपम्।
    - 4.15. ग्रहाणां स्नायुः आदि सारत्वम्।
    - 4.16. ग्रन्थस्य मूलपाठः।
    - 4.17. सारांशः।
    - 4.18. शब्दावली।

4.19. बोधप्रश्नोत्तराणि।

4.20. अभ्यासप्रश्नाः।

**4.1.प्रस्तावना।**

प्रिय अध्येता!

चतुर्थपाठाय भवते स्वागतम्!गते पाठे फलमात्रप्रयोजनात्मिकान् संज्ञान् ज्ञातवान्।भवान्ज्योतिषशास्त्रस्य आधारभूतसिद्धान्तान् ज्ञातवान्। वर्गोत्तमनवांशं, मूलत्रिकोणस्थानम्, उपचयभावानाम्, कण्टकादिसंज्ञानां, पणफरत्रिकोणसंज्ञाविशेषानां, बलविचाराणां, होराबलराशिबलयोः गणनाक्रमंचअधीतवान्। एवं परमपवित्रतमहोराशास्त्रस्य प्रथमाध्यायं ज्ञातवान्।

4.2. उद्धेश्यम् ।

- पाठादस्मात्कालपुरुषस्य आत्मादिविभागम्अधिगच्छति।
- पाठादस्मात्ग्रहाणां राजादिविभागं ज्ञास्यति।
- पाठादस्मात्रव्यादिग्रहाणां पर्यायान्अवगच्छति।
- पाठादस्मात्ग्रहाणां वर्णान् अध्येष्यति।
- पाठादस्मात्ग्रहाणां वर्णाधिपत्यम् ज्ञास्यति।
- पाठादस्मात्ग्रहाणां देवताः अवगच्छति।
- पाठादस्मात्ग्रहाणां दिक्स्वामित्वं विन्दति।
- पाठादस्मात्ग्रहाणां पापसौम्यत्वं वेत्ति।
- पाठादस्मात्ग्रहाणां महाभूताधिपत्यनिरूपणे पटुः भविष्यति।
- पाठादस्मात्ग्रहाणां ब्राह्मणादिवर्णाधिपत्यनिरूपणे निपुणो भविष्यति ।
- पाठादस्मात्ग्रहाणां सत्वादिगुणाः निरूपणे कुशलो भविष्यति।
- पाठादस्मात्ग्रहाणां स्वरूपम् अवगच्छति।
- पाठादस्मात्रवेः स्वरूपम् अध्येष्यति।
- पाठादस्मात्चन्द्रस्य स्वरूपं पठिष्यति।
- पाठादस्मात्कुजस्य स्वरूपं ज्ञास्यति।
- पाठादस्मात्बुधस्य स्वरूपम्अवगमिष्यति।।
- पाठादस्मात्गुरोः स्वरूपम्अवबोधः अवगच्छति।
- पाठादस्मात्शुक्रस्यस्वरूपज्ञाने समर्थो भविष्यति।

- ☞ पाठादस्मात्शनेः स्वरूपज्ञाने समर्थो भविष्यति।
- ☞ पाठादस्मात्ग्रहाणां स्नायुः आदि सारत्वम्विशेषांज्ञातुं प्रभविष्यति।

4.3. कालपुरुषस्य आत्मादिविभागः।

अध्यायेऽस्मिन् ग्रहाणां नामस्वरूपादिकं वर्ण्यते। विश्वस्मिन् विश्वे दृश्यमानचराचरजगत्सर्वं कालपुरुषेण प्रभावितः वर्तते। तदुक्तं यथा-"*कालः पचति भूतानि। कालः संहरति प्रजाः।कालः सुप्तेषु जागर्ति। कालो हि दुरतिक्रमः।।*"चराचरमिदं ग्रहमयं जगत् कालपुरषस्य अङ्गं भवति। कालपुरुषस्य अङ्गविभागः, यथा मेषादि द्वादशराशिषु दर्शितः तथा एव रव्यादिग्रहाणाम् अपि प्रदर्शितं वर्तते। राशिस्वामिनः ग्रहाः एव भवन्ति। अतः ग्रहकालपुरुषयोः सम्बन्धः वर्तते एव। आदौ कालपुरुषस्य ग्रहेणसह सम्बन्धः विव्रीयते।

कालपुरुषस्य आत्मा सूर्यः, चन्द्रः मनः, सत्वं कुजः,बुधः वचः, गुरुः ज्ञानसुखे,शुक्रःकामं, शनिः दुःखं भवति।

अत्र सत्वं नाम किम्? इति जिज्ञासायांसत्वस्य लक्षणं लिख्यते-"अधिकारकरं सत्त्वं वासनाभ्युदयागमे"। तदुच्यते- सत्वशब्दः शौर्यपर्यायः वर्तते। सिंहादीनां सहजपराक्रमः वर्तते।

| अङ्गम्। | ग्रहः। |
|---|---|
| आत्मा। | रविः। |
| मनः। | चन्द्रः। |
| सत्वम्। | कुजः। |
| वचः। | ज्ञः। |
| ज्ञानसुखे। | जीवः। |
| मदनः। | सितः। |
| दुःखम्। | दिनेशात्मजः। |

तादृक्-सहजपराक्रमंसत्वशब्देन मन्यते। तत्तु कुजेनचिन्त्यते।ज्ञानसुखे इति द्वन्द्वसमासः,ज्ञानं च सुखं च ज्ञानसुखे इति विग्रहः।कालपुरुषस्य ज्ञानसुखे बृहस्पतिः भवति। शुक्रः,कालपुरुषस्य मदनः अर्थात् कामः भवति। सङ्गीतसाहित्यादि ज्ञानं शुक्रस्य, वेदशास्त्रादि ज्ञानं जीवसुखमपि च गुरोः कारकत्वं भवति। सुखं द्विविधं, तच्च सात्विकः राजसिकः इति। सात्विकसुखं गुरोः कारकत्वं भवति।राजसिकसुखंशुक्रस्य कारकं भवति। दुःखं शनेः कारकत्वं भवति।दुःखं कीदृशम्? उक्तःयथा- शव-आशौच-दीक्षा-बन्धु-नाश-व्याधि-मरणादयोः चिन्तनीयाः।

"कालात्मा दिनकृन्मनस्तुहिमगुः सत्वं कुजो ज्ञो वचो ।
जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ।"

अत्र स्मर्तव्यः अंशः -

- आत्मा-मन-सत्वं-वच-ज्ञानसुखे-मदन-दुखंकालपुरुषस्य अङ्गानि, एतेषां क्रमेण रव्यादिग्रहाःकारकाः भवन्ति। तच्च कोष्टके लिखितः।-

आत्मादिभूतेषु ग्रहेषु बलवत्सुजातस्य पुरुषस्य आत्मादयः कारकाः अपि बलिनः भवन्ति। दुर्बलेषु ग्रहेषु जातस्य आत्मादि कारकाः दुर्बलाः भवन्ति। आत्मादीनां ग्रहाणां च अन्योन्यसम्बन्धः वर्तते इति ज्ञातव्यम्। सर्वेन्द्रियेषु मनः एव प्राधान्यं भवति। अतः मनोबलस्य चन्द्रेण सह अन्योन्यसम्बन्धः वर्तते। यदि चन्द्रः बली तर्हि मनसःबलत्वं भवति। अतः सिद्धं यत् ग्रहेषु चन्द्रबलत्वस्य प्राधान्यमिति। मनोबलेन विना इतरकारकाणां बलवत्वे फलं न भवति।अतःचन्द्रबलप्राधान्यमुच्यते। तच्च उक्तं यथा-

"अमृतकिरणवीर्याद्वीर्यमाश्रित्य सर्वे विदधाति फलमेते खेचराः साध्वसाधु।
निजनिजविषयेषु व्याप्रियन्ते यथामून्लहमिह मनसैवाधिष्ठितानीन्द्रियाणि।"

एतदुक्तं वराहमिहिराचार्येण बृहत्संहितायांयथा-

"आत्मा सहैति मनसा मनइन्द्रियेण। स्वार्थेन चेन्द्रियगणः एवमेषः।
योगोऽयमेव मनसः किमगम्यस्ति। यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा।।"

इति संहितावचनेन आत्ममनसोः अन्योन्याश्रयत्वात् एकस्य बलवशाद् इतरस्य बलसिद्धिः।

प्रयोजनम्-जातके प्रश्ने वा,पीडितग्रहे देहतः अपि तदङ्गभावात्मगुणपीडनं वक्तव्यं भवति।

बलिष्ठग्रहे पुष्टिः वदेत्। तच्च लघुजातके-

"आत्मादयो गगनतरौः बलिभिः बलवत्तराः।दुर्बलैः दुर्बला ज्ञेया विपरीतं शनेः स्मृतम्।।"

शनेः विशेषता वर्तन्ते। शनिः बलवते दुखं न्यूनम् ।शनिः दुर्बले दुःखादिक्यम् एवं विपरीतेन चिन्तनीयम्।

बोधप्रश्नाः

1. रव्यादिग्रहाणां कारकत्वं लिखत।
2. चन्द्रबलस्य प्राधान्यं कीदृशम्?

4.4. ग्रहाणां राजादिविभागः।

निर्मले नीले गगने दिने रवेः प्रकाशेन उत्सहः चैतन्यश्च वर्धते। तेनैव कारणेन जगतः सृष्टि-स्थिति-लयाः भवन्ति। आधुनिकविज्ञानमपि रवेः किरणस्य अपरिमितशक्तिम् आमनन्ति। वेदेषु उक्तं यथा *"आदित्यात् भूमिर्जायते। आदित्यात् वायुर्जायते।...असावादित्यो ब्रह्म।"* इति। आदित्यः ग्रहाणां नक्षात्राणां च राजा भवति।आदित्यमिव अन्यः यः ग्रहः अपि अस्मान् अत्यन्तं प्रभावयति सः एवचन्द्रः। पौर्णम्यां नीलगगने आकाशे परिवीक्षिते अस्मान् अत्यन्तं तोषयति। चन्द्रः मनसि आह्लादंजनयति। दिवा सूर्यकिरणेन प्राणशक्तिः प्राप्स्यते। निशायां चन्द्रप्रतिफलित-किरणेन मनसः आनन्दो जायते।चन्दयति आह्लादयति चन्दति दीप्यते इति वा चन्द्रः इति भवति। चन्द्रः रात्रौ ग्रहाणां राजा भवति। अनन्तनक्षत्रेषु ग्रहेषुवा रविचन्द्रौ एव प्रकाशकौ खलु? अतः रविचन्द्रौराजनौ एव।अतः उच्यते रविचन्द्रौ राजनौ इति। ततः अग्रे सत्वविचारे लिख्यते। वने विद्यमानसिंहस्य पराक्रमादयो गुणाः सहजतया प्राप्ताः सन्ति। तादृशविक्रमशौर्यपराक्रमादि गुणानां कारकः भवति कुजः। अतः कुजः ग्रहेषु सेनानायकः भवति। कुमारः अर्थात् बुधः राज्ञः पुत्रः वर्तते। बृहस्पतिः देवानां गुरुः, शुक्रः दैत्यानां गुरुः भवति। "आचार्यत्वं" साधर्म्यत्वात् उभौ मन्त्रिणौ भवतः। शनिः प्रेष्यः भवति। एवं

राजादिविभागः।

| | | | |
|---|---|---|---|
| मन्त्री | सेनापतिः | मन्त्री | कुमारः |
| प्रेष्यः | | | राजा |
| प्रेष्यः | | | राजा |
| मन्त्री | सेनापतिः | मन्त्री | कुमारः |

पञ्चाताराग्रहाः भवन्ति। कुजबुधगुरुशुक्रशनयःताराग्रहाः भवन्ति। राहुकेतू तमो ग्रहौ भवतः। अत्र स्मर्तव्यः अंशः-

- रविन्द्रौ राजानौ, कुजः सेनापतिः, बुधः कुमारः,गुरुशुक्रौ सचिवौ, शनिः दासः चभवति।

वराहमिहिराचार्येण ग्रन्थे उक्तः श्लोकश्च-

"कालात्मा दिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो।जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ।
राजानौ रविशीतगूक्षितसुतो नेताकुमारो बुधः।
सूरिर्दानवपूजितः च सचिवौ प्रेष्यः सहस्रांशुजः ।।"

**प्रयोजनम्-**

जन्मनि प्रश्ने वा बलवान् ग्रहः उपचयस्थो भवति, तर्हि राजादिकारककार्यसाधिकं भवति। प्रथममुदितौ सूर्येन्दू सर्वसाधारण्येन सर्वत्र निरूपणीयौ भवतः। बुधः अपि आश्रयवशात्

सुखदुःखादयो ज्ञेयः। तदनन्तरे उदितौ कुजशनी अनिष्टदौ सर्वत्र। तदनन्तरोदितौ गुरुभृगूसर्वत्र शुभफलदौ भवतः। तदनन्तरोदितौ राहुकेतू क्षेत्रोच्चादिहीनत्वात् अशुभफलदौ इति।

विशेषविचारः-

रविः सिंहादारभ्य क्रमात् षड्राशीनाम् अधिपतिः, चन्द्रः व्युत्क्रमेण कर्कटकात् षड्राशीनाम् अधिपतिश्च भवति।

**पदच्छेदः-** कालात्मा दिनकृत्, मनः हिमगुः, सत्वं कुजो,ज्ञो वचो, जीवो ज्ञानसुखे, सितः च मदनो, दुःखं दिनेशात्मजः।राजानौ रविशीतगूः, क्षितसुतो नेता कुमारो बुधः सूरिः दानवपूजितः च सचिवौ प्रेष्यः, सहस्रांशुजः।

अन्वयः-कालात्मादिनकृत् मनसः च हिमगुः सत्वं कुजो, वचो ज्ञो, ज्ञानं सुखं जीवो,मदनो सितश्च, दुःखं दिनेशात्मजः सन्ति। राजानौ रविशीतगू, नेता क्षितिसुतो, कुमारो बुधः, सचिवः सूरिः, दानवपूजितः च प्रेष्यः सहस्रांशुजः (भवति)।

**अन्वयार्थः**-कालात्मा=कालपुरुषस्य आत्मा, दिनकृत्=दिनं यः करोति सः अर्थात् रविः भवति। रवेः उदये दिनम् इत्यतः रविः दिनकृत् भवति। मनसः=चेतः,हृत् च। हिमगुः=गावः शब्दस्य किरणः इति अर्थः वर्तते; रविणा प्रतिफलितकिरणाः इत्यतः चन्द्रकिरणाः स्वभावतः शीतलानि वर्तन्ते; अनेन सिध्यति यत् हिमगुः इत्यस्य चन्द्रः इति अर्थः। सत्त्वं=शौर्यम्, कुजो=कोः जातः अर्थात् मङ्गलः, वचो=गिरः, ज्ञो=बुधः, ज्ञानं=सत्यम् ज्ञानम् अनन्तं ब्रह्म, सुखं=पञ्चेन्द्रियमनश्च हितकारकं प्रीतिकारं सुखम् भवति। जीवो=गुरुः,मदनो=कामः इच्छा, सितश्च=शुक्रः च, श्वेतवर्णेन उषा काले पूर्वस्मिन् दिशि द्योतते अतः सासितः इति आहूयते, दिनेशात्मजः=दिनस्य ईशः अर्थात् रविः, दिनेशस्य आत्मजः अर्थात् यः रवेः पुत्रः सः शनिः भवति। राजानौ=ग्रहेषु राजानौ, रविशीतगू=रविचन्द्रौ, नेता=नायकः, क्षितिसुतो=पृथिव्याः सुतः मङ्गलः, कुमारो=बुधः, सचिवः=मन्त्री, सूरिः=गुरुः, दानवपूजितः=शुक्राचार्यः दैत्यानां गुरुः अतः दानवानां गुरुः, दानवैः पूजितः शुक्रः भवति। च प्रेष्यः=दूतः, सहस्रांशुजः=अंशुः, इत्यस्य किरणः इति अर्थः, सहस्रकिरणाः सूर्यस्य वर्तते इत्यतः सहस्रांशुः तेन जातः सहस्रांशुजः च इति।

**भावः**-कालस्य आत्मा सूर्यः, कालपुरुषस्य मनः चन्द्रः, सत्वं कुजः, वचः बुधः, ज्ञानसुखे च बृहस्पतिः, मदनः शुक्रः, दुखं शनिः भवति। आदित्यचन्द्रौ राजानौ भवतः। कुजः सेनापतिः, बुधः कुमारः, गुरुशुक्रौ मन्त्रिणौ, शनिः प्रेष्यः च भवति।

बोधप्रश्नौ-

3. आदित्यादिग्रहाणां राजादिकारकत्वं विशदयत।

4. ग्रहाणां चिन्तनविधिः लिखत।

4.5. रव्यादिग्रहाणां पर्यायाः 2-3 श्लोकः।

| ग्रहाः। | पर्यायाः। |
|---|---|
| सूर्यः | हेलिः। |
| चन्द्रः | शीतरश्मिः। |
| कुजः | आरः, वक्रः, क्रूरदृक्, आवनेयः। |
| बुधः | हेम्ना, वित्, ज्ञः, बोधनः, इन्दुपुत्रः। |
| गुरुः | जीवः, अङ्गिरसः, सुरगुरुः, इज्यः। |
| शुक्रः | भृगुः, भृगुसुतः, सितः, आस्फुजित्। |
| शनिः | कोणः, मन्दः, सूर्यपुत्रः, असितः। |
| राहुः | तमः, अगुः, असुरः। |
| केतुः | शिखी। |

एकः व्यक्तिः स्वजीवनावधौ अनेकानि पात्राणि आचरन्ति। यथा-गृहे यजमानः, पुत्राणां पिता, कार्यालये कार्यकर्ता, एवम् अनेकानि दायित्वं स्थानानो अलङ्करोति। तेन स तादृक् नाम्नि अभिज्ञायते। तथैव चन्द्रः शीतलकिरणत्वात् शीतरश्मिरिति, मृग-अङ्कधाराणात् मृगाङ्कः भवति। एवं ग्रहाणां कार्याधारेण,स्वरूपाधारेण इतरकारणेन वा पर्यायपदानि विवृतानि; तानि पदानि ज्ञातव्यानि भवन्ति। अतः अग्रे ग्रहाणां पर्यायः लिख्यते।सूर्यः हेलिसंज्ञः,चन्द्रमा शीतरश्मिसंज्ञःच भवति।कुजः पृथिव्याः पुत्रः भवति। सैव आरः, वक्रः, क्रूरदृक् च भवति।बुधःचन्द्रस्य पुत्रः भवति। स हेम्ना, वित्, ज्ञः, बोधनः च भवति। गुरुः जीवनप्रदाता भवति अतः जीवः, आङ्गिरः, अग्नि-आधान-अश्वमेधापर्यन्तं क्रतूनाम् आचार्यत्वं कारकत्वं च ससुरगुरुःइति अपि वक्ष्यते।सर्वशास्त्रव्यवहारपाटवत्वात् वाक्पतिः,इज्यः, पूज्या एताः बृहस्पतेः संज्ञाःभवन्ति।शुक्रस्य, भार्गवः, सितः च भवति।सूर्यस्य पुत्रः शनैश्चरः भवति, सकोणः, मन्दः, असितः चेति पर्यायपदानि भवन्ति। किरणरहितत्वात् राहुः तमसंज्ञा, केतुः वह्निवाचकत्वात् शिखीसंज्ञा च भवति।

अत्र स्मर्तव्यः अंशः-

- सूर्यः हेलिः,चन्द्रमा शीतरश्मिः, बुधः इन्दुपुत्र-वित्-ज्ञाः, आर-वक्र-क्रूरदृगाः कुजः, कोण-मन्द-सूर्यपुत्र- असितश्च शनैश्चरः, जीव-आङ्गिरा-सुरुगुरु-वचसां पतयः, शुक्रः भृगुसुत-सित-आस्फुजित्, राहु-तमौ, केतोः शिखी, एवं संज्ञा भवन्ति।

"हेलिः सूर्यश्चन्द्रमाः शीतरश्मिर्हैम्नो विज्ञो बोधनश्चेन्दुपुत्रः।

आरो वक्रः क्रूरदृक्कावनेयः कोणो मन्दः सूर्यपुत्रो असितश्च।।

जीवोऽङ्गिराः सुरगुरुः वचसां पतीज्यः शुक्रो भृगुः भृगुसुतः सितास्फुजिच्च।

राहुः तमो सुरगुरश्च शिखीति केतुः पर्यायमन्युपलभ्य वदेच्चलोकात्।।"

पदच्छेदः- जीवः, सः एवाङ्गिराः सुरगुरुः, सुराः देवताः, तेषां गुरुः, वचसां पतिः, तथा इज्यः पूज्यः, हेलिः सूर्यः, चन्द्रमाः शीतरश्मिः, हेम्नो, वित्, ज्ञो, बोधनः च इन्दुपुत्रः। आरः वक्रः, क्रूरदृक् च आवनेयः, कोणो मन्दः सूर्यपुत्रो असितःच।

अन्वयः-हेलिः सूर्यः चन्द्रमा शीतरश्मिः हेम्ना-विद् ज्ञो बोधनः इन्दुपुत्रः च आरोवक्रः क्रूरदृक् आवनेयः च कोणो मन्दः असितः सूर्यपुत्रो एवं पर्यायः भवति।

अन्वयार्थः=हेलिः=हेलिसंज्ञा,सूर्यः=आदित्यः, चन्द्रमा=शशि, शीतरश्मिः=सूर्येण प्रतिफलितकिरणाः, हेम्ना=बुधः,विद्=ज्ञानी, ज्ञो=बुधः, बोधनः=अध्यापकः, इन्दुपुत्रः=चन्द्रपुत्रः, च आरो=कुजः, वक्रः=मङ्गलः,क्रूरदृक्=क्रूरदृष्टिः, आवनेय=क्रूरदृष्टिः, च कोणो=शनिः, मन्दः=मन्दगतित्वात् मन्दः अर्थात् शनिः, असितः=कृष्णवर्णः, सूर्यपुत्रो=सूर्यस्य पुत्रः।

भावः-सूर्यः हेलि संज्ञः। चन्द्रमा, शीतरश्मिः, बुधः शीतरश्मिः, इन्दुपुत्रः वित्, ज्ञः, आरः, वक्रः, क्रूरदृक्, कुजः भवति। कोणः, मन्दः,सूर्यपुत्रः, असितश्च शनैश्चरस्य संज्ञा भवति।जीवः आङ्गिराःसुरुगुरुः, वचसां पतिः, शुक्रः भृगुसुतः, सितः, आस्फुजित् च भवति। राहुः तमः केतोः शिखी इति भवति। अन्यात् सर्वं ममानान्तरं लोकात् वदेत्।

बोधप्रश्नः

5. सूर्यादि ग्रहाणां पर्यायाः लिखत।

4.6. ग्रहाणां शरीरवर्णः।

ग्रहाणां शरीरवर्णाः कथिताः। तत्रादौ रवेः रक्तवर्णश्यामवर्णयोः मिलितवर्ण अर्थात् पाटलपुष्पवर्णः भवति। रक्तश्यामः इति आचार्येण श्लोके कथितः। रक्तश्च असौ श्यामश्च रक्तश्यामः इति। सूर्यस्य स्वरूपं रक्तश्यमवर्णः भवति। यदि रविः उच्चगः तर्हि रक्तवर्णः भवति। यदि नीचगः तर्हि श्यामवर्णः भवति। एवम् अनुपातेन इतरक्षेत्रेषु ज्ञेयम्।चन्द्रः गौरवर्णः अर्थात् श्वेतवर्णप्रायः भवति। कुजः अर्थात् अङ्गारकः स नाति उच्चः न अतिदीर्घः, रक्तगौरः पद्मपत्राभः वर्तते।ज्ञः बुधः स दूर्वश्यामः शाद्वलवर्णः। गुरुः गौरगात्रःअर्थात् गौरशरीरः,धवलगात्रः, गौर-अवयवः भवति। शुक्रः श्यामवर्णः भवति अर्थात् अतिगौरः अपि नास्ति अतिकृष्णोऽपि नास्ति। भास्करिः सौरिः स कृष्णदेहः असितशरीरः अर्थात् अन्तः स्वच्छ इत्यर्थः।वर्णप्रयोजनम्-सर्वग्रहेषु यः बलवान् स तद्वर्णः तत्कालजातो भवति। प्रश्नकालेषु चौरादेः अपि ज्ञातव्यम्।

| ग्रहः। | वर्णस्वरूपम्। |
|---|---|
| सूर्यः। | रक्तश्यामः,रक्ताश्चासौ श्यामश्च , पाटलपुष्पवर्णः च। |
| चन्द्रः। | गौरवर्णः, श्वेतवर्णश्च। |
| कुजः। | अङ्गारकः नात्युच्चाङ्गः नातिदीर्घः , रक्तगौरः,वक्रः, पद्मपत्राभः च। |
| बुधः। | ज्ञः दूर्वश्यामः दूर्वा इव श्यामवर्णः च। |
| गुरुः। | गौरगात्रः, श्वेतवर्णः, शरीरश्च। |
| शुक्रः। | श्यामवर्णः। |
| शनिः। | कृष्णदेहः। |

अत्र स्मर्तव्यः अंशः-

- रक्तश्यामः, गौरवर्णः, नात्युच्चाङ्गः, दूर्वश्यामः, गौरगात्रः, श्यामवर्णः,कृष्णदेहः आदित्यादीनां वर्णाश्च भवन्ति।

रक्तश्यामो भास्करो गौरेन्दुर्नात्युच्चाङ्गो रक्तगौरश्च वक्रः ।
दूर्वा श्यामो ज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः ।।

पदच्छेदः-

रक्तश्यामो भास्करो गौर-इन्दुः न अत्युच्च-अङ्गो रक्तगौरश्च वक्रः दूर्वाश्यामो ज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः।

अन्वयः-भास्करो रक्तश्यामो, इन्दुः गौरः, वक्रः(भौमः) नात्युच्चाङ्गः रक्तगौरश्च, ज्ञो दूर्वाश्यामो, गुरुः गौरगात्रः, शुक्रो श्यामः,भास्करिः कृष्णदेहः।

अन्वयार्थः= भास्करो=रविः, रक्तश्यामो=रक्तश्च श्यामश्च, इन्दुः=चन्द्रः, गौरः=श्वेतवर्णः, वक्रः(भौमः) =कुजः, नात्युच्चाङ्गः=ना अति उच्चम् अङ्गः(न अति नीचम् ) नातिदीर्घः च समकायः, रक्तगौरश्च=रक्तश्च असौ गौरश्च पद्मपत्राभः, ज्ञो=बुधः, दूर्वाश्यामो=शाद्वलवर्णः, गुरुः=बृहस्पतिः, गौरगात्रः=गौरशरीरः, शुक्रो=शुक्रः, श्यामः=असितशरीरः,भास्करिः=सौरिः, कृष्णदेहः=असितशरीरः।

भावः- रविः पाटलपुष्पवर्णः, चन्द्रः श्वेतवर्णः, अङ्गारकः पद्मपत्राभः, ज्ञः बुधः, गुरुः गौरशरीरः,शुक्रः श्यामवर्णः, शनिः कृष्णवर्णः, राहुः तमः भवति।

बोधप्रश्नाः

6. आदित्यादीनां ग्रहाणां वर्णं लिखत।

4.7. ग्रहाणां वर्णाधिपत्यम्।

रात्रौ नीलाकाशे अकाशवीक्षणसन्दर्भे रक्तवर्णेन दृश्यमानग्रहः भवति मङ्गलः।सर्वे मोदन्ते एवपूर्णचन्द्रं दृष्ट्वा । चन्द्रस्य श्वेतवर्णस्य मनोहरत्वम् अवगच्छन्ति।एवम् इतरग्रहाणां वर्णाधिपत्यम् अग्रे लिख्यते।ताम्रवर्णस्य नाथः सूर्यःअधिपः भवति।श्वेतवर्णस्य अधिपः चन्द्रः भवति। अतिरक्तस्य अधिपः भौमः, हरितस्य अधिपः बुधः, हरिद्रासदृशवर्णस्य अधिपः गुरुः, चित्रस्य नानवर्णस्य शुक्रः, कृष्णवर्णस्य सौरिः, एवं वर्णानाम् अधिपत्यं भवति।तदुक्तं च "वर्णाः ताम्रसितातिरक्तहरितव्यापीतचित्रासिताः।" अर्थात्ग्रहादीनां वर्णाःसूर्यादीनां क्रमशः ज्ञातव्यम् इति। यथा आदित्यस्य आधिपत्यं ताम्रवर्णे, चन्द्रस्यः सिते, कुजस्य अतिरक्ते, बुधस्य हरिते, गुरोः व्यापीते, शुक्रस्य चित्रे, शनेः असिते भवति।

| ग्रहः। | वर्णाः। |
|---|---|
| रविः | ताम्रः, रक्तः। |
| चन्द्रः | सितः श्वेतः। |
| कुजः | अतिरक्तः। |
| बुधः | हरितः। |
| गुरुः | व्यापीतः विशेषेण आसमन्तात् पीतः वि +आ+पी+त,हरिद्रा। |
| शुक्रः | चित्रः, नानावर्णः। |
| शनिः | असितः, कृष्णः। |

**अत्र स्मर्तव्यः अंशः-**

- ताम्र-सित-अतिरक्त-हरित-व्यापीत-चित्र-असिताः आदित्यादीनां वर्णाधिपत्यम् भवति।

प्रयोजनम्- हृतनष्टादिवर्णद्रव्यज्ञानं जन्मनि प्रश्नकाले चोक्तद्रव्यलाभः अन्यथा हानिः ग्रहपूजायां ग्रहाणां यद्वर्णःतद्वर्णः कुसुमपूजा कर्तव्या।

बोधप्रश्नाः।

7. ग्रहाणां वर्णाधिपत्यम् लिखत।

ग्रहाणां देवताः।

"ग्रहाः देवतांशाः ","ग्रहरूपी जनार्दनः "इत्यादयःउक्तयः ग्रहाणां देवतांशकत्वंस्मार्यन्ते। सूर्यादिग्रहाणां स्वामिनः वर्तन्ते। तानि अग्रे लिख्यन्ते। सूर्यस्य वह्निः, चन्द्रस्य जलं,कुजस्य

सुब्रह्मण्यः, बुधस्य विष्णुः, गुरोः इन्द्रः, शुक्रः शची, शनेः कः(ब्रह्मा) एवं देवताः भवन्ति।अत्र स्मर्तव्यः अंशः-

- "वह्नि-अम्बु-अग्निज-केशव-इन्द्र-शचि-काः सूर्यादिग्रहाणां नाथाः क्रमात् भवन्ति"।

| सूर्यादीनां स्वामिनां देवाः। | |
|---|---|
| ग्रहः | ग्रहः |
| रविः | रविः |
| चन्द्रः | चन्द्रः |
| कुजः | कुजः |
| बुधः | बुधः |
| गुरुः | गुरुः |
| शुक्रः | शुक्रः |
| शनिः | शनिः |

बोधप्रश्नः।

8. सूर्यादिग्रहाणां स्वामिनः के भवन्ति?

4.8. ग्रहाणां दिक्स्वामित्वम्।

प्रागादि दिशाम् अधिपाः भवन्ति। अष्टदिक्षुपूर्वदिशःअधिपः आदित्यः अधिपः भवति। आग्नेय्यादिशः अधिपः शुक्रः भवति। दक्षिणदिशः अधिपः अङ्गारकः भवति। दक्षिणपश्चिमस्याम् अर्थात् नैऋत्यां दिशः तमोअर्थात् राहुः अधिपः भवति।पश्चिमदिशः शनिः अधिपः भवति।पश्चिमोत्तरस्याम् अर्थात् वायव्यदिशः चन्द्रः अधिपः भवति। उत्तरदिशः वित् अर्थात् बुधःअधिपः भवति। ईशान्यदिशःगुरुःअधिपः भवति। अत्र स्मर्तव्यः अंशः

| ग्रहाणां प्रागाद्या नाथाः। | |
|---|---|
| रविः | पूर्वः। |
| चन्द्रः | वायव्यः। |
| कुजः | दक्षिणः। |
| बुधः | उत्तरः। |
| गुरुः | ईशान्यम्। |
| शुक्रः | आग्नेयः। |
| शनिः | पश्चिमा। |

- प्रागादिदिशाम् अधिपतयः रवि-शुक्र-कुज-तम-शनि-इन्दु-वित्-गुरवः भवन्ति।

| पूर्वादि दिक् आधारेण ग्रहाणाम् अधिपत्यम्। | | | | | | | |
|---|---|---|---|---|---|---|---|
| पूर्वः | आग्नेयः | दक्षिणः | नैऋत्य | पश्चिम | वायुव्यः | उत्तरः | ईशान्य |
| आदित्यः | शुक्रः | अङ्गारकः (कुजः) | राहुः(तमः) | शनिः | चन्द्रः | बुधः | गुरुः |

बोधप्रश्नाः-

9. ग्रहाणां दिक्स्वामित्वं लिखत।

4.1. ग्रहाणां पापसौम्यत्वम्।

*"अष्टादशपुराणेषु व्यासस्य वचनद्वयम्। परोपकाराय पुण्याय पापाय परपीडनम्।"*अनेन श्लोकेन ज्ञायते यत् परपीडनात्मकहिंसात्मकगुणः पापः, उपकारात्मक-अहिंसात्मकगुणः पुण्यः शुभः च भवति। लोके सामान्यतया गुणद्वयं दरीदृश्यते। स च शुभः अशुभश्चेति। तथैव ग्रहेषु च शुभाशुभकारकं वर्तेते। आदौ पापग्रहान् विव्रीयन्ते।क्षीणेन्दुः,रविः, महीसुतः, अर्कतनयः पापै युतः बुधः एते पापग्रहाः भवन्ति। अत्र काचित् शङ्काऽस्पदः। क्षीणेन्दुः नाम कः? इति। तदानीमुच्यते शास्त्रकारेण यथा कृष्णपक्ष अष्टमीतः शुक्लपक्ष अष्टमीं यावत् कालः क्षीणेन्दुः भवति।महीसुतः कुजः भवति। शनिःअर्कतनयः भवति।एते पापग्रहाः भवन्ति। बुधस्य विशेषत्वं कथम्? इति प्रश्नस्वरूपंतत् कथा निदर्शनेन निरूप्यते-मण्डनमिश्रस्य गृहे शुकाः अपि शास्त्रचर्चाः कुर्वन्ति स्म। साधारणतया शुकाः न प्रौढचिन्तनं कर्तुं अर्हन्ति एव। परन्तु यथा प्रदेशः परिवेशः जायते तथैव अप्रौढाःव्यवहरन्ति। प्रौढचिन्तनं कर्तुं मस्तिष्कविकासः कुमाराणं न भवति।अनेन सिद्धं भवति यत् परिसरवशात् कुमारस्य स्वरूपगुणादिषु व्यत्यासःभवति। तथैव ग्रहेषु अपि कुमारः बुधः। स यस्य संयुतौ भवति तद्वत् व्यवहरति। यथा गुरुणा सह पण्डितः भविष्यति, कुजेन सह पापकारकग्रहः भविष्यति।अत्र भवति ज्ञातव्यः। तथ्यः-

- क्षीणेन्दु-रवि-महीसुत-अर्कतनयाः पापैर्युतः बुधः, एते पापग्रहाः भवन्ति।

व्याघ्रः सहजक्रूरी प्राणिः भवति। परन्तु गोः क्षीरं सर्वप्राणिसङ्कुलानाम् ओषधितुल्यं भवति। एवं निसर्गे सहजशुभत्वम् एवम् अशुभत्वम् वर्तते। ग्रहेषु गुरुशुक्रौ सामान्यतया शुभौ स्तः। बुधः शुभैः युते शुभं भवति। बलवान् चन्द्रः शुभत्वमिति सिद्धान्तः।तच्च शुक्लपक्षस्य अष्टमीतः, कृष्णपक्ष-अष्टमीं यावान्कालः बलवान् चन्द्रः भवति। अत्र स्मर्तव्यः अंशः –

- गुरुः शुक्रः शुभसहितः बुधःबलवान् चन्द्रश्च एते शुभग्रहाः भवन्ति।

अथ ग्रहाणां पापाशुभत्वफलितचिन्तनविधिः लिखितः। क्षीणेन्दुः, रविः, कुजः, शनिः, पापयुतःबुधः, इत्यादीनाम् उत्तरोत्तरं पापफलसूचकत्वम् अवगन्तव्यम्। अनेन शुभपापग्रहैः बलयुतैः फलभेदः उच्यते। रविकुजसौराः निसर्गतः पापाः। चन्द्रबुधयोः अवस्थान्तरेणैव पापत्वम्। गुरुशुक्रयोः सर्वदा शुभफलत्वम् अवगन्तव्यम्।अत्र चन्द्रस्य क्षीणत्वेपापत्वं न स्वतो जायते।चन्द्रस्य क्षीणतायाम् अन्ये ग्रहाः स्थानबलादि बलवन्तोऽपि विबलाः भवन्ति।

| गुणाः। | ग्रहाः। |
|---|---|
| पापग्रहाः। | क्षीणेन्दुः,रविः, कुजः,शनिः,पापयुक्तबुधाः,राहुः, केतुः। |
| शुभग्रहाः। | गुरुः, शुक्रः, बुधः, बलवान् चन्द्रः। |

वर्णाः ताम्रसितातिरक्तहरितव्यापीतचित्रासिता।

वह्न्यम्ब्वग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथाः क्रमात् ।।

प्रागाद्यारविशुक्रलोहिततमः सौरेन्दुवित्-सूरयः।

क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधास्तैर्युतः । ।(शा वि )

**पदच्छेदः-** वर्णाः ताम्र-सित-अतिरक्त-हरित-व्यापीत-चित्रासितावह्नि-अम्बु-अग्निज-केशव-इन्द्र-शचिकाः सूर्यादिनाथाः क्रमात्। प्रागाद्याः रवि-शुक्र-लोहित-तम-सौरेन्दु-वित्-सूरयःक्षीणेन्दु-अर्क-महीसुत-अर्कतनयाः पापाः बुधाः-तैर्युतः।

**अन्वयः**-ताम्र-सित-अतिरक्त-हरित-व्यापीत-चित्र-असिता सूर्यादिग्रहाणां वर्णाः।वह्निः अम्बुःअग्निजःकेशवः इन्द्रः शचिः कः च क्रमात् सूर्यादिनाथाः।प्रागाद्याः रविशुक्रलोहिततमः सौरेन्दुवित्सूरयः अधिपाः भवन्ति। क्षीणेन्दु-अर्क-महीसुत-अर्कतनयाः पापाः तैः युतः बुधःआदिपापाः भवन्ति।

अन्वयार्थःताम्रः=ताम्रवर्णस्य, सितः=श्वेतवर्णस्य,अतिरक्त=लोहितवर्णस्य, हरित=शुक्रवर्णस्य, व्यापीतः=हरिद्रासदृशस्य(आसमन्तात् पीतः इति), चित्रवर्णः=नानावर्णस्य, असितः=कृष्णवर्णस्य वर्णस्य, सूर्यादिग्रहाणां वर्णाः=आदित्यादि ग्रहाणां क्रमशः वर्णाधिपत्यम् इति ज्ञातव्यम्।वह्निः=अग्निदेवता,अम्बुः=आपोदेवाः, अग्निजः=सुब्रह्मण्यः अग्नौ जातः, केशवः=श्रीविष्णुः, इन्द्रः=देवानां राजा, शची=इन्द्रस्य पत्नी, कः=ब्रह्मा अर्थात् प्रजापतिः, क्रमात् सूर्यादिनाथाः=सूर्यादिग्रहाणाम् अधिपाः भवन्ति। प्रागाद्याः=पूर्वादिदिक्षु, रविशुक्रलोहिततमः=रविः, शुक्रः, कुजः, राहुः, च एते क्रमशः अधिपाः भवन्ति। शुक्रः सौरेन्दुवित्सूरयः=शुक्रशनिचन्द्रबुधगुरवः, एते क्रमशः दिशाम् अधिपाः भवन्ति।

क्षीणेन्दुः=कृष्णपक्ष-अष्टमीतः शुक्लपक्ष-अष्टमीं यावत्कालं क्षीणेन्दुः भवति। (निर्बलः चन्द्रः), अर्कः=रविः,महीसुतः=पृथिव्यासुतः,अर्कतनयाः=शनिः, पापाः=पापग्राः, तैः=पापग्रहैः, युतः=संयुतः, बुधः=बुधग्रहः,अपि पापग्रहः भवति।

भावः= ताम्रसितातिरक्तहरितव्यापीतचित्रासिताःवर्णाः सूर्यादिग्रहनाथाः भवन्ति। वह्नि-अम्बुअग्नितेजकेशवइन्द्रशचिकाः सूर्यादिग्रहाणां नाथाः भवन्ति। रविः, शुक्रः, कुजः, तमः, सौरिः, इन्दुः, बुधः, गुरुः, एते प्रागादीनां दिक्पतयः भवन्ति। क्षीणेन्दुरविकुजशनयः पापयुतः बुधःच तैः युतः एते पापग्रहाः भवन्ति।

4.2. ग्रहाणां प्रकृतिविभागः-स्त्रीपुरुषादयः भेदाः।

ग्रहेषु स्त्री-पुरुषाकारकभेदाः अपि विव्रीयन्ते। बुधसूर्यसुतौ ग्रहाणां नपुंसकौ शशीशुक्रौ युवती, नराः शेषाः भवन्ति। रविकुजगुरवः पुरुषाः भवन्ति। बुधः स्त्रीनपुंसकः, शनिः पुरुषनपुंसकः भवति।

| ग्रहः। | शारीरकसंज्ञाः। |
|---|---|
| बुधसूर्यसुतौ | नपुंसकाख्यौ। |
| चन्द्रशुक्रौ | स्त्री। |
| कुजः,रविः,गुरुः | नराः पुरुषाः। |

आचार्य वराहमिहिरेण कथितम् यथा-

"बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नरास्तु शेषाः। "

अस्मिन् सन्दर्भे ग्रहेषु कौटुम्बिकसम्बन्धः कल्पना क्रियते।ग्रहेषु आदित्यः पिता, शशी माता, शुक्रो भार्या, कुजो भ्राता, गुरुः सुतः भवति।

बोधप्रश्नाः-

10. ग्रहाणां प्रकृतिविभागान्-स्त्रीपुरुषादिभेदान् लिखत।

4.1. ग्रहाणां महाभूताधिपत्यम्।

| शिखिभूखपयोमरुद्गणानां क्रमेण भूमिसुतादयः वशिनः अधिपाः भवन्ति। | |
|---|---|
| पृथिवी | बुधः। |
| जलम् | शुक्रः। |

| | |
|---|---|
| तेजः | कुजः। |
| वायुः | शनिः। |
| आकाशः | गुरुः। |

अगस्त्यनक्षत्रोदये पृथिव्यां कूपादिषु विद्यमानजलं शुद्धं भवति। पौर्णम्यां समुद्रे उन्नततरङ्गाः भवन्ति। अनेन ज्ञायते यत् आकाशकीयग्रहपिण्डानां ग्रहाणां च पञ्चमहाभूतानां मिथः सम्बन्धः वर्तते इति। अतः पञ्चमहाभूतात्मिका अस्मिन् पृथिवीपिण्डे कः ग्रहः कं भूतं प्रभावयति इति सम्यग् अवगन्तव्यं, तदर्थम् अग्रे लिख्यते। अग्निभूतस्य अङ्गारकः(कुजः), पृथिवी भूतस्य बुधः, आकाशभूतस्य गुरुः, जलभूतस्य(पयसम्) अधिपः शुक्रः, वायुभूतस्य अधिपः शनिः भवति।अत्रस्मर्तव्यः अंशः-

- अग्नि-भू-आकाश-जल-वायवः कुजादयो ग्रहाः क्रमशः पञ्चमहाभूतानाम् अधिपाः भवन्ति।तदुक्तं च वराहमिहिराचार्येण-"शिखिभूखपयो मरुद्गणानां वशिनो भूमिसुतादयः क्रमेण।।"अत्र जिज्ञासाऽस्पदः रविचन्द्रयोः किम्? इति। रवेः अग्निकारकत्वात् तेजोभूतः, चन्द्रः जलमयत्वात् जलभूतमेवविचिन्तयेत्।

बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराः च शेषाः।शिखिभूखपयो मरुत्गणानां वशिनो भूमिसुतादयः क्रमेण।।

पदच्छेदः=बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराः च शेषाः शिखि-भू-ख-पयो-मरुत्-गणानां वशिनो भूमिसुतः आदयः क्रमेण।।

अन्वयः=बुधःसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवति शेषाः नराश्च शिखिभूखपयो मरुद्गणानां क्रमेण भूमिसुतादयः वशिनो भवन्ति।

अन्वयार्थः=बुधःसूर्यसुतौ=शशिसुतःशनिः च, नपुंसकाख्यौ=नपुंसककग्रहौ, शशिशुक्रौ=चन्द्रशुक्रौ, युवती=स्त्री, शेषाः=इतरग्रहाः, नराश्च=पुरुषाः च, शिखिः=अग्निः, भूः=भूमिः, ख=आकाशः, पयो=जलभूतम्, मरुद्=वायुः, गणानां= क्रमेण भूमिसुतादयः=कुजादयः वशिनो भवन्ति।

भावः=बुधस्सूर्यसुतौ नपुंसकग्रहौ, शशिशुक्रौ युवतिसंज्ञे, शेषाः नराश्च=शेषाः पुरुषाः, शिखिः=अग्निः,भूः खपयो मरुद् गणानां क्रमेण भूमिसुतादयः वशिनो भवन्ति।

बोधप्रश्नाः-

11. ग्रहाणां महाभूताधिपत्यं लिखत।

4.2. ग्रहाणां विप्रादिवर्णाधिपत्यम्।

"चातुर्वर्ण्यं मयासृष्टं गुणकर्मविभागशः।" इति गीताचार्यः श्रीकृष्णः अर्जुनं प्रबोधयत्।प्राचीनकालेषु भारतदेशे सामाजिकसंरचनाः गुणकर्माधारेण कुर्वन्ति स्म। तादृशगुणानां ग्रहाणां च सम्बन्धः वर्तते। समाजे क्वचित् जनाः सहजतयाध्यापकाः भवन्ति। क्वचित् दयावन्ताः भवन्ति। एवं गुणकर्माणाम् एवं ग्रहाणां च सम्बन्धःवर्तते। विप्रादिवर्णचतुष्टस्य स्वामिनः अग्रे विव्रीयन्ते।शुक्रगुरू-कुजार्कौ-शशी-बुधश्च असितः क्रमशः चातुर्वर्ण्यानाम् अधिपाः भवन्ति। विप्रवर्णस्य अधिपः शुक्रगुरूअर्थात् शुक्रः, गुरुः च भवति, कुजार्कौ अर्थात् कुजः, रविः च क्षत्रियवर्णस्य अधिपः भवति। चन्द्रः वैश्यवर्णस्य, बुधःशूद्रवर्णस्य, च अधिपः भवति।असितःअर्थात् शनिः अन्तराणाम् अर्थात् शङ्करजातीनाम् इतराणाम् अन्त्यजानां चाण्डालानां स्मशानवासीनां च अधिपाः भवन्ति।

| विप्रादितःवर्णचतुष्टयस्य स्वामिनः ग्रहाः च। | |
|---|---|
| विप्रः | शुक्रगुरू। |
| क्षत्रियः | कुजार्कौ। |
| वैश्यः | चन्द्रः। |
| शूद्रः | बुधः। |
| अन्त्यजानां,चाण्डालानां, शङ्करजातीनाम्। | शनैश्वरः च |

अत्र स्मर्तव्यः तथ्यः-

- शुक्रगुरू, कुजरवी,शशी, बुधः एते ग्रहाः क्रमशः विप्र-क्षत्रिय-वैश्य-शूद्राः एवं वर्णानां क्रमशः अधिपतयः भवन्ति।
- अन्तराणां(इतरेषां) शनिना चिन्त्यमिति विज्ञातव्यम्।

अस्य प्रयोजनम् –

हृते नष्टे ग्रहबलस्य उक्तवर्णः प्रभावंजनयति। तत् विज्ञानम् अग्रे लिख्यते यदि चौरप्रश्ने अथवा पृच्छकस्य वर्णचिन्तनसमये बलवान् ग्रहः यस्मिन् वर्णीयः पृच्छकः तद्वर्णे जातः इति चिन्तनीयम्। यदि बलवान् ग्रहः गुरुः तर्हि जातः अथवा पृच्छकः उत्तमविप्रः इति कथयेत्, यदि बली ग्रहः शुक्रः, तर्हि जातः अथवा पृच्छकः मध्यमविप्रः भवति। यदि रविः बली तर्हि सार्वभौमक्षत्रियः भवति।यदि कुजः भवति माण्डलिकः भवति।अत्र सन्देहः, शङ्करंनाम किम्? विप्रक्षत्रियवर्णयोः जातानां देवपार्षादिसंज्ञया व्यवह्रियन्ते। क्षत्रियवैश्ययोः जातानां भल्लातप्रभृतिसंज्ञया व्यवह्रियन्ते। यदि शनिः उच्चस्थानगते अर्थात् तुलायां स्थिते तर्हि देवपार्षादिनाम् अधिपः भवति। शनिमध्यबले भल्लातप्रभृतीनाम् अधिपः भवति।शनिः हीने बले

शूद्रादीनां शङ्करजातानाम् अधिपः भवति। नीचे अथवा शत्रुक्षेत्रगते शनौ चाण्डालादीनाम् अधिपः भवति।

**बोधप्रश्नाः**

12. ग्रहाणां विप्रादिवर्णाधिपत्यं विशदयत।

4.3. ग्रहाणां सत्वादिगुणाः।

प्राचीनभारतीयानांसम्प्रत्यये योगदर्शनानुसारेण व्यक्तित्वं सत्वरजस्तमेति त्रिधा विभज्यते। तच्च उक्तं गीताचार्येण-

| गुणाः। | ग्रहाः। |
|---|---|
| सत्वम् | चन्द्ररविगुरवः। |
| रजः | ज्ञसितौ |
| तमः | कुजार्कौ |

"सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।5
तत्र सुखं निर्मलत्वात् प्रकाशमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन भारत।6
रजो रागात्मकं विद्धितृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।।7
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनम्।प्रमादालस्य निद्राभिः तन्निबध्नाति भारत।।8"

एवं ग्रहाः अपि अस्माकं शरीरे विद्यमानसत्वरजतमगुणान् प्रभावयन्ति। चन्द्रार्कजीवाः एते सात्विकाः ग्रहाः ।बुधशुक्रौ च एतौ राजसिकौ भवतः। कुजशनौ एतौ द्वौ तमसंज्ञौ भवतः। तच्च- यस्मिन् ग्रहे बलवति पुरुषो जातः तद् गुणस्वभावः असौ भवति। लग्ने ग्रहदृष्टियोगाभ्यां जन्मलग्नाधिपाभ्यां वा बलवत् ग्रहवशात् त्रिगुणाधिपत्यं चिन्त्यम्।अथवा यस्य त्रिंशांशे बुधः तद् गुणप्रधानः पुरुषो जायते।तदुक्तं लघुजातके-

"सत्वं रजस्तमे वात्रिंशांशे। यस्य भास्करस्तादृक्।
बलिनः सदृशीमूर्तिः। बुध्वा वा जातिकुलादेशान्।।"

त्रिविधा हि पुरुषा जातः भवन्ति सात्विकाः राजसिकाः तामसिकाः च। तत्स्वभावो हि संहितायामुक्तं च -

"यः सात्विकस्य दयास्थिरत्वं सत्यार्जवं ब्राह्मणदेवभक्तिः।
रजोधिकः काव्यकलाक्रतुः स्त्रीसंसक्तचित्तः पुरुषोतिशूरः।।
तमोऽधिका वाञ्चयिता परेषां हिंस्राऽलसः क्रोधपरोतिनिद्रः।
मिश्रै गुणमिश्रगुणस्वभावा भवन्ति सर्वेऽपि शरीरभाजः।।"

एवं जातकेषु ग्रहवशात् त्रिगुणाधिपत्यं विज्ञाय पुरुषस्य शुभाशुभत्वं चिन्त्यम्।

श्लोकः-

विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोऽन्तराणाम्।
चन्द्रार्कजीवा ज्ञसितौ कुजार्की यथाक्रमं सत्वरजस्तमांसि।।7

पदच्छेदः= विप्र-आदितः शुक्रगुरू कुजार्कौ शशीबुधश्च इति असितो अन्तराणां चन्द्रार्कजीवा ज्ञसितौ कुजार्की यथाक्रमं सत्वरजतमांसि।।

अन्वयः=शुक्रगुरू, कुजार्कौ, शशीबुधौ, असितो, विप्रादितः अन्त्यजानां स्वामिनः। चन्द्र-अर्क-जीवा,ज्ञसितौ कुज-अर्की यथा क्रमं सत्वरजतमांसि गुणाः सन्ति।

अन्वयार्थः-शुक्रः=सितग्रहः, गुरुः=बृहस्पतिः, कुजार्कौ=मङ्गलरवौ च, शशी=चन्द्रः, बुधः=ज्ञः, असितो=शनिः, विप्रादितः अन्त्यजानाम्=नीचानाम्, स्वामिनः=अधिपतयः। चन्द्रः=इन्दुः, अर्कः=रविः, जीवा=गुरुः,ज्ञसितौ=बुधसितौ कुजार्की=कुजशनी, यथाक्रमं सत्वरजः तमांसि=त्रयगुणाः सन्ति।

भावः=विप्र-क्षत्रियः-वैश्या-शूद्रा इति चातुर्वर्ण्यानां शुक्रगुरूःकुजार्कौ-शशी-बुधाः इति ग्रहः अधिपः भवति। शनिः अन्त्यजानाम् अधिपः भवति एवं भावः।

**बोधप्रश्नाः**

13. ग्रहाणां सत्वादिगुणाः लिखत।

4.1. ग्रहाणां स्वरूपम्।

प्रत्येकमपि जीवस्य उत वस्तुनः स्वरूपं, गुणंवा वर्तते। यदि स्वरूपं न विद्यते तर्हि निर्गुणं भवति। परन्तु ग्रहाः सगुणाः भवन्ति। अतः सम्पूर्णज्ञानप्राप्त्यर्थं स्वरूपम् अवगन्तव्यं भवति। निसर्गः, प्रकृतिः, स्वरूपस्य एते पर्यायाः भवन्ति। प्रत्येकस्य अपि प्रकृतिः भिन्ना भवति। यथा जलं शीतस्पर्शवती भवति। अग्निः उष्णस्पर्शवत् भवति।एवं ग्रहाणां प्रकृतिः अथवा स्वरूपं ज्ञातव्यम्। तच्च कोष्टके दश्यते।

| ग्रहः। | गुणाः। |
|---|---|
| रविः | मधुवत् पिङ्गलदृष्टियुक्तः चतुरस्रतनुः प्रसादितभुजद्वयप्रमाणसमः पित्तप्रकृतिः। |
| चन्द्रः | तनुश्चासौ वृत्ता च तनुः यस्य सः तनुवृत्ततनुः कृशवर्तुलाङ्गः बहुवातकफः प्रभूतवातकफयुक्तः प्राज्ञः मेधावी मृदुवाक् कोमलभाषी शुभदृक् दर्शनीयाक्षः। |
| कुजः | क्रूरदृष्टिः, यस्य सः क्रूरदृक्, तरुणमूर्तिः, यौवनोपेत शरीरः। |
| बुधः | श्लिष्टवाक् गद्गदभाषी,श्लेषयुक्तभाषी, सततहासस्य रुचिः, नित्यंपरिहासरुचिः पित्तं मारुतकफप्रकृतियुक्तः। |
| गुरुः | बृहत्तनुः, स्थूलशरीरम्, पिङ्गलाः मूर्धजाः, केशाः, पिङ्गलमूर्धजः ;पिङ्गले ईक्षणे नयने यस्य सः |

| | |
|---|---|
| | पिङ्गलेक्षणः;मतिः धर्मबुद्धिः; कफात्मकः अर्थात् कफप्रकृतिः। |
| शुक्रः | सुखासक्तः कान्तवपुः दर्शनशरीरम्,सुलोचनः शोभननेत्रवान्, कफानिलात्मकः, कफवातप्रकृतिःअसितवक्रमूर्धजः असिता कृष्णाकुटिलकेशाः । |
| शनिः | शनैश्चरः अलसः क्रियासु अपटुः,किलदृक्,कपिलवर्णदृष्टिः,कृशदीर्घगात्रः, दुर्बलोच्चशरीरम्, स्थूलद्विजः, स्थूलदन्तयुक्तः, परुषरोमकायः, रूक्षरोमकेशयुक्तः अनिलात्मावातप्रकृतिः। |

4.1.1. रवेः स्वरूपम्।

आदौ सूर्यस्य स्वरूपंविशदीक्रियते। मधुवत्पिङ्गलादृष्टिः सूर्यस्य भवति।प्रसारित भुजद्वयप्रमाणसमः-उच्छ्रायः चतुरस्रतनुः चतुष्कोणः इत्यर्थः। सूर्यः गम्भीरः भवति।पित्ताधिकः, विरलकेशः,देहचपलत्वञ्च एवं विधः तनुः भवति। सूर्यः एवं रूपेण भवति इति वराहमिहिराचार्यः उल्लिखति।

"मधुपिङ्गलदृक्-चतुरस्रतनुः पित्तप्रकृतिः सविता अल्पकचः।"

प्रयोजनम्-व्याधिप्रश्ने मधुपिङ्गलशब्देन नयनरोगं चिन्तनीयम्।

पदच्छेदः-मधुपिङ्गलदृक्-चतुरस्रतनुः पित्तप्रकृतिः सविता अल्पकचः।"

अन्वयः=मधुपिङ्गलदृक्चतुरस्रतनुः पित्तप्रकृतिः अल्पकचःसविता अस्ति।

अन्वयार्थः=मधुपिङ्गलदृक्=ईशत्कातराक्षः, चतुरस्रतनुः=प्रसारितभुजद्वयप्रमाणोच्छ्रायः, पित्तप्रकृतिः=पित्ताधिकः, अल्पकचः=विरलकेशः, सविता=आदित्यः अस्ति।

भावः=रविः ईशत्, रक्ताक्षः, प्रसारितभुजद्वयप्रमाणोच्छ्रायः, पित्ताधिकः,अल्पकचःअर्थात् विरलकेशः एवं विधः आदित्यः भवति।

बोधप्रश्नः-

14. आदित्यः कीदृशः भवति?

**4.1.2. चन्द्रस्य निसर्गः।**

लघुः तनुः, वर्तुलाकारं, प्रकर्षेण ज्ञानी अर्थात् त्रिकालज्ञानी, मधुरभाषी,शोभनदृष्टिः एवं विधः चन्द्रस्य स्वरूपं भवति। कृशवर्तुलाङ्गः, बहुवातकफः, प्राज्ञः, मारुतश्लेष्मा, मेधावी, मृदुवाक्, शुभदृक्, एवं विधः चन्द्रः भवति। वराहमिहिराचार्योक्तिरियम्-

तनुवृत्ततनुर्बहुवातकफः प्राज्ञश्च शशी मृदुवाक्शुभदृक्।।

पदच्छेदः-तनुः वृत्ततनुः बहुवातकफः प्राज्ञः च शशी मृदुवाक् शुभदृक्।।

अन्वयः-"तनुः वृत्ततनुः बहुवातकफः प्राज्ञः मृदुवाक् शुभदृक् च शशी भवति।।"

अन्वयार्थः -"तनुः=कायः, वृत्ततनुः=समचतुरस्रशरीरः, बहुवातकफः=वातकफादिकः, प्राज्ञः=प्रकर्षेण ज्ञातः अर्थात् ज्ञानी,मृदुवाक्=कोमलभाषी, शुभदृक्=दर्शनीयाक्षः,च शशी=चन्द्रः,भवति।।"

भावः- कृशवर्तुलाङ्गः बहुवातकफः प्राज्ञः मारुतश्लेष्मा मेधावी मृदुवाक् शुभदृक् एवं विधः चन्द्रः भवति।

**बोधप्रश्नः-**

15. चन्द्रस्य निसर्गं लिखत।

4.1.3. कुजस्य प्रकृतिः।

क्रूरदृक् इति। अशुभदृष्टिः, तरुणमूर्तिः,उदारः, दाता, पैत्तिकः, पित्तप्रकृतिः, सुचपलः, अस्थिरः, कृशबलो, दुर्बलकटिः, क्रूरं पश्यतीति क्रूरदृक्, तरुणमूर्तिर्बालकार इति केचित्। क्रूरदृग् इति क्रूरा दृग् यस्येति, कुजस्य दृष्टेः अशुभत्वं सूचितम्। अथवा लोचनस्य रक्तत्वात् क्रूरदृक् इति अभिप्रायः। तरुणमूर्तिःअर्थात् नित्यं यौवनेपेताकारविग्रहः उदारः, दाता, पित्तबहुलः, सुचपलः, अतीवस्थिरचित्तः, कृशमध्यस्तनूदरः एवं विधः अङ्गारकः भवति।

क्रूरदृक्तरुणमूर्तिः उदारः पैत्तिकः सुचपलः कृशमध्यः ।

पदच्छेदः= क्रूरदृक् तरुण-मूर्तिः उदारः पैत्तिकः सुचपलः कृशमध्यः (कुजः भवति)।

अन्वयः=क्रूरदृक् तरुणमूर्तिः उदारः पैत्तिकः सुचपलः कृश मध्यः (कुजः भवति)।

अन्वयार्थः=क्रूरदृक्=क्रूरदृष्टिः, तरुणमूर्तिः=तरुणवयसिफलप्रदत्वम्, उदारः=दाता, पैत्तिकः=पित्तप्रधानः, सुचपलः=धैर्यरहितः, कृशमध्यः=मध्ये कृशः दर्शनीयः,कुजः=एवं विधः कुजःभवति।

भावः=क्रूरदृक्तरुणवयसिफलप्रदत्वम्कीर्तिप्रियः कृशमध्यः कुजदृष्टे अशुभत्वं भवति।

**बोधप्रश्नः।**

16. कुजस्य स्वरूपं लिखत।

**4.1.4. बुधस्य स्वरूपम्।**

प्रियवाक्, युक्तियुक्तभाषी, सततहास्यरुचिः, हासनशीलः, पित्तमरुतकफप्रकृतिश्च शब्देन मध्यमरूप इत्यपि सूचितम्। श्लिष्टवाक्, गद्गदभाषी, सतत हस्यरुचिः,पित्तमारुतकफः, प्रकृतिदोषत्रयलवो स्वभावः एवं विधःबुधः भवति।

"श्लिष्टवाक्सततहास्य रुचिज्ञः पित्तमारुतकफप्रकृतिः च।"

पदच्छेदः-श्लिष्ट-वाक्-सतत-हास्य-रुचिःज्ञःपित्त-मारुत-कफप्रकृतिःच।

अन्वयः-श्लिष्टवाक्सततहास्यरुचिःपित्तमारुतकफप्रकृतिश्चज्ञः एवं विधः भवति।

**अन्वयार्थः** -

श्लिष्टः=गद्गदः,वाक्=वाणी,सततम्=नित्यं,हास्यरुचिः=परिहासशीलः,पित्तमारुतकफः=उष्णवात शीतप्रकृतिः, ज्ञः=बुधश्च।

भावः-श्लिष्टवाक्सततहास्यरुचिःपित्तमारुतकफप्रकृतिःचज्ञः एवं विधः भवतिइति भावः।

**बोधप्रश्नः-**

17. बुधस्य स्वरूपं लिखत।

4.1.5. गुरोः स्वरूपम्।

स्थूलशरीरः,विशालकुक्षिः, श्रेष्ठमतिःअर्थात् अतिधर्मबुद्धिः,धर्मानुप्राज्ञः, नयशास्त्रज्ञःअर्थात् क्षमावान्, कपिलकेशकातराक्षः,कफात्मक एवं विधः बृहस्पतिः भवति।मूर्धजाः केशा ईक्षणो नयने ।तदुक्तं च- आचार्यवराहमिहिरेण-

"बृहत्तनुः पिङ्गलमूर्धजेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः ।"

पदच्छेदः- बृहत्तनुः पिङ्गल-मूर्धज-ईक्षणो बृहस्पतिः श्रेष्ठ-मतिः कफ-आत्मकः ।

अन्वयः -बृहत्तनुः पिङ्गलमूर्धजेक्षणो श्रेष्ठमतिः कफात्मकः बृहस्पतिः (भवति) ।

अन्वयार्थः –बृहत्तनुः=स्थूलशरीरः, पिङ्गलमूर्धजेक्षणो=कपिलकेशकातराक्षः, श्रेष्ठमतिः= धर्मानुप्राज्ञः, कफात्मकः=कफप्रकृतिकः, बृहस्पतिः= गुरुः (भवति)।

भावः–बृहद्गात्रः, कपिलकेशकातराक्षः, कफात्मकः, गुरुः च एवं विधः वर्तते।

**बोधप्रश्नः-**

18. गुरोः स्वरूपं लिखत।

**4.1.6. शुक्रस्यस्वरूपम्।**

शुक्रस्वरूपं वर्ण्यते।नित्यं सुखासक्तः अर्थात् सुरभिद्रवैरपन्नपानैश्चचाम्बरैः स्त्रीभिः च मदनोपकरणै अन्यैः च सुखासक्तः भवति। कान्तवपुःअर्थात् ललितदेहः, दर्शनीयं शरीरं शुक्रस्य वर्तते। सुलोचनः अर्थात् विशालनयनः भवति। शोभनवाक्, श्लेष्ममारुतप्रकृतिः, कृष्णकुटिलकेशः इत्यर्थः।एवं विधः शुक्रः भवति।

"भृगुः सुखी कान्तवपुः सुलोचनः कफानिलात्मासितवक्रमूर्धजः।।(वंशस्थ)"

पदच्छेदः-भृगुः सुखी कान्तवपुः सुलोचनः कफ-अनिल-आत्म-सित-वक्र-मूर्धजाः।

अन्वयः- सुखी कान्तवपुः सुलोचनः कफानिलात्मसितवक्रमूर्धजाःभृगुः भवति।

अन्वयार्थः=सुखी=सदा सुखेषु आसक्तः, कान्तवपुः=दर्शनीयशरीरः, सुलोचनः=शोभनाक्षः, कफ=श्लेष्मप्रकृतिः अनिल=मारुतप्रकृतिः,सितः=शुक्रः, वक्रमूर्धजः=कृष्णकुटिलकेशाः,भृगुः=शुक्रः भवति।

भावः=सुखेषु आसक्तः, दर्शनीयं शरीरं, सुलोचनः, शोभनवाक्, श्लेष्ममारुतप्रकृतिः कृष्णकुटिलकेशः, एवं विधः शुक्रः भवति।

बोधप्रश्नः

19. शुक्रस्य स्वरूपं लिखत।

4.1.7. शनेः स्वरूपम्।

शनेः स्वरूपं लिख्यते।शनिः अलसः अर्थात् मन्दोत्साहः, मन्दः इति पिशुनः चपलः अज्ञः रौद्रश्च उक्तः। कपिलःकलुषा अप्रसन्नादृक् भवति। शनिः कृशदीर्घगात्रः अर्थात् दीर्घं सिरालं रौद्रं गात्रम् अस्येति। स्थूलाः द्विजाः अर्थात् स्थूलाः नखदन्तादयो यस्यासौ स्थूलद्विजाः उक्तः। परुषरोमकचः परुषाः रुक्षाश्च पिङ्गला रोमकचा यस्यासावुक्तः। रोमकचः इत्यत्र किमर्थं रोमशब्दः? इति जिज्ञासा। तदर्थम् उच्यते कण्ठस्य अधोभागे परुषाणि रोमाणि बहूनि सन्ति इति ज्ञापनार्थम्। एवं मन्दस्वरूपम्।

"मन्दो अलसः कपिल दृक् कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचो अनिलात्मा ।"

पदच्छेदः- मन्दो अलसः कपिल-दृक्-कृशदीर्घगात्रः स्थूल-द्विजः परुष-रोम-कचो अनिल-आत्मा।

अन्वयः-अलसः कपिलदृक् कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचो अनिलात्मामन्दः भवति।"

अन्वयार्थः-अलसः=क्रियासु अपटुः, कपिलदृक्=पिंगलाक्षः, कृशदीर्घगात्रम्= दुर्बलम् उच्चतरं गात्रं, स्थूलद्विजः=बृहद्दन्तः, परुषरोमकचो =रूक्षतनूरुहकेशः, अनिलात्मा=वातप्रकृतिः, मन्दः=शनैश्चरः भवति।"

भावः- अलसः कपिलदृक् कृशदीर्घगात्रम् स्थूलद्विजः परुषरोमकचो अनिलात्मा एवं विधः मन्दः भवति।"

प्रयोजनम्- ग्रहाणां स्वरूपविशेषस्य अवगमनेन जातकस्य स्वरूपादिकम् ज्ञातुं शक्यम्। जन्मकाले यः ग्रहः बलवान् भवति तस्य स्वरूपसदृशः तत्कालजातो भवति। चोरप्रश्नादिषु चोरस्वरूपादिज्ञाने अपि उपयोक्तुं शक्यते।

बोधप्रश्नाः-

20. शनेः स्वरूपं लिखत।

4.2. ग्रहाणां स्नायुः आदि सारत्वम्।

| धातवः। | ग्रहाः। |
|---|---|
| अस्थिः | अर्कः। |
| रक्तम् | चन्द्रः। |
| त्वक् | बुधः। |
| शुक्रः | शुक्रः। |
| वसा मेधा | गुरुः। |
| मज्जा | कुजः। |
| स्नायुः | शनिः। |

सूर्यादिग्रहाणां शरीरे विद्यमानसप्ताधातूनां कारकत्वं लिख्यते। देहे अर्कः अस्थिसारः, चन्द्रः रक्तसारः अर्थात् रुधिरसारः, भौमः मज्जसारःअर्थात् अस्थि अन्तर्गतो धातुः, बुधः त्वक्सारः अर्थात् चर्मसारः, गुरुः मेदः अर्थात् वसासारः, शुक्रः शुक्लसारः अर्थात् रेतः, मन्दः स्नायुसारः एवं विभागः भवति।

प्रयोजनम्- व्याधिप्रश्ने लग्ननवांशतुल्यग्रहस्य धातुविशेषस्य पीडा इति चिन्तनीम्।

पदच्छेदः-स्नाय्वस्थ्यसृक् त्वगथ शुक्लवसे च मज्जा मन्दार्कचन्द्रबुधशुक्रसुरेज्यभौमाः।

अन्वयः-स्नायु अस्थि-असृग्-त्वग् अथ शुक्लवसा मज्जा-आदिसारत्वं मन्द-अर्क-चन्द्र-बुध-शुक्र-सुरेज्य-भौमाः क्रमशः कारकाः भवन्ति।

अन्वयार्थः-स्नायुः=वायुवाहिनी नाडी,अस्थि=कीकसम्, असृक्=रक्तः, त्वग्=चर्मः, अथ शुक्लः=रेतः, वसा=मेदा, मज्जा=अस्थ्यन्तर्गतो धातुविशेषः, आदि सारत्वं= मन्दः=शनिः,अर्कः=रविः,चन्द्रः=इन्दुः,बुधः=वित्, शुक्रः=सितः, सुरेज्यः=देवानां गुरुः, भौमः=कुजः, क्रमशः कारकाः भवन्ति।

भावः- स्नायु-अस्थि-असृक्-त्वग्-अथ शुक्लवसामज्जा-आदि सारत्वं मन्द-अर्क-चन्द्र-बुध-शुक्र-सुरेज्य-भौमाः क्रमशः कारकाः भवन्ति।

बोधप्रश्नः।

21. सूर्यादिग्रहाणां धातूनां कारकत्वं लिखत।

4.3. ग्रन्थस्य मूलपाठः।

"कालात्मा दिनकृन्मनस्तुहिनगुः सत्वं कुजो ज्ञो वचो ।जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः ।

राजानौ रविशीतगूःक्षितसुतो नेताकुमारो बुधः।

सूरिर्दानवपूजितः च सचिवौ प्रेष्यः सहस्रांशुजः ।।"

हेलिः सूर्यश्चन्द्रमाः शीतरश्मिर्हैम्नो विज्ञो बोधनश्चेन्दुपुत्रः।

आरो वक्रः क्रूरदृक्क अवनेयः कोणो मन्दः सूर्यपुत्रो असितश्च।।

रक्तश्यामो भास्करो गौरैन्दुर्नात्युचाङ्गो रक्तगौरश्च वक्रः ।।

दूर्वाश्यामो ज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः ।।(शलिनी)

वर्णास्ताम्रसितातिरक्तहरितव्यापीतचित्रासिता ।।

वह्न्यम्ब्वग्निजकेशवेन्द्रशचिकाः सूर्यादिनाथाः क्रमात् ।

प्रागाद्यारविशुक्रलोहिततमः सौरिन्दुवित्सूरयः।।

क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापाःबुधाः तैर्युतः।

जीवो अङ्गिराः सुरगुरुर्वचसां पतीज्यः शुक्रो भृगुर्भृगुसुतः सित आस्फुजिच्च ।

राहुस्तमोऽगुरुसुरश्च शिखी इति केतुः पर्यायमन्यमुपलभ्य वदेत् च लोकात् ।।

बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः ।

शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण । ।

विप्रादितः शुक्रगुरूकुजार्कौ शशीबुधश्चेत्यसितान्त्यजानाम् ।।

चन्द्रारर्कजीवज्ञसितौ कुजार्की यथाक्रमं सत्वरजस्तमांसि । ।

मधुपिङ्गलदृक्-चतुरस्रतनुः पित्तप्रकृतिः सवितात्पकचः ।

तनुवृत्ततनुर्बहुवातकफः प्राज्ञश्च शशी मृदुवाक्शुभदृक् । ।

क्रूरदृक्तरुणमूर्तिरुदारः पैत्तिकः सुचपलः कृशमध्यः ।

श्लिष्टवाक्सततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च । ।

बृहत्तनुः पिङ्गलमूर्धजेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः ।

भृगुः सुखी कान्तवपुः सुलोचनः कफानिलात्मासितवक्रमूर्धजः ।

मन्दो अलसः कपिलदृक्-कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचो अनिलात्मा ।

स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसे च मज्जामन्दार्कचन्द्रबुधशुक्रसुरेज्यभौमाः ।

**4.4. सारांशः।**

अस्मिन् अध्याये ग्रहाणां संज्ञाः,कारकाः कथिताः। आत्मा-मन-सत्वं-वच-ज्ञानसुखे-मदन-दुखानि कालपुरुषस्य अङ्गानि, एतेषां क्रमेण रव्यादिग्रहाणां कारकाः भवन्ति। अनेन भावाधिपत्यम् अपि ज्ञातुं शक्यम्। कालात्मा इति सूर्यस्य आत्मकारकं तेने प्रथमभावकारत्वं जातकग्रन्थेषु कथयन्ति। गुरु-कुज-चन्द्रबुधौ-गुरु-कुजशनौ-शुक्र-शनय रविर्गुरौ-शनिसूरिसूर्यविदा-सुरगुरु-शनयः लग्नात् प्रारभ्य क्रमशः कारकाः स्युः। वराहमिहिराचार्यःग्रहाणां राजादिकारकत्वं रचयामास। यथा-रविचन्द्रौ राजानौ, कुजः सेनापतिः, बुधः कुमारः,गुरुशुक्रौ सचिवौ, शनिः दासः भवति।ग्रहाणां पर्यायाः अकथयत्। सूर्यः हेलिः,चन्द्रमा शीतरश्मिः, बुधः, इन्दुपुत्र-वित्-ज्ञाः, आर-वक्र-क्रूरदृक् कुजः, कोण-मन्द-सूर्यपुत्र-असितश्च शनैश्चरः, जीवः आङ्गिराःसुरुगुरुःवचसां पतिः च, शुक्रः,

भृगुसुतःसितःआस्फुजित् च, राहुःतमः, केतोः शिखी, एवं संज्ञा भवति।ग्रहाणां वर्णाः वर्णिताः। रक्तश्यामः, गौरवर्णः, नात्युच्चाङ्गः, दूर्वश्यामः, गौरगात्रः, श्यामवर्णः,कृष्णदेहः च आदित्यादीनां वर्णाः भवन्ति।ग्रहाणां वर्णाधिपत्यम् वर्णितम्।ताम्र-सित-अतिरक्त-हरित-व्यापीत-चित्रा-असिताः आदित्यादीनां वर्णाधिपत्यं भवति।वह्नि-अम्बु-अग्निज-केशवःइन्द्र-शचि-काः सूर्यादिग्रहाणां नाथाः क्रमात् भवन्ति। प्रागादिदिशाम् अधिपतयः रवि-शुक्र-कुज-तम-शनि-इन्दु-वित्-गुरवः भवन्ति। ग्रहाणां शुभाशुभत्वेन विभज्यते। यथा क्षीणेन्दु-रवि-महीसुत-अर्कतनयः, पापैः युतः बुधः एते पापग्रहाः भवन्ति। गुरुःशुक्रःशुभसहितः बुधः, बलवान् चन्द्रः च एते शुभग्रहाः भवन्ति।पञ्चमहाभूतेषुग्रहाणां कारकत्वं वक्ष्यति। अग्नि-भू-आकाश-जलं-वायवः कुजादयो ग्रहाः क्रमशः पञ्चमहाभूतानाम् अधिपाः भवन्ति।शुक्रःगुरुः, कुजःरविः,शशी, बुधश्चएते ग्रहाः क्रमशः विप्र-क्षत्रिय-वैश्य-शूद्राः एवं वर्णानां क्रमशः अधिपतयः भवन्ति। अन्तराणाम् (इतरेषां) शनिना चिन्त्यमिति विज्ञातव्यम्।विप्र-क्षत्रिय-वैश्या-शूद्रा इति चातुर्वर्ण्यानां शुक्रगुरूः कुजार्कौ शशी बुधश्च इति ग्रहः अधिपः भवति। शनिः अन्त्यजानाम् अधिपः भवति।ग्रहाणां प्रकृतिः कर्षितः; यथासूर्यः गम्भीरः भवति। पित्ताधिकः, विरलकेशः, देहचपलत्वञ्च एवं विधः तनुः भवति। सूर्यः एवं रूपेण भवति इति वराहमिहिराचार्यः उल्लिखति। कृशवर्तुलाङ्गः, बहुवातकफः, प्राज्ञः, मारुतश्लेष्मा, मेधावी, मृदुवाक्, शुभदृक्, एवं विधः चन्द्रः भवति।नित्यं यौवनेपेताकारविग्रहः, उदारः, दाता, पित्तबहुलः, सुचपलः, अतीवस्थिरचित्तः कृशमध्यस्तनूदरः च एवं विधः अङ्गारकः भवति।श्लिष्टवाक् सततहास्यरुचिः पित्तमारुतकफप्रकृतिः ज्ञः च।बृहद्गात्रम्, कपिलकेशकातराक्षः, कफात्मकः,गुरुः च एवं विधः वर्तते। सुखेषु आसक्तः, दर्शनीय शरीरीसुलोचनः, शोभनवाक्, श्लेष्ममारुतप्रकृतिः कृष्णकुटिलकेशः, एवं विधः शुक्रः भवति।अलसः, कपिलदृक्, कृशदीर्घगात्रः, स्थूलद्विजः, परुषरोमकचो, अनिलात्माच एवं विधः मन्दः भवति।ग्रहाणां शरीरस्थसप्तधातूनां ग्रहाणां च सम्बन्धः सूत्रितः। यथा स्नायु-अस्थि-असृक्-त्वग्-अथ शुक्ल-वसा-मज्जा आदि सारत्वं मन्द-अर्क-चन्द्र-बुध-शुक्र-सुरेज्य-भौमाः क्रमशः कारकाः भवन्ति।

### 4.5. शब्दावली।

हेलिः=सूर्यस्य

यवनसंज्ञा।तुहिनगुः=चन्द्रः।प्रेष्यः=दासः।सहस्रांशुजः=रविः।बोधनः=अध्यापकः।

कोणः=शनिः।कोणः शनैश्चरो मन्दः छायाहृदयनन्दनः।मन्दः=मन्दं चलति इति धिया शनिः मन्देति कथ्यते।

असितः=शनिः।वशिनो–अधिपः।

**4.6. बोधप्रश्नोत्तराणि।**

1. आत्मा-मन-सत्वं-वच-ज्ञानसुखे-मदन-दुखानि कालपुरुषस्य अङ्गानि, एतेषां क्रमेण रव्यादिग्रहाः कारकाः भवन्ति।
2. यदि चन्द्रबली तर्हि मनसः बलत्वं भवति। अतः सिद्धं यत् ग्रहेषु चन्द्रबलत्वस्य प्राधान्यमिति। मनोबलेन विना इतरकारकाणां बलवत्वे फलं न भवति।अतः चन्द्रबलप्राधान्यमुच्यते।
3. रविचन्द्रौ राजानौ, कुजः सेनापतिः, बुधः कुमारः,गुरुशुक्रौ सचिवौ, शनिः दासः भवति।
4. प्रथममुदितौ सूर्येन्दू सर्वसाधारण्येन सर्वत्र निरूपणीयौ। बुधः अपि आश्रयवशात् सुखदुःखादयो ज्ञेयः। तदनन्तर उदितौ कुजशनी अनिष्टदौ सर्वत्र। तदनन्तरोदितौ गुरुभृगू सर्वत्र शुभफलदौ। तदनन्तरोदितौ राहुकेतू, क्षेत्रोच्चादिहीनत्वात् अशुभफलदौ इति।
5. सूर्यः हेलिः,चन्द्रमा शीतरश्मिः, बुधः इन्दुपुत्र-वित्-ज्ञाः, आरवक्रक्रूरदृक्कुजाः, कोण-मन्द-सूर्यपुत्र-असिताश्च शनैश्चरस्य संज्ञा भवति।जीव-आङ्गिराःसुरुगुरुः वचसां पतिः, शुक्रः भृगुसुतःसितःआस्फुजित् च भवति। राहुःतमः, केतोः शिखी, एवं संज्ञा भवति।
6. रक्तश्यामः, गौरवर्णः, नात्युच्चाङ्गः, दूर्वाश्यामः, गौरगात्रम्, श्यामवर्णः,कृष्णदेहः आदित्यादीनां वर्णाः भवन्ति।
7. ताम्र-सित-अतिरक्त-हरित-व्यापीत-चित्र-असितादीनम् आदित्यादीनां वर्णाधिपत्यम् भवति।
8. "वह्नि-अम्बु-अग्निज-केशव-इन्द्र-शचि-काः सूर्यादिग्रहाणां नाथाः क्रमात् भवन्ति"।
9. प्रागादिदिशाम् अधिपतयः रविः, शुक्रः, कुजः,तमः, शनिः, इन्दुः, वित्-गुरुः भवति।
10. बुधसूर्यसुतौ ग्रहाणां नपुंसकौ शशीशुक्रौ युवती, नराः शेषाः भवन्ति। रविकुजगुरवः पुरुषाः भवन्ति। बुधः स्त्रीनपुंसकः, शनिः पुरुषनपुंसकः भवति।
11. अग्नि-भू-आकाश-जलं-वायवः कुजादयो ग्रहाः क्रमशः पञ्चमहाभूतानाम् अधिपाः भवन्ति।
12. शुक्रगुरू, कुजरवी, शशी, बुधश्च एते ग्रहाः क्रमशः विप्र-क्षत्रिय-वैश्य-शूद्राः एवं वर्णानां क्रमशः अधिपतयः भवन्ति।
13. चन्द्रार्कजीवाः एते सात्विकाः ग्रहाः । बुधशुक्रौ च एतौ राजसिकौ भवतः। कुजसूर्यसुतौ एतौ द्वौ तमसंज्ञौ भवतः।
14. ग्रहाणां स्वरूपम्।
15. आदित्यः मधुपिङ्गलदृक्-चतुरस्रतनुः पित्तप्रकृतिः सवितात्पकचः भवति।

16. कृशवर्तुलाङ्गः, बहुवातकफः, प्राज्ञः, मारुतश्लेष्मा, मेधावी, मृदुवाक्, शुभदृक्, एवं विधः चन्द्रः भवति।
17. क्रूरदृग् कुजस्य दृष्टेः अशुभत्वं सूचितम्। अथवा लोचनस्य रक्तत्वात् क्रूरदृक् तरुणमूर्तिः।
18. प्रियवाक्, युक्तियुक्ता,सततहास्यरुचिः, हासनशीलः, पित्तमरतकफप्रकृतिश्च शब्देन मध्यमरूप इत्यपि सूचितम्। श्लिष्टवाक्, गद्गदभाषी, सततहस्यरुचिः, पित्तमारुतकफप्रकृतिदोषत्रयल्वो स्वभावः एवं विधः बुधः भवति।
19. स्थूलशरीरम्,विशालकुक्षिः, श्रेष्ठमतिःअर्थात् अतिधर्मबुद्धिः,धर्मानुप्राज्ञः, नाट्यशास्त्रज्ञःअर्थात् क्षमावान्, कपिलकेशकातराक्षः,कफात्मक एवं विधः बृहस्पतिः भवति।
20. शुक्रस्वरूपं वर्ण्यते। नित्यं सुखासक्तः अर्थात् सुरभिद्रवैरपन्नपानैश्चचाम्बरैः स्त्रीभिः च मदनोपकरणै अन्यैः च सुखासक्तः भवति। कान्तवपुः अर्थात् ललितदेहः, दर्शनीयं शरीरं शुक्रस्य वर्तते। सुलोचनः अर्थात् विशालनयनः भवति। शोभनवाक्, श्लेष्ममारुतप्रकृतिः, कृष्णकुटिलकेशः इत्यर्थः। एवं विधः शुक्रः भवति।
21. मन्दो अलसः कपिलदृक् कृशदीर्घगात्रः स्थूलद्विजः परुषरोमकचो अनिलात्मा एवं विधः शनिः भवति।

**4.7. अभ्यासप्रश्नाः।**

1. ग्रहाणां कारकाणां सङ्कलनं कुरुत।
2. इतरग्रन्थेषु विद्यमानग्रहाणां स्वरूपसङ्कलं कुरुत।
3. जातकग्रन्थेषु उक्तग्रहाणां स्वरूपं लिखत।

❊ॐ❊

## ग्रहस्थानविवेचनात् ग्रहमैत्रीं यावत्।

5. पाठसंरचना।

5.1. प्रस्तावना।

5.2. उद्देश्यम्।

5.3. ग्रहाणां स्थानानि।

5.4. ग्रहाणां वस्त्राणि।

5.5. ग्रहाणां द्रव्याणि।

5.6. ग्रहाणाम् ऋतवः।

5.7. ग्रहाणां दृष्टिः।

5.7.1. ग्रहाणां विशेषदृष्टिः।

5.8. ग्रहाणां कालाः।

5.9. ग्रहाणां रसाः।

5.10. ग्रहमैत्रीविचारः।

5.10.1. नैसर्गिकग्रहमैत्र्याम् इतरमतम्।

5.10.2. नैसर्गिकग्रहमैत्र्यां सत्याचार्यमतम्।

5.10.3. तात्कालिकग्रहमैत्री।

5.10.4. पञ्चधामैत्री।

बोधप्रश्नाः।

ग्रन्थस्य मूलपाठः

5.11. सारांशः।

5.12. शब्दावली।

बोधप्रश्नोत्तराणि।

5.13. अभ्यासप्रश्नाः।

5.1. प्रस्तावना।

**5.2.उद्देश्यम्।**

पाठस्यास्य अध्ययनेन भवान् अधोलिखितेषु विषयेषु समर्थो भविष्यति। ते यथा-

☞ पाठादस्मात्ग्रहाणां स्थानानिअवगच्छति।

☞ पाठादस्मात्ग्रहाणां वस्त्राणि ज्ञास्यति।

☞ पाठादस्मात्ग्रहाणां द्रव्याणाम् अवबोधो भविष्यति।

☞ पाठादस्मात्ग्रहाणाम् ऋतूनाम् ज्ञानं भविष्यति।

☞ पाठादस्मात्ग्रहाणां दृष्टिनिरूपणे निपुणो भविष्यति।

☞ पाठादस्मात्ग्रहाणां विशेषदृष्टेः अवगमनं भविष्यति।

☞ पाठादस्मात्ग्रहाणां कालविभागं अवगमिष्यति।

☞ पाठादस्मात्ग्रहाणां रसाविषयकज्ञानंभविष्यति।।

☞ अस्मात् पठात् ग्रहाणां मैत्रीं ज्ञास्यति।

☞ पाठादस्मान्नैसर्गिकग्रहमैत्र्याम् इतरमतं ज्ञास्यति।

☞ पाठादस्मात् नैसर्गिकग्रहमैत्र्यां सत्याचार्यमतप्रतिपादने कुशलो भविष्यति।

☞ पाठादस्मात्तात्कालिकग्रहमैत्रीनिरूपणे निपुणो भविष्यति ।

☞ पाठादस्मात्पञ्चधामैत्रीनिर्धारणे समर्थः भविष्यति।

**5.3.ग्रहाणां स्थानानि।**

| **ग्रहः।** | **स्थानानि।** |
|---|---|
| **रविः।** | देवः। |
| **चन्द्रः** | अम्बुः। |
| **कुजः** | अग्निः। |
| **बुधः** | विहारः। |
| **गुरुः** | कोशः। |
| **शुक्रः** | शयनम्। |
| **शनिः** | क्षित्युत्करेशाः। |

समाजे क्वचित् सन्दर्भेषु जनाः नष्टद्रव्यस्य चिन्तायां दुःखितस्सन्तः दैवप्रेरणया एव दैवज्ञम् अभिलषन्ति। दैवज्ञः ग्रहाणाम् आधारेण फलं वक्ति मार्गदर्शनञ्च करोति। फलप्रवचनं दैवज्ञस्य कर्तव्यं भवति। साम्प्रतमस्मिन् सन्दर्भे फलितचिन्तनविधिः लिख्यते। ग्रहाणाम् एवं स्थानानां च सम्बन्धान् ज्ञास्यति।

आदित्यादिप्रभृतिग्रहाणां स्थानानि जातकग्रन्थेषुविवृतानि वर्तन्ते। तानि अत्र प्रस्तूयन्ते। आदित्यस्य देवस्थानं निर्दिष्टम्। चन्द्रस्य जलस्थानं,कुजस्य अग्निस्थानं, बुधस्य विहारस्थानं, कोशो अथवा भाण्डागारं बृहस्पतेः शयनस्थानं शुक्रस्य, अवकरराशिस्थानं ***शनेः***भवति।अत्र भवति स्मर्तव्यः तथ्यः-

* ***आदित्यस्य देवस्थानम्, चन्द्रस्य जलस्थानम्, कुजस्य अग्निस्थानम्, बुधस्य विहारस्थानम्, कोशम् अथवा भाण्डागारं बृहस्पतेः, शयनस्थानं शुक्रस्य, अवकरराशिं शनेः,ग्रहाणां स्थानं भवति।***

प्रयोजनम्-जन्मकालीनः प्रसवप्रदेशस्य ज्ञानं भवति। जन्मकाले यः ग्रहः बलिष्ठः तस्य निर्दिष्टस्थाने जन्म भवति। चोरप्रश्ने प्रश्नकालीनः बलवान् ग्रहोक्त प्रदेशे चोर्यद्रव्यं वर्तते इति च फलादेशक्रमः निर्दिष्टः।

तदुक्तं यथा-

**"देवम्ब्वग्निविहारकोशशयनक्षित्युत्करेशाः क्रमात्।"**

**विशेषविचाराः**-देवशब्देन राजगृहं, देवगृहं च सूच्येते। क्षित्युत्करः शब्देन पांसूत्करः उपस्करः वा उक्तः। यत्र सर्पादिनां नष्टादीनां वा स्थानजिज्ञासा तत्र ग्रहवशात् स्थानकथने अयं विधिः उपयुक्तः।

**पदच्छेदः**- देवः अम्बुः अग्निः विहारः कोशः शयनम् क्षित्युत्करईशः क्रमात् ।

**अन्वयः**-देव-अम्बु-अग्नि-विहार-कोश-शयन-क्षित्युत्कर-(स्थानानाम्)ईशाः (आदित्यात्)क्रमात् (भवन्ति)।

**अन्वयार्थः**-देवः=देवसम्बन्धी प्रदेशः(देवस्थानम्, पूजाभवनम्); अम्बु=जलस्थानम्, अग्निः=अग्निस्थानम्, विहारः=क्रीडास्थानम्(उपवनम्), कोशः=भाण्डारगारं, शयनः=शयनस्थानम्, क्षित्युत्करः=अवकरस्थानम्,(स्थानानां), ईशाः=अधिपाः,(आदित्यात्)क्रमात्=रव्यादितः क्रमेण ,(भवन्ति)।

**भावः**-देव-जलम्-अग्नि-विहार-कोश-शयन-क्षित्युत्कराः एतेषां स्थानानाम् आदित्यात् आरभ्य क्रमशः अधिपाः कारकाः वा भवन्ति इति भावः।

**बोधप्रश्नाः**-

1. चोरप्रश्ने रवेः बलत्वे चोरद्रव्यं कुत्र वर्तते?
2. चन्द्रोक्तप्रदेशः कः?

### 5.4.ग्रहाणां वस्त्राणि ।

लोकयात्रायांयदा नष्टवस्तोः उत हृतवस्तोः ज्ञानम् आवश्यकंतदा जनाः दैवेन प्रेरितः सन् दैवज्ञम् अनुसरन्ति। दैवज्ञेन बलवान् ग्रहवस्तोः वर्णाधारेण चौरद्रव्यस्य वा इष्टद्रव्यस्य वस्त्रमुच्यते। तच्च सत्यं भवति। अतः सप्तग्रहाणां वस्त्रादिज्ञानम् अतीव आवश्यकमस्ति।

आदित्यस्य स्थूलतन्तुकृतवस्त्रम्, अभुक्तम् अर्थात् नवं वस्त्रं चन्द्रस्य, अग्निना हतम् एकदेशदग्धं कुजस्य,अम्बुना हतं क्लिन्नं वस्त्रं बुधस्य, नातिनवं नातिजीर्णं बृहस्पतेः, शुक्रस्य दृढालान्तरस्थायि, स्फाटितम् अर्थात् जीर्णं शनैश्चरस्य भवति।

**"वस्त्रं स्थूलमभुक्तमग्निकहतं मध्य दृढं पाटितम्।"**

स्थूलं शब्देन परुषं, चर्मं वा वस्त्रं भवति। अभुक्तशब्देन अननुभूतं नवम्, दुकूलपट्टादयः भवन्ति। अग्निकहतं शब्देन दग्धं, छिन्नम्, अरक्षित्वात् वा मलिनं छिन्नं वल्कलं वा भवति। मध्य शब्देन कौशेयं भवति। दृढं प्रसिद्धं कार्पासकृतं भवति। पाटलं वल्कलमित्यर्थान्तरमपि सूचितमस्ति।

ग्रहाणां वस्त्राणि।

आदित्यस्य स्थूलतन्तुना निर्मितवस्त्रम्, नवं वस्त्रं चन्द्रस्य, एकदेशदग्धं कुजस्य, अम्बुना हतं क्लिन्नं वस्त्रं बुधस्य, नातिनवं नातिजीर्णं गुरोः, शुक्रस्य दृढालान्तरस्थायि, जीर्णं शनैश्चरस्य भवति।

| ग्रहाः। | रविः। | चन्द्रः। | कुजः। | बुधः। | गुरुः। | शुक्रः। | शनिः। |
|---|---|---|---|---|---|---|---|
| वस्त्रम्। | स्थूलम्। | अभुक्तम्। | अग्निहतम्। | जलेन हतम्। | नातिनवंनातिजीर्णम्। | दृढङाकलान्तरस्तायि। | जीर्णम्। |

**पदच्छेदः**=वस्त्रं स्थूलम् अभुक्तम् अग्नि-क-हतं मध्यं दृढं स्फाटितम् ।

**अन्वयः**=वस्त्रं स्थूलम् अभुक्तम् अग्निकहतं मध्यं दृढं स्फाटितम् ।

**अन्वयार्थः**=वस्त्रं=अम्बरम्, स्थूलम्=स्थूलतन्तुकृतम्, अभुक्तम्=नवम्, अग्निः=अग्निना हतम् अर्थात् एकदेशदग्धम्, कहतम्=जलेनहतम्, मध्यं=नातिनवं नातिजीर्णम् अर्थात् मध्यमवस्त्रम्, दृढं=अङ्कालान्तरस्थायी, स्फाटितम्=जीर्णम्।

**भावः**=आदित्याद्यारभ्य क्रमशः सप्तग्रहाणांवस्त्रं कथितम् यथा–स्थूलम्, अभुक्तम्, अग्निः,कहतं, मध्यं, दृढं, स्फाटितम् भवति।

**बोधप्रश्नः-**

3. **ग्राहणां वस्त्रादिषु आधिपत्यं विशदयत।**

**5.5.ग्रहाणां द्रव्याणि।**

द्रव्यचोरप्रश्ने अथवा द्रव्यनष्टप्रश्ने जनाः समाजस्य सन्मार्गदर्शीरूपी दैवज्ञं मिलित्वा स्वाभिलषितद्रव्यविचारमधिकृत्य प्रश्नं पृच्छन्ति। क्वचित् जनाः स्वजातकं प्रदर्श्य स्वाभिलषितद्रव्यविचारमधिकृत्य पृच्छेयुः। तस्माद् ग्रहाणां द्रव्याणां च सम्बन्धः ज्ञातव्यः। आदित्यादि आरभ्यग्रहाणां द्रव्याणि कथितानि वर्तन्ते। आदित्यस्य ताम्रं, चन्द्रस्य मणिः, भौमस्य हेमम् अर्थात् सुवर्णम्, बुधस्य शुक्तिः, बृहस्पतेः रजतं,शुक्रस्य अयः,शनेः सीसम्, एवं द्रव्याणां कारकत्वानि भवन्ति।तदुक्तं यथा-

**"ताम्रं स्यान्मणिहेमशुक्तिरजतान्यर्कात्तु मुक्तयसी।।"**

ताम्रम् इति शब्देन पाषाणादिषु फलितचिन्तनं क्रियते। रवेः तावत् सूर्यकान्तम्, आर्यकूटं, वैदूर्यं च गृह्यन्ते। चन्द्रस्य जलस्वरूपत्वात् मुक्तांशङ्खस्फाटिककांस्यत्रपूणि, भौमस्य ताम्रेष्टकादि,बुधस्य मुक्तकादि, बृहस्पतेः रक्तमणिकनककाचादयः रजतं शास्त्रान्तरादवगन्तव्यम्।

| **ग्रहः।** | **सूर्यः।** | **चन्द्रः।** | **कुजः।** | **बुधः।** | **गुरुः।** | **शुक्रः।** | **शनिः।** |
|---|---|---|---|---|---|---|---|
| **द्रव्यम्।** | ताम्रम्। | मणयः। | हेमम्। | शुक्तिः। | रजतम्। | अयः। | सीसम्। |

**प्रयोजनम्**-जन्मकाले प्रश्नकाले वा बलवद् ग्रहे, द्रव्यसत्ता अर्थात् द्रव्यप्राप्तिः भवति। निर्बलग्रहे द्रव्यस्य अभावः भवति।

उपचयस्थग्रहेण शुभदशायां द्रव्यप्राप्तिः भवति। अशुभदशायां ग्रहोक्तद्रव्यस्य नाश इति कथ्यते।

**पदच्छेदः**-ताम्रं स्यात् मणि-हेम-शुक्ति-रजतानि अर्कात् च मुक्त-अयसी ।

**अन्वयः**-अर्कात्(आदित्यादीनां ग्रहाणां क्रमशः कारकत्वं)ताम्रं मणि-हेम-युक्ति-रजतानि मुक्त-अयाःच (स्यात्)।

**अन्वयार्थः- अर्कात्=सूर्यात् आरभ्य** ग्रहाणां=सूर्य-चन्द्र-कुज-बुध-गुरु-शुक्र-शनयः ग्रहाणां, क्रमशः=अनुक्रमेण कारकत्वं,हेम=स्वर्णम्,रजतानि च मुक्ता=प्रवालः,च (स्यात् ) ।

**भावः**-आदित्यस्य ताम्रं, चन्द्रस्य मणयः, भौमस्य हेमम् अर्थात् सुवर्णम्, बुधस्य शुक्तिः, बृहस्पतेः रजतम्, शुक्रस्य अयः, शनेः सीसम्, एवं द्रव्याणां कारकत्वानि भवन्ति।

**बोधप्रश्नः-**

आदित्यस्य ताम्रं, चन्द्रस्य मणयः, भौमस्य हेमम् अर्थात् सुवर्णम्, बुधस्य शुक्तिः, बृहस्पतेः रजतं, शुक्रस्य अयः, शनेः शीसम्, एवं द्रव्याणां कारकत्वानि भवन्ति।

4. **ग्रहाणां द्रव्याधिपत्यं लिखत।**

**5.6.ग्रहाणां ऋतवः।**

नष्टजन्मपत्रिकादिनां निर्माणे, कालनिर्णये ऋतूनां ग्रहाणां च ज्ञानमत्यन्तम् आवश्यकं भवति। तदुक्तं यथा-

**"द्रेक्काणैः शिशिरादयः शशुरुचज्ञग्वादिषु द्यत्सु वा।।**"अर्थात् शिशिर-वसन्त-ग्रीष्मा-वर्षा-शरद्-हेमन्ता एवं क्रमशः शनिः, शुक्रः, रुधिरः(अर्थात् कुजः),चन्द्रः, बुधः, गुरुः,इत्थं ग्रहाः ऋतूनाम् अधिपाः भवन्ति।वराहमिहिराचार्यः सूत्ररूपेण अलिखत्, यथा **शशुरुचज्ञग्वादिषु अर्थात् श** वर्णस्य शनिरिति, **शुवर्णस्य शुक्रेति, रुवर्णस्य रुधिरः** अर्थात् **कुजः,च** वर्णस्य **चन्द्रमिति, ज्ञ** वर्णस्य **बुधः, गु** वर्णस्य **गुरुः** इति ज्ञातव्यः।

शनिः शिशिरः ऋतोः, शुक्रः वसन्तः ऋतोः, रुधिरः(अर्थात् कुजः) ग्रीष्मऋतोः,चन्द्रः वर्षा ऋतोः,बुधः शरद् ऋतोः,गुरुः हेमन्तः ऋतोः एवं ग्रहाः ऋतूनाम् अधिपाः भवन्ति।

एते ग्रहाः शिशिरादीनामधिपाः भवन्ति। आदि पदेन किम्? इति पृच्छायां वसन्त-ग्रीष्म-वर्षा-शरद्-हेमन्ताः ज्ञातव्याः। आदित्यस्य किम्? तदर्थं ग्रीष्मः इति ज्ञेयः। क्व प्रमाणम्? इतिजिज्ञासायामुच्यते बादरायणः- **"ग्रीष्ममथ प्रवदन्ति कुजार्कौ" इति।** द्रेष्काणैः शब्दत्वात् किम्? इतिपृच्छायां द्रेष्काणैः उदयद्भिः इति। लग्ने यदि ग्रहाभावे तर्हि लग्नद्रेष्काणानुसारेण ऋतूनां ज्ञानम्। शनैश्चरद्रेष्काणे लग्नगते शिशिरः, लग्ने शुक्रद्रेष्काणे वसन्तः च ज्ञेयः। लग्ने

भौमःवा रविः द्रेष्काणे ग्रीष्मऋतौ एव ज्ञेयः। चन्द्रद्रेष्काणे वर्षा, बुधद्रेष्काणे शरत्, जीवद्रेष्काणे हेमन्तः च ज्ञेयः।

| ग्रहः। | आदित्यः। | चन्द्रः। | कुजः। | बुधः। | गुरुः। | शुक्रः। | शनिः। |
|---|---|---|---|---|---|---|---|
| ऋतुः। | ग्रीष्मः। | वर्षा। | ग्रीष्मः। | शरद्। | हेमन्तः। | वसन्तः। | शिशिरः। |

**प्रयोजनम्**-व्याधिप्रश्ने पृष्टे सतिहिमाधिक्यात् शीतबाधेति वदेत्। मन्दस्य दुःखकारकत्वेन दुःखकालः, शुक्रेण मदनरूपत्वात् तद्दतौ मदनोदयः, कुजस्य अग्निकारकत्वात् तद्दतौ तैक्ष्ण्यं, चन्द्रस्य तद्दतौ वर्षागमः, ज्ञस्य वैमल्यात् तद्दतौ वैमल्यम्, गुरोः ज्ञानस्वरूपत्वात् तत् ऋतौ बुद्धेः सात्विकत्वम्, इत्यादिभिः फलादेशविधिः विज्ञायते। यः ग्रहः व्याधिप्रश्ने दुःस्थः तद्दतौ तस्य रोगविकारेति ज्ञेयः।

**पदच्छेदः**=द्रेष्काणैः शिशिरादयः श-शु- रु-च -ज्ञ गु-आदिषु उद्यत्सु वा ।

**अन्वयः**= द्रेष्काणैः शिशिरादयः श-शु-रु-च-ज्ञ-गु-आदिषु उद्यत्सु वा ।

**अन्वयार्थः**= द्रेष्काणैः=लग्नगते द्रेष्काणैः, शिशिरादयः=शिशिरादिषड्ऋतवः, श=शनिः शु=शुक्रः रु=रुधिरः च=चन्द्रः ज्ञ=बुधः गु=गुरुः आदिषु उद्यत्सु वा । ।

**भावः**- लग्ने ग्रहाभावे द्रेष्काणैः शिशिरादीनां षड्ऋतूनां शनि-शुक्र-रुधिर-चन्द्र-ज्ञ-गुरु-आदिषु अधिपाः भवन्ति।

**देवाम्ब्वग्निविहारकोशशयनक्षित्युत्करेशाः क्रमात्।**

**वस्त्रं स्थूलमभुक्तमग्निकहतं मध्यं दृढं पाटितम्।।**

**ताम्रं स्यान्मणिहेमशुक्तिरजतान्यर्कात्तु मुक्तयसी।**

**द्रेष्काणैः शिशिरादयः शशुरुचज्ञग्वादिषुद्यत्सु वा।।**

**पदच्छेदः**-देव-अम्बु-अग्नि-विहार-कोश-शयन क्षिति-उत्कर-ईशाः क्रमात्।वस्त्रं स्थूलम्-अभुक्तम्-अग्नि-हतं-मध्यं-दृढं-स्फाटितम्।ताम्रं स्यान्मणि हेम-शुक्ति-रजतानि-अर्कात् च मुक्त-अयसी। द्रेष्काणैः शिशिर-आदयः श-शु-रु-च-ज्ञ-गु आदिषु उद्यत्सु वा।

**अन्वयः**-देव-अम्बु-अग्नि-विहार-कोश-शयन क्षिति-उत्करेशाः क्रमात्, स्थूलम्-अभुक्तम्-अग्नि-हतं-मध्यं-दृढं-स्फाटितम्वस्त्रम्।ताम्र-मणि-हेम-शुक्ति-रजतानि-मुक्त-अयसीच अर्कात्; द्रेष्काणैः शिशिर-आदयः श-शु-रु-च-ज्ञ-गु आदिषु उद्यत्सु वाज्ञेयाः।

**अन्वयार्थः**= देवः=देवालयः देवगृहादयः,अम्बु=जलसमबन्धस्थानम् ताडगकूपादयः, अग्निः=अग्निसम्बन्धीस्थानम्, विहारः=विहारस्थानानि उपवनम् इत्यादयः, शयन=शयनस्थानानि, स्थूलम्=परुशतन्तुनानिर्मितम्,अभुक्तम्=न प्रक्षालितम्,


अग्निहतं=अग्निनादग्धम्, मध्यं=न प्राचीनम् न नूतनम्, दृढं=सदृढम्, वस्त्रम्=अम्बरम्, हेम=स्वर्णः, मुक्तः=मौक्तिकम्, अयसी=IRON, च अर्कात्=सूर्यात्; द्रेष्काणैः=द्रेष्काणाधारेण, शिशिरआदयः=शिशिरवसन्तग्रीष्माषाढशरद्हेमन्ताः इति षड्ऋतूनामधिकृत्य चिन्तनम्, श=शनिः, शु=शुक्रः, रु=रुधिरः वर्णः यस्य सः मङ्गलः,च =चन्द्रः,ज्ञ=ज्ञः अर्थात् बुधः, गु=गुरुः, आदिषु उद्यत्सु वाज्ञेयाः।

**भावः**-अर्कात् क्रमात् ग्रहाणां स्थानानि कथयामास- देव-अम्बु-अग्नि-विहार-कोश-शयन-क्षित्युत्कराः ईशाः क्रमाद् भवन्ति।आदित्यात् क्रमात् वस्त्राणां कारकं कथयामास। वस्त्रं –स्थूलम्-अग्निहतं-हतम् - मध्यं-दृढं-स्फाटितम्-एवं वस्त्राणाम् आदित्यादयः क्रमशः अधिपाः भवन्ति। शनिः शिशिरःऋतोः, शुक्रः वसन्तः ऋतोः, रुधिरः(अर्थात् कुजः)ग्रीष्मऋतोः,चन्द्रःवर्षा ऋतोः,बुधःशरद् ऋतोः,गुरुः हेमन्तः ऋतोः एवं ग्रहाः ऋतूनाम् अधिपाः भवन्ति।

5. **ग्रहाणाम् ऋतूनाम् आधिपत्यं लिखत।**

**5.7.ग्रहाणां दृष्टिः।**

ग्रहस्थानात् 180 अंशात्मकं दूरे ततः सरलरेखावर्ती दूरतमप्रदेशःसप्तमराशिः अथवा अस्तलग्नं भवति। सरलरेखायां सम्मुखे विद्यमानं द्रव्यं द्रष्टुःअत्युत्तमतया द्रष्टुमर्हति खलु? तथैव ग्रहाः स्वसप्तमस्थानं सम्पूर्णदृष्ट्या अवलोकयन्ति।




अतः सर्वेग्रहाः स्वस्थानात् सप्तमस्थानं सम्पूर्णदृष्ट्या अवलोकयन्ति। सप्तमस्थानात् स्व-इच्छाकामादिकं चिन्त्यते। तद्विचाराधारेण भर्तृहरिणा उक्तमिदम् वचनम्-

**विश्वामित्रपराशरप्रभृतयो वाताम्बुपर्णाशानाः। तेऽपिस्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः।।**ग्रहाणां दृष्टिः चतुर्धा विभज्यन्ते। पाददृष्टिः, अर्धदृष्टिः, पादोनदृष्टिः, सम्पूर्णदृष्टिः इति। ग्रहाणां स्थानाधारेण दृष्टिबलेषु व्यत्यासो जायन्ते।

**पाददृष्टिः** -यस्मिन् स्थाने ग्रहाः स्थिताः तस्मात् तृतीयदशमस्थानं पाददृष्ट्या ग्रहाः अवलोकयन्ति। ग्रहाः स्वस्थानात् 270अंशे दूरे अथवा -60 अंशात्मके दूरे विद्यमानं ग्रहं च पाददृष्ट्या अवलोकयन्ति। सर्वे ग्रहाः स्वाश्रितराशितः तृतीयं-दशमं-स्थानं पाददृष्ट्या अवलोकयन्ति।

| ग्रहः। | पाददृष्टिः। | अर्धदृष्टिः। | पादोनदृष्टिः। | सम्पूर्णदृष्टिः। |
|---|---|---|---|---|

**अर्धदृष्टिः**-यस्मिन् स्थाने ग्रहाः स्थिताः तस्मात् स्थानात् पञ्चमस्थानम् नवमस्थानम् च, अर्थात् 120अंशात्मकदूरं विद्यमानं ग्रहं 240 अंशात्मकदूरं विद्यमानं ग्रहं च अर्धदृष्ट्या अवलोकयन्ति। सर्वेग्रहाः स्वाधिष्ठितराशेः पञ्चमं नवमं स्थानं अर्धदृष्ट्या अवलोकयन्ति।

**पादोनदृष्टिः**- यस्मिन् स्थाने ग्रहाः स्थिताः तस्मिन् स्थानात् चतुर्थ-अष्टमस्थानं ग्रहाः पादोनदृष्ट्या अवलोकयन्ति। ग्रहाः स्वस्थानात् 90 अंशात्मके दूरेविद्यमानग्रहं, 210 अंशात्मके दूरे विद्यमानग्रहं च पदोनदृष्ट्या अवलोकयन्ति। सर्वेग्रहाः स्वाधिष्ठितराशेः चतुर्थम् अष्टमं च स्थानं पादोनदृष्ट्या अवलोकयन्ति।

**सम्पूर्णदृष्टिः**-सर्वेग्रहाः स्वाधिष्ठितराशेः सप्तमं स्थानं सम्पूर्णतया अवलोकयन्ति।ग्रहाः स्वस्थानात् 180 अंशात्मके दूरे विद्यमानं ग्रहं सम्पूर्णदृष्ट्या अवलोकयन्ति।

ग्रहस्य स्वस्थानात् तृतीयभावारम्भे पाददृष्टिः ततः वृद्धिं प्राप्य, तृतीय-चतुर्थभावसन्धौ पादोन दृष्टिः, पूरितःभवति। तस्मात् ह्रासं प्राप्य चतुर्थ-पञ्चमभावसन्धौ अर्धदृष्टिः जायते। सा च पुनः ह्रासं प्राप्य पञ्चमषष्ठभावसन्धौ शून्या जायते। षष्ठादेः आरभ्य षष्ठसप्तमभावसन्धौ वृद्धिं प्राप्य पूर्णादृष्टिः जायते। पुनः सप्तमात् आरभ्य ह्रासेन सप्तमअष्टमसन्धौ पादोन दृष्टिः जायते। श्लोकपूर्वार्धस्यैवा अयमभिप्रायः। तस्मादपि ह्रासेन अष्टमनवमसन्धौ अर्धदृष्टिः जायते। नवम भावे ग्रहस्य अर्धदृष्टिः एव भवति।तस्मादपि नवमदशमादौ पाददृष्टिर्जायते।

**सर्वेग्रहाः स्वस्थानात् सप्तमस्थानं सम्पूर्णदृष्ट्या अवलोकयन्ति।ग्रहाः स्वाश्रितराशितः तृतीयदशमस्थानयोः पाददृष्ट्या अवलोकयन्ति,पञ्चमनवमयोःअर्धदृष्ट्या,चतुर्थाष्टमयोः पादोनदृष्ट्याग्रहाः अवलोकयन्ति।**

| | | | | |
|---|---|---|---|---|
| रविः | त्रिदशयोः। | पञ्चमनवमयोश्च। | चतुर्थराशिः एवम् अष्टमराशिः च। | सप्तमराशिः। |
| चन्द्रः | त्रिदशयोः। | पञ्चमनवमयोश्च। | चतुर्थराशिः एवम् अष्टमराशिः च। | सप्तमराशिः। |
| कुजः | त्रिदशयोः। | पञ्चमनवमयोश्च। | **चतुर्थाष्टमसप्तमराशिषु सम्पूर्णदृष्टिः।** | |
| बुधः | त्रिदशयोः। | पञ्चमनवमयोश्च। | चतुर्थराशिः एवम् अष्टमराशिः च। | सप्तमराशिः। |
| गुरुः | त्रिदशयोः। | पञ्चमनवमयोः**सम्पूर्णदृष्टिः।** | चतुर्थराशिः एवम् अष्टमराशिः च। | सप्तमराशिः **सम्पूर्णदृष्टिः।** |
| शुक्रः | त्रिदशयोः। | पञ्चमनवमयोश्च। | चतुर्थराशिः एवम् अष्टमराशिः च। | सप्तमराशिः। |
| शनिः | **सम्पूर्णदृष्टिः तृतीयदशमयोः।** | पञ्चमनवमयोश्च। | चतुर्थराशिः एवम् अष्टमराशिः च। | **सम्पूर्णदृष्टिः।** |

**श्लोकः-त्रिदशत्रिकोणचतुरश्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः।**

**पदच्छेदः**=त्रि-दश-त्रि-कोण-चतुरस्र-सप्तमानि अवलोकयन्ति चरणाभिवृद्धितः ।

**अन्वयः**=त्रिदशत्रिकोणचतुरस्रसप्तमानि चरणाभिवृद्धिताःग्रहाः अवलोकयन्ति ।

**अन्वयार्थः**=त्रि=तृतीयस्थानम्, दशम=दशमस्थानम्, त्रिकोण=पञ्चमनवमस्थानम् च,चतुरस्त्रं=चतुर्थाष्टमस्थानम् च, सप्तमानि=सप्तमभवनानिचरणा=पाद-अर्ध-पादोन-सम्पूर्ण एवं क्रमेण अभिवृद्धितःअवलोकयन्ति=पश्यन्ति।

**भावः**-ग्रहाःस्वस्थानात्त्रिदशः स्थानेषु अर्थात् तृतीयभावं दशमभावं अनयोः भावं सपाददृष्ट्या पश्यन्ति। ग्रहाः स्वस्थानात् पञ्चमभावं नवमभावम् अर्धं दृष्ट्या पश्यन्ति। चतुरस्त्रम् अर्थात् ग्रहाः स्वस्थानात् चतुर्थभावम् अष्टमभावंच पादोनदृष्ट्या पश्यन्ति।

| ग्रहः। | विशेषदृष्टिः। |
|---|---|
| कुजः | चतर्थभवनम् अष्टमभवनम्। |
| गुरुः | पञ्चमभवनम् नवमभवनम्। |
| शनिः | तृतीयभवनम् दशमभवनम्। |

6. **ग्रहाणां पूर्णदृष्टिः कस्मिन् स्थाने भवति?**
7. **ग्राहणाम् अर्धदृष्टेः व्याख्यानं कुरुत।**
8. **ग्राहणां पाददृष्टिः कयोः स्थानयोः भवति?**

### 5.7.1. ग्रहाणां विशेषदृष्टिः।

शनिः यत्र स्थितः तस्मात् स्थानात् तृतीयदशमस्थानं सम्पूर्णदृष्ट्याः पश्यति। यस्मिन् स्थाने जीवः स्थितः तस्मात् स्थानात् पञ्चमनवमस्थानं जीवः सम्पूर्णदृष्ट्या पश्यति। कुजः स्वाधिष्ठितराशितः चतुर्थाष्टमं सम्पूर्णदृष्ट्या परिप्रेक्ष्यति।

**स्वाश्रितराशितः तृतीयदशमभावं शनिः, पञ्चमनवमस्थानं जीवः, कुजः चतुर्थ-अष्टमराशीन् च सम्पूर्णदृष्ट्या पश्यति।**

तदुक्तंयथा-

**त्रिदशत्रिकोणचतुरस्त्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः।**
**रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः ।।**

**पदच्छेदः**=त्रि-दश-त्रि-कोण-चतुरस्त्रसप्तमानि अवलोकयन्ति चरण-अभिवृद्धितः।रविज-अमरेज्य-रुधिराः परे च ये क्रमशो भवन्ति किल वीक्षणे अधिकाः ।

**अन्वयः**-त्रि-दश-त्रि-कोण-चतुरस्त्र-सप्तमानि चरण-अभिवृद्धितःरविजामरेज्यरुधिराः परे च ये क्रमशो वीक्षणे अधिकाः भवन्ति किल।

**अन्वयार्थः**-त्रि=तृतीयः,दशम=दशमभावः, त्रिकोण=पञ्चमनवमभावौ,चतुरस्त्र=चतुर्थ-अष्टमौ,सप्तमानि=सप्तमभवनानि,चरण=पादः(25%), अभिवृद्धितः= उन्नतिः, रविजः=रवेः जातः स च शनिः, अमरेज्य=अमराणाम् इज्यः स च बृहस्पतिः, रुधिराः=रुधिरवर्णीयः कुजः, परे=इतरग्रहाः, च ये=ग्रहो, क्रमशो=अनुक्रमेण, वीक्षणे=ईक्षणे, अधिकाः=वृद्धिः, भवन्ति किल।

**भावः**-शनिः तृतीय-दशमभावं सम्पूर्णं दृष्ट्या पश्यति। गुरुः पञ्चमनवमयोः सम्पूर्णदृष्ट्या पश्यति। चतुरस्राष्टमं कुजः सम्पूर्णदृष्ट्या पश्यति इति भावः। इतरेग्रहाः उत्तरोत्तरं पाद-अर्ध-पादोन-सम्पूर्णदृष्ट्या पश्यन्ति।

9. **केषां विशेषदृष्टिः भवति?**

5.8.**ग्रहाणां कालाः।**

लोकयात्रायां शुभाशुभनिर्देशः फलितज्योतिषशास्त्रस्यास्य महत्तरप्रयोजनं वर्तते। शुभाशुभयोः कालनिर्णेतव्यः। कियान् कालः शुभः अशुभोवा? इति अतीव आवश्यकं भवति। तस्मात् ग्रहाणां कालनिर्देशो निर्दिष्टः। शत्रुजयापजयःपृष्टे सति, परदेशगतस्य प्रत्यागमन आगमनप्रश्ने, कालनिर्देशः कृतः। तच्च अग्रे वक्ष्यते-

आदित्यादि प्रभृति ग्रहाणांकालनिर्देशः कृतः अस्ति। आदित्यात् अयननिर्देशः कृतः। चन्द्रात् क्षणः निर्दिष्टः।भौमात् वासरनिर्देशः कृतः। बुधात् ऋतोः निर्देशः कृतः। जीवात् मासनिर्देशः कृतः। शुक्रात् पक्षः निर्दिष्टः। सौरात् संवत्सरः निर्दिष्टः।

**प्रयोजनम्-** प्रश्नलग्ने यस्य ग्रहस्य उदयः स ग्रहः तस्मात् नवांशात् यावता संख्यायां नवांशे भवति तावता संख्यां अयनिदिको ग्रहोपलक्षितकालशुभाशुभफलपक्तौ वाच्यः।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ग्रहः। | आदित्यः। | चन्द्रः। | कुजः। | बुधः। | गुरुः। | शुक्रः। | शनिः। |
| कालः। | अयनः। | क्षणः। | वासरः। | ऋतवः। | मासः। | पक्षः। | वत्सराः। |

**अयनक्षणवासरर्तवो मासोऽर्धं च समाश्च भास्करात् ।**
**कटुकलवणतिक्तमिश्रितामधुराम्लौ च कषाय इत्यपि।।(वैतालिय)**

**पदच्छेदः=** अयन-क्षण-वासर-ऋतवो-मासो-अर्धं-च-समाः च भास्करात् (प्रभृति क्रमशः कालनिर्देशः भवति)।

**अन्वयः**-अयनक्षणवासराःऋतवोमासोअर्धं च समाः च भास्करात् प्रभृति क्रमशः कालनिर्देशो भवति।

**अन्वयार्थः**-अयनः=षाण्मासम्,क्षणः=मुहूर्तः, वासरः=दिवसः, ऋतवो=षाण्मासः, मासो=त्रिंशत् दिनात्मककालो, अर्धं=पञ्चदशदिनानि, समाः=संवत्सरम्, च भास्करात्=दिनकरात् प्रभृति क्रमशः कालनिर्देशः=कारकफलसमयः भवति।

**भावः**-आदित्यादिप्रभृति ग्रहाणां कालविशेषो निर्दिष्टः। स च आदित्यस्य अयनः, चन्द्रस्य क्षणः,मङ्गलस्य वासरः,बुधस्य ऋतवो,जीवस्य मासो , शुक्रस्य अर्धं शनेः समाः च भवति।

**5.9.ग्रहाणां रसाः।**

लोकयात्रनिरूपणे प्रश्नचिन्तनसमये सरसफलप्रवचनाय अनेके विषयाः उपयुज्यन्ते। क्वचित् सन्दर्भेषु भोजनाहारचन्तनं करणीयम्। भोजनाश्रये प्रश्ने यो ग्रहो उदये वा यस्य नवांशः उदये तस्य ग्रहसम्बन्धी रसान् अन्वित भोजनज्ञानं भवति।अतः ग्रहाः रसाः च अनयोः सम्बन्धः अग्रे विव्रीयते।

| ग्रहः। | रसाः। |
|---|---|
| रविः | कटुकम्। |
| चन्द्रः | लवणम्। |
| कुजः | तिक्तम्। |
| बुधः | मिश्रितम्। |
| गुरुः | मधुरम्। |
| शुक्रः | आम्लम्। |
| शनिः | कषायम्। |

।। यवनोक्तमैत्रीचक्रम् ।।

आदित्यस्य कटुरसः निर्देशः कृतः वर्तते। कटुकं नाम मरीचिकादनेन यः रसः ज्ञायते स च कटुकशब्देन उच्यते। चन्द्रस्य लवणः निर्दिष्टः कृतः। भौमः तिक्तः रसः निर्देशः कृतः, बुधः

आदित्यस्य अयनः, चन्द्रस्य क्षणः,मङ्गलस्य वासरः,बुधस्य ऋतवो,जीवस्य मासो , शुक्रस्य अर्धं शनेः समाः च भवि

मिश्ररसः, जीवस्य मधुरः रसः, शुक्रात् आम्लः रसः , सौरात् कषायस्य रसस्य निर्देशः कृतः। अत्र स्मरणीयं कथनम्-

* कटुक-लवण-तिक्त-मिश्रिता-मधुर-आम्लाः च कषाय इतिक्रमशः आदित्यादिप्रभृति ग्रहाणां रसनिर्देशः भवति। तदुक्तं च वराहमिहाराचर्येण-

**"कटुकलवणतिक्तमिश्रितामधुराम्लौ च कषाय इत्यपि।।(वैतालिय)"**

**पदच्छेदः**-कटुक-लवण-तिक्त-मिश्रिता-मधुर-आम्लौ च कषाय इति अपि ।

**अन्वयः**= कटुकः लवणतिक्तमिश्रितामधुराम्लौ च कषायः इतिक्रमशः आदित्यात् प्रभृति ग्रहाणां रसनिर्देशः भवति।

**अन्वयार्थः**= कटुक=मरीचादिषु, लवण=क्षारः, तिक्त=निम्बादिषु, मिश्रिता=षड्रसस्य मिश्रिणम्, मधुरम्=मिष्टान्नम्, इतिक्रमशः आदित्यादि प्रभृति= ग्रहाणां रसनिर्देशः भवति।

| ग्रहः। | सूर्यः। | चन्द्रः। | कुजः। | बुधः। | गुरुः। | शुक्रः। | शनिः। |
|---|---|---|---|---|---|---|---|
| मित्रः। | गुरुः। | गु बु। | ज्ञ, शुक्रः। | श,गु,शु,कु। | र, चं, बु, शु श । | कु, बु,गु,श । | बु गु शु। |
| शत्रुः | चं,कु,ज्ञ,शु,श | र,कु,शु ,श | र,चं,गु,शु। | रविः। | कुजः। | चन्द्रः,रविः। | र,चं, कु। |

**भावः**-आदित्यात् प्रभृति सप्तग्रहाणां क्रमशः षड्रासानाम् आधिपत्यं भवति। यथा आदित्यस्य कटुकं, चन्द्रस्य लवणम्, कुजस्य तिक्तं, बुधस्य मिश्रितं, जीवस्य मधुरं, शुक्रस्य आम्लं, शनेः कषायः च भवति। एवं भावः।

10. **ग्रहाणां रसाधिपत्यं लिखत।**

## 5.10. ग्रहमैत्रीविचारः।

निसर्गे शत्रुमित्रतासहजतया विद्यते। गोः मित्रं वृषभः, शत्रुः व्याघ्रः इत्यादिसम्बन्धः जन्तुषु

अपि भवन्ति। तृणधिक्ये, हरिणः तृणं खादति। हरिणाधिक्ये व्याघ्रः हरिणं मारयति।एवमेव शत्रुता मित्रता नैसर्गिकतया विद्यते। साम्प्रतं विषयमनुसरामः। ग्रहेषु विद्यमान शत्रुतामित्रादीनिहोराशास्त्रेषु वर्णितवन्तः। मित्रक्षेत्रस्थे उच्चगे मित्रेण दृष्टे जातः राजतुल्यो जायते। अतः स्थानभेदेन फलभेदः जायते। अतः ग्रहाणां मित्रसमशत्रुभावान् ज्ञास्यामः। तत्रादौ यवनाचार्यमतम्।

### 5.10.1. नैसर्गिकग्रहमैत्र्याम् इतरमतम्।

**यवनोक्तमैत्रीचक्रम्।**

सूर्यादीनां ग्रहाणां जीवादयः ग्रहा क्रमशः भवन्ति।आदित्यस्य बृहहस्पतिः मित्रम् अस्ति। चन्द्रस्य जीवबुधौ सुहृदौ भवतः। भौमस्य भार्गवबुधौ सुहृदौ भवतः। बुधस्य शनि-गुरु-शुक्र-शनयः मित्राणि भवन्ति। बृहस्पतेः, रविः,चन्द्रः, बुधः, शुक्रः, शनिःमित्राणि भवन्ति। शुक्रस्य कुजबुधगुरुशनयःमित्राणि भवन्ति। अत्र उदासीनः न कथितः वर्तते।

**"जीवो जीव बुधौ सितेन्दु तनयौ व्यर्का विभौमाः क्रमात्। वीन्द्वर्का विकुजेन्द्विनाश्च सुहृदः केषाञ्चिदेवं मतम् ।"**

**पदच्छेदः**=जीवो जीवो-बुधौ सित-इन्दु-तनयौ व्यर्का-विभौमाः क्रमात् वीन्द्वर्का विकुजेनद्विजनाश्च सुहृदः सुहृदः केषाञ्चिदेव मतम्।

**अन्वयः**=जीवो जीवोबुधौ सितेन्दुतनयौ व्यर्का विभौमाः, इन्दु-अर्का,विकुजेन्दु-इनाश्च क्रमात् सूर्यादीनां सुहृदः, केषाञ्चित् यवनाचार्यस्य एवं मतम्।

**अन्वयार्थः**=जीवो=बृहस्पतिः, जीवोबुधौ=बृहस्पतिः ज्ञः च, सितेन्दुतनयौ=शुक्रः बुधः च, व्यर्का =अर्कं विहाय सर्वे,विभौमाः=भौमं विहाय सर्वे , वीन्दु-अर्का=अर्कं इन्दुं च विहाय सर्वे,विकुज=कुजं विहाय, इन्दु=चन्द्रः, इनाश्च क्रमात् सूर्यादीनां सुहृदः=सूर्यात् आरभ्य सप्तग्रहाणां मित्राणि भवन्ति।केषाञ्चित् यवनाचार्यस्य=केचनयवनाचार्याः, एवं मतम्=एवम् अभिप्रयन्ति।

**भावः**=आदित्यस्य जीवः,चन्द्रस्य जीवबुधौ, कुजस्य सितेन्दुतनयौ,बुधस्य अर्कात् अन्ये पञ्च सुहृदः,बृहस्पतेः भौमं विहाय अन्ये, शुक्रस्य चन्द्रार्कौ विना अन्ये, शनैश्चरस्य चन्द्रार्ककुजान् विना त्रयः सुहृदः अन्ये शत्रवः एवं केचिद् यवनेश्वरादः वदन्ति।

11. **यवनाचार्यमतेन ग्रहाणां मित्रामित्रत्वं लिखत।**

### 5.1.1. नैसर्गिकग्रहमैत्र्यां सत्याचार्यमतम्।

| ।। सत्योक्तनैसर्गिक मैत्री चक्रम् ।। | | | | | | | |
|---|---|---|---|---|---|---|---|
| ग्रहः। | आदित्यः। | इन्दुः। | मङ्गलः। | बुधः। | गुरुः। | शुक्रः। | शनिः। |
| मित्रम् | चं, कु,गु | रविः, बुधः | र,चं, गु | र, शु | र, चं, कु | बु, श | ज्ञ, शु |
| समः | ज्ञः | कु,गु,शु,श | शु,श | कु, गु, श | श | कु, गु | गुरुः |
| शत्रुः | श,शु | | बु | चं | ज्ञ, शु | र, चं | र,चं, कु |

सत्याचार्यमतानुसरामः। सत्योक्ते होराशास्त्रे स्वत्रिकोण-मूलत्रिकोणराशेः स्वाम्-अन्त्य-धी-धर्मपाः स्वोच्चायुः सुखपाः ते ग्रहस्य सुहृदः भवन्ति। यस्य कस्यापि ग्रहस्य

मूलत्रिकोणस्थानात् स्वम् अर्थात् द्वितीयभावाधिपः ग्रहः मित्रं भवति। मूलत्रिकोणराशितः अन्त्यपः अर्थात् व्ययभवनाधिपः मित्रं भवति। मूलत्रिकोणराशितः धीः अर्थात् पञ्चमभवनाधिपः, धर्मः अर्थात् नवमभवनाधिपतिः, स्वोच्चराशेः अधिपः,मूलत्रिकोणराशितः, आयुषः अष्टमस्थानाधिपः, सुखपाः अर्थात् चतुर्थस्थानाधिपः ग्रहो मित्रं भवति। एतावत् लक्षणविरोधात् इतरभवनानाम् अधिपतयः शत्रवः भवन्ति। क्वचित् सन्दर्भेषु एकः एव ग्रहः, शत्रुतायां, मित्रतायां च आप्नोति। तदानीं किम्? इति पृष्टे सति उदसीनभावः भवति।

सुहृत् त्रिकोण भवनाद् ग्रहस्य सुतभे व्यये अथ धनभवने स्वजने निधने धर्मे स्वोच्चे च भवन्ति न शेषाः।

द्विराश्यधिपतिः मित्रसंज्ञः, अनुक्तराश्यधिपः शत्रुः, उक्तानुक्ते राश्यधिपे समे भवतः। अत्र ध्यातव्यः अंशः-

- मूलत्रिकोणस्थानात् स्वम्(2),स्वन्त्यम्(12), धीः(5), धर्मपाः(9), स्वोच्चस्थानम्, आयुषः, स्थानम्(8), सुखम्(4) एतेषां राशीनाम् अधिपाः मित्राणि भवन्ति। इतराणि शत्रवश्च भवन्ति।

**अथवा**

- मूलत्रिकोणस्थानात् द्वितीय-द्वादश-पञ्चम-नवम-अष्टम-चतुर्थाः एतेषां भावानाम् अधिपाः मित्राणि भवन्ति।
- प्राग् अनुक्तस्थानानाम् अधिपतयः शत्रवः अर्थात् तृतीय-षष्ठ-सप्तम-दशम-एकादशाः भावाधिपाः शत्रवः भवन्ति।

आदित्यस्य सिंहराशिः मूलत्रिकोणस्थानं भवति। मूलत्रिकोणस्थानात् **"स्वम्"** स्थानपः अर्थात् द्वितीयस्थानाधिपः सः बुधः, आदित्यस्य मित्रं भवति। सिंहराशितः एकादशराशेः अधिपः बुधः भवति। सा च राशिः मित्रक्षेत्रेषु नान्तर्भवति। अतः शत्रुः एव। अतः द्वितीयस्थानाधिपतित्वात् मित्रम्, एकादशाधिपतिः स्थानाधिपतित्वात् शत्रुः भवति।अतः एकत्र शत्रुः अपरत्र मित्रम् इत्यतः समः भवति। सिंहराशितः द्वादशस्थानस्य कर्कटकस्य चन्द्रमा अधिपतिः। सः मित्रं भवति। सिंहराशितः **धीः** स्थानम् अर्थात् पञ्चमस्थानाधिपः गुरुः भवति। अतः गुरुः मित्रं भवति। **धर्मपाः** अर्थात् धर्मस्थानस्य नवमराशेः अधिपः कुजः भवति। स च मित्रं भवति। **स्वोच्चस्थानम्** अर्थात् मेषः राशिः। मेषराशेः अधिपः कुजः इत्यतः सोऽपि मित्रम् भवति। कुजस्य धर्माधिपतित्वम् उच्चाधिपतित्वम् च जातम् अनेन मैत्री गाढता जायते। सुखपाः अर्थात् सिंहलग्नात् चतुर्थ स्थानं वृश्चिकः तस्य अधिपः कुजः भवति । पुनरपि च रविकुजयोः

मैत्री वर्धते। तच्च **अधिमैत्री** शब्देन मन्यते।**आयुः** अर्थात् अष्टमस्थानं तस्याधिपः मित्रं भवति। अत्र ध्यातव्यः अंशः-

* **सत्याचार्यः मूलत्रिकोणराशिमाश्रित्य नैसर्गिकतया नैसर्गिकशत्रुमित्रसमग्रहाणां निर्णयं करोति।**

अत्र उदाहरणम्-

सिंहराशितः अष्टमभवनाधिपः गुरुः जायते। सोऽपि मित्रः भवति। अतः गुरुः अधिमित्रं जातम्। इतरस्थानानाम् अधिपतयः शत्रवः अर्थात् तृतीयः षष्ठःसप्तमःदशमः एकादशः च एते भवनाधिपाः शत्रवः भवन्ति। सिंहराशितः तृतीयभवनाधिपः शुक्रः, षष्ठस्थानाधिपः शनिः,सप्तमस्थानाधिपः शनिः,दशमस्थानाधिपः शुक्रः, एतेषां भवनाधिपः बुधः एवं शत्रवः भवन्ति। शुक्रः, शनिः, बुधः शत्रवः भवन्ति। एषु त्रिषु शुक्रः,शनिः च द्विवारम् आवर्तितः, अतः अधिशत्रुः भवति। बुधः द्वितीयभवनाधिपत्वात् मित्रम् एकादशभवनाधिपतित्वात् शत्रुः भवति। तदानीं समः भवति।अत्र ध्यातव्य अंशः-

**अत्र द्वि-एक-अनुक्त-भपान् नैसर्गिकान् सुहृत्-सम-रिपून् सङ्कल्पयेत्।**

**द्युक्तभपाः**-2- नैसर्गिकमित्राणि कुज-गुरु-चन्द्राः।

**एकोक्तभपाः**-1- नैसर्गिकसमः- बुधः।

**अनुक्तभपाः** -0-शुक्रशनौ।

एवं सिंहो वृषः इत्यादितः तत् ग्रहस्य मूलत्रिकोणराशितः सत्योक्तलक्षणविद्यमानेन द्वेकानुक्तभपान् नैसर्गिकान् सुहृत्-सम-रिपून् सञ्चिन्तयेत्। एवम् इतरग्रहाणाम् अवगच्छेत्। अनेन विधानेन निर्णीतः नैसर्गिकशत्रुमित्रसमग्रहाः "शत्रूमन्दसितौ समाश्च" इत्यादि श्लोके कथितः तच्च अग्रे लिख्यते।-

आदित्यस्य शनिशुक्रौ शत्रू भवतः। बुधःसमः भवति। शेषाः मित्राणि भवन्ति। शेषाः ते च के? चन्द्रः, कुजः, गुरुः च एते मित्राणि भवन्ति। चन्द्रस्य आदित्यः, बुधः च मित्रे भवतः। कुजः, गुरुः, शुक्रः, शनिः च समाः भवन्ति। शत्रवः न भवन्ति। कुजस्य जीवो चन्द्रःसूर्यः च एते सुहृदः भवन्ति। ज्ञः शत्रुः भवति। शुक्रः, शनिः च समौ भवतः। बुधस्य अर्कशुक्रौ मित्रे स्तः। चन्द्रः अरिः भवति। अन्ये भौमगुरुशनयः समाः मध्यस्थाः इति।बृहस्पतेः सौम्यो, सितः च अरी भवतः। सौरः मध्यस्थः भवति। रविचन्द्रभौमाः मित्राणि भवन्ति। शुक्रस्य बुधसौरौ सुहृदौ भवतः। कुजः, जीवः समौ भवतः। शनेः शुक्रज्ञौ सितबुधौ सुहृदौ , जीवः मध्यस्थः, रविशशिभौमः शत्रवः भवन्ति।

ग्राहाणां मित्रशत्रुत्वे बिन्दवः-

1. चन्द्रस्य शत्रुः नास्ति। गुरुः कस्यापि शत्रुः न भवति।
2. रविकुजगुरवः परस्परं मित्राणि भवन्ति। शनिशुक्रौ मित्रे भवतः।

**सत्योक्ते सुहृदस्त्रिकोणभवनात् स्वात् स्वान्त्यधीधर्मपाः।**

**स्वोच्चायुः सुखपाः स्वलक्षणविधेः नान्यैर्विरोधादिति ।।(शा वि)**

**शत्रूमन्दसितौ समश्च शशिजो मित्राणि शेषा रवेः।तीक्ष्णाशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः।**

**जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोऽरिः सितार्की समौ।मित्रे सूर्य सितौ बुधस्य हिमगुः शत्रुः समाश्च अपरे । ।(शा वि)**

**सूरेः सौम्यसितावरी रविसुतो मध्योऽपरे त्वन्यथा।सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी।।**

**शुक्रजौ सुहृदौ समः सुर गुरुः सौरस्य च अन्ये अरयो। ये प्रोक्ताः स्वत्रि कोण भादिषु पुनस्तेऽमी मया कीर्तिताः।।(शा वि)**

**पदच्छेदः**=सत्य-उक्ते सुहृदः त्रिकोणे भवनात् स्वात् स्व-अन्त्य-धी-धर्मपाःस्वोच्च-आयु-सुखपाः स्वलक्षणविधेः नान्यैः विरोधा इति । शत्रूमन्दसितौ समः च शशिजो मित्राणि शेषाः रवेः। तीक्ष्णांशुः हिमरश्मिजः च सुहृदौ शेषाः समाः शीतगोः।जीवः इन्दु-उष्णकराः कुजस्य सुहृदो ज्ञो अरिः सितार्की समौमित्रे सूर्य-सितौ बुधस्य हिमगुः शत्रुः समाः च अपरे। सूरेः सौम्यसितौ अरी रवि-सुतो मध्यो अपरे त्वन्यथासौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी।शुक्रजौ सुहृदौ समः सुर गुरुः सौरस्य च अन्ये अरयोये प्रोक्ताः स्वत्रिकोण-भादिषु पुनः ते अमी मया कीर्तिताः।

**अन्वयः**=सत्योक्ते स्वात् त्रिकोणभवनात् स्वान्त्यधीधर्मपाः स्वोच्चायुः सुखपाः च सुहृदः। लक्षणविधेःविरोधाः अन्ये नइति।रवेः मन्दसितौ शत्रू, शशिजः समश्च, शेषाः(चन्द्रः, कुजः, गुरुः च) मित्राणि।शीतगोः तीक्ष्णाशुर्हिमरश्मिजश्च सुहृदौ, शेषाः (कुजः गुरुः शनिः शुक्रः च) समाः, कुजस्य जीवेन्दूष्णकराः सुहृदो, ज्ञो अरिः सितार्की समौ;बुधस्य सूर्यसितौ मित्रे,हिमगुः शत्रुः,अपरे(रविशुक्रौ) समाश्च। सूरेः सौम्यसितौ अरी, रविसुतो मध्यः, अपरे(रविः चन्द्रः कुजः च)तु अन्यथा, शुक्रस्य सौम्यार्की सुहृदौ,कुजगुरू समौ, शेषाः (रविचन्द्रौ) अरी,शुक्रज्ञौ सुहृदौ, सुरगुरुः समः, सौरस्य च अन्ये (रविचन्द्रकुजाः)अरयो, ये प्रोक्ताः स्वत्रिकोण भादिषु पुनः ते अमी मया कीर्तिताः।।

**अन्वयार्थः**=सत्योक्ते=सत्याचार्य उक्तमतमिदम्,स्वात्=द्वितीयभवनात्, त्रिकोणभवनात्=स्वमूलत्रिकोणभवनात्, स्वान्त्यधीधर्मपाः=द्वितीयद्वादशपञ्चनवमभवनाधिपाः, स्वोच्चायुः=स्वो तुङ्गस्थानाधिपाः,अष्टमस्थानाधिपाः,सुखपाः=चतुर्थभवनाधिपाः, च सुहृदः=मित्राणि भवन्ति। लक्षणविधेः=प्रागुक्तलक्षणविधेः, विरोधाः=इतरभावाधिपाः, अन्ये=शत्रवः, न=न मित्राणि इति।रवेः=आदित्यस्य, मन्दः=मन्देन चलति यः स अर्थात् शनिः, सितौ=शुक्रः, शत्रू=अरी, शशिजः=शशेः जातः, समः=न मित्रम् न शत्रुः उदासीनभावः, च शेषाः=इतरग्रहाः, मित्राणि=सुहृदः भवन्ति।शीतगोः=शीतलाः गावः यस्य सः अर्थात् शीतलानि किरणानि यस्य स चन्द्रमा । तीक्ष्णांशुः=तीक्ष्णाः अंशवः यस्य स तीक्ष्णांशुः अर्थात् रविः, हिमरश्मिजः=हिमरश्मेः जातः बुधः, च सुहृदौ=मित्रे, शेषाः=इतरग्रहाः, समाः=उदासीनाः न आसक्तः न द्वेषः च, कुजस्य=भौमस्य, जीवः=गुरुः, इन्दुः=चन्द्रः, उष्णकराः=यः उष्णं करोति स अर्थात् रविः,सुहृदः=मित्रः, ज्ञः=बुधः, अरिः=शत्रुः, सितार्की=शुक्रः शनिः, समौ=उदासीनौ, बुधस्य=हिमरश्मिजस्य, सूर्यसितौ=अदित्यशुक्रौ, मित्रे=सुहृदे, हिमगुः=हिमाः गावःयस्य स,शत्रुः=अरिः,अपरे=इतरग्रहाः समाः=उदासीनाः च भवन्ति।सूरेः=गुरोः, सौम्यसितौ=बुधशुक्रौ, अरी=शत्रू, रविसुतः=शनिः, मध्यः=उदासीनः, अपरे= त्वन्यथा, शुक्रस्य=भार्गवस्य, सौम्यार्की=बुधशनी, सुहृदौ=मित्रे, कुजगुरू=मङ्गलबृहस्पतिः,समौ=उदासीनौ,अरी=सौरस्य=शनिः,शुक्रज्ञौ=शुक्रबुधौ, सुहृदौ=मित्रे, सुरगुरुः=बृहस्पतिः, च अन्ये= अरयः=शत्रवः, ये प्रोक्ताः स्वत्रिकोणभादिषु=स्वमूलत्रिकोणादिषु, पुनः ते अमी=शत्रुमित्रत्वम्,मया=वराहमिहिराचार्येण, कीर्तिताः=प्रकीर्तिताः।

**भावः**=सत्योक्ते स्वमूलत्रिकोणभवनात्द्वितीयव्ययपञ्चमनवमस्वोच्चराशेर्भवनाधिपाः अष्टमचतुर्थभवनाधिपाः च सुहृदः भवन्ति। एतत् लक्षणविधेः विरोधाः शत्रवः भवन्ति।रवेः मन्दसितौ च शत्रू भवतः। शशिजः समः भवति। शेषाः मित्राणि भवन्ति। शीतगोः तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ भवतः। शेषाः समाः भवन्ति। कुजस्य जीवः इन्दुः उष्णकराः सुहृदः भवन्ति।ज्ञो अरिः भवति। सितार्की समौ भवतः। बुधस्य सूर्यसितौ मित्रे भवतः। हिमगुः शत्रुः भवति।अपरे समाश्च भवन्ति। सूरेः सौम्यसितौ च अरी भवतः। रविसुतो मध्यः भवति। अपरे त्वन्यथाभवन्ति। शुक्रस्य सौम्यार्की सुहृदौ भवतः, कुजगुरू समौ भवतः, शेषाः अरी भवतः। सौरस्यशुक्रज्ञौ सुहृदौ, सुरगुरुः समः, च अन्ये अरयो, ये प्रोक्ताः स्वत्रिकोण भादिषु पुनः ते अमी मया कीर्तिताः।।

12. **सत्याचार्यमतानुसारं मित्रामित्रविवेचनं कुरुत।**

13. **नैसर्गिकमित्रामित्रविभागं लिखत।**

5.1.2. **तात्कालिकग्रहमैत्री।**

यात्रायां जनाः स्वपरिवेशे स्थितैः जनैः सह मैत्रीम् आचरन्ति। यात्रानन्तरे ते प्रायशः विस्मरन्ति। स च मैत्री तात्कालिकी भवति। ग्रहस्थित्याधारेण एतादृश तात्कालिकी मैत्रीं ज्ञातुमर्हति। ग्रहाणां तात्कालिकस्नेहत्वंजातकस्य फलचिन्तने, उत प्रश्नकाले, यात्राप्रश्ने, फलितचिन्तने, वा उपयुज्यते।केषुचित् धनादिषु स्थानेषु व्यवस्थिताःग्रहाः परस्परं ग्रहस्य तत्काले सुहृदः भवन्ति।ग्रहस्थानात् धनभावे, व्ययभावे, आयभावे सहजभावे व्यापारभावे,बन्धुभावेषु स्थितेषु ग्रहेषु ग्रहस्य परस्परं मैत्री जायन्ते। ग्रहः यस्मिन् स्थाने स्थितः तस्मात् दशमः,एकादशः, द्वादशः, द्वितीयः, तृतीयः, चतुर्थः च, एषु भावेषु स्थितेषु ग्रहेषु ग्रहस्य परस्परतात्कालिकी मैत्री वर्तते। एषा मैत्री न चिरा। क्वचित् कालम् एव। अत्र भवति ध्यातव्यः अंशः-

- दशमभावात् आरभ्य चतुर्थभावपर्यन्तं व्यवस्थितः ग्रहः तत्कालिकमित्राणि भवन्ति।

**वराहमिहिराचार्येण उक्तमिदम् वाक्यम्-**

**“अन्योन्यस्य धनव्ययायसहजव्यापारबन्धुस्थिताः तत्काले सुहृदः स्वतुङ्गभवनेऽप्येकेअरयस्त्वन्यथा।“**

पञ्चमषष्ठसप्तमअष्टमनवमस्थानेषु व्यवस्थिताः ग्रहाः ग्रहस्य तत्काले शत्रवः भवन्ति।परन्तु अभिप्रायोऽयम् आचार्येण न अभिप्रेतम्।

| तात्कालिकग्रहमैत्री चक्रम्। | |
|---|---|
| ग्रहः। | |
| मित्रम् | ग्रहस्थानात् दशमः, एकादशः,द्वादशः, द्वितीयः, तृतीयः,चतुर्थः भावेषु स्थिताः ग्रहाः। |
| शत्रुः | इतरभावेषु स्थिताः ग्रहाः। |

**।।पञ्चधामैत्री ।।**

इतः पूर्वम् एव दर्शितं नैसर्गिकमैत्रीं, तत्कालिकमैत्रीं च ज्ञातवान्। अनयोः आधारेण पञ्चधा मैत्री क्रियते। मित्रम्-अधिमित्रम्-सम-शत्रु-अधिशत्रवः इति। तच्च कथम्? इति पृच्छायाम् अग्रे दश्यर्ते। **“शत्रूमन्दसितौ”**इत्यादिषु श्लोकेषु नौसर्गिकमैत्रीं

विज्ञाय,"**धनव्ययायसहज**"इत्यादिषु श्लोकेषु ग्रन्थोक्तानुसारेण तत्कालिकी मित्रादिभिः उपलक्षयेत्। तेन आधारेण पञ्चधामैत्री अग्रे विव्रीयते।

| **स्थानम्।** | **नैसर्गिकस्थानम्।** | **तात्कालिकस्थानम्।** | **नैसर्गिकस्थानम्।** | **तात्कालिकस्थानम्।** | **नैसर्गिकस्थानम्।** | **तात्कालि** |
|---|---|---|---|---|---|---|
| **ग्रहः** | समः | मित्रम् | समः | शत्रुः | शत्रुः | मि |
| **फलम्** | मित्रम् | | शत्रुः | | समः | |

नैसर्गिकतया, तात्कालिकतया,च ये ग्रहाःमित्राणि भवन्ति ते अधिमित्राणि भवन्ति।नैसर्गितया, तत्कालिकतया,च ये ग्रहाः शत्रवः भवन्ति ते अधिशत्रवः भवन्ति। नैसर्गिकतया समाः तत्कालिकतया मित्राणि ये ग्रहाः भवन्ति, ते मित्राणि भवन्ति। एकत्र शत्रवः अपरत्र मित्रम् तर्हि समाः भवन्ति। यथा- नैसर्गिकतया शत्रवः, तात्कालिकतया मित्राणि, ये ग्रहाः भवन्ति, ते समाः भवन्ति।

**तात्कालिकमित्रम्+नैसर्गिकमित्रम्- अधिमित्रम् ।**

**तत्कालशत्रुः+नैसर्गिकशत्रुः- अधिशत्रुः ।**

**तत्कालमित्रम्+नैसर्गिकसमः- मित्रम् ।**

**तत्कालमित्रम्+नैसर्गिकशत्रुः –समः ।**

**तत्कालशत्रुः +नैसर्गिकसमः –शत्रुः ।**

**अन्योन्यस्य धनव्ययायसहजव्यापारबन्धुस्थिताः तत्काले सुहृदः स्वतुङ्गभवनेऽप्येकेअरयस्त्वन्यथा ।**

**द्व्येकानुक्तभपान्सुहृत्समरिपूनसंचिन्त्य नैसर्गिकांस्तत्काले च पुनस्तु तान् अधिसुहृन्मित्रादिभिः कल्पयेत् । ।(शा वि)**

**पदच्छेदः**- अन्योन्यस्य धनव्यय-आयसहजव्यापारबन्धुस्थिताः तत्काले सुहृदः स्वतुङ्गभवने अपि एकेअरयस्त्वन्यथा।द्वि एकानुक्तभपान् सुहृत् समरिपून् संचिन्त्य नैसर्गिकां तत्काले च पुनः तु तान् अधिसुहृन् मित्रादिभिः कल्पयेत् ।

**अन्वयः**-अन्योन्यस्य धनव्ययायसहजव्यापारबन्धुस्थानेषु स्थिताः तत्काले सुहृदः भवन्ति।एके (आचार्याः)स्वतुङ्गभवने अपि सुहृदः भवन्ति। अन्यथातुअरयः भवन्ति।द्व्येकानुक्त( पूर्वोक्त)भपान् सुहृत् समरिपून् संचिन्त्य नैसर्गिकां तत्काले च पुनः तु तान् अधिसुहृ मित्रादिभिः कल्पयेत्।

**अन्वयार्थः**-अन्योन्यस्य धनः =द्वितीभावः, व्ययः =द्वितीये, आयः=एकादशभावः, सहजः=तृतीयभावः, व्यापारः=दशमभावः, बन्धुः=चतुर्थभावः,स्थिताः =एषु भावेषु संस्थिताः, तत्काले सुहृदः=तत्काले मित्राणि भवन्ति।एके=केचन आचार्याः, स्वतुङ्गभवने=स्वोच्चे भवनेऽपि

सुहृद्=मित्राणि भवन्ति। अरयः=शत्रवः, तु अन्यथा=प्रागुक्तराशि अतिरिक्तस्थानेषु स्थिताः भवन्ति।द्व्येकान्=उक्तभपान्= सुहृत्=मित्रम्, सम=मध्यस्थ,रिपून्=शत्रून्, संचिन्त्य=सङ्गृह्य नैसर्गिकां=प्राकृतिका मैत्रीम्, तत्काले=तस्मिन् कालीन जन्मकालीन उत प्रश्नकालीन वा,च पुनः=,तु तान् अधिसुहृत्मित्रादिभिः कल्पयेत्।

**भावः**-धनव्ययायसहजव्यापरबन्धुस्थिताः तत्काले स्थितिकाले सुहृदः भवन्ति।एके स्वतुङ्गे स्थितः सुहृद् भवतीति वदन्ति। ते च यवनेश्वरादयः। अन्यत्र भावेषु स्थिताः ग्रहाः शत्रवः भवन्ति। नैसर्गिकान् द्वि एकानुक्तभवान् सुहृत्समरिपून् सञ्चिन्त्य पुनः तत्काले सुहृन्मित्रादिभिः कल्पयेत्। द्वेकानुक्तभवान् एकस्य ग्रहस्य द्वे क्षेत्रे विद्यते तत्र द्वयोरपि बन्धुत्वे बन्धुः। एकस्य बन्धुत्वे उदासीनः। द्वयोः अनुक्ते शत्रुः। एवं नैसर्गिकाः सुहृत् समरिपवः सञ्चिन्त्याः। पुनः नैसर्गिकबन्धो तत्कालसुहृत्वे अतिबन्धुत्वं, नैसर्गिकसमस्य तत्कालबन्धुत्वे बन्धुत्वम्, नैसर्गिकसमस्य तत्कालशत्रुत्वम् समः, नैसर्गिकशत्रोः स्तत्कालशत्रुत्वेऽधिशत्रुत्वम् इति द्रष्टव्यम्।एवं ग्रहाणां परस्परं पञ्चविधः बन्धःवर्ततेएवं भावः।

**बोधप्रश्नः-**

14. **पञ्चधामैत्रीं विशदयत।**

**ग्रन्थस्य मूलपाठः।**

**देवम्ब्वग्निविहारकोशशयनक्षित्युत्करेशाः क्रमात्।वस्त्रं स्थूलमभुक्तमग्निकहतं मध्यं दृढं स्फाटितम्।।**

**ताम्रं स्यान्मणिहेमयुक्तिरजतान्यर्काच्च मुक्तायसी।द्रेष्काणैः शिशिरादयः शशुरुचङ्गवादिषुद्यत्सु वा।।**

**त्रिदशत्रिकोणचतुरसत्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः ।**

**रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्तिकिल वीक्षणेऽधिकाः।।**

**अयनक्षणवासरार्तवो मासोर्द्धं च समाश्च भास्करात् ।**

**कटुकलवणतिक्तमिश्रितामधुराम्लौ च कषाय इत्यपि । ।(वैतालिय)**

**जीवो जीवबुधौ सितेन्दुतनयौ व्यर्का विभौमाः क्रमात्वीन्द्वर्काविकुजेन्द्विनाश्च सुहृदः केषां चिदेवं मतम् ।**

**सत्योक्ते सुहृदस्त्रिकोण भवनात् स्वात् स्वान्त्यधीधर्मपाः स्वोच्चायुः सुखपाः स्वलक्षणविधेः नान्यैर्विरोधादिति ।।(शा वि)**

**शत्रूमन्दसितौ समश्च शशिजो मित्राणि शेषा रवेःतीक्ष्णाशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः ।**

**जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोरिः सितार्कीसमौमित्रे सूर्य सितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ।।(शा वि)**

**सूरेः सौम्यसितावरीरविसुतो मध्योऽपरेत्वन्यथासौम्यार्की सुहृदौ समौ कुजगुरूशुक्रस्य शेषावरी। शुक्रजौ सुहृदौ समः सुरगुरुः सौरस्य च अन्ये अरयोये प्रोक्ताः स्वत्रिकोणभादिषु पुनस्ते अमी मयाकीर्तिताः।।(शा वि)**

**अन्योन्यस्य धनव्ययाय सहजव्यापारबन्धुस्थिताः।।**

**तत्काले सुहृदः स्वतुङ्गभवनेऽप्येकेरयस्त्वन्यथा ।द्व्येकानुक्तभपान् सुहृत् समरिपून् संचिन्त्य नैसर्गिकां**

**तत्काले च पुनस्तुतान् अधिसुहृन्मित्रादिभिः कल्पयेत् । ।(शा वि)**

### 5.2.सारांशः।

अमुष्मिन् अध्याये ग्रहाणां संज्ञाः वरामिहिराचार्यः कथयामास। ग्रहाणां स्थानानि वस्त्राणि द्रव्याणि ऋतवः एतेषाम् आधिपत्यं दर्शयति।

| **ग्रहः।** | **देवता।** | **वस्त्रम्।** | **द्रव्यम्।** | **ऋतवः।** |
|---|---|---|---|---|
| **रविः** | देवः | स्थूलम् | ताम्रम् | ग्रीष्मः। |
| **चन्द्रः** | अम्बुः | अभुक्तम् | मणिः | वर्षा। |
| **कुजः** | अग्निः | अग्निहतम् | हेमः | ग्रीष्मा। |
| **बुधः** | विहारः | हतम् | शुक्तिः | शरद्। |
| **गुरुः** | कोशः | मध्यम् | रजतम् | हेमन्तः। |
| **शुक्रः** | शयनः | दृढम् | मुक्ता | वसन्तः। |
| **शनिः** | क्षित्युत्करेशाः | स्फटितम् | अयः | शिशरः। |

- ग्रहाणां द्विविधा दृष्टिः च दर्शिता। साच निसर्गदृष्टिः विशेषदृष्टिश्चइति। सप्तमभावे निसर्गदृष्टिः भवति। शनि-कुज-गुरूणां विशेषतया तृतीयदशमे, पञ्चमनवमे, चतुर्थाष्टमे, विशेषतया सम्पूर्णा दृष्टिः भवति। अनयोः फलानि च प्रादर्शयति। ग्रहाणां कालः रसः निर्देशयत।अग्रे ग्रहाणां स्थानवशात् कारकं कथितः। यथा-देव-जलम्-अग्नि-विहार-कोश-शयन-क्षित्युत्कराः एतेषां स्थानानाम् आदित्यात् प्रारभ्य क्रमशः अधिपाः कारकाः वा भवन्ति।आदित्यात् आरभ्य क्रमशः सप्तग्रहाणां वस्त्रं कथ्यते। यथा–स्थूलम्, अभुक्तम्, अग्नि,कहतं, मध्यं, दृढं, स्फाटितं भवति। आदित्यादीनां ग्रहाणां क्रमशः कारकत्वं ताम्रं मणि-हेम-शुक्ति-रजतम्-मुक्त-अयः च स्यात्। लग्ने ग्रहाभावे

द्रेष्काणैः शिशिरादीनां षड्ऋतूनां शनि-शुक्र-रुधिर-चन्द्र-ज्ञ-गुरवः अधिपाः भवन्ति। ग्रहाःस्वस्थानात् त्रिदशः स्थानेषु अर्थात् तृतीयभावं दशमभावम् अनयोः भावं सपाददृष्ट्या पश्यन्ति। ग्रहाः स्वस्थानात् पञ्चमभावं नवमभावम् अर्धदृष्ट्या पश्यन्ति। चतुरस्त्रम् अर्थात् चतुर्थभावं ग्रहाः स्वस्थानात् अष्टमभावं पादोनदृष्ट्या पश्यन्ति। शनिः तृतीय-दशमभावं सम्पूर्ण दृष्ट्या पश्यति। गुरुः पञ्चमनवमं सम्पूर्णदृष्ट्या पश्यति। चतुरस्त्राष्टमं कुजः सम्पूर्णदृष्ट्या पश्यति इति। अयनक्षणः वासरः ऋतवोमासोअर्धं च समाः च भास्करादिप्रभृति क्रमशः कालनिर्देशः भवति। कटुकः लवणतिक्तमिश्रितामधुरः आम्लौ च कषायः इतिक्रमशः आदित्यादि प्रभृति ग्रहाणां रसनिर्देशः भवति। आदित्यस्य जीवः,चन्द्रस्य जीवबुधौ, कुजस्य सितेन्दुतनयौ,बुधस्य अर्कात् अन्ये पञ्चसुहृदः,बृहस्पतेः भौमं विहाय अन्ये, शुक्रस्य चन्द्रार्कौ विना अन्ये, शनैश्चरस्य चन्द्रार्ककुजान् विना त्रयः सुहृदः अन्ये शत्रवः एवं केचिद् यवनेश्वरादः वदन्ति। मूलत्रिकोणस्थानात् द्वितीय-द्वादश-पञ्चम-नवम-अष्टम-चतुर्थाः एतेषां भावानाम् अधिपाः मित्राणि भवन्ति।सत्योक्ते स्वात् त्रिकोणभवनात् स्वान्त्यधीधर्मपाः स्वोच्चायुः सुखपाः च सुहृदः। लक्षणविधेः विरोधाः अन्ये न इति। रवेः मन्दसितौ शत्रू, शशिजः समः च शेषाः(चन्द्रः, कुजः, गुरुः च) मित्राणि। शीतगोः तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः (कुजः गुरुः शनिः शुक्रः च) समाः, कुजस्य जीवः इन्दुः उष्णकराः सुहृदो, ज्ञो अरिः सितार्की समौ;बुधस्य सूर्यसितौ मित्रे,हिमगुः शत्रुः,अपरे(रविशुक्रौ च) समाश्च। सूरेः सौम्यसितौ, अरी रविसुतो, मध्यः अपरे(रविः, चन्द्रः, कुजः च)तु अन्यथा, शुक्रस्य सौम्यार्की सुहृदौ, कुजगुरू समौ, शेषाः( रविचन्द्रौ च) अरी,शुक्रज्ञौ सुहृदौ, सुरगुरुः समः, सौरस्य च अन्ये ( रविः चन्द्रः कुजःच)अरयो, ये प्रोक्ताः स्वत्रिकोणभादिषु पुनः ते अमी मया कीर्तिताः। दशमभावात् आरभ्य चतुर्थभावपर्यन्तं व्यवस्थिताः ग्रहाः तत्कालिकमित्राणि भवन्ति। अन्यथा शत्रवः भवन्ति। नैसर्गिकतया तात्कालिकतयाउभयत्र मित्राणि चेत् अधिमित्रम्।उभयत्र शत्रुः चेत् अधिशत्रुः भवति। मित्रशत्रुत्वे समः भवति। एकत्र मित्रम् अन्यत्र समः चेत् मित्रं भवति।नैसर्गिकतया समः तात्कालिकतया शत्रुः चेत् शत्रुरेव भवति। एवं पञ्चधामैत्री भवति।

अग्रिमे अध्याये ग्रहाणां संज्ञा आधारेण बलादिनिर्णयः करिष्यति।तच्च ज्ञास्यामः इति शम्।

**5.3.शब्दावली।**

अम्बुः =जलम्।अयन=मार्गः।क्षणः =घटिकाद्वयम्।वासरः=दिनम्।ऋर्तवो=मासद्वयम्।मासो=त्रिंशत् दिनानि।

मासोर्द्धं=पञ्चदशदिनानि।

**5.4.सन्दर्भः।**

होराशास्त्रम्/बृहज्जातकम्-आचार्यवराहमिहिरेण रचितः भट्टोत्पलटीकोपेता ज्योतिषप्रकाशन चौक, चौखम्बा संस्कृतसंस्थान वारणसी।

होराशास्त्रम्/बृहज्जातकम्- श्री सनातनभारत भारती पाठशाला 716,11th main, 2nd cross, E Block, JP Nagar, Mysore570008 Karnataka.

होराशास्त्रम्/बृहज्जातकम्-सान्वयरुद्रविवरणी टीका –चौखम्बासुरभारती प्रकाशन वारणसी।

**5.5.सहायकग्रन्थाः।**

6. बृहत्पराशरहोराशास्त्रम्-पराशरविरचितं चौखम्बासुरभारती प्रकाशन वारणसी।
7. होराकृष्णीयम्- चौखम्बासुरभारती प्रकाशन वारणसी।
8. सारावली –कल्याणवर्मोविरचिता कान्तिमती हिन्दी व्याख्यासहिता डा.मुरलीधरचतुर्वेदी-नरेन्द्रप्रकाशजैन,मोतीलाल बनारसीदास, बंगलोरोड्, दिल्ली 110-007।
9. सारावली –कल्याणवर्मोविरचिता कान्तिमती हिन्दी व्याख्यासहिता डा.मुरलीधरचतुर्वेदी-नरेन्द्रप्रकाशजैन,मोतीलाल बनारसीदास, 120 रोयपेट् रोड् मालापुर् 600-004।
10. सारावली-वे सुब्रह्मण्यशास्त्री मुम्बय्यां पाण्डुरङ्गःजावजी –निर्णयसागर मुद्रणालयैः मुद्रितः।
11. सारावली –कल्याणवर्मोविरचिता कान्तिमती हिन्दी व्याख्यासहिता डा.मुरलीधरचतुर्वेदी-नरेन्द्रप्रकाशजैन,मोतीलाल बनारसीदास, बंगलोरोड्, दिल्ली 110-007।
12. सारावली –कल्याणवर्मोविरचिता कान्तिमती हिन्दी व्याख्यासहिता डा.मुरलीधरचतुर्वेदी-नरेन्द्रप्रकाशजैन,मोतीलाल बनारसीदास, 120 रोयपेट् रोड् मालापुर् 600-004।
13. सारावली-वे सुब्रह्मण्यशास्त्री मुम्बय्यां पाण्डुरङ्गःजावजी –निर्णयसागर मुद्रणालयैः मुद्रितः।

13.1. **बोधप्रश्नोत्तराणि ।**

1. चोरप्रश्ने रवेः बलत्वे चोरद्रव्यं देवस्थानं वर्तते।
2. चन्द्रोक्तप्रदेशः जलस्थानं भवति।

3. आदित्यस्य स्थूलतन्तुनानिर्मित वस्त्रम्, नवं वस्त्रं चन्द्रस्य, एकदेशदग्धं कुजस्य,अम्बुना हतं क्लिन्नं वस्त्रं बुधस्य, नातिनवं नातिजीर्णं गुरोः, शुक्रस्य दृढालान्तरस्थायी, जीर्णं शनैश्चरस्य भवति।
4. आदित्यस्य ताम्रं, चन्द्रस्य मणयः, भौमस्य हेमम् अर्थात् सुवर्णम्, बुधस्य शुक्तिः, बृहस्पतेः रजतं, शुक्रस्य अयः, शनेः सीसम्, एवं द्रव्याणां कारकत्वानि भवन्ति।
5. शनिः शिशिरः-ऋतोः, शुक्रः वसन्तः-ऋतोः, रुधिरः(अर्थात् कुजः) ग्रीष्माऋतोः, चन्द्रः वर्षा-ऋतोः, बुधः शरद्-ऋतोः, गुरुः हेमन्तः-ऋतोः एवं ग्रहाः ऋतूनाम् अधिपाः भवन्ति।
6. सर्वेग्रहाः स्वस्थानात् सप्तमस्थानं सम्पूर्णदृष्ट्या अवलोकयन्ति।
7. पञ्चमं नवमं स्थानम् अर्धदृष्ट्या अवलोकयन्ति।
8. ग्रहाः स्वाश्रितराशितः तृतीयदशमस्थानं पाददृष्ट्या अवलोकयन्ति।
9. स्वाश्रितराशितः तृतीयदशमभावं शनिः, पञ्चमनवमस्थानं जीवः, कुजः चतुर्थाष्टमं च सम्पूर्णदृष्ट्या पश्यति।आदित्यस्य अयनः, चन्द्रस्य क्षणः, मङ्गलस्य वासरः,बुधस्य ऋतवो,जीवस्य मासो , शुक्रस्य अर्धं शनेः समाः च भवति।
10. कटुक-लवण-तिक्त-मिश्रिता-मधुर-आम्लाः च कषाय इतिक्रमशः आदित्यादि प्रभृति ग्रहाणां रसनिर्देशः भवति।
11. मूलत्रिकोणस्थानात् स्वम्(2)-स्वन्त्यम्(12)-धी(5)-धर्मपाः(9) स्वोच्चस्थानम् आयुषः स्थानम्(8) सुखम्(4) एतेषां राशीनाम् अधिपाः मित्राणि भवन्ति। इतराणि शत्रवश्च भवन्ति।अथवामूलत्रिकोणस्थानात् द्वितीय-द्वादश-पञ्चम-नवम-अष्टम-चतुर्थाः एतेषां भावानाम् अधिपाः मित्राणि भवन्ति।प्राग् अनुक्तस्थानानाम् अधिपतयः शत्रवः अर्थात् तृतीय-षष्ठ-सप्तम-दशम-एकादशाः भावाधिपाः शत्रवः भवन्ति।
12. आदित्यस्य जीवः,चन्द्रस्य जीवबुधौ, कुजस्य सितेन्दुतनयौ,बुधस्य अर्कात् अन्ये पञ्चसुहृदः,बृहस्पतेः भौमं विहाय अन्ये, शुक्रस्य चन्द्रार्कौ विना अन्ये, शनैश्चरस्य चन्द्रार्ककुजान् विना त्रयः सुहृदः अन्ये शत्रवः एवं केचिद् यवनेश्वरादः वदन्ति।
13. रवेः मन्दसितौ शत्रू भवतः। शशिजः समः भवति। शेषाः मित्राणि भवन्ति। शीतगोः तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ भवतः। शेषाः समाः भवन्ति। कुजस्य जीवेन्दूष्णकराः सुहृदः भवन्ति।ज्ञो अरिः भवति। सितार्कौ समौ भवतः। बुधस्य सूर्यसितौ मित्रे भवतः। हिमगुः शत्रुः भवति।अपरे समाश्च भवन्ति। सूरेः सौम्यसितौ अरी भवतः। रविसुतो मध्यः भवति। अपरे अन्यथाभवन्ति। शुक्रस्य सौम्यार्कौ सुहृदौ भवतः, कुजगुरू समौ भवतः, शेषा अरी

भवतः। सौरस्यशुक्रज्ञौ सुहृदौ, सुरगुरुः समः, च अन्ये अरयो, ये प्रोक्ताः स्वत्रिकोणभादिषु पुनः ते अमी मया कीर्तिताः।

14. धनव्ययायसहजव्यापरबन्धुस्थिताः तत्काले स्थितिकाले सुहृदः भवन्ति।एके स्वतुङ्गे स्थितः सुहृद् भवतीति वदन्ति। ते च यवनेश्वरादयः। अन्यत्र भावेषु स्थिताः ग्रहाः शत्रवः भवन्ति। नैसर्गिकान् द्वि एकानुक्तभावान् सुहृत्-सम-रिपून् सञ्चिन्त्य पुनः तत्काले सुहृन् मित्रादिभिः कल्पयेत्। द्वेकानुक्तभावान् एकस्य ग्रहस्य द्वे क्षेत्रे विद्यते तत्र द्वयोरपि बन्धुत्वे बन्धुः। एकस्य बन्धुत्वे उदासीनः। द्वयोः अनुक्ते शत्रुः। एवं नैसर्गिकाः सुहृत् समरिपवः सञ्चिन्त्याः। पुनः नैसर्गिकबन्धो तत्कालसुहृत्वे अतिबन्धुत्वं, नैसर्गिकसमस्य तत्कालबन्धुत्वे बन्धुत्वे, नैसर्गिकसमस्य तत्कालशत्रुत्वं, नैसर्गिकशत्रोस्तत्कालशत्रुत्वेऽधिशत्रुत्वम् इति द्रष्टव्यम्।एवं ग्रहाणां परस्परं पञ्चविधः बन्धःकथितः। इति शम्।

### 13.2. अभ्यासप्रश्नाः।

1. इतरग्रन्थेषु उक्त मित्रशत्रुत्वेन सह तोलनं कुरुत।
2. ग्रहाणां सम्बन्धः अपि च मित्रशत्रुत्वे सम्बन्धश्च चिन्तयत।
3. ग्रहाणां कारकाणां कोष्टकं कुरुत।
4. आधुनिकजनजीवने ग्रहाणां कारकाणां उपयोगान् लिखत।
5. प्रश्नशास्त्रे मित्रशत्रुविभागे कस्य मतस्य उपयोगः करणीयः।

ॐ

6. पाठः षष्ठः।

6.1. प्रस्तावना।

6.2. उद्धेश्यम्।

6.3. षड्बलपरिचयः तत्प्रयेजनञ्च।

6.4. स्थानबलम्।

6.5. दिग्बलम् ।

6.6. चेष्टाबलम् ।

6.6.1. रविचन्द्रयोः चेष्टाबलम्।

6.6.2. ताराग्रहाणां चेष्टाबलम् ।

6.7. कालबलम्।

6.7.1. दिनरात्रिबलम्।

6.7.2. पक्षबलम्।

6.7.3. वर्षाद्याधिबलम्।

6.8. निसर्गबलम्।

6.9. दृग्बलम् ।

6.10. ग्रन्थस्यमूलपाठाः।

6.11. सारांशः।

6.12. शब्दावली।

6.13. बोधप्रश्नोत्तराणि।

6.14. अभ्यासप्रश्नाः।

**6.1.प्रस्तावना।**

**प्रिय अध्येता !**

जन्मकालादारभ्य जातकस्य शुभाऽशुभचिन्तनं क्रियते। गते पाठे ग्रहाणां वस्त्राणिअधीतवान्। द्रव्याणि, ऋतवः, दृष्टिः, विशेषदृष्टिः, कालाः, रसाः,ग्रहमैत्रीविचारः, नैसर्गिकग्रहमैत्र्याम् इतरमतम्, नैसर्गिकग्रहमैत्र्यां सत्याचार्यमतम्, तात्कालिकग्रहमैत्रीं, पञ्चधामैत्रीञ्च अधीतवान्।

पाठेऽस्मिन् षड्बलपरिचयः, तत्प्रयेजनानि, स्थानबलं, दिग्बलं, चेष्टाबलम्, रविचन्द्रयोः चेष्टाबलम्, ताराग्रहाणां चेष्टाबलं, कालबलं, दिनरात्रिबलम्, पक्षबलं, वर्षाद्याधिबलं, निसर्गबलं, दृग्बलमित्यादीन् विचारान् भवान् ज्ञास्यति।

**"यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम्।**

**स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या।"**

इति भास्कराचार्यस्य वचनम्।स्फुटफलप्रवचनाय ग्रहाणां षड्बलानां ज्ञानम् अत्यन्तम् आवश्यकम्। ग्रहाणां बलानुसारेण ग्रहोक्तफलानां निर्देशः कर्तव्यः। अस्य अङ्कात्मकतया गणनाक्रमः विद्यते। परन्तु पाठादस्मात् नातिलघु, नातिविस्ताराध्ययनं करिष्यति।

**6.2.उद्देश्यम् ।**

- **पाठादस्मात् षड्बलपरिचयम्आप्नोति।**
- **पाठादस्मात् तत्प्रयोजनञ्चस्थानबलं प्राप्नोति।**
- **पाठादस्मात् दिग्बलदर्शने दर्शकः भविष्यति।**
- **पाठादस्मात् चेष्टाबलनिरूपणे परिणतिः भविष्यति।**
- **पाठादस्मात् रविचन्द्रयोःचेष्टाबलम् अवगम्यते।**
- **पाठादस्मात् ताराग्रहाणां चेष्टाबलगणने निपुणो भविष्यति।**
- **पाठादस्मात् कालबलदिनरात्रिबलयोः गणने परिणतिः भविष्यति।**
- **पाठादस्मात् पक्षबलज्ञाने निपुणो भविष्यति।**
- **पाठादस्मात् वर्षाद्यादिबलं वेत्ति।**
- **पाठादस्मात् निसर्गबलावगमने समर्थो भविष्यति।**
- **पाठादस्मात् दृग्बलंगणने शक्तःभविष्यति।**

**6.3.षड्बलपरिचयः तत्प्रयेजनञ्च ।**

जातके फलनिरूपणे शिष्यहिताय षड्बलं वराहमिहिराचार्यः व्यरचयत्। जातकस्य समीचीनफलनिरूपणाय स्फुटगणितं सम्पादयेत्। जन्मकाले स्फुटीकृतस्थितान् ग्रहान् विज्ञाय बलाबलं गणयेत्। ग्रहाणां बलाबलनिर्णयावसरे आचार्येण चतुष्प्रकारं बलम् उक्तम्। परं सूक्ष्मतया अवबोधनाय षड्प्रकारं क्रियते। तथा च पराशरः-

**"निसर्गकालचेष्टाख्यास्थानायनदिगाख्यया।षड्वरकं बलं प्राहुः ग्रहाणां पूर्वसूरयः।।"**

1. निसर्गबलम्।
2. कालबलम्।
3. चेष्टाबलम्।

4. स्थानबलम्।
5. अयनबलम्।
6. दिग्बलम्।

पाठेऽस्मिन् एतेषां **षड्वाकारकबलानां** साधनादिकं विज्ञानं विशदीक्रियते। एषु षड्बलेषु च अनेकानि अङ्गानि वर्तन्ते। तद्यथा - दृक्बलम् एकविधम्। स्थानबले – उच्चबलम्,सप्तवर्गजबलम्,युग्मायुग्मबलम्,केन्द्रादिबलम्,द्रेष्काणबलमिति पञ्चभेदाः। निसर्गबलम् एकमेव।चेष्टाबले वक्र-समागम-सौम्यायनायनाः चत्वारो बलभेदाः। दिग्बलम् एकमेव। कालबले नतोन्नत-पक्ष-दिनरात्रित्रिभाग(याम)-वर्षेश-मासेश-दिनेश-होरेशाः इति सप्तबलभेदाः भवन्ति।परन्तु पाठेऽस्मिन् सर्वेषां साङ्गमध्ययनं न क्रियते;केचन महत्वपूर्णानाम् एव अध्याप्यते।

**6.4.स्थानबलम्।**

**"स्वदेशे पूज्यते राजा"**इति वाक्यं श्रुतवान् स्यात्। राजानं तस्य प्रजाः एव पूजयन्ति इति। सर्वसाधारणतया जनानां स्वपरिवेषे, स्वमित्राणां गृहे स्व-आत्मीयगृहे परिचयः,यथा आदरः भवति तथैव ग्रहाणाम् अपि स्थानविशेषेणबलं कथितम्।

**उच्चबलम् -अजवृषभमृगाङ्गना**दिषु श्लोकेषुग्रहाणामुच्चस्थानं कथितम्। सर्वे ग्रहाः स्वेच्चे बलिनः भवन्ति। सर्वे ग्रहाः न केवलम् उच्चे बलिनः, अपि च स्वमूलत्रिकोणस्थाने, स्वसुहृत्भवने, स्वद्रेष्काणैः, स्वनवांशैः, स्वगृहे स्थिताः बलिनः भवन्ति।

**उच्चबलानयनप्रक्रिया-"नीचेतःअर्धं ह्रसति हि ततः च अन्तरस्थेऽनुपातः"**इत्यस्मिन् श्लेके दशान् आनयनाय **उच्चबलम्** कथितम्।अर्थात् उच्चे पूर्णं बलं, नीचे अर्धं बलं भवति। मध्ये अनुपातेन ज्ञेयम्।यथा षड्राश्यन्तरिते, बले अर्धभागः ह्रासो जायते, तर्हि स्वाभीष्टस्थानस्य किम्? इति।बलानयनप्रक्रिया भवति। यथा-

$\frac{\text{½बलम्*अन्तरम्}}{\text{6राशिः}}$= अभीष्टस्थानीयकं बलम्।

| स्थानबलम्। |
| --- |
| स्वोच्चराशिः। |
| स्वमूलत्रिकोणराशिः। |
| स्वमित्रराशिः। |
| स्वद्रेष्काणवर्गः। |
| स्वनवांशस्थग्रहः। |
| स्वराशिः। |

**शत्रूमन्दसितौ समश्च शशिजः** इत्यादिषु श्लोकेषु पूर्वस्मिन् पाठे ग्रहाणां मित्रामित्राविचारः पठितः। तेषु श्लेकेषु आधृत्य सर्वेग्रहाः स्वमित्रक्षेत्रेषु बलिनः भवन्ति।जीवो जीवबुधौ इत्यादिना उक्तं खलु, तेन किम्?इति जिज्ञासा तदानीम् उच्यते-
मुहूर्तादौ प्रश्ने वा उपयोगः करणीयः।**सिंहोवृषः प्रथमषष्ठः** इत्यादिषु श्लोकेषु सर्वेषां ग्रहाणां मूलत्रिकोणस्थानानि उक्तानि। तेषु

मूलत्रिकोणक्षेत्रेषु स्थितः ग्रहः बली जायते। **स्वगृहोपगतैः**अर्थात् स्वभवनस्थितःग्रहः बली जायते। **क्षितिजसितज्ञचन्द्ररविसितावनिजाः इत्यादिषु** श्लोकेषु ग्रहाणां भवनाधिपत्यं कथितः।स्त्रीराशौ स्त्रीग्रहाः, पुरुषराशौ पुरुषग्रहाः बलिनः इति केचित्तु मन्यन्ते।"**बुधसूर्यौ नपुंसाख्यौ शशीशुक्रौ युवती नराश्च शेषाः**" इति ग्रहाणां स्त्रीपुंनपुंसकादिभेदः कथितः। तथा ओजराशौ अर्थात् विषमराशौ पुरुषग्रहाः, समराशौ स्त्रीग्रहौ(चन्द्रशुक्रौ), बलिनः भवन्ति।

**द्रेकाणाः स्युःस्वभवनात् त्रित्रिकोणाधिपानाम्।** इति श्लोकेषु द्रेष्काणविचारः पठितः। द्रेष्काणाः त्रिधा भवन्ति। आदिद्रेष्काणः, मध्यद्रेष्काणः,अन्तिमद्रेष्काणःचेति। स्त्रीग्रहौ आदिद्रेष्काणे, नपुंसकौ मध्यद्रेष्काणे,पुरुषग्रहाः अन्त्यद्रेष्काणे बलिनः भवन्ति।

**अजमृगतुलादिनवांशविधिः** इति श्लेकेषु नवांशविवेचनं कथितम्। प्राग् विवृतरीत्य ग्रहाणां षड्वर्गः आदौ ज्ञेयः। षड्वर्गेषु स्वद्रेष्काणे,स्वनावंशेविद्यमानग्रहः बलवान् इति ज्ञेयः।स्त्रीग्रहौ चन्द्रशुक्रौ स्त्रीराश्यांशकस्थौ,शेषाः विषमराश्यांशकस्थाः चपादबलयुक्तं भवति।

- **स्वोच्च-सुहृत्-स्वत्रिकोणनवांशैः स्वगृहोपगतैश्च स्थानबलं कथयेत्। स्वोच्चे,स्वमित्रक्षेत्रे, स्वमूलत्रिकोणे, स्वनवांशैः, स्वक्षेत्रे वा यदि ग्रहः वर्तते तदानीं सः स्थानबलवान् इति कथ्यते। एवं स्थानं वैपरीत्येन नीचे, शत्रुक्षेत्रे, शत्रुनवांशे, यदि ग्रहः भवति तदानीं स्थानबलरहितः स्यात्। एवं स्थानबलम्।**

**"स्वोच्चसुहृत्स्वदृगाणनवांशैः स्थानबलं स्वगृहोपगतैश्च।"**

स्वशब्दः प्रत्येकं स्थानेषु अपि योज्यम्। यथा स्व+उच्चे,स्व+सुहृद् तात्कालिकस्यसुहृत् क्षेत्रे तथा स्वत्रिकोणे अर्थात् आत्मीयमूलत्रिकोणे, स्वनवांशके स्वराशौ वा येषामन्यतमेषु स्थितः ग्रहः स्थानबलयुक्तो जायते।

**अन्वयः**- स्वोच्च-सुहृत्-(स्वमूल)त्रिकोण-नवांशैः स्थानबलं स्वगृहोपगतैः च स्थानबलं भवति।

**अन्वयार्थः**-स्वोच्च=आत्मीय उच्चस्थानः, सुहृत्=आत्मीयमित्रः, (स्वमूल)त्रिकोण=स्वमूलत्रिकोणराशिः, स्वनवांशैः=आत्मीयनवांशः, स्थानबलं=ग्रहाणां स्थानबलं कथितम्, स्वगृहोपगतैः=स्वभवने व्यवस्थिताः, च स्थानबलं=स्थानबलं भवति।

**भावः**-स्वोच्चे, स्वमूलत्रिकोणस्थाने, स्वसुहृत्भवने, स्वद्रेष्काणैः, स्वनवांशैः,स्वगृहस्थितैः ग्रहाः स्थानबलिनः भवन्ति।

**बोधप्रश्नः**

1. ग्रहाणां स्थानबलं विशदयत।

### 6.5.दिग्बलम्।

प्राक्-दक्षिण-प्रतीची-उत्तरा इति चतुर्षुदिक्षुग्रहाणां बलम् उक्तम्। तत्रपूर्वस्यां दिशि उदयकाले बुधाङ्गीरसौ अर्थात् ज्ञजीवौ बलिनौ भवतः।अत्र पूर्वं पदेन लग्नम् इति अर्थः। अतः लग्ने बुधाङ्गीरसौ बलिनौ भवतः।दक्षिणस्यां दिशि रविभौमौ बलिनौ स्तः। दक्षिणदिशि नाम दशमभावः अथवा खमध्यः अर्थात् अन्तरिक्षस्य मध्यः घटते।ततः रविः कुजः च दशमे भावे व्यवस्थिते बलिनौ भवतः इति सिद्धः। पश्चिमायां दिशि अस्तमये शनिः बलवान् भवति। अस्तमयदिक् नाम सप्तमभावः घटते। सप्तमे भावे शनिः बलवान् भवति।उत्तरस्यां दिशि सितशीतकरौ भवतः। अर्धरात्रेः चतुर्थभावे चन्द्रशुक्रौ बलवन्तौ स्तः।

**बलानयनप्रक्रिया**-यः ग्रहः यस्मात् बली स तस्मात् सप्तमस्थानस्थो विबलो जायते। मध्ये कथम्? अनुपातेन ऊह्यम् इति।एवं दिक्बलम्। अत्र स्मर्तव्ये अंशे-

- **प्राग्दिशि बुधाङ्गिरसौ, दक्षिणदिशि रविभौमौ,पश्चिमायां सूर्यसुतः, उत्तरे सितशीतकरौ च बलिनः भवन्ति।**
- **लग्नेज्ञजीवौ, चतुर्थे चन्द्रशुक्रौ, सप्तमे शनिः, दशमे रविकुजौ एवं सप्तग्रहाणां दिग्बलं कथितः।**

**वराहमिहिराचार्योक्तमिदम् वाक्यम्-**

**"दिक्षु बुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च।।"**

अन्वयः=बुध-आङ्गिरसौ,रविभौमौ,सूर्यसुतः, सित-शीतकरौ, च दिक्षु बली भवति।

अन्वयार्थः=बुधः=ज्ञः,आङ्गिरसः=अङ्गीरसगोत्रोद्भवः,रविः=रौति अवति च इति रविः अर्थात् सूर्यः,भौमः=कुजः,सूर्यसुतः=शनिः, सितः=शुक्रः, शीतकरः=चन्द्रः, च दिक्षुः=दिशासु, बली=शक्तः भवति।

<table>
<tr><td colspan="2"></td><td>पूर्वदिक्।</td><td colspan="2"></td></tr>
<tr><td rowspan="3">उत्तरदिक्</td><td rowspan="3">शुक्रः।</td><td>लग्नम्, बुधः, गुरुः च।</td><td rowspan="3">रविः, कुजः।</td><td rowspan="3">दक्षिणदिक्।</td></tr>
<tr><td></td></tr>
<tr><td>शनिः।</td></tr>
<tr><td colspan="2"></td><td>पश्चिमदिक्।</td><td colspan="2"></td></tr>
</table>

**भावः**-पूर्वादिदिक्षु बुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च दिग्बलशालिनः भवन्ति इति भावः।

**वराहमिहिराचार्येणोक्तश्लोकमिदम्-**

**"स्वोच्चसुहृत्स्वदृगाणनवांशैः स्थानबलं स्वगृहोपगतैश्च।**

**दिक्षु बुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च।।**

**पदच्छेदः**= स्व-उच्च-सुहृत् स्वदृगाण-नवांशः स्थानबलं स्व गृहोपगतैः च दिक्षु बुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च।

**पूर्वादिदिक्षु ग्रहाः बलवत्तराः भवन्ति। पूर्वस्मिन् दिशि लग्नभावे बुधगुरू बलिनौ भवतः। दक्षिणदशमभावे रविकुजौ बलिनौ। पश्चिमे सप्तमभावे शनैश्चरः बली भवति। उत्तरे चतुर्थभावे चन्द्रशुक्रौ बलिनौ भवतः।**

**अन्वयः**=स्वोच्च सुहृत् स्वत्रिकोण नवांशैः स्व गृहोपगतैः च भवेत् स्थानबलं बुधाङ्गिरसौ रविभौमौ, सूर्यसुतः सितशीतकरौ च पूर्वादिदिक्षु बली (भवति)।

**अन्वयार्थः**=स्वोच्च=स्व उच्चस्थाने, सुहृत्=मित्रक्षेत्रे, स्वत्रिकोणे=स्वमूलत्रिकोणे, नवांशैः=स्वनवांशैः, स्वगृहोपगतैः=स्वभवनगतैः, च भवेत् स्थानबलम्=स्वक्षेत्रबलम् भवति।बुधाङ्गिरसौ=बुधजीवौ, रविभौमौ=रविकुजौ, सूर्यसुतः=शनिः, सितशीतकरौ=शुक्रचन्द्रौ च, च पूर्वादिदिक्षु बली=प्रागादिदिक्षु बली भवति।

**भावः**=स्वोचभवने स्वसुहृत्-भवने स्वत्रिकोणभवनेस्वनवांशैः स्वगृहोपगतैः व्यवस्थितैःस्थानबलं च भवेत्। बुधाङ्गिरसौ रविभौमौ, सूर्यसुतः सितशीतकरौ च पूर्वादि दिक्षु क्रमशःबलिनः भवतः।

**बोधप्रश्नाः**

2. प्राग्दिशि कौ ग्रहौ बलिनौ भवतः?
3. शनिः कस्मिन् दिशि बलवान् भवति?
4. दक्षिणदिशि कौ बलिष्ठौ भवतः?
5. चतुर्थभावे कौ बलिनौ भवतः?

**6.6.चेष्टाबलम् ।**

जन्तवःचेष्टाः कुर्वन्ति। चेष्टाः नाम प्रयत्नः, उद्यमः इति अर्थः।जन्तवःचेष्टयाउत स्वकर्मणा कर्मयोग्यफलं प्राप्स्यन्ति। जन्तवः यथा स्वोद्यमेन फलं प्राप्स्यन्ति तथा एव ग्रहाः स्वचेष्टया बलिनः भवन्ति।

**प्रत्यासत्तिं मदकरटिनो दानगन्धेन वायुर्गर्जोद्भूतिं प्रकटितरुचिश्चञ्चलेवाम्बुदस्य ।**
**चेष्टा स्पष्टं वदति मतिमन्नैपुणोन्नेयतत्त्वा जन्तोर्जन्मान्तरपरिचितां निश्चलां चित्तवृत्तिम् ।।२७।।**

**[रा.त. ४.३५४]**

सप्तग्रहेषु कुजादयोपञ्च "तारग्रहाः" इति कथ्यते। रविः चन्द्रः च बिम्बग्रहौ इति कथ्यते।

**बोधप्रश्नाः**

6. **ताराग्रहाः के?**
7. **बिम्बग्रहौ कौ?**

6.6.1. **रविचन्द्रयोः चेष्टाबलम्।**

मकरादिराशिषट्के रवेः सञ्चार्यमाणः षण्मासकालःउत्तरायणम् इति नाम्ना व्यवह्रीयते। कर्कादिराशिषट्के रवेः अयनःषण्मासःकालःदक्षिणायनम् इति कथ्यते।तच्च उक्तं यथा- सूर्यसिद्धान्ते-

**उत्तरायणे(उदग् अयने) रविचन्द्रौ बलिनौ भवतः।**

**"भानोर्मकरसङ्क्रान्तेः षण्मासा उत्तरायणम्।कर्क्यादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्।"१४.०९**

उत्तरायणे रविः चन्द्रः च बलिनौ भवतः। तदुक्तं यथा -

**"उदगयने रविशीतमयूखौ।"**

उदग् नाम उत्तरम् इति अयनः नाम मार्गः इति।मयूखः शब्दस्य किरणः इति अर्थः। शीतकिरणवान् इति अर्थः। सूर्यरश्मिना प्रतिफलितकिरणः शीतः इत्यतः चन्द्रः शीतकिरणवान् भवति।उत्तरायने सूर्येन्दू बलिनौ इति कथितः। अनेन उत्तरायाणादौ बलस्य न्यूनता उत्तरायणस्यान्ते बलस्य परिपूर्णता इति।अत्र भवतः स्मर्तव्ये अंशे-

- उत्तरायणे सूर्यचन्द्रौ बलिनौ भवतः।
- **मकरादिषु बहुत्सु राशिषु रविचन्द्रौ चेष्टाबलयुक्तौ ज्ञेयौ।**

**बोधप्रश्नाः**

8. रविचन्द्रौ कदा बलिनौ भवतः?
9. उत्तरायणं कदा भवति?
10. दक्षिणायनं कदा भवति?

### 6.6.2. **ताराग्रहाणां चेष्टाबलम् ।**

चन्द्रसंयोगे ग्रहाणां समागमः शब्दः वाच्यः। रविणा सह संयोगे अस्तशब्दः वाच्यः। भौमादीनां परस्परं संयोगः युद्धम् इति वच्यः।

**ताराग्रहाः वक्रगतिंप्राप्तश्चेत् चेष्टाबलशालिनः भवन्ति।**
**चन्द्रेण संयुताः ताराग्रहाः बलिनः भवन्ति।**
**उत्तरदिशि व्यवस्थिताः ग्रहाः बलिनः भवन्ति।**


**ताराग्रहाः वक्रगतयो बलिनो भवन्ति।** वक्रगतिः नाम कीदृशी गतिः? इति पृष्टे सति अग्रेलिख्यते- ताराग्रहाणां विपरीतगतयः भवन्ति। ग्रहणां चलनवशात् केचन विशेषांशाः सूच्यन्ते। बिम्बग्रहयोः रविचन्द्रयोः वक्रगतिः न विद्यते। छायाग्रहयोः राहुकेत्वोः ऋजुगतिः न विद्यते। ताराग्रहाणां कुज-गुरु-शुक्र-शनिग्रहाणां वक्र-अतिचार-स्तम्भनगतयः भवन्ति । एते वस्तुतः वक्रमार्गेण न सञ्चरन्ति। भूमिः अपि सञ्चरति इत्यतः भूमौ स्थित्वा यः परिशीलयति तस्य दृष्ट्या विभिन्नाः ग्रहाः विभिन्नगतियुक्ताः इव दृश्यन्ते ।तस्य परिणामः एव ग्रहाणाम् अष्टधा गतिः दृष्टा। वक्रगतिकः ग्रहः किं फलं धत्ते? इति प्रश्नः। अतः उच्यते -**वक्रगतः स्वेच्छाफलं विधत्ते**

| संख्या। | अंशः। | ग्रहः। |
|---|---|---|
| **श्रेयः** | 12 | **चन्द्रः।** |
| **सेव्यः** | 17 | **कुजः।** |
| **गयः** | 13 | **बुधः।** |
| **पयः** | 11 | **गुरुः।** |
| **धनुः** | 09 | **शुक्रः।** |
| **मया** | 15 | **शनिः।** |
| **शुक्रेण सह एतैः अंशैः उत्तरे सति चन्द्रादीनां ग्रहाणां मौढ्यं भवति।** | | |

**यथा"सपत्नीचास्तगतोऽपिसेर"**इत्युक्तिः प्रसिद्धावर्तते। **दिवसकरेण अस्तसमयः, समागमः शीतरश्मिसहिता,भौमादीनाम् अन्योन्ययुक्तानां युद्धं** निगद्यते।

**समागमे ताराग्रहाः बलिनः भवन्ति।**समागमः नाम किम् ? इति जिज्ञासा।**चन्द्रेण सह कुजादिग्रहाणां योगे समागमः इति।** अथवाचन्द्रेण संयुते समागमः इति कथ्यते।संयुतः नाम किम्? इति पृष्टे सति लिख्यते- तारग्रहः चन्द्रः च एकस्मिन् राशौ व्यवस्थितौतर्हिचन्द्रेणसंयुतः इति कथ्यते। यदा चन्द्रेण तारग्रहाः संयुताः तदानीं समगमः शब्देन कथ्यते। यः ग्रहः समागमः जातः सः बली भवति।**रविणा सह चन्द्रादिग्रहाणां योगे अस्तमयः** अथवा **मौढ्यं** भवति।तदानीं ग्रहाः निर्बलाः भवन्ति।

युद्धम् ।




समागमः।




भौमादयः तारग्रहाः एकस्मिन् राशौ व्यवस्थिताः भवेयुः तदा ग्रहाणां युद्धः ज्यौतिषग्रन्थेषु कथितः।ग्रहयुद्धे उत्तरदिशिव्यवस्थिताः ग्रहाः बलिनः भवन्ति।शीघ्रकेन्द्रात् द्वितीयतृतीयपदस्थः ग्रहस्य विपुलकरत्वं प्रयासं भवति। यतः वक्रगतिः समीपस्थत्वात्। अपि च विपुलकराः अर्थात् विस्तीर्णरश्मयः ग्रहाःबलिनः भवन्ति।अत्र स्मर्तव्याः अंशाः-

- **परिशेषाः अर्थात् कुजादिपञ्चताराग्रहाः वक्रसमागमगाः, चेष्टाबलिनः ज्ञेयाः।**
- **वक्रगतिःप्राप्तश्चेत्,तथैव समागमे प्राप्तश्चेत् चेष्टाबलशालिनः ज्ञेयाः। चन्द्रेण सह एकस्मिन् राशौ स्थितिः समागमः इत्युच्यते।तदनीं कुजादयः बलिनः भवन्ति।**
- **रविणा सह ताराग्रहाः अस्तम् आप्नुवन्ति, निर्बलाः भवन्ति।**
- **परस्परताराग्रहः संयुतौ यद्धेति कथितः, युद्धे उत्तरदिशिस्थितः ग्रहः बली भवति। विस्तारितकिरणवान् ग्रहः बली भवति।**

**श्लोकः -**

**उदगयने रविशीतमयूखौ वक्रसमागमाः परिशेषाः।**
**विपुलाकारयुधि चोत्तरसंस्थिताः चेष्टितवीर्ययुताः परिकल्प्याः।।**

**अन्वयः**=उदगयने रविशीतमयूखौ चेष्टाबलिः ताराग्रहा परिशेषाः वक्रः चन्द्रेण समागमाः विपुलाकारयुधि मिथयोगो उत्तरसंस्था चेष्टितवीर्ययुताः परिकल्प्याः।

**अन्वयार्थः**= उदगयने=उत्तरायणे, रविशीतमयूखौ=रविचन्द्रौ, चेष्टाबलिः=**चेष्टबली,** ताराग्रहाः=**कुजादयः,** परिशेषाः=कुजबुधगुरुशुक्रशनि ग्रहाः, वक्रः=**वक्रगतियुक्तः,** चन्द्रेण समागमाः=**चन्द्रेण एकस्मिन् राशौ व्यवस्थिताः,** विपुलाकारः=विस्तीर्णरश्मयः, युधि=**युद्धे,**

मिथयोगो=**परस्परयुतौ**,उत्तरसंस्थाः=**उत्तरदिशिसंस्थिताः**, चेष्टितवीर्ययुताः=**चेष्टाबलयुताः**, परिकल्प्याः=चिन्तनीयाः।

**भावः=** परिशेषाः अर्थात् कुजादिपञ्चताराग्रहाः वक्रसमागमगाः चेष्टाबलिनः ज्ञेयाः। अर्थात् वक्रगतिंप्राप्तश्चेत् तथैव समागमे प्राप्तश्चेत् ,चेष्टाबलशालिनः ज्ञेयाः। चन्द्रेण सह एकस्मिन् राशौताराग्रहाणां व्यवस्थितिः समागमः इत्युच्यते। तदानीं कुजादयः बलिनः भवन्ति। रविणा सह अस्तं भवति तदानीं निर्बलत्वं भवति। परस्परताराग्रहाः एकराशौ स्थिते तदानीं ग्रहयुद्धं भवति। ग्रहयुद्धे उत्तरदिशिव्यवस्थितः ग्रहः बली जायते। विस्तीर्णरश्मयः ग्रहः च बली भवति।तच्च चेष्टाबलम् इति नाम्ना व्यवह्रीयते।

**बोधप्रश्नाः**

11. समागमशब्दस्य कोऽर्थः?
12. ताराग्रहाः कदा बलिनः भवन्ति?
13. परिशेषाःशब्देनके ग्रहाः सूचिताः सन्ति?

## 6.7.**कालबलम् ।**

द्युनदिवसहोरामासपैः कालवीर्यं भवति।अर्थात् स्ववारः,(द्वि-अयन) स्वसंवत्सरः,स्वहोरा, मासाश्च एतैः ग्रहाणां कालबलं चतुर्विधं भवति। एतेषु यत् कालः अल्पः तस्मिन् काले बलाधिक्यम्।ततः क्रमेण कालाऽधिकेषु बलस्य न्यूनत्वं भवति। कालहोरायां यत् कालबलं ततो न्यूनं स्वदिवसे, ततो न्यूनं स्वमासे , ततो न्यूनं स्वसंवत्सरे, कालबलमिति।


**बोधप्रश्नः**

14. कालबलं कतिविधम्?

### 6.7.1. **दिनरात्रिबलम् ।**

चन्द्र-कुज-शनयः रात्रौ बलिनः भवन्ति। ज्ञःसर्वदा बली। रविगुरुशुक्राःदिने बलिनः भवन्ति।शशिकुजसौराः निशि बलिनः। बुधः निशि दिवा चबलवान्।अहनि अन्ये बलिनः भवन्ति। श्लोकोक्त**अन्ये** इतिपदेन केषां ग्रहणम्? इति पृष्टे सतिरविशुक्रजीवाः बलिनः इति ज्ञेयः। निशाशब्देन मध्यरात्रिः उच्यते। अहश्शब्देन मध्याह्नः ज्ञायते। शशिकुजसौराः मध्याह्ने बलशून्याः। अर्कगुरुशुक्राः मध्यरात्रेः बलशून्याश्च भवन्ति। अन्तरे काले व्यवस्थितानां ग्रहाणां कालबलं कथम्? इति जिज्ञासा।तदर्थम् अनुपातः।मध्यरात्र्यादारभ्य जन्मकालावधिको नाड्यादिकालो ग्राह्यः। तत् द्विगुणीकृत्य षष्ठ्यांशरूपं बलम् आनेतव्यम्।एतत् बलं शशिकुजसौराणांकथितम्। षष्टितः अपनीय शिष्टं रविगुरुशुक्राणां बलम्। एतत् षष्ठ्यंशरूपमेव । बुधस्य सर्वदा दिवारात्रौ षष्टिः। षष्ठ्यांशानां षष्टिबलमिति। किमर्थं बुधस्य अहर्निशा च बले

विशेषता प्रदत्ता? इति जिज्ञासा स्वरूपः। तच्च लिख्यते- बुधस्य सूर्येण युतौ निपुणयोगो भवति। चन्द्रेण युतौ समागमः भवति। **"निशि शशिकुजसौरास्सर्वदाज्ञोऽह्नि चान्ये।"**




**बोधप्रश्नाः-**

15. **दिवाबलिनः ग्रहाः के भवन्ति?**
16. **रात्रिबलिनः ग्रहाः केभवन्ति?**
17. **सदाबलिनः ग्रहाः केभवन्ति?**

| दिवाबलिनः। | रात्रिबलिनः। | सर्वदाबली |
|---|---|---|
| सूर्यः | **चन्द्रः** | **बुधः** |
| गुरुः | **कुजः** | |
| शुक्रः | **शनिः** | |

6.7.2. **पक्षबलम्।**

आदौ पक्षबलं नाम किद्दशम्?इति जिज्ञासा भवति। मासे पक्षद्वयं भवति। तौ कृष्णशुक्लौ भवतः। ग्रहाः सर्वदा बलिनः न भवन्ति। सर्वदा निर्बलाः अपि न भवन्ति।**ग्रहाणां बलं पक्षाधारेण विभाजनमेव पक्षबलम्।** तच्च कथ्यते-

**पक्षबलम्**-क्रूराः कृष्णपक्षे बलिनः भवन्ति।सौम्याः शुक्लपक्षे बलिनः भवन्ति। तच्च उक्तं-

**"बहुलसितगतास्स्युः क्रूरसौम्याः क्रमेण।"**

क्रमेण नाम कथं विधिः? क्रूराःसौम्याः कृष्णशुक्लपक्षविषयः।अथवा कृष्णपक्षे दिनम् अर्थात् कृष्णप्रतिपत् प्रारभ्य बलवन्तः भवन्ति।पौर्णम्यान्ते चन्द्रबुधगुरुशुक्राःपूर्णबलाः भवन्ति। रविकुजमन्दाः हीनबलाः भवन्ति।अमावास्याः अन्त्ये चन्द्रबुधगुरुशुक्राः निर्बलाः, रविकुजमन्दाःपूर्णबलाःच भवन्ति।तन्मध्येकथम्? इति जिज्ञासा। तच्च उच्यते त्रैराशिकेन अवगन्तव्यम् इति।एतदुक्तं वराहमिहिराचार्येण यथा-

**"बहुलसितगतास्स्युः क्रूरसौम्याः क्रमेण।।"**

**अत्र स्मर्तव्यांशे -**

- **ग्रहाणां बलं पक्षाधारेण विभजनम् एव पक्षबलम्।**
- **क्रूराः कृष्णपक्षे बलिनः भवन्ति।सौम्याः शुक्लपक्षे बलिनः भवन्ति।**

**पक्षबलानयनप्रक्रिया-**

1. चन्द्रात् अर्कं विशोधयेत्। (चन्द्रस्फुटम्–रविस्फुटम्=फलम्)।
2. शिष्टं षट्राश्यधिकंद्वादशेभ्यो अपनीयः। (12-00-00-00–शिष्टकलाः=फलम्)।
3. प्राप्तं फलम् अंशीकृत्य त्रिभिः विभजेत्। यदि षड्राशितः न्यूने सति चन्द्रार्कयोः अन्तरम् साक्षात् त्रिभिः विभाजयेत्। प्राप्तं फलं **चन्द्रबुधगुरुशुक्राणां** बलं भवति।
4. इतराणां पक्षबलज्ञानविधिः कथम्? इति जिज्ञासा। तच्च लिख्यते-
5. चन्द्रार्कयोः अन्तरं करणीयम् (चन्द्रस्फुटम्–रविस्फुटम्=फलम्)। प्राप्तं फलम् षष्टिऽभ्योऽपनीयः(60-00-00-00-फलम्=शिष्टं(रविकुजमन्दानां फलम्))। शिष्टं रविकुजमन्दानां फलं भवति।

**चन्द्रस्य विशेषः- चन्द्रपक्षबलं द्विगुणं भवति।**

**"निशीन्दुमन्दावनिजाः परेऽहनि स्वकीयहोरासममासवासराः।**
**सितादिपक्षद्वयगाः शुभाशुभा बुधः सदा कालजवीर्यशालिनः ।।३६।।"**

**बोधप्रश्नः।**

18. पक्षबलं कथं भवति?

**6.7.3. वर्षाद्यादिबलम्।**

स्ववर्षे वर्षाधिपः ग्रहः बलवान् भवति। चैत्रादौ वर्षारम्भे आदौ यः दिवसाधिपः वर्षाधिपतिःभवति। यस्मिन् वासरे चैत्रादौ संवत्सरस्य आरम्भो भवति सःवासराधिपः, संवत्सराधिपः वर्षाधिपः भवति। वर्षाधिपः तस्मिन् वर्षे बली जायते। एतदुक्तं वराहमिहिराचार्येण यथा-

**"द्व्ययनदिवसहोरामासपाः कालवीर्यं शरुबुगुशुचासाद्या वृद्धितो वीर्यवन्तः।।"**

**अयनबलम्।**

**उत्तरेण गच्छन्तः शुक्रकुजार्केन्द्रमन्त्रिणो बलिनः। याम्येन गच्छन्तौ चन्द्रशशी बलिनौ। उभयमार्गेण गच्छन् बुधो बली।**

**मासाधिपः**-चैत्रादि द्वादशाचान्द्रमासाः भवन्ति। तेषु मासारम्भेआदौ यः दिवसाधिपः मासाधिपतिन्तं विद्यात्। मासाधिपतिः स्वमासे बलिः भवति।

**बलानयनप्रक्रिया** मासादौ न्यूनं बलम् मासान्ते पूर्णम् इति। मध्ये अनुपातेन ज्ञेयम्।

**दिवसाधिपः।**

स्वदिवसःअर्थात् स्ववासरः=सूर्योदयात् सूर्यास्तपर्यन्तं यावत् समयः दिनमानं भवति।

1. दिनमानस्य त्रिधा विभागः करणीयः(दिनमानम्/3) यथा-राशि-अंश-कला-विकलाः/3=राशिः1-अंशः1-कलाः1-विकलाः1।
    a. प्रथमभागस्य बुधः अधिपतिः भवति ।
    b. द्वितीयभागस्य अर्को अधिपतिः भवति।
    c. तृतीयभावस्य मन्दः अधिपतिः भवति।
2. रात्रिमानं त्रिधा विभाजयेत्।
    a. प्रथमभागस्य चन्द्रः अधिपतिः भवति।
    b. द्वितीयभागस्य शुक्रो अधिपतिः भवति।
    c. तृतीयभागस्य भौमः अधिपतिः भवति।

एतत् वर्णितं च पराशरहोरायां -

**ज्ञार्कमन्देन्दुशुक्रारदिनरात्र्योस्त्रिभागपाः।तत्रैतेषां बलं पूर्णं देवेड्यस्य तु सर्वदा।।**


**होराबलम्**-ततः परं कक्षाप्रकारेण ग्रहाः कालहोराधिपाः भवन्ति। ते च मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः सप्तैते कालहोरेशाः क्रमशः शीघ्रगामिनः इति। कालहोरा द्विप्रकारकः भवति।कालहोरा अर्धनाडिकाद्वयम् इति एकः प्रकारः। एकाकालहोरा सार्द्धद्विनाडिकाः चेत् एकस्मिन् दिवसे कति? इति अनुपातः। षष्टिःघटिकाः एकं दिनम्।तर्हि 60घटिकाः/2.30 =24कालहोरा भवन्ति। एवमेकस्मिन् अहोरात्रे चतुर्विंशति कालहोराः भवन्ति। वारेशात् पञ्चमात् प्रभृति चक्रक्रमात् इति एक प्रकारः। चक्रक्रमः नाम किम्?इति जिज्ञासा। तच्च कक्ष्याक्रमः इति कथितः। ग्रहाणां कक्ष्याक्रमःइत्थं वर्तते-

"**मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः।**"

यस्मिन् वासरः भवति तस्मात् पञ्चमं ग्रहाणां गणयेत्। स च पञ्चमाधिपः कालहोराधिपः भवति।**जन्मकालिककालहोराधिपः ग्रहः ग्राह्यः**।यस्मिन् समये**यस्य कालहोरा भवति** सः ग्रहः कालहोराधिपतिः भवति।

**संवत्सराधिपः, मासाधिपः, दिवसाधिपः,कालहोराधिपः च एते चत्वारःकालबलशालिनः भवन्ति। इति कालबलम्।**वर्षाधिपतेः पादं बलं, मासाधिपतेः अर्धं, दिनाधिपतेः पादोनं, कालहोराधिपतेः पूर्णम् एकं बलम् इति। तच्च उक्तं यथा-

"**पादं स्ववर्षेऽथ फलं स्वमासे दिने स्वकीये चरणोनुरूपम्।**
**रूपं स्वहोरस्विति कालवीर्यमुक्तं हि होरानिपुणैः पुराणे।।**"




- **वर्षाधिपतेः ग्रहस्य ¼ बलम्(स्ववर्षे बली)।**
- **मासाधिपतेः ग्रहस्य ½बलम्(स्वमासप्रवेशे बली)।**
- **दिनाधिपतेः  ग्रहस्य ¾ बलम्(स्वदिने बली)।**
- **कालहोराधिपतेः ग्रहस्य 1 बलम्(स्वहोरायाम् एव बली)।**

**बोधप्रश्नाः-**

19. वर्षाधिपः कः भवति?
20. मासाधिपः कः भवति?
21. दिवसाधिपः कः भवति?
22. कालहोराधिपः कः भवति?

### 6.8.निसर्गबलम् ।

निसर्गेण ग्रहेषु स्वशक्तिषु बलेषु व्यत्ययः भवति। **शनि-रुधिर-बुध-गुरु-शुक्र-चन्द्राः क्रमशः उत्तरोत्तरं बलिनः भवन्ति।** तच्च उक्तं यथा-

**"शरुबुगुशुचासाद्याः वृद्धितो वीर्यवन्तः।।"**

श वर्णेन शनिः, रु वर्णेन रुधिरः, बु वर्णेन बुधः, गु वर्णेन गुरुः, शु वर्णेन शुक्रः, च वर्णेन चन्द्रः।शनैश्चरात् अधिकः भौमः बली भवति। तस्मात् अधिकः बुधः बली भवति।बुधस्य अपेक्षया शुक्रः अधिकः बलवान्। मनः कारकः चन्द्रः शुक्रापेक्षया बलवान् भवति। सर्वेषाम् अपेक्षया सविता बलवान् भवति। अत्र सप्तग्रहाः अतः सप्त इति संख्या बलवत्वेन स्वक्रीयते। शनिः सप्तांशेषु एक अंशात्मकं बली भवति। रुधिरः सप्तांशेषु अंशद्वयात्मकं बली इति। तच्च अधः प्रस्तूयते।

**श-शनिः 1/7 शनेः बलम्।**

**रु-रुधिरः 2/7 कुजस्य बलम्।**

**बु-बुधः3/7 बुधस्य बलम्।**

**गु-गुरुः 4/7गुरोःबलम्।**

**शु-शुक्रः 5/7शुक्रस्यबलम्।**

**च-चन्द्रः 6/7चन्द्रस्यबलम्।**

**साद्या सविता सूर्यः 7/7बलम्।**

**एते सप्तग्रहाः वृद्धितः क्रमशः वृद्ध्या क्रमेण उत्तरोत्तरवृद्ध्या वीर्यवन्तः बलिनः भवन्ति।**

शनिः → कुजः → बुधः → गुरुः → शुक्रः → चन्द्रः → सूर्यः।

**"निशिशशिकुजसौरास्सर्वदाज्ञोऽह्नि चान्ये।बहुलसितगतास्स्युः क्रूरसौम्याः क्रमेण।।**

**व्द्ययनदिवसहोरामासपैः कालवीर्यम्।शरुबगुशुचासाद्यो वृद्धितो वीर्यवन्तः।।"**

**अन्वयः**=शशिकुजसौराः निशि, ज्ञो सर्वदा, अन्ये च अह्नि, क्रूरसौम्याः क्रमेण बहुलसितगताः क्रमेण बलिनः स्युः द्वि अयनः, दिवसः, होरा मासपैः कालवीर्यं, शरुबुगुशुचासाद्यो वृद्धितो वीर्यवन्तः।

**अन्वयार्थः**=शशिकुजसौराः=शशिः कुजः सौराः च=शशिकुजसौराः अर्थात् चन्द्रः कुजः शनिः च इति, निशि=रात्रौ, ज्ञो=बुधः, सर्वदा=सदा, अन्ये=इतरग्रहाः, च अह्नि=दिवसे, क्रूरसौम्याः=पापग्रहाःशुभग्रहाः च, क्रमेण=अनुक्रमेण, बहुलसितगताः=कृष्णपक्षः शुक्लपक्षः च, क्रमेण बलिनः=क्रमेण बलवान् स्युः। द्वि अयन=एकसंवत्सरम् इति अर्थे द्वि अयनम् इति, दिवसः=दिनम्, होरा=कालहोरा, मासपैः=मासाधिपैः, कालवीर्यं=कालबलम् इति, शरुबुगुशुचासाद्यो=शनि रुधिरः बुधः गुरुः शुक्रः चन्द्रः रविः एते क्रमेण,वृद्धितो=उत्तरोत्तरम्,वीर्यवन्तः=बलवन्तः।

**भावः**=रविः, गुरुः, शुक्रः,च दिने बलिनः भवन्ति।शशिकुजसौराः निशि बलिनः। बुधः सर्वदा बलवान्। क्रूराः कृष्णपक्षे बलिनः भवन्ति। सौम्याः शुक्लपक्षे बलिनः भवन्ति।स्वसंवत्सरे, स्वदिवसे, स्वमासे, स्वकालहोरायां ग्रहाः बलिनः जायन्ते। शनिः, रुधिरः,बुधः, गुरुः, शुक्रः,चन्द्रः,आसाद्यो उत्तरोत्तरं नासर्गिकतया वीर्यवन्तः भवन्ति।

**बोधप्रश्नः-**

23. ग्रहाणां नैसर्गिकबलं विशदयत।

**6.9.दृग्बलम् ।**

मित्रक्षेत्रे स्थिताः स्वगृहे स्थिताःउच्चराशौस्थिताः, स्वनवांशेषु स्थिताः, शुभग्रहाणां च दृष्टः ग्रहः दृग्बलम् प्राप्स्यति।चन्द्रसितौ स्त्रीक्षेत्रस्थे दृष्टे दृष्टं ग्रहं दृग्बलम् प्राप्स्यति। इतराः ग्रहाः कुजबुधगुरुशुक्राः पुरुषक्षेत्रस्थे दृष्टाः ग्रहाः दिग्बलशालिनः भवन्ति। तच्च लघुजातके उक्तं यथा-

**"बलवान् मित्रस्वगृहोच्चनवांशेषु ईक्षिताःशुभैः चापि। चन्द्रसितौ स्त्रीक्षेत्रे पुरुषक्षेत्रोपगाः शेषाः।"**

**शुभग्रहाणां दृष्टियुक्ता ग्रहाः दृग्बलशालिनः भवन्ति।पापग्रहाणां दृष्ट्या सहिता ग्रहाः दृक्बलरहिताः भवन्ति।**

**बोधप्रश्नः**

24. दृग्बलं कथं भवति?

6.10. **ग्रन्थस्यमूलपाठः ।**

**"स्वोच्चसुहृत्स्वदृगाणनवांशैः स्थानबलं स्वगृहोपगतैश्च।दिक्षुबुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च।**

**उदगयने रविशीतमयूखौ वक्रसमागमाः परिशेषाः।।विपुलाकारायुधि चोत्तरसंस्थिताः चेष्टितवीर्ययुताः परिकल्प्याः।।"**

**"निशि शशिकुजसौरास्सर्वदाज्ञोऽह्नि चान्ये।बहुलसितगतस्स्युः क्रूरसौम्याः क्रमेण।। स्वादिवससमहोरामासपैः कालवीर्यम्।शरुबगुशुचासाद्यो वृद्धितो वीर्यवन्तः।।"**

6.11. **सारांशः।**

**ग्रहाणां षड्विधं बलम् अत्रोक्तम्। ते च-**

1. **स्थानबलम्।**
2. **दिग्बलम्।**
3. **चेष्टाबलम्।**
4. **कालबलम्।**
5. **नैसर्गिकबलम्।**
6. **दृग्बलम्।**

एवं षड्बलेषु स्थानबलम् आचार्येण बहुधा सूचितम्। उच्चत्रिकोणस्वसुहृदि इत्यादिना सुहृत्-अरि-परकीयाः कुलसमकुलमुख्येत्यादिभिः श्लोकैः स्थानबलस्य प्राधान्यमूह्यम्। केन्द्रे स्थितानां प्रथमे वयसि,पणफरस्थाः (मध्ये) मध्यवयसि,आपोक्लीमस्थाः अन्तिमे वयसि,च फलं विदधाति। केन्द्रे स्थिताः 60 अंशबलयुक्ताः, पणफरस्थाः 30 त्रिंशदंशबलयुक्ताः, आफोक्लीमस्थाः 15अंशबलयुक्ताः, च भवन्ति। मूलत्रिकोणे पञ्चचत्वारिंशत् अंशं बलम्, स्वराशौ त्रिंशत् अंशं बलम्, स्व-अतिमित्रक्षेत्रे विंशद् अंशानां बलम्,मित्रक्षेत्रे पञ्चदशांशानां बलम्, समक्षेत्रे दशांशानां, शत्रुक्षेत्रे दशांशानाम्,अतिशत्रुक्षेत्रे षष्ठ्यंशाः एवं ग्रहाणां फलं कथितम्।स्वोच्च-सुहृत्-स्वत्रिकोण-नवांशैः स्वगृहोपगतैश्च स्थानबलं कथयेत्। स्वोच्चे मित्रक्षेत्रे स्वमूलत्रिकोणे स्वनवांशैः स्वक्षेत्रे वा यदि ग्रहः वर्तते तदानीं सः स्थानबलवान् इति कथ्यते। (एवं

स्थानं) वैपरीत्येन नीचे, शत्रुक्षेत्रे, शत्रुनवांशे, यदि ग्रहः भवति तदानीं स्थानबलरहितः स्यात्। एवं स्थानबलम्। दिग्बलं नाम पूर्वादिदिक्षुग्रहाः बलवत्तराः भवन्ति। तेषां बलज्ञानम् एव दिग्बलम्। पूर्वादिदिक्षु बुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च दिग्बलशालिनः भवन्ति। प्राच्यां लग्नराशौ प्रथमभावे बुधगुरू बलिनौ भवतः। दक्षिणदशमभावे रविकुजौ बलिनौ। पश्चिमे सप्तमभावे शनैश्चरः बली भवति। उत्तरे चतुर्थभावे चन्द्रशुक्रौ बलिनौ भवतः। उत्तरायणे सूर्यचन्द्रौ बलिनौ भवतः।ताराग्रहाः वक्रगतयो बलिनो भवन्ति। चन्द्रेण संयुताः ताराग्रहाः बलिनः भवन्ति। उत्तरदिशि व्यवस्थिताः ग्रहाः बलिनः भवन्ति। परिशेषाः अर्थात् कुजादिपञ्चताराग्रहाः वक्रसमागमगाः चेष्टाबलिनः ज्ञेयाः। वक्रगतिं प्राप्तश्चेत् चेष्टाबलशालिनः ज्ञेयाः। तथैव समागमे प्राप्तश्चेत् चन्द्रेण सह एकस्मिन् राशौ स्थितिः समागम इत्युच्यते। कुजादयः समागमे बलिनः भवन्ति।(द्वि अयन) स्वसंवत्सरः, मासाः, स्ववासरः, स्वहोराः च एतैः ग्रहाणां कालबलं चतुर्विधं भवति। एतेषु यः कालः अल्पः तस्मिन् काले बलाधिक्यम्।ततः क्रमेण कालाऽधिकेषु बलस्य न्यूनत्वं भवति। कालहोरायां यत् कालबलं ततो न्यूनं स्वदिवसे, ततो न्यूनं स्वमासे, ततो न्यूनं स्वसंवत्सरे कालबलमिति।**शनि -रुधिर-बुध-गुरु-शुक्र-चन्द्राः क्रमशः उत्तरोत्तरं नैसर्गिकतया बलिनः भवन्ति।**मित्रक्षेत्रे स्थिताः,स्वगृहे स्थिताः,उच्चराशौस्थिताः, स्वनवांशेषु स्थिताः, शुभग्रहाणां च दृष्टः ग्रहः दृग्बलं प्राप्स्यति। चन्द्रसितौ स्त्रीक्षेत्रस्थे दृष्टे दृष्टं ग्रहं दृग्बलं प्राप्स्यति।

### 6.12. शब्दावली।

उदगयने =उत्तरायणे।शीतमयूखः=(शीतकिरणः)चन्द्रः।वक्रः=वक्रगतियुक्तः ग्रहः।समागमाः =चन्द्रेण संयुतः ग्रहः।विपुलाकारः=विस्तीर्णकिरणवान्।युधि =युद्धे।उत्तरसंस्थिताः =उत्तरदिशि स्थिताः।चेष्टिताः=चेष्टायुक्ताः।

### 6.13. बोधप्रश्नोत्तराणि।

1. स्वोच्चे, स्वमूलत्रिकोणस्थाने, स्वसुहृत्भवने, स्वदृगाणैः, स्वनवांशैः, स्वगृहस्थितैः ग्रहाः स्थानबलिनःभवन्ति।
2. पूर्वस्यां दिशि उदयकाले बुधाङ्गीरसौ बलिनौ भवतः।
3. शनिः पश्चिमस्यां दिशि बलवान् भवति।
4. दक्षिणस्यां दिशि रविभौमौ बलिनौ स्तः।
5. चतुर्थभावे चन्द्रशुक्रौ बलवन्तौ स्तः।
6. सप्तग्रहेषु कुजादयो पञ्च "तारग्रहाः"इतिकथ्यते।
7. रविः चन्द्रः च बिम्बग्रहौ इति कथ्येते।

8. उत्तरायणे सूर्यचन्द्रौ बलिनौ भवतः।

9. उत्तरायणं मकरादितः भवति।

10. दक्षिणायनं कर्कसङ्क्रमादितः भवति।

11. चन्द्रेण सह कुजादिग्रहाणां योगे समागमः इति। अथवा चन्द्रेण संयुते समागमाः इति कथ्यते।

12. चन्द्रेण संयुताः ताराग्रहाः बलिनः भवन्ति।

13. परिशेषाः शब्देन कुजादिपञ्चताराग्रहाः ग्रहाः सूचिताः।

14. स्ववासरः,(द्वि अयन) स्वसंवत्सरः,स्वहोरा, मासाश्च एतैः ग्रहाणां कालबलं चतुर्विधं भवति।

15. रविगुरुशुक्राः दिने बलिनः भवन्ति।

16. शशिकुजसौराः निशि बलिनः।

17. बुधः निशि दिवा च बलवान् भवति।

18. ग्रहाणां बलं पक्षाधारेण विभजनमेव पक्षबलम्।

19. चैत्रादौ वर्षारम्भे आदौ यः दिवसाधिपः सः वर्षाधिपतिः विद्यात्।

20. मासरम्भे आदौ यः दिवसाधिपः सःमासाधिपतिः इति विद्यात्।

21. यस्मिन् वासरः भवति तस्मात् पञ्चमं ग्रहाणां गणयेत्। स च पञ्चमाधिपः कालहोराधिपः भवति। जातके जन्मकालिककालहोराधिपः ग्रहः ग्राह्यः।

22. निसर्गेण ग्रहेषु स्वशक्तिषु बलेषु व्यत्ययः भवति। शनि-रुधिर-बुध-गुरु-शुक्र-चन्द्राः क्रमशः उत्तरोत्तरं बलिनः भवन्ति।

23. शनैश्चरात् अधिकः भौमः बली भवति। तस्मात् अधिकः बुधः बली भवति।बुधापेक्षया शुक्रः अधिकः बलवान्। मनः कारकः चन्द्रः, शुक्रापेक्षया बलवान् भवति। सर्वेषाम् अपेक्षया सविता बलवान् भवति।

24. शुभग्रहाणां दृष्टियुक्ता ग्रहाः दृग्बलशालिनः भवन्ति।पापग्रहाणां दृष्ट्या सहिता ग्रहाः दृक्बलराहिताः भवन्ति।

### 6.14. अभ्यासप्रश्नाः।

1. कृत्तिकानक्षत्रे प्रथमे पादे जाते चन्द्रस्य स्थानबलं कियत्,कथम् भवति?
2. गुरुः कर्कस्थे जाते केन हेतुना गुरोः स्थानबलम् इति विशदयत।
   कर्कस्थे गुरौ उच्चस्थे भवति अतः गुरोः उच्चबलं विद्यते।
3. मध्याह्ने जातस्य रवेः दिग्बलं विशदयत।

मध्याह्ने रविः खमध्ये भवति। अतः रविबलवान् भवति।

4. ग्रीष्मऋतौ रवेः केन हेतुना बलं भवति?

   रवेः ग्रीष्मऋतौ उत्तरायणम् भवति अतः बली भवति।

5. वसन्तऋतौ रवेः कस्मात् बलं जायते?

   रवेः वसन्तऋतौ उत्तरायणम् भवति अतः बली भवति।

6. सूर्यसिद्धान्ते ग्रन्थे चन्द्रेण सह ताराग्रहाणां युतिः विचारम् वर्णितम्। तच्च अध्ययनं कुरु।

7. ग्रहाणां समागमः कदा भवति? इति पञ्चाङ्गे आकाशे च दृष्ट्वा विज्ञाय सारिणीं निर्मातु।

8. स्वोच्चे ग्रहाः कतिअंशात्मकं बलिनः भवन्ति?

9. स्वमित्रक्षेत्रे ग्रहाः कति अंशात्मकं बलिनः भवन्ति?

10. रव्यादीनां ग्रहाणां होराक्रमः कथं भवति?

**Ωॐशुभं भवतु। ॐΩ**

7. पाठसंरचना ।

7.1. प्रस्तावना।

7.2. उद्देश्यम्।

7.3. वियोनिजन्मनिश्चयः(वियोनिशब्दार्थं स्पष्टीकृत्य प्रथमद्वितीयौ श्लोकौ व्याख्येयौ)।

7.4. वियोनौ राशीनाम् अवयवत्वप्रकल्पना।

7.5. वियोनिवर्णज्ञानम्।

7.6. पक्षिजन्मयोगाः।

7.7. वृक्षजन्मयोगाः।

7.7.1. वृक्षसङ्ख्यानिर्णयः।

7.7.2. रव्यादीनां वृक्षविशेषकारकत्वम्।

7.7.3. वृक्षस्य स्थानं शुभाशुभत्वं च।

7.7.4. पुनः वृक्षसङ्ख्यानिर्णयः । ग्रन्थस्य मूलपाठः ।

7.7.5. सारांशः।

7.7.6. शब्दावली।

7.7.7. बोधप्रश्नोत्तराणि।

7.7.8. अभ्यासप्रश्नाः।

## 7. पाठसंरचना।

### 7.1.प्रस्तावना।

गते पाठे, भवान्षड्बलपरिचयं प्राप्तवान्।स्थानबलं ज्ञातवान्।दिग्बलम् अधीतवान्।चेष्टाबलम् अभ्यस्तवान्।रविचन्द्रयोः,ताराग्रहाणाञ्चचेष्टाबलान् भेदाञ्च अवगतवान्। कालबलेषु विद्यमानभेदोपभेदान् ज्ञातवान्। दिनरात्रिबलम् अधीतवान्।चन्द्रस्य पक्षबलं ज्ञातवान्। वर्षाद्याधिबलम् अधिगतवान्।निसर्गबलं पठितवान्।दृग्बलं ज्ञातवान्।

प्रपञ्चसंस्कृतौ भारतीयानां संस्कृतिः अत्यन्तं श्रेष्ठं; यतः भारतीयचिन्तनम् अत्यन्तं श्रेष्ठं प्राचीनञ्च वर्तते। "**शं नो अस्तु द्विपदे शं चतुष्पदे।**" इति वेदोक्तिःभारतीयानां संस्कृतेः वैशाल्यञ्च प्रदर्शयति। पृथिव्यां न केवलं द्विपदानां शुभं भवतु, अपि च चतुष्पदानां शुभमस्तु, इति भारतीयानां चिन्तनं वर्तते। **आत्मनः मोक्षाय जगतः हिताय** च,इति जगते अस्माकं पूर्वजाः बोधितवन्तः। अस्माकं पूर्वजैःअनुसृतः मार्गः धर्ममार्गः आसीत्। भारतीयसम्प्रत्ययेषु कथितेषु सिद्धान्तेषु कर्मसिद्धान्तः अन्यतमः वर्तते। प्राग्-जन्मार्जितकर्मानुसारं जन्तवः नानायोनीषु जायन्ते।तेषुजातेषु जन्तुषु मानवः श्रेष्ठः। तदुक्तं शङ्कराचार्यैः यथा -**"जन्तूनां नरजन्म दुर्लभम्"**

इति। तेन आत्मनः मोक्षाय जगतः हिताय च प्रयतनीयः।अतः तेन मानवेन स्वपरिवेशे विद्यमानः प्रत्येकः अपि जीवहिताय शुभाशुभचिन्तनं कर्तव्यमस्ति। समजः नाम समः जाताःअर्थात् प्राणिनः भवन्ति। मानवं विहाय इतरेषांजन्तूनांयद्यपिअमूर्तचिन्तनशक्तिः नैव वर्तते, तथापि तेषाम् उन्नतिः मानवेन करणीयः।

प्राणः यस्य अस्ति सः प्राणी।'प्राण' शब्देन सह 'इन्' प्रत्ययस्य योजनेन प्राणी शब्दोत्पत्तिः। जन्तुभिः मनुजाः नैकोपकारकं स्वीक्रियन्ते। श्वानः स्वस्वामीं विश्वासेन रक्षयन्ति।भारतीया: गां मातृत्वेन पश्यन्ति, पालयन्ति च। न केवलं दुग्धदातृत्वेन गवां मातृत्वम् । बहुविधदिव्यगुणानां निलय: भवति गौ:। गवि गव्ये च दिव्यत्वम् अस्ति। तादृशगाव: दुग्धदानयन्त्राणि नैव। ता: राष्ट्रसौभाग्यदायिन्य:। परोपकारगुणेन गोतुल्यजन्तु: नान्य: अस्ति भूतले।आधुनिकजनजीवने हस्तिनः उत्सवादिषु उपयुज्यन्ते, तेषां तु प्राचीनकाले न केवलं दैविकमहत्वम् अपि च साम्पत्तिक एवं राजकीयमहत्वं च आसीत्।

अतः स्व-परिवेशे विद्यमाने समजानां जातकविमर्शनम् क्रियते। प्रत्येकस्यापि जीवस्य उन्नत्यै प्रकृतेः संरक्षणायै प्रत्येकः अपि प्रयतनीयः। तन्निमित्तं समजानां जातकचिन्तनविधिम् अस्मिन् खण्डे विशदीक्रियते। तदेव बृहज्जातके वराहमिहिराचार्येण वियोनिजन्माध्याये विशदीकृतम् अस्ति।

***वर्गीकरणम् ।***

अरस्तू महोदयः [ग्रीक् दार्शनिकः, प्लेटो महोदयस्य शिष्यः, नाना क्षेत्रेषु प्रतिभासम्पन्नः] आधुनिकरीत्या जन्तूनां वर्गीकरणम् आरब्धवान् । तदनन्तरं केरोलस् लिनियस् महोदयः समुचितरीत्या वर्गीकरणम् अग्रे नीतवान् । तेन मतेन प्रमुखतः पञ्चविभागाः आसन्। 1. सूक्ष्मजीवाः, 2. जलचराः, 3. सरीसृपाः, 4. उभयपदिनः, 5. सस्तन्यः चेति । एषु पुनः अनेके विभागाः भवन्ति । प्राणिनां वर्गीकरणम् एवमपि क्रियते - अस्थिमन्तः अनस्थिमन्तः इति । कर्कटाः, वृश्चिकाः, प्रवालाः, कीटाः, षट्पदाः शम्बूकाः च अनस्थिमन्तः सन्ति। अस्थिमत्सु पञ्चवर्गाः सन्ति। ते मत्स्याः मण्डूकादयः, सर्पादयः, पक्षिणः, कशिनः च ।

वराहमिहिराचार्यः ग्रहाणां वियोनिजन्मप्रभावानुसारं विभक्तम्।यथा-चतुष्पादाः, पक्षयः, वृक्षाः एतेषां जननयोगानिइति। ततःअग्रे, स्थले जाताः, जलेजाताः, स्थलजलर्क्षजाताः, इति भिन्नभिन्नयोगाः वर्तन्ते।खण्डेऽस्मिन्वियोनिजन्मानां जन्मकारकग्रहस्थितिः योगान् अध्येष्यति।

7.2. उद्धेश्यम् ।

* पाठस्यास्य अध्ययनेन वियोनिजन्मनिश्चये समर्थो भविष्यति।

* पाठस्यास्य अध्ययनेन वियोनौ राशीनाम् अवयवत्वप्रकल्पना निपुणो भवष्यति।
* पाठस्यास्य अध्ययनेन वियोनिवर्णज्ञाने प्रबुद्धो भविष्यति।
* पाठस्यास्य अध्ययनेन पक्षिजन्मयोगाः ज्ञास्यति।
* पाठस्यास्य अध्ययनेन वृक्षजन्मयोगाः अवगमिष्यति।
* पाठस्यास्य अध्ययनेन वृक्षसंख्यानिर्णये निष्णातः भविष्यति।
* पाठस्यास्य अध्ययनेन रव्यादीनां वृक्षविशेषकारकत्वे निर्णये समर्थः भविष्यति।
* पाठस्यास्य अध्ययनेन वृक्षस्य स्थानं शुभाशुभत्वं चिन्तनपटुः भविष्यति।
* पाठस्यास्य अध्ययनेन पुनः वृक्षसंख्यानिर्णयः निर्णेतुं शक्ष्यति।

### 7.3.वियोनिजन्मनिश्चयः।

आदौ वियोनिः नाम किम्? इति प्रश्नमुदेति।विविधाः योनयः वियोनयः।विविधानांयोनीनां, तिर्यक्, स्थावरादीनाम् जन्म तत् वियोनिजन्मा। प्रपञ्चेऽस्मिन् (84,000)चतुरशीतिसहस्राणि वियोनिजन्मानि वर्तन्ते। तेषांवियेनिनां जातकचिन्तनम् अत्र विशदिक्रीयते। स्वप्राग्जन्माकर्मानुसारेण तिर्यक्, पक्षिः, स्थावरः, जङ्गमादयः जायन्ते।

| <u>वियोनिजन्मकारकम्।</u> |
|---|
| पापाःबलिनः,सौम्याः निर्बलाः भूत्वा, क्लीबग्रहौ लग्नं पश्यतः, उत केन्द्रस्थितः, चन्द्रे वियोनिद्वादशांशे वियोनिजन्म जायते। |

तत्र प्रष्टुः सकाशात् जातककालं प्रश्नकालं वा विज्ञाय वियोनिजन्मनिश्चयज्ञानं भवति। प्रश्नकाले जन्मकाले वा यदिक्रूरग्रहाः बलसहिताः भूत्वा,सौम्यग्रहाःनिर्बलाः सन्तः, नपुंसकग्रहौ केन्द्रसंस्थितौ स्यातां, तर्हि वियोनिजन्म जायते। तत्र जिज्ञासा स्वरूपः, वियोनिःकीदृशः?कीदृशः असौ सत्वः?इति। तच्च अग्रे लिख्यते; चन्द्रः यस्मिन् राशेः द्वादशांशे स्थितः तस्मिन् राशिसमानरूपं वदेत्, अर्थात् चन्द्रद्वादशांशसमानरूपं वदेत्। चन्द्रद्वादशांशः मेषे भवति चेत्, मेषसमानरूपःवियोनिरिति ज्ञातव्यः। अध्याये अस्मिन् वियोनिजन्मयोगे प्रथमश्लोके क्रूरग्रहशब्दः प्रयुक्तः। क्रूरग्रहाः के? इति प्रश्नःसमुदेति।क्रूरग्रहैः अर्थात्रविकुजशनिभिः,एभिः सुबलिभिः अर्थात् बलिष्ठैः भवेत्। सौम्यग्रहैः अर्थात् चन्द्रबुधगुरुशुक्रैः विबलैः बलहीनैः भवेत्। क्लीबे ग्रहौ अर्थात् बुधशनी, एतौ चतुष्टयगतौ अर्थात् केन्द्रे गते भवेत्। तदनीं वियोनिजन्म भवति। अन्ययोगः क्लीबग्रहौ तत् अवेक्षणात् वा; तयोः क्लीबग्रहयोः बुधशन्योः,लग्ने परिदृष्टौ सति अवेक्षणात् वा,वियोनिजन्म जायते। स च वियोनिः चन्द्रोप्राप्तः द्वादशांशासमानरूपं जायते। चन्द्रप्राप्तद्वादशांशाः यदि वियोनिसंज्ञः भवेत् अर्थात्मेष-

वृषभ-मिथुन-कर्क-सिंह-वृश्चिक-धनु-उत्तरार्धा-मकर-मीनाः एषु राशिषु वियोनिसंज्ञितेषु अन्यतमः राशिः भवेत्। तदा चन्द्रोपगात् द्विरसभागसमानरूपम् अर्थात् चन्द्रप्राप्तद्वादशांशराशेः समानरूपं तिर्यग् जन्तवः जन्म वदेत्।

अत्र भवति स्मर्तव्याः अंशाः-

→ पापग्रहाः सुबलिभिः, सौम्याः विबलैः, क्लीबे चतुष्टयोपगते, वियोनिजन्म जायते।

→ पापग्रहाः सबलिभिः, सौम्याः विबलैः, क्लीबे लग्नम् ईक्षणात् वा वियोनिजन्म जायते।

→ चन्द्रप्राप्तद्वादशांशराशिः समानरूपं तिर्यग् जन्तूनां जन्म भवति।

इदं योगम् वसन्ततिलकछन्दसि उक्तम्। यथा-

**क्रूरग्रहैः सबलिभिः विबलैश्च सौम्यैः क्लीबे चतुष्टयगते तदवेक्षणद्वा।**

**चन्द्रोपगाद्विरसभागसमानरूपं सत्वं वदेत् यदि भवेत्स वियोनि संज्ञः।।**

पापाः अर्थात् पापग्रहाः भवन्ति। एते पापग्रगहाः स्वभागगाःअर्थात् स्वनवांशं प्राप्ताः बलिनः भवेयुः, शोभनाः अर्थात् शुभग्रहाः, पारक्ये अर्थात् परग्रहनवांशे विबलाः भवेयुः, तदानीं वियोनिसंज्ञकमेषादिषु पूर्वोक्तेषु राशिषु अन्यतमं लग्नं भवेत्, अत्रापि चन्द्रोपगात् द्विरसभागसमानरूपं दृष्ट्वा वियोनिसंज्ञकं तिर्यक् जन्तुरूपजन्म आदिशेत्।चन्द्रमा यस्मिन् द्वादशांशे तत् सदृशरूपं प्राणिनां वियोनिजन्म वदेत्। तच्च अग्रे विव्रीयते। मेषद्वादशभागे व्यवस्थिते चन्द्रमसि जाते, मेषाख्यस्य जन्म जायते। एवं वृषद्वादशभागे व्यवस्थिते चन्द्रमसि, वृषाख्यस्य जन्म जायते। कर्काटकद्वादशभागे व्यवस्थिते कुलीरादेः जन्मजायते। सिहंस्य द्वादशांशे चन्द्रमसि, सिंहद्विपिश्रृगालमार्जारादिसत्त्वानां जन्मजायते। वृश्चिकद्वादशभागे व्यवस्थिते सर्पकीटादेः जन्मजायते। धनुर्धरद्वादशभागे द्वितीयार्धे व्यवस्थिते अश्वगर्दभादि जन्मजायते। मकरद्वादशभागे पूर्वार्धे व्यवस्थिते, मृगजन्म जायते। केचिदाचार्याः, मण्डूकादेः जलचरप्राणिनः इच्छन्ति। मीने मीनस्यैव भवति। अत्र भवतः स्मर्तव्याः अंशाः-

| वियोनिजन्मयोगः। | |
|---|---|
| पापाः बलिनः। | **शुभग्रहाः विबलाः।** |
| बुधे शनौ वा केन्द्रे। | |
| बुधे शनौ वा लग्नम् ईक्षिते। | |
| वियोनिसंज्ञकलग्ने। | |
| चन्द्रोपगात् द्विरसभागः समानरूपे। | |

→ पापाः बलिनः स्वनवांशस्थाः, शुभग्रहाः परनवांशगताः विबलाः, लग्नं वियोनिसंज्ञक भवेत् तदानीं वियोनिजन्म जायते।

→ चन्द्रप्राप्तद्वादशांशराशेः समानरूपं तिर्यग् जन्तूनां जन्मानि जायन्ते।

**पापबलिनः स्वभागगाः पारक्ये विबलाः च शोभनाः।**

**लग्नञ्च वियोनिसंज्ञकं दृष्ट्वाऽत्रापि वियोनिमादिशेत्।।**

पदच्छेदः-

**क्रूर-ग्रहैः सबलिभिः विबलैः च सौम्यैः क्लीबे चतुष्टयगते तत् अवेक्षणात् वा चन्द्रः उपगतः द्विरसभागसमानरूपं सत्वं वदेत् यदि भवेत् वियोनि संज्ञः।**

**पापबलिनः स्वभागगाः पारक्ये विबलाः च शोभनाः।लग्नं च वियोनि संज्ञकं दृष्ट्वा अत्रापि वियोनिम् आदिशेत्।**

**अन्वयः**=क्रूरग्रहैः सुबलिभिः सौम्यैः विबलैः च क्लीबैः चतुष्टयगते तत् अवेक्षणात् वियोनिजन्म वा चन्द्रोपगद्विरसभाग समानरूपंसत्वं वदेत् यदि वियोनिसंज्ञःभवेत्।

**अन्वयार्थः**- क्रूरग्रहैः=पापग्रहैः, सुबलिभिः=बलसहितैः, सौम्यैः=शुभैः, विबलैः=विगतैः बलैः अर्थात् निर्बलैः, च क्लीबे=नपुंसके ग्रहे, चतुष्टयगते=केन्द्रगते, तत् अवेक्षणात्=लग्नम् ईक्षणात्, वियोनिजन्म वा=विविधाः योनि जन्मम् चन्द्रोपग=चन्द्रप्राप्त, द्विरसभागः=(द्विरसाः अर्थात् द्वि रसेन गुणिताः; रसशब्देन षड् मन्यन्ते। द्वि रसेन गुणिताः अर्थात् 2*6=12 द्वादशांशाः समानरूपम् आदिशेत्) समानरूपं=राशिसमानरूपम्, सत्वं=प्रकृतिम्, वदेत्=फलम् आदिशेत्, वियोनिसंज्ञः भवेत्।

**भावः**=क्रूरग्रहैः बलेन सहितैः, सौम्यैः विबलैः, केन्द्रगते क्लीबे, चन्द्रप्राप्तद्वादशांशसमानरूपं वियोनिजन्म जायते।क्रूरग्रहैः बलेन सहितैः, सौम्यैः विबलैः, क्लीबे लग्नं वीक्षिते चन्द्रप्राप्तद्वादशांशसमानरूपं वियोनिजन्म जायते। पापाः बलिनः स्वनवांशगताः, पारक्ये विबलाः, वियोनिसंज्ञकं लग्नं भवेत्स अत्रापि चन्द्रप्राप्तद्वादशांशसमानरूपं वियोनिजन्म जायते।

**बोधप्रश्नाः-**

1. वियोनिजन्मप्रथमयोगं लिखत।
2. लग्नवशात्वियोनिजन्मयोगं लिखत।

**व्याकरणांशः-**

सु उपसर्गस्य सहितः इति अर्थः। बलेन सहिताः सबलाः ताभिः सबलिभिः।वि उपसर्गस्य विगतः इति अर्थः। विगतः बलैः विबलैः।

**व्यापकार्थः**= लग्नञ्च वियोनिसंज्ञितम् इति उक्तत्वात् लग्नद्वादशांशकस्य च तादृशवियोनिः चिन्त्या इति। दृष्ट्वा वदेत्इति उक्तत्वात् **आरूढप्रश्नचिन्तनम् व्यञ्जयति। लग्नारूढन्द्राणां बलाबलं दृष्ट्वा देशकालानुरूपं वदेत्। नष्ट प्रश्ने उत मुष्टिप्रश्ने च एषः योगः उपयोक्तुं शक्यमिति व्यापकार्थः।**

**7.4.वियोनौ राशीनाम् अवयवत्वप्रकल्पना।**

7.5.

वियोनौ विशेषतः चतुष्पदानाम् अङ्गविभागः दर्शितः। क्रियः शिरः अर्थात् मेषराशिः चतुष्पदानां शिरः उपलक्षितम् इति अर्थः। वृषःचतुष्पदानाम् वक्त्रं गलः भवति। मिथुनः चतुष्पादानां पूर्वपादौ अंसकौ स्कन्धौ तत् पादांसकं मिथुनं जायते। पृष्ठःकर्कटकः। उरः सिंहः। पार्श्वद्वयं कन्या। कुक्षिद्वयं तुला। अपानं गुदा वृश्चिकः।अङ्घ्री पश्चिमपादौ धन्वी। मेढ्रः अर्थात्

| **राशिः** | क्रियः | वृषः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | घटः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **अङ्गविभागः** | शिरः | वक्त्रगलम् | पादांसकम् | पृष्टम् | उरः | पार्श्वे | कुक्षिः | अपानम् | अङ्घ्रिः | मेढ्रमुष्कौ | स्फिक् | पुच्छम् |

लिङ्गं, मुष्कौ अर्थात् वृषणौ, एते मकरः। स्फिचौ कुंभौ, पुच्छं लाङ्गूलं मीनः। चतुष्पादानाम् अङ्गे एवं क्रमेण विभागम् आह।

**व्यापकार्थः**= पार्श्वादीनां सप्तमराशिः कुक्षिः। तेन क्षीरचिन्त्यम्। जलराशिः वा जलग्रहयुतराशिः वा यदि क्षीरबाहुल्यं भवति। रसविशेषाः चिन्त्याः।वृषाणां वाहनशक्तिः आदि द्वितीयराशिना चिन्त्यम्।

**क्रियः शिरो वक्त्रगले द्वितीये पादांसके पृष्ठमुरोऽथपार्श्वे।**

**कुक्षिस्त्वपानाङ्घ्र्यथ मेढ्रमुष्कौ स्फिक् पुच्छम् इत्याह चतुष्पदाङ्गे।**।3

**पदच्छेदः**=क्रियः-शिरोवक्त्र-गलेवृषोअन्येपाद-अंशकंपृष्ठम्-उरोअथ-पार्श्वे ।कुक्षिःतुअपान-अङ्घ्राअथ-मेढ्रमुष्कौस्फिक्-पुच्छमइति-आहचतुष्पद-अङ्गे ।

**अन्वयः**=शिरोक्रियः वक्त्रगलौ द्वीतीयः,पाद अंशके उरो अथ पार्श्वे कुक्षिस्तु अपानः अङ्घ्रिः अथ मेढ्रमुष्के स्फिक् पुच्छम् चतुष्पदाङ्गे इत्याह।

**अन्वयार्थः**=शिरो=शीर्षः, क्रियः=मेषः, वक्त्रगलौ=मुखं गलः, द्वितीयः=वृषभः,पादः=चरणः, अंशके=भागे,अथ=तदनन्तरम्, पार्श्वे= कुक्षिस्तु , अङ्घ्रिः=पादः, स्फिक्=कट्या अधोभागः पुच्छम्=लाङ्गूलम्, पशुपश्चाद्वर्त्तिलम्बमानलोमाग्रावयवविशेषः। तत्पर्यायः। पुच्छम् २ लूम ३ वालहस्तः ४ बालभिः ५। अवलम्बः अमरः;चतुष्पदाङ्गे= वियोनीनाम् अङ्गे, इत्याह।

**भावः**=चतुष्पदानाम् अङ्गेषु राशिविभागः उच्यते।मेषः चतुष्पदानां शिरः,वक्त्रं गलं वृषभराशिः, पादावंसौ मिथुनराशिः, पृष्ठं कर्कटकः, उरः सिंहराशिः, पार्श्वद्वयं कन्या,कुक्षिः तुलाराशिः, अपानः वृश्चिकराशिः, अङ्घ्रिद्वयं पक्षद्वयं चापराशिः, मेढ्रमुष्कौ राशिः, स्फिकौ कुम्भः, पुच्छं मीनं, इति शास्त्रम् आह ।पक्षिणाम् अपि एवम्। राशि उपलक्षित अङ्गे वर्णोपघातादि विज्ञानम् इति।

**बोधप्रश्नः।**

3. **चतुष्पादानाम् अङ्गविभागः राश्यादिक्रमेण लिखत।**

**प्रयोजनम्** =राशिः उपलक्षिते अङ्गे व्रणोपघातादेः विज्ञानं भवति।

**व्याकरणांशः-**

क्रियः +शिरः= क्रियश्शिरः**वा शरि सूत्रेण** विसर्गस्य परे, शर् वर्णः उत्तरेपदे, विसर्गे पूर्वे सति विकल्पेन विसर्गस्थाने शर् वर्णानाम् आदेशोजायते। अतः क्रियः +शिरः इत्यत्र क्रियश्शिरः इति जायते।

**7.6.वियोनिवर्णज्ञानम्।**

लग्नराशौ येन ग्रहेण योगो जातः तेन प्रोक्तः ग्रहवर्णानुसृत्य वियोनौ सत्त्वजातो वदेत्। लग्ने यदि न केनापि ग्रहयुते कथम्? इतिअभावकल्पनायाम् उच्यते; लग्नं येन ग्रहेण वीक्ष्यते तेन वर्णेन वियोनौ वदेत्। लग्नं यदि केनचित् ग्रहेण न दृष्टं न युतं वा तदानीं वर्णज्ञानम् अंशकात् करणीयं भवति। तच्च लग्ने यः राशिः नवांशकः उदये भवति, सः राशिवर्णः रक्ताश्वेतादीना ज्ञातव्यः।लग्ने यदि बहुभिः ग्रहैः युतैः दृष्टैः वा,तदानीं बह्वन् एव वर्णान् वदेत्। लग्नस्थितेषु दृष्टेषु वा तेषु ग्रहेषु यः ग्रहः बलवत्तरः स सम्बन्धितवर्णबाहुल्यम् इति कथयेत्।

लग्नस्य नवांशकात् अर्थात् लग्ननवांशराशिवशात्, लग्ने ग्रहयोगात्, लग्ने ईक्षणात् अर्थात् दृष्ट्या वा वियोनौ वर्णान् वदेत् इति सिद्धान्तः। एतेषां त्रयाणां मध्ये बलिष्ठात् ग्रहात् वर्णाधिपनिर्णयः। लग्ने ग्रहाणां दृष्ट्या समानं, स्ववर्णसङ्ख्यावियोनिजन्म कथयेत्। लग्ने यावतां ग्रहाणां दृष्टिः वर्तते,तावतां सङ्ख्यासमानाः तिर्यग् जन्तवः समुत्पन्नाः इत्यर्थः। वियोनिजन्मलग्नात् स्मरसंस्थैः ग्रहैः अर्थात् सप्तमस्थैः ग्रहैः समानसंख्यां बलवत् ग्रहवर्णयुक्तां रेखां वियोनीनां पृष्ठे वदेत्। क्वचित् वियोनेः पृष्ठेः रेखाः भवेयुः।क्वचित् वियोनेः पृष्ठेः रेखाः न भवेयुः। भवति पृच्छकाय विश्वासः उत्पादनीयः। अतः सप्तमस्थाने यावन्तो बलिनः ग्रहाः वर्तन्ते तावन्तो सङ्ख्यकाःरेखाः वक्तव्या। अत्र जिज्ञासा। यदि सप्तमे ग्रहहीने कथमिति? तत्र रेखा न भवदितिउत्तरम्।

**अत्र स्मर्तव्याः अंशाः-**

→ लग्ननवांशकराशेः वर्णः, लग्नगतग्रहवर्णः लग्नं वीक्ष्यमाणग्रहवर्णः वा वीयनेः वर्णो भवति।

→ लग्नात् सप्तमस्थानगतैःबलिष्ठैः ग्रहैः,पृष्ठे वियोनेः विद्यमानरेखाः कथिताः।

→ सप्तमस्थानस्थग्रहोक्तवर्णान् रेखान् वियोनेः पृष्ठे चिन्तितः।

**लग्नांशकाद् ग्रहयोगे क्षणात् वा वर्णान् वदेत् दलयुक्तद्वियोनौ।**

**दृष्ट्या समानान् प्रवदेत् स्वसङ्ख्या रेखां वदेत् स्मरसंस्थैश्च पृष्ठे।।**

लग्न-अंशकाद् ग्रह-योग-ईक्षणात् वा वर्णान् वदेत् बल-युक्ता द्वि-योनौ ।दृष्ट्या समानान् प्रवदेत् स्व सङ्ख्या रेखां वदेत् स्मरसंस्थैः च पृष्ठे।।(वैश्वदेवी)

**अन्वयः**=वियोनौ बलयुक्तैः लग्नांशकात् ग्रहयोगे आक्षणात् वा वर्णान् वदेत् संख्यां दृष्ट्या समानां प्रवदेच्च,पृष्ठे रेखा च स्मरसंस्थैः वदेत्।

**अन्वयार्थः**=वियोनौ=विविधयोनौ, बलयुक्तैः=षड्बलयुक्तैः ग्रहैः,लग्नांशकात्=लग्ननवांशकात्, ग्रहयोगे=ग्रहाणां युतौ, आक्षणात्= वा वर्णान्=वर्णास्ताम्रसितातिरक्तहरित...इत्यदिश्लोकोक्तक्रमेण बलिष्ठग्रहोक्तवर्णान्,वदेत्=कथयेत्, संख्यां=यावन्तः सङ्ख्याः ग्रहाः लग्नं पश्यन्ति तावतां सङ्ख्यां , दृष्ट्या=ग्रहाणां दृष्ट्या, समानां प्रवदेच्च=ग्रहाणां दृष्टितुल्या,पृष्ठे=चतुष्पादस्य पृष्ठभागे, रेखा=अभिज्ञानविशेषाः रेखाः लक्ष्माःवा ,च स्मरसंस्थैः =सप्तमसंस्थैः, वदेत्।

**भावः**=वियोनौ लग्नांशकात् ग्रहयोगे ईक्षणात् वा वर्णान् वदेत्। लग्नाधिपस्य नवांशकनाथस्य च बलाधिक्ये अंशकराशेः वर्णान् वदेत्।वियोनौ वर्णसंख्यां ग्रहाणां दृष्टिभिः तुल्यां वदेत्।सप्तमभवनसंस्थैः ग्रहैः पृष्ठगतां रेखां च वदेत्।इति भावः।

**बोधप्रश्नाः।**

4. वियोनेः वर्णः कथं ज्ञायते?
5. मेषे लग्नस्य वृषभनवांशके वियोनेः वर्णः कः भवति?
6. मीनलग्ने मीनगतेः शुक्रे वियोनेः वर्णः कः भवति?
7. सिंहलग्नं सबलीकुजेन दृष्टे जाते वियोनौ कः वर्णः भवति?

**व्याकरणांशाः-**

लग्न+अंशकात्=लग्नांशकात्। सवर्णदीर्घसन्धिः।अकः सवर्णे दीर्घः इति सूत्रानुसारेण अत्र सवर्णदीर्घसन्धिः जायते।

स्मरे संस्थः स्मरसंस्थः।

स्मरसंस्थैः+ च=स्मरसंस्थैश्च=विसर्गसन्धिः। खरि च सूत्रम्।खरि विसर्जनीयस्य सः स्यात्। पूर्वपदे विसर्गः अपरे पदे खर् प्रत्याहरेषु विद्यमान च वर्णः विद्यते अनेन विसर्गस्य सकार आदेशः जायते।

### 7.7. पक्षिजन्मयोगाः।

क्वचित् पक्षिणः स्थलजाः, क्वचित् जलजाः,क्वचित् स्थलाम्बुजा एवं विवधपक्षिणः भवन्ति। तेषां ग्रहस्थितिवशात् ज्ञानयोगम् उच्यते।पक्षिजन्मयोगत्रयं विद्यते।स्थलजाः, जलजाः, स्थलाम्बुजाः एवं त्रिविधाः भवन्ति। खगद्रेष्काणःअर्थात् पक्षिस्वरूपयुक्तद्रेष्काणः भवति। तच्च मिथुनद्वितीयः, सिंहप्रथमः, तुलाद्वितीयः, कुम्भप्रथमः, एषाम् अन्यतमद्रक्काणलग्नम्उदयं भूत्वा,

लग्नं शनिना युक्ते दृष्टे वा स्थलजाः पक्षिणः भवन्ति।लग्नं चन्द्रेण युक्ते दृष्टे वा, जलजाः पक्षिणः जायन्ते।चरभांशकोदये बलसंयुतेन ग्रहेणयुक्ते वा पक्षिजन्म कथयेत्।

→ पक्षिदृकाणे लग्नगते शनैश्चरेण युते दृष्टे वा, स्थलजाः पक्षिणः जायन्ते।

→ पक्षिदृकाणे लग्नगते चन्द्रेण युते दृष्टे वा,जलजाः पक्षिणः जायन्ते।

→ पक्षिदृकाणे लग्नगतेशनैश्चरेणचन्द्रेण युते,स्थलाम्बुजाः पक्षिणःजायन्ते।

→ यस्मिन् कस्मिन् राशौ बलसंयुतेलग्नगते चरराशिगतनवांशकोदये वा तथा लग्ने बलयुतेन ग्रहेण युक्ते, अपि शनैश्चरेन्द्वोःच ईक्षणयोगसम्भवाः स्थलाम्बुजाः पक्षिणः जायन्ते।

→ यस्मिन् कस्मिन् राशौ बलसंयुते लग्नगते चरराशिगतनवांशकोदये वा तथा लग्ने बलयुतेन ग्रहेण युक्ते, अपि शनैश्चरेक्षणयोगसम्भवाः स्थलजाः पक्षिणः जायन्ते।

→ यस्मिन् कस्मिन् राशौ बलसंयुते लग्नगते चरराशिगतनवांशकोदये वा तथा लग्ने बलयुतेन ग्रहेण युक्ते, अपि चन्द्रेण ईक्षणयोगसम्भवाः जलजाः पक्षिणः जायन्ते।

→ यस्मिन् कस्मिन् राशौ बुधांशके(मिथुनकन्ययोःअन्यतरे नवांशे)उदयति बलसंयुतेन ग्रहेण युक्ते सति शनैश्चरेन्द्वोः ईक्षणेयोगसंभवाः स्थलाम्बुजाः पक्षिणः जायन्ते।

→ यस्मिन् कस्मिन् राशौ बुधांशके(मिथुनकन्ययोःअन्यतरे नवांशे)उदयति बलसंयुतेन ग्रहेण युक्ते सति चन्द्रस्य ईक्षण-योगसंभवाः जलजाः पक्षिणः जायन्ते।

→ यस्मिन् कस्मिन् राशौ बुधांशके(मिथुनकन्ययोःअन्यतरे नवांशे)उदयति बलसंयुतेन ग्रहेण युक्ते सति चनद्रस्य शनैश्चरः ईक्षणयोगसंभवाः स्थलजाः पक्षिणः जायन्ते।

**खगे दृकाणे बलसंयुतेन वा ग्रहेणयुक्ते चरभांशकोदये।**

**बुधांशके वा विहगाः स्थलाम्बुजाः शनैश्चरेन्दुवीक्षणयोगसम्भवाः।।**

शनैश्चरशब्देन स्थलचराः ग्रह्याः। इन्दुशब्देन जलचराः ग्राह्याः। स्थलशब्देन दशमभावः, जलशब्देन चतुर्थभावः च ग्राह्यः।

**पदच्छेदः -** खगेदृकाणेबल-संयुतेनवाग्रहेणयुक्तेचर-भ-अंशक-उदये ।बुध-अंशकेवाविहगाःस्थल-अंबुजाःशनैः-चरइन्दु-ईक्षण-योग-संभवाः । ।(वंशस्थ)

**अन्वयः**=खगे दृकाणे बलसंयुतेन वा चरभांशकोदये ग्रहेण युक्ते स्थलाम्बुजाः विहगा वा बुधांशके शनैश्चरेन्दु ईक्षणयोगसम्भवाः ।

**अन्वयार्थः**=खगे दृकाणे=पक्षिद्रेक्काणे,बलसंयुतेन=बलयुक्तेन, वा चरभांशकोदये=चरनवांशकः उदये, ग्रहेण युक्ते=ग्रहेणसंयुते, स्थलाम्बुजाः विहगाः=स्थले जले च जीवमानविहगाः, वा बुधांशके=बुधनवांशके,शनैःचर=शनिः, इन्दुः=चन्द्रः, ईक्षणयोगसम्भवाः =दृष्टिः युतिः वा पक्षिजन्मयोगकारकं जायते।

**भावः**=अस्मिन् श्लोके पक्षिविषयक त्रयः योगाः उच्यन्ते। मिथुनराशेः द्वितीयद्रेष्काणः, तुलाराशेः मध्यमद्रेष्काणः, सिंहराशेः प्रथमद्रेष्काणः, कुम्भराशेः प्रथमद्रेष्काणः, च एते पक्षिद्रेक्काणाःभवन्ति।लग्ने पक्षिद्रेक्काणगते जाते, बलसंयुतेन ग्रहेण युक्ते, शनिनालग्ने युते अथवा वीक्षणे स्थलगताः पक्षिणः जन्म जायन्ते। एवमेव लग्ने चन्द्रेणयुते दृष्टे वा स्थलाम्बुजाः पक्षिणः जायन्ते। लग्ने शनिनाचन्द्रेण च युते दृष्टे वा स्थलाम्बुजाः पक्षिणः जायन्ते।

**बोधप्रश्नाः।**

8. स्थलोपजीवीनां पक्षीणांजननयोगान् लिखत।
9. जलोपजीवीनांपक्षिणांजननयोगान्लिखत।
10. स्थलजलोपगते पक्षिणां जननयोगान्लिखत।

### 7.8. **वृक्षजन्मयोगाः।**

प्रकृतिं पूजयित्वा संरक्ष्य सम्पोष्य च अस्माकं पूर्वजाः जीवन्ति स्म।कालिदासोक्तिरियम्-

**"अश्वत्थो वटवृक्षः चन्दनतरुः मन्दारकल्पद्रुमौजम्बूनिंबकदंबचूतलरलाः वृक्षाश्च ये क्षीरिणः।**
**सर्वे ते फलसंयुताः प्रतिदिनं विभ्राजनं राजतेरम्यं चैत्ररथं च नन्दनवनं कुर्वन्तु नो मङ्गलम् ॥४॥"**

वृक्षाणाम् अपि षड्भावविकाराः वर्तन्ते।1.अस्ति, 2.जायते, 3. वर्धते, 4. विपरिणमते, 5. अपक्षीयते, 6. विनश्यति एताः षड्भावविकाराः वर्तन्ते।वृक्षाः जीवन्ति। वृक्षाणां रोगादयः जायन्ते। वृक्षाः वर्धयन्ति। वृक्षाःविनश्यति।अतः वृक्षाणाम् उन्नत्यै प्रकृतिसंरक्षणायै वृक्षजातकचिन्तनं क्रियते।

लग्न-चन्द्र-रवि-गुरुभिः च विबलैः तरूणां जन्मप्रवदेत्। तत्र प्रदेशभेदः वदेत्। यथा तोये, स्थले,पङ्के इत्यादि। तत्र अंशकृत प्रभेदः स्यात्। होरा-चन्द्र-रवि-गुरुभिः विबलैः तोये स्थले वा तरूणां जन्म जायन्ते। तत्र लग्नं नवांशंस्थलराशिं प्राप्तश्चेत् स्थले तरूणां जन्म भवति। मृगापरार्धः, कुलीरः,मीनः, एते राशयःजलराशयः भवन्ति। इतरराशयः स्थलराशयः भवन्ति।तत्र लग्नं नवांशंजलराशिं प्राप्तश्चेत् जले तरूणां जन्म भवति। लग्नस्य नवांशाधिपः यस्मिन् राशौ व्यवस्थितः तत्तुल्य क्षेत्रं कथितः। लग्ननवांशाधिपः स्थले सति स स्थलर्क्षाधिपो भवति। लग्ननवांशाधिपो जले सति जलर्क्षाधिपो भवति।

**"होरेन्दुसूरिरविभिः विबलैः तरूणां तोयस्थले तरुभवोंशकृतः प्रभेदः।**

**लग्नाद्ग्रहः स्थलजलर्क्षपतिस्तु यावां तावन्त एव तरवः स्थल तोऽय जाताः।।"**

अत्र भवति स्मर्तव्यः अंशः-

→ लग्नेन्दुसूरिरविभिः निर्बले तरवः जायन्ते। लग्ननवांशाधिपः स्थितराशिः तत्तुल्यप्रदेशो वृक्षजन्मप्रदेशो वाच्यः।

7.8.1. **वृक्षसङ्ख्यानिर्णयः।**

लग्ननवांशाधिपेन वृक्षविचारः निर्णीयते। लग्ननवांशाधिपः लग्नकुण्डल्यां लग्नात् यावन्तो राशयः अन्तरितो भवन्ति तावन्तो त्संख्या तुल्यो भवति।लग्ननवांशाधिपः लग्नात् यावत् सङ्ख्याराशौ स्थितः तावत् एव सङ्ख्याकाः तरवः तत्र विद्यन्ते इति फलमादिशेत्।अत्र अपि अंशकपतिवशात् वक्ष्यमाण आयुर्दायविधिना द्विगुणत्वं वाच्यम्।तच्च कथम्? इति जिज्ञासा।**"स्वतुङ्गवक्रोपगतैः त्रिसङ्गुणम्"**। लग्ननवांशाधिपः यदि स्वतुङ्गस्थैः,वक्रोपगतैः वा तर्हि त्रिगुणितं कार्यम्। अर्थात् लग्नात् यावत् सङ्ख्याराशौ लग्ननवांशाधिपः स्थितः तावत् एव सङ्ख्याकान् त्रिगुणितं कार्यम्।लग्नात् सः जलर्क्षपतिः नवांशाधिपः ग्रहाः यावान् यावन्मिते राशौ भवति तावन्तः तावत्सङ्ख्याकाः एव स्थलतोयजाता तरवः वाच्याः।

- उदितांशैः स्थलचारी वा भवति तदधिपतिः यावत् सङ्ख्याराशौ लग्नात् व्यवस्थितं तावदेव तत्संख्याः तरवो वृक्षाः स्थलजाः जलजाः वा वक्तव्या।

**"लग्नाद्ग्रहः स्थलजलर्क्षपतिस्तु यावां तावन्त एव तरवः स्थलतोयजाताः।"**

**होरेन्दुसूरिरविभिः विबलैः तरूणां तोयस्थले तरुभवोंशकृतः प्रभेदः ।**

**लग्नाद्ग्रहः स्थलजलर्क्षपतिः तु यावां तावन्त एव तरवः स्थलतोयजाताः । ।(व ति )**

**अन्वयः**=विबलैः होरन्दुसूरिरविभिः तरूणां तोयस्थले तरुभवः अंशकृतः प्रभेदः लग्नादिग्रहः स्थलजलर्क्षपतिः तु यावान् तावन्तःएव तरवः स्थलतोयजाताः।

**अन्वयार्थः**= विबलैः=निर्बलैः, होरन्दुसूरिरविभिः=लग्नचन्द्रगुरुसूर्यैः, तरूणां =वृक्षाणाम्, तोयस्थले=जलस्थले, तरुभवः=**वृक्षाः जाताः**, अंशकृतः प्रभेदः=**अंशाधारेण संख्यानिर्णेतव्यः**, लग्नादिग्रहः=लग्नभावतः आरभ्य लग्ननवांशकग्रहः, स्थलजलर्क्षपतिः=लग्ननवांशकपतिः स्थलजलर्क्षपतिः भवति।तु यावान् तावन्तः=**लग्नात् लग्ननवांशकाधिपः स्थितः स्थानयोः अन्तरम् जन्मकुण्डल्याम्,**एव तरवः=**तावत्सङ्ख्याकसमानतरवः**, स्थलतोयजाताः=स्थले तोये च जाताः अथवा भूमौ पये वाजाताः ।

**भावः**=लग्नचन्द्रगुरूणां तरूणां स्थावराणां वा जन्म प्रवदेत्। लग्ननवांशकः राशिःजलराशिः चेत् जलक्षेत्रगताः वृक्षाः भवन्ति। लग्ननवांशकः स्थलराशिः चेत् स्थलक्षेत्रगताः भवन्ति।

स्थलजलर्क्षपतिः ग्रहः लग्नात् यावान् स्थलतोयजाताः तावन्तः एव तरवः भवन्ति।लग्ननवांशकपतिः लग्नात् यावन् राशिः अन्तरे वर्तते तावत् समान सङ्ख्काः तरवः सद्योजातवृक्षसमीपे वर्तन्ते इति निर्दिशेत्।लग्ननवांशकराशिः जलराशिः चेत् जलवृक्षाः, लग्ननवांशकराशिः स्थलराशिः चेत् स्थलवृक्षाः जायन्ते।लग्नलग्ननवांशकयोः बलाधिक्येन हि सर्वत्र फलनिर्देशः इति कृत्वा अंशकृतः प्रभेदः स्थलजलर्क्षपतिरिति च तन्त्रेण निर्दिष्टः। एवं भावः।

**बोधप्रश्नाः**

11. स्थावराणां जन्म कथं जायते?
12. स्थलर्क्षपतिः नाम कःभवति?
13. जलर्क्षपतिः नाम कः भवति?

**व्याकरणांशाः**

**होरा+इन्दुः=होरेन्दुः।अदेङ् गुणः** सूत्रेण गुणसंज्ञा जायते।होरा शब्दस्य अन्तिमः वर्णः अ वर्णः भवति। इन्दुः शब्दस्य पूर्ववर्णः इ वर्णः भवति। आद्गुणः सूत्रेण अ वर्णस्थाने ए वर्णस्य आदेशो भवति। अनेन होरेन्दुः इति जायते।

### 7.8.2. रव्यादीनां वृक्षविशेषकारकत्वम्।

प्रत्येकमपि वृक्षेषु अपि सहजभिन्नता वर्तते। तद्यथा अन्तस्साराः,बहिस्साराः, निस्सारादयः भवन्ति। तेषाम् ज्ञानविधिम् अग्रे ज्ञास्यति।लग्ननवांशाधिपवशात् वृक्षस्य सारादिकान् चिन्त्यते। लग्ननवांशस्वामिः यदि सूर्यः तर्हि अन्तः सारान् अर्थात् मध्ये दृढान् वृक्षान् जनयति। लग्ननवांशस्वामिः यदिसूर्यसूनुः तर्हि, दुर्भगान् दृढमनसोरव्रियान् जनयति।लग्ननवांशाधिपः तुहिनकिरणःअर्थात् चन्द्रः क्षीरोपेतान् इक्षुप्रभृतीन् जनयति।लग्ननवांशाधिपः भौमः, कुजः कञ्चुकाड्यान् कण्टकाबहुलान् खदिरबिल्वप्रभृतीन् वृक्षान् जनयति।लग्ननवांशाधिपःवागीशज्ञौ सफलविफलान् वृक्षान् जनयति।पुनःइन्दुः स्निग्धान् कदल्यादीन् जनयति। लग्ननवांशाधिपः भूमिपुत्रः, कटुकविटपान् कटुरसपदार्थान् निम्बमरीच्यान् वृक्षान् जनयति।

**अन्तस्सारान् जनयति रविः दुर्भगान् सूर्यसूनुः।। क्षीरोपेतान् तुहिनकिरणः कण्टकांड्याश्च भौमः।**
**वागीशज्ञौ सफलविफलान् पुष्पवृक्षांश्च शुक्रः।स्निग्धानिन्दुः कटुकविटपान् भूमिपुत्रश्च भूयः।।**

अन्तःसारान्जनयतिरविः दुर्भगान्सूर्यसूनुःक्षीर-उपेतांतुहिन-किरणःकण्टक-आढ्यांश्च भौमः।वाग्-ईशःज्ञौसफल-विफलान्पुष्प-वृक्षांश्चशुक्रःस्निग्धान्-इन्दुःकटुक-विटपान्भूमिपुत्रश्च भूयः ।।(मन्दाक्रान्ता)

**अन्वयः**=रविः अन्तः सारान् जनयति, सूर्यसूनुः दुर्भगान् , तुहिनकिरणः क्षीरोपेतान् भौमःकण्कांड्याश्च वागीशज्ञौ, सफलविफलौ शुक्रः पुष्पवृक्षास्तु इन्दुस्निग्धान्, भूमिपुत्राश्च कटुकं कटुकविटपान् भूयः।

**अन्वयार्थः**=रविः अन्तः सारान्=सूर्यः अंशकपतिः मध्यदृढान् अर्थात् गृहादिभवननिर्माणेषु योग्यान् जनयति, सूर्यसूनुः दुर्भगान्=शनिः दृष्मनसोःअप्रियान्, तुहिनकिरणः=चन्द्रः, क्षीरोपेतान् भौमः=क्षीरानिक्षुप्रभृतीन्,कण्कांड्याश्च=कण्टकबहुलान्,वागीशज्ञौ=बृहस्पतिबुधौ, सफलविफलौ=सफलश्च विफलश्च सफलविफलौ, शुक्रः=भृगुसुतः, पुष्पवृक्षांस्तु=पुष्पवान् वृक्षाः, इन्दुः स्निग्धान्=चन्द्रः स्निग्धान् वृक्षान्, भूमिपुत्राश्च=भूमिपुत्राः च, कटुकं=कटुकविटपान्, भूयः=**अनेकः**।

**भावः**=ग्रहाणां वृक्षविशेषेषु प्रभावं क्रियाकारकसम्बन्धः कथितः। रविः अन्तस्सारान् जनयतीति सम्बन्धः।शनिः दुर्भागान् अर्थात् पञ्चेन्द्रियाणाम् असन्तोषकरान् अनिष्टान् वा जनयति।चन्द्रः क्षीरोपेतान् सप्तच्छदादीन् च जनयति। भौमः कण्टकिनो वृक्षान् कारस्करकिंशुकादीन् चजनयति। गुरुः सफलान् वृक्षान् जनयति। शुक्रः विफलान् वृक्षान् जनयति। ग्रहाणां बलाबलवशेन वा योगेक्षणवशेन वा यथोक्तवृक्षाणां विकल्पो योजनीयः।चन्द्रः स्निग्धान् वृक्षान् जनयति। चन्द्रबलसत्तायां स्नेहाधिकान् नारिकेलाधिकान् जनयति।भूमिपुत्रः कटुकविटपान् भल्लातकादीन् जनयति। एवं भावः।



**बोधप्रश्नाः**

14. रव्यादितः सप्तग्रहाणां वृक्षयोगान् लिखत।
15. मेषलग्नस्य पञ्चमनवांशे लग्ने वृक्षजन्मजाते कीदृशो वृक्षो जायते?
16. कर्काटकलग्नस्य प्रथमे नवांशे कः वृक्षः जायते?
17. आम्रवृक्षस्य कारकः ग्रहः कः?
18. जम्बूवृक्षः पुष्पवान् वृक्षः वा सफलो वृक्षो वा?
19. पनसवृक्षस्य कारकः रविः उत गुरुःअनयो मध्ये कः भवितुम् अर्हति?
20. जलस्थे विद्यमानवृक्षाणां नामानि लिखत।
21. स्थलस्थे जन्यमानवृक्षाणां नामानि लिखत।

**व्याकरणांशाः।**

**अन्तः+ सारान्=अन्तस्सारान्। विसर्गसन्धिः।** विसर्जनीयस्य सः इति सूत्रेण स् वर्णः विसर्गस्य स्थाने जायते।**पूर्वपदे विसर्गस्थाने स् वर्णः आदेशो जायते।**

**क्षीर+उपेतान् =क्षीरोपेतान्। आद् गुणः।** 6-1-87इति सूत्रानुसारेण अ वर्ण स्थाने ओ वर्णः अवश्यकम् भवति।

**सूर्यस्य सूनुः सूर्यसूनुः =षष्ठीतत्पुरुषः।षष्ठी** 2-2-8 इति सूत्रानुसारेण षष्ठ्यन्तेन पूर्वपदेन युक्ते उत्तरपदप्रधाने षष्ठीतत्पुरुषो जायते।

**वागीशः च ज्ञः च =वागीशज्ञौ।**द्वन्द्वसमासः उभयपदार्थप्रधानसमासः।अत्र वगीशः गुरुः भवति।ज्ञःनाम बुधः अस्ति। उभयोरपि प्राधान्यत्वात् द्वन्द्वसमासः जायते।

**भूमेः पुत्रः भूमिपुत्रः।**षष्ठीतत्पुरुषः।

### 7.8.3. वृक्षस्य स्थानं शुभाशुभत्वञ्च।

लग्ननवांशाधिपतिना वृक्षस्थितभूमेः शुभाशुभत्वम्,भूमिवृक्षयोः शुभाशुभज्ञानमाह। लग्ननवांशाधिपतिः स्थलजलर्क्षपतिः भवति।पूर्वोक्तः वृक्षनिर्धारकः स्थलजलर्क्षपतिः ग्रहः शुभः सन् अशुभग्रहस्य राशौ विद्यते चेत् रुचिरं वृक्षं कुत्सितभूमिजातं करोति।अन्यथा विपरीतं करोति। ग्रहः अशुभः सन् शुभग्रहस्य राशौस्थिते अरुचिरं दुष्टं वृक्षं शोभनभूमिजातं जनयति। अशुभग्रहः अशुभक्षेत्रे दृष्टं वृक्षम् अशोभनभूमिजातं जनयति। वृक्षसंख्याज्ञाने प्रकारान्तरमाह स्थलजलर्क्षपतिग्रहः स्वकात् स्वकीयनवांशात् यावति यावत् सङ्ख्के परांशके परग्रहनवांशे विच्युतः चलितः तत्तुल्याः तत्संख्यसमानाः तथाविधाः अंशाधिपसदृशाः तरवः वाच्यः।

**शुभेऽशुभर्क्षे रुचिरं कुभूमिजं करोति वृक्षं विपरीतमन्यथा।**

**परांशके यावति विच्युतःस्वकात् भवन्ति तुल्य तरवः तथा विधः।।**

शुभो-अशुभ-ऋक्षे रुचिरं कुभूमिजं करोति वृक्षं विपरीतम् अन्यथा । पर-अंशके यावति विच्युतः स्वकाद्भवन्ति तुल्याः तरवः तथा विधाः । ।(वंशस्थः)

**अन्वयः**=अशुभर्क्षे शुभःकुभूमिजं रुचिरे वृक्षं करोति अन्यथा विपरीतं स्वकाद् यावति परांशके विच्युतः भवन्ति तथाविधा तुल्या तरवः भवन्ति।

**अन्वयार्थः**=अशुभर्क्षे=अशुभराशौ, शुभः=शुभग्रहः, कुभूमिजं=अनिष्टक्षेत्रं सूचयति। रुचिरे=उत्तमम् वृक्षं करोति, अन्यथा=प्रागुक्त योगस्य विपरीतं यथा शुभराशौ अशुभग्रहः, विपरीतं= शुभभूमौ विद्यमान अशुभग्रहःजनयति। स्वकाद्=स्वनवांशकात्, यावति परांशके विच्युतःभवन्ति तथाविधाः=तादृक् विधाः तुल्यातरवः भवन्ति।

**भावः=सर्वत्र** राशिवशेन ग्रहवशेन च फलविशेषनिर्देशप्रकारमपि अत्र वृक्षस्थितभूविशेषान् च कथितः। अशुभराशौ शुभग्रहः अप्रीतिकरभूमौ शुभवृक्षान् कथितः। अन्यथा शुभराशिस्थितः अशुभग्रहेण शोभनप्रदेशगते अप्रियवृक्षमिव निन्द्यो जायते। लग्ननवांशाधिपः स्वभवनात् यावन्तो राशयः इतराणाम् अंशके अग्रेगतः तावन्तो तरवः तत्र वर्तन्ते इति कथितः।

**व्याकरणांशाः-**

**कुभूमिजं**-कुत्सितः भूमिः कुभूमिः तत्र जातं कुभूमिजम् इति।अत्र भूमिः कीदृशी इति प्रश्नः कुत्सितम् इति उत्तरम्।अनेन विशेषणपूर्वपदकर्मधारयसमासः जायते।

### 7.8.4. पुनः वृक्षसङ्ख्यानिर्णयः ।

लग्ननवांशाधिपःयस्मिन् राशौ व्यवस्थितः, स च राशिः स्व अंशकात् यावन्तो राशयः अग्रे वर्तन्ते तावन्तः समानसङ्ख्यकाः वृक्षाः वर्तन्ते। स्वस्थलपतिः जलांशाधिपः ग्रहः स्वनवांशकात् अतिक्रम्य यावत् सङ्ख्याः इतरराशयःचलितः तत्तुल्यसंख्या वृक्षाः भवन्ति। स च कथितः

**"परांशके यावति विच्युतः स्वकाद् भवन्ति तुल्याः तरवो तथाविधः।"**

**बोधप्रश्नः।**

22. वृक्षाणां संख्यानिर्धारणं कथम् ज्ञेयम्?

**ग्रन्थस्य मूलपाठः।**

**क्रूरग्रहैः सबलिभिः विबलैश्च सौम्यैः क्लीबे चतुष्टयगते तदवेक्षणाद्वा ।**

**चन्द्रोपगाद्विरसभागसमानरूपं सत्त्वं वदेत् यदि भवेत्सवियोनि संज्ञः।।**

**पापबलिनः स्वाभागगाः पारक्ये विबलाः च शोभनाः।**

**लग्नञ्च वियोनिसंज्ञकं दृष्ट्वात्रापि वियोनिमादिशेत्।।**

**क्रियः शिरो वक्रगले द्वितीये पादांसके पृष्ठमुरोऽथपार्श्वे।**
**कुक्षिस्त्वपानाङ्घ्रिथ मेढ्रमुष्कौ स्फिक् पुच्छम् इत्याह चतुष्पदाङ्के।।3**

**लग्नांशकाद् ग्रहयोगे क्षणात् वा वर्णान् वदेत् दलयुक्तद्वियोनौ।**
**दृष्ट्या समानान् प्रवदेत् स्वसङ्ख्यया रेखां वदेत् स्मरसंस्थैश्च पृष्ठे।।**

**खगे दृकाणे बलसंयुतेन वा ग्रहेणयुक्ते चरभांशकोदये।**
**बुधांशके वा विहगाः स्थलाम्बुजाःशनैश्चरेन्दुवीक्षणयोगसम्भवाः।।**

**होरेन्दुसूरिरविभिः विबलैः तरूणां तोयस्थले तरुभवोंशकृतः प्रभेदः।**
**लग्नाद्ग्रहः स्थलजलर्क्षपतिस्तु यावां तावन्त एव तरवः स्थलतोयजाताः।**
**अन्तस्सारान् जनयति रविः दुर्भगान् सूर्यसूनुः।।**

**क्षीरोपेतान् तुहिनकिरणः कण्टकाढ्यंश्च भौमः।**
**वागीशज्ञौ सफलविफलान् पुष्पवृक्षांश्च शुक्रः।**
**स्निग्धानिन्दुः कटुकविटपान् भूमिपुत्रश्च भूयः।।**

**शुभे अशुभर्क्षे रुचिरं कुभूमिजं करोति वृक्षं विपरीतमन्यथा।**
**परांशके यावति विच्युतःस्वकात् भवन्ति तुल्य तरवः तथा विधः।**

### 7.8.5. सारांशः

अध्यायेऽस्मिन्वियोनीनां जन्मविचारे विशदीक्रियते। तत्र वियोनिषु चतुष्पादाः, पक्षिणः, वृक्षाः इति वर्गीकृताः वर्तन्ते। ततः पुनः स्थलजाः, जलजाः,स्थलजलर्क्षजाः इति च वर्गीकृताः वर्तन्ते। तत्रादौ वियोनिजन्मज्ञानविधिः उक्तः।तच्च-पापग्रहाणां बलसत्ता, शुभग्रहाणां बलहीनता, क्लीबग्रहाणां केन्द्रसंस्थितिः उत दृष्टिः, एतानि लक्षणानि जन्मकुण्डल्यां वियनिजन्मकारकानि भवन्ति। चन्द्रप्राप्तद्वादशांशराशिः समानरूपं तिर्यग् जन्तूनां जन्म जायते। अग्रे लिखिताः पापग्रहाः स्वनवांशस्थाः,सौम्याःपरनवांशगताः विबलाः, तदानीं लग्नं वियोनिसंज्ञकं भवति।अतः चन्द्रप्राप्तद्वांदशतुल्यं लग्नतुल्यं वा वियोनेः रूपं भविष्यति। शुभग्रहाणां निर्बलत्वं पापग्रहाणां बलसत्ता च वियोनिजन्मकारकमिति सिद्धान्तो जायते। वियोनीनाम् अवयवत्वकल्पना अत्र कथिता। मेषादि द्वादशराशीनां क्रमशः शिरः,वक्रगलम्, पादांसकम्,पृष्टम्, उरः,पार्श्वः,

कुक्षिः,अपानम्,अङ्घ्रिः,मेढ्रमुष्कौ,स्फिक्,पुच्छम् इति अवयवकल्पना वर्तन्ते। सद्-असद् ग्रहसंयोगात् शुभम् अशुभत्वम् अत्रापि फलं चिन्तयेत्।लग्ननवांशकराशेः वर्णः, लग्नस्थग्रहवर्णः,

लग्नं वीक्ष्यमाणग्रहवर्णः वा वियोनेः वर्णो भवति।लग्नात् सप्तमस्थानगतैःबलिष्ठैः ग्रहैः पृष्ठे विद्यमानरेखां कथयेत्।

ततः पक्षिजन्म आख्यातः। प्रागुक्तयोगे, पक्षिद्दकाणे लग्नगते पक्षिजन्मजायते।शनैश्चरेण युते दृष्टे वा स्थलजाः पक्षिणः,चन्द्रेण युते दृष्टे वा जलजाः पक्षिणः,शनैश्चरेणचन्द्रेण च युते दृष्टेवास्थलाम्बुजाः पक्षिणःजायन्ते।यस्मिन् कस्मिन् राशौ बलसंयुते लग्नगते, चरराशिगतनवांशकोदये वा, तथा लग्ने बलयुतेन ग्रहेण युक्ते,पक्षिणः जायन्ते।अत्रापि शनैश्चरेन्दुःचईक्षणयोगसम्भवे स्थलाम्बुजाः पक्षिणः जायन्ते।शनैश्चरेक्षणयोगे वास्थलजाः पक्षिणः, चन्द्रेण ईक्षणयोगे वा जलजाः पक्षिणः जायन्ते।यस्मिन् कस्मिन् राशौ बुधांशके(मिथुनकन्ययोःअन्यतरे नवांशे)उदयति बलसंयुतेन ग्रहेण युक्ते सति, पक्षिजन्मो भवति। अत्रापि शनिः स्थलजातानां पक्षिणां, चन्द्रः जलजानां, उभौ स्थलाम्बुजानां पक्षिणां कारकाः भवन्ति।

तरूणां जन्मकुणडली कथितः।लग्नेन्दुसूरिरविभिः बलहीनत्वे तरवः जायन्ते। लग्ननवांशाधिपः स्थितराशि तुल्यप्रदेशो वृक्षजन्मप्रदेशो वाच्यः। तरूणां सङ्ख्या च कथिता। लग्नात् लग्ननवांशाधिपः यावन्तो राशयः सङ्क्रमितः तावन्तो सङ्ख्यकाः वृक्षाः कथिताः। वृक्षाणां विभागः अत्र कृतः। यथा अन्तः सरान्, क्षीरोपेतान् , कण्टकान्, विफलान्, सफलान्, पुष्पितान् , दुर्भागान् चसूर्यादीनां ग्रहाणां कारकानि भवन्ति। चन्द्रः स्निग्धान् जनयति। कटुकविटपान् वृक्षान् मङ्गलः जनयति।ततः वृक्षस्थितक्षेत्राणि च कथितानि।लग्ननवांशाधिपतिः तत्काले शुभग्रहः चेत् शोभनवृक्षः इति उक्तः। स च लग्ननवांशाधिपतिः स्थितराशिवशात् वृक्षक्षेत्रचिन्तनं भवति। यथा लग्ननवांशाधिपः शुभक्षेत्रस्थः सति वृक्षःस्थितं भूमिः शुभभूमिः इति, अशुभक्षेत्रस्थः सति अशुभभूमिरिति च फलं वाच्यः।एवं वियोनिजन्मप्रकरणम् समाप्तम्।

### 7.8.6. शब्दावली

सबलिभिः=बलेन सहितैः इति शब्दं सबली इति समासकर्तुं शक्यते।

विबलैश्च =विगतैः बलैः इति पदं विबली इति समासः।

द्विरसभाग=काव्येषु नवरसाःभवन्ति। परन्तु व्यवहारे मधुरम् आम्लं लवणं कटुं कषायं तिक्तम् च एवं षड्प्रकाराः भवन्ति। अतः रसशब्देन षड् मन्यन्ते।

स्वभागगाः=भागपदेन अंशं ज्ञेयम्। स्वभागगाः अर्थात् स्वनवांशकगाः इति अर्थः।

पारक्ये=परनवांशके।

क्रियः=मेषः sheep।

स्मरसंस्थैः=स्मर शब्देन कामदेवः।

वागीशः=वक् ईशः गुरुः भवति। जातके वाक् कारकः बुधः। परन्तु जातकग्रन्थेषु वागीश पदेन गुरुम् आमनन्ति।

भूमिपुत्रः=क्वचित् समये रूढिः अर्थः परिगण्यते। शब्दार्थः तावत् भूमेः पुत्रः इति भवति। अनेन भूमौ जायमान सर्वे पुल्लिङ्गान् ग्राह्यम्। परन्तु रूढ्यर्थः तावत् मङ्गलः इति भवति।

### 7.8.7. बोधप्रश्नोत्तराणि।

1. पापाः बलिनः,सौम्याः निर्बलाः भूत्वा, क्लीबग्रहौ लग्नं पश्यतः, उत केन्द्रस्थितः, चन्द्रे वियोनिद्वादशांशे वियोनिजन्म जायते।
2. पापाः बलिनः स्वनवांशस्थाः, शुभग्रहाः परनवांशगताः विबलाः, लग्नं वियोनिसंज्ञक भवेत् तदानीं वियोनिजन्म जायते।
3. मेषादिद्वादशराशीनां क्रमशः शिरः,वक्त्रगलम्, पादांसकं,पृष्टम्, उरः, पार्श्वः, कुक्षिः, अपानम्, अङ्घ्रिः, मेढ्रमुष्कौ, स्फिक्, पुच्छम् इति अवयवकल्पना वर्तन्ते।
4. लग्ननवांशकराशेः वर्णः, लग्नस्थग्रहवर्णः लग्नं वीक्ष्यमाणग्रहवर्णः वा वीयनेः वर्णो भवति।
5. मेषे लग्नस्य वृषभनवांशके  वियोनेः वर्णः श्वेतः भवति।
6. मीनलग्ने मीनगतेः शुक्रे, वियोनेः वर्णः चित्रा भवति।
7. सिंहलग्नं सबलीकुजेन दृष्टे जाते वियोनौ अतिरक्तवर्णः भवति।
8. पक्षिदृकाणे लग्नगते शनैश्चरेण युते दृष्टे वा, स्थलजाः पक्षिणः जायन्ते। यस्मिन् कस्मिन् राशौ बलसंयुते लग्नगते चरराशिगतनवांशकोदये वा तथा लग्ने बलयुतेन ग्रहेण युक्ते, अपि शनैश्चरेक्षणयोगसम्भवाः स्थलजाः पक्षिणः जायन्ते। यस्मिन् कस्मिन् राशौ बुधांशके(मिथुनकन्ययोःअन्यतरे नवांशे)उदयति बलसंयुतेन ग्रहेण युक्ते सति चन्द्रशनैश्चरः ईक्षण योगसंभवाः स्थलजाः पक्षिणः जायन्ते।
9. पक्षिदृकाणे लग्नगते चन्द्रेण युते दृष्टे वा,जलजाः पक्षिणः जायन्ते। यस्मिन् कस्मिन् राशौ बलसंयुते लग्नगते चरराशिगतनवांशकोदये वा तथा लग्ने बलयुतेन ग्रहेण युक्ते, अपि चन्द्रेण ईक्षण योगसम्भवाः जलजाः पक्षिणः जायन्ते। यस्मिन् कस्मिन् राशौ बुधांशके(मिथुनकन्ययोःअन्यतरे नवांशे)उदयति बलसंयुतेन ग्रहेण युक्ते सति चन्द्रेक्षणयोगसंभवाः जलजाः पक्षिणः जायन्ते।
10. पक्षिदृकाणे  लग्नगतेशनैश्चरेणचन्द्रेण युते,स्थलाम्बुजाः पक्षिणःजायन्ते। यस्मिन् कस्मिन् राशौ बलसंयुते लग्नगते चरराशिगतनवांशकोदये वा तथा लग्ने बलयुतेन ग्रहेण युक्ते, अपि शनैश्चर इन्दुः ईक्षणयोगसम्भवाः स्थलाम्बुजाः पक्षिणः जायन्ते। यस्मिन् कस्मिन् राशौ

बुधांशके(मिथुनकन्ययोःअन्यतरे नवांशे)उदयति बलसंयुतेन ग्रहेण युक्ते सति शनैश्चर इन्दु-ईक्षण योगसंभवाः स्थलाम्बुजाः पक्षिणः जायन्ते।

11. लग्नेन्दुसूरिरविभिः निर्बले तरवः जायन्ते।
12. स्थलर्क्षपतिः नाम स्थिरराशौ स्थितः लग्ननवांशपतिः भवति।
13. जलर्क्षपतिः नाम जलराशौ स्थितः लग्ननवांशाधिपतिःभवति।
14. अन्तस्सरान्, क्षीरोपेतान् , कण्टकान्, विफलान्, सफलान्, पुष्पितान् , दुर्भागान् चसूर्यादयः ग्रहाः कारकाः भवन्ति।
15. मेषलग्नस्य पञ्चमनवांशे लग्ने वृक्षजन्मजाते कीदृशो वृक्षो जायते।
16. कर्काटकलग्नस्य प्रथमे नवांशे चन्द्रः वृक्षः जायते।
17. आम्रवृक्षस्य कारकः ग्रहः गुरुः।
18. जम्बूवृक्षः सफलो वृक्षो भवति।
19. पनसवृक्षस्य कारकः गुरुःभवति।
20. जलस्थे विद्यमानवृक्षाणां नामानि लिखत।
21. स्थलस्थे जन्यमानवृक्षाणां नामानि लिखत।
22. लग्नात् लग्ननवांशाधिपः यावन्तो राशयः सङ्क्रमितः तावन्तो सङ्ख्यकाः वृक्षाः कथिताः।

### 7.7.8. **अभ्यासप्रश्नाः।**

23. अनेन पाठेन भवान् किम् अधीतवान्?
24. भवान् वियोनिजन्मानां कथम् वर्गीकरणं करोति?
25. वृक्षाणां जननस्य ग्रहाणां कः सम्बन्धः कल्पितः?
26. प्राणीनाम् जीवने ग्रहाणां प्रभावः कीदृशः वर्तते?
27. पक्षिणाम् लोकयात्रायां ग्रहाणां प्रभावःकीदृशः वर्तते?
28. वियोनीनां जातकसङ्ग्रहणं कृत्वा योगाः परिशीलनीयाः।

**-शुभं भवतु-**

8.

8.1. प्रस्तावना ।

8.2. उद्देश्यम्।

8.3. आर्तवकारणम्।

8.4. गर्भधारणक्षमः।

8.5. ऋतुकालः।

8.6. मैथुनप्रकारः।

8.7. गर्भसम्भवासम्भवत्वम्।

8.8. स्त्रीपुरुषयोः रोगप्रदो योगः।

8.9. स्त्रीपुरुषयोः मरणप्रदो योगः।

8.10. पित्रादिसंज्ञाः शुभाशुभत्वञ्च।बोधप्रश्नाः।

8.11. मरणप्रदाः योगाः।

8.12. तत्रप्रथमो योगः "अभिलषद्भिः" इति।

8.13. द्वितीयो योगः"उदयराशिः"।

8.14. तृतीयो योगः "पापद्वयमध्यसंस्थितिः"।

8.15. चतुर्थो योगः"क्रूरे शशिनः"।

8.16. पञ्चमो योगः (बन्ध्वन्तयोः योगः) शस्त्रकृतमरणयोगः।

8.17. गर्भस्त्रवयोगः। बोधप्रश्नः।

8.18. गर्भपुष्टिकरः योगः ।

8.19. ग्रन्थस्य मूलपाठः।

## 8.1. प्रस्तावना।

प्रिय अध्येता!

"**अनेकसंशोयोच्छेदि परोक्षार्थस्य दर्शकम्।सर्वस्य लोचनं शास्त्रं यस्य नास्ति अन्ध एव सः।।**"तस्मात् नेत्रस्वरूपशास्त्राय भवते अष्टमपाठाय स्वागतम्।

भारतीयसमाजस्य सम्प्रत्यये चतुर्विधाःआश्रमाः कथिताः। तेआश्रमाणां विषये वर्णितः कविकुलगुरुणा दीपशिखाकालिदासेन स्वीये रघुवंशेमहाकाव्ये यथा-"*शैशवे अभ्यस्तविद्यानाम्। यौवने विषयैषिणाम्।। वार्धक्ये मुनिवृत्तीनाम्।।योगेन अन्त्ये तनुत्यजाम्।।*" ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्यासाश्रमःच इति चत्वारः अश्रमाः भवन्ति। चतुर्षुआश्रमेषु मोक्षशास्त्राणां वेदोपनिषद् दर्शनानां नियमेन अध्ययनं भारतवर्षे प्रचलन्ति स्म। अतः भारतीयानां

संस्कृतिः उत्कृष्टा जाता।भारतीयानां संस्कृतौ भारतीयतायाः आधारभूताः(32) द्वात्रिंशत् संस्कारविशेषाः शास्त्रेषु कथिताः। द्वात्रिंशत् संस्कारेषु आधारभूतमासन् षोडशसंस्काराः। भारतीयानाम् आधारभूतषोडशसंस्काराः आसन्। ते च संस्काराः -1. गर्भाधानम्2. पुंसवनम्3. सीमन्तोन्नयनम्4. जातकर्म 5. नामकरणम्6. निष्क्रमणम्7. अन्नप्राशनम्8. चूडाकरणम्9. कर्णवेधः10. वेदारम्भः11. उपनयनः12. विद्यारम्भः13. केशान्तः14. समावर्तनः15. विवाहः16. अन्त्येष्टिः।षोडशसंस्कारवशात् हेतुना भारतीयानां जीवनसार्थकं भवति स्म। अत्र गर्भाधानसंस्काराय मुहूर्तग्रन्थेषु मुहूर्ताः कथिताः। गर्भाधानकालः निषेककालः इत्युच्यते। स च निषेककालाधारेण सन्तानः जायते। स च सन्तानः पितृणां नरकात् त्रायते स्म। तच्च कथितः**पुं नाम नरकात् त्रायते इति पुत्रः**। सत् प्रजाः भवन्ति चेत् सत् समाजः निर्माणं भवति, तस्माद् उत्तमराष्ट्रः भवति। मानवनिर्माणवशात् राष्ट्रनिर्माणं भवति स्म। राष्ट्रनिर्माणस्य मूलः गृहे भवति स्म।भवता अस्मिन् पाठे निषेकविचारं ज्यौतिषपरिप्रेक्ष्य अध्येतव्यम् अस्ति। जन्मकालाधारेण दैवज्ञेन जातककर्मसंस्कारः अर्थात् जातकं विलिख्य फलादेशः क्रियते। तच्च-

**"जननी जन्मसौख्यानां वर्धनी कुलसंपदाम्।पदवीपूर्वपुण्यानाम् लिख्यते जन्मपत्रिका।।"**

ततः जन्मपत्रलेखनेन भवता चिन्तनीयः फलादेशः विचारः अस्मिन् खण्डे अध्येष्यते। प्रिय अध्येता! अस्मै पाठाय भवते स्वागतं व्याह्रीयते।

## 8.2. उद्देश्यम्।

अस्य पाठस्य अध्ययनेनभवान्-

- ग्रहवशात् स्त्रीणां शरीरे जायमानार्तवकारणं ज्ञास्यति।
- गर्भधारणक्षमःसत्-ग्रहयोगाः, गर्भाधारणे सुसमयः ज्ञास्यति।
- ऋतुकालः,मानवशरीरधारणे ऋतूनां प्रामुख्यतां ज्ञास्यति।
- ग्रहस्थितिवशात् मैथुनप्रकारज्ञानविधिम् अध्येष्यति।
- निषेककालाधारेण गर्भसम्भवासम्भवत्वयोगाः अध्येष्यति।
- निषेककालाधारेण स्त्रीपुरुषयोः रोगप्रदो योगःपठिष्यति।
- स्त्रीपुरुषयोः मरणप्रदो योगानाम् अवगमने दक्षो भविष्यति।
- जन्माकालवशात् ग्रहाणां पित्रादिसंज्ञाः पितृणां शुभाशुभत्वञ्च ज्ञातुं सक्षमः भविष्यति।
- जातकाधारेण मरणप्रदाः योगानां चिन्तने निपुणो भविष्यति।
- जन्मकालाधारेण शस्त्रकृतमरणयोगचिन्तने समर्थो भविष्यति।
- निषेककालाधारेण गर्भस्त्रावज्ञाने निपुणो भविष्यति।

➢ निषेकाधारेण गर्भपुष्टिः विचाराणां ज्ञाने समर्थो भविष्यति।

8.3. **आर्तवकारणम् ।**

निषेकः शब्दस्यार्थः **गर्भाधानम्** इति।गर्भाधानसमयमाधृत्य अत्र शुभाशुभलक्षणानि विचिन्त्यन्ते।तत्रादौ स्त्रीणां रजोदर्शनं निरूपयति। कुजः अर्थात् भौमः, चन्द्रः तौ हेतुः कारणं स्त्रीणां शरीरे रजसः उत्पद्यते।स्त्रीणां प्रतिमासमार्तवं कुजेन्दुहेतुना जायते।आर्तवस्य कारणं भवतः कुजचन्द्रौ इत्यर्थः। चन्द्रेण रक्तम्, कुजेन पित्तम्, प्रभावितो भवति।पित्तेन रक्ते क्षुभिते आर्तवं जायते। अत्र भवता स्मर्तव्यः अंशः-

❖ **कुजचन्द्रौ आर्तवकारकौ भवतः।**

8.4. **गर्भधारणक्षमः ।**

ग्रहस्थानात्तृतीय-षष्ठ-दशम-एकादशभावाःउपचयस्थानानि इति कथ्यन्ते। एतेषां स्थानानां विहाय इतराणां स्थानानाम् अनुपचयस्थानमिति उच्यन्ते।

स्त्रियाः जन्मराशितः अनुपचयस्थानगतः चन्द्रमा यदि कुजेनसन्दृष्टो भवति, तर्हि गर्भधारणसमर्थः आर्तवः भवति।अनुष्णदीधितौ अर्थात् चन्द्रे, पीडर्क्षे गते अनुपचयस्थानं स्त्रीजन्यराशितः, प्राप्ते कुजेन दृष्टश्चेत् स्त्री गर्भधारणयोग्यमार्तवं प्राप्नोति।

**उदाहरणम्-1**

| | | | |
|---|---|---|---|
| | | | |
| चन्द्रः | | | |
| | | | कुजः |
| | | जन्यर्क्षः | |

अत्र भवता स्मर्तव्यः अंशः।

→ यस्याः जन्मराशितः अनुपचयस्थानप्राप्ते चन्द्रे कुजे दृष्टे गर्भधारणयोग्यो आर्तवो जायते।

**गर्भसमर्थम् आर्तवकालम् अत्र दर्शितः ।**

8.5. **ऋतुकालः।**

कदा आर्तवं भवति ? इति जिज्ञासा।तच्च कथितं**प्रतिमासम्** इति। **"प्रतिमासम्"**इति शब्देन प्रथमोद्भूतरजोनिवृत्तिं दर्शयन् गर्भग्रहणक्षम आर्तवं दर्शयति। चन्द्रे गोचरे यदा अनुपचयगृहेस्थिते तस्मिन्काले आर्तवं जायते।पुरुषजन्मराशेः उपचयस्थचन्द्रमा यदि भवति तस्मिन् शुभेन सौम्येनपुंग्रहेण गुरुणेक्षिते दृष्टे कामिनी नरेण सह संयोगम् उपैति।कस्मिन् काले इति पुनः जिज्ञासा। स्नातः चतुर्थे दिने इति कथितः।

**"कुजेन्दुहेतु प्रतिमासमार्तवं गते तु पीडर्क्षमनुष्णदीधितौ ।।**

**अतोऽन्यथास्थे शुभपुंग्रहेक्षिते नरेण सँय्योगमुपैति कामिनी ।। ४.१ ।।"**

**पदच्छेदः-**

कुज-इन्दु-हेतुः प्रतिमासम् आर्तवं गते तु पीड-ऋक्षम् अनुष्ण-दिधितौ।अतो अन्यथास्थे शुभ-पुं ग्रह-ईक्षिते नरेण संयोगम् उपैति कामिनी । ।(वंशस्थः)

**अन्वयः**=प्रतिमासं कुजेन्दुहेतु आर्तवम् अनुष्णदीधितौ पीडर्क्षं गते, अतोन्यथास्यो शुभ पुंग्रहेक्षिते कामिनी नरेण संयोगम् उपैति।

**अन्वयार्थः**=प्रतिमासं=मासं मासं प्रतिमासं, कुजेन्दुहेतु=मङ्गलचन्द्रयोः हेतुः, आर्तवम्=, अनुष्णदीधितौ=चन्द्रः पीडर्क्षं गते=**अनुपचयगृहाश्रिते**, अतोन्यथास्थे =पुरुषजन्मराशेः उपचयराशौ प्राप्ते चन्द्रे, शुभपुंग्रहेक्षिते=शुभग्रहेषु पुरुषग्रहेण दृष्टे अर्थात् गुरुणा दृष्टे, कामिनी=स्त्री, नरेण=पुरुषेण, संयोगम्=मैथुनम्, उपैति=प्राप्नोति।

**भावः**=कुजचन्द्रौ निमित्तं स्त्रीणां प्रतिमासम् आर्तवं जायते।स्त्रीणां जन्मराशितः प्रकृतः अनुपचयगृहाश्रितचन्द्रः पीडर्क्षप्राप्तःआर्तवकारणं भवति।स्त्रियाः जन्मराशितः गोचरस्थचन्द्रमाअनुपचयगृहाश्रितः कुजेन दृष्टः चेत् तदानीं गर्भाधानयोग्यम् आर्तवं जायते। अतः अन्याथास्थे अर्थात् उपचयगते चन्द्रे गुरुदृष्टेकामिनी नरेणसंयोगम् उपैति।

**व्याकरणांशाः।**

कुजः च इन्दुः च कुजेन्दू, कुजेन्दू हेतुः यस्मिन् कुजेन्दुहेतु। द्वन्द्वगर्भितबहुव्रीहिसमासः।

आर्तवम्- ऋतौ भवम् आर्तवम्

न उष्णदीधितिः –अनुष्णदीधितिः।नञ् समासः।

अन्यथास्थे- अन्यथा स्थितः-अन्यथास्थः तस्मिन् अन्यथास्थे।

**बोधप्रश्नाः।**

1. निषेकशब्दास्यार्थः कः?
2. शरीरे रजसः उत्पादकौ कौ भवतः?
3. केन ग्रहेण रक्तः प्रभावितो जायते?
4. पित्तं केनग्रहेण प्रभावितो जायते?
5. गर्भाधारणम् आर्तवो कथं जायते?
6. उपचयराशयः के?
7. अनुपचयराशयः के?
8. पीडर्क्षशब्दस्यार्थः कः?

### 8.6. मैथुनप्रकारः।

**मैथुनस्वरूपज्ञानं कथ्यते-**

आधानलग्नः प्रश्नलग्नः वा ततः यःअस्तराशि इति ज्ञातव्यः। सप्तमराशेः संज्ञको यः जन्तुः येन प्रकारेण संयोगमुपैति तैनैवप्रकारेण संयोगो वाच्यः।अस्तराशिः गर्भाधानकाललग्नात् गर्भप्रश्नलग्नात् वा सप्तमराशिः, सप्तमराशिस्वरूपं मेषः वृषः इत्यादि यथा मिथुनं,स्त्रीपुरुषसंयोगरूपसुरतं प्राप्नोति; तथैव रीत्या प्रष्टुः पुरुषस्य मिथुनप्रयोगः स्त्रीपुरुषसंयोगः वक्तव्यः। आधानलग्नात् सप्तमः मेषश्चेत् मेषवत् वृषभश्चेत् वृषभवत्,मिथुनप्रयोगः वाच्यः। अस्ते आधानलग्नात् सप्तमराशौ असत् ग्रहालोकितंसंयुते पापग्रहयोगदृष्टियुक्ते सरोषः सकलहः मिथुनप्रयोगो वाच्यः। इष्टैः शुभग्रहैः आलोकितसंयुते सविलासहासः विलासः श्रृङ्गारभावः हासैः सहितैः मिथुनप्रयोगः वाच्यः।अत्र न केनापि ग्रहेण सप्तमराशिः दृष्टे, युते वा न सरोष नविलासेति कथितः।अत्र ध्येयः अंशः।

- ❖ आधानलग्नात् सप्तमराशितुल्यं मिथुनप्रयोगो वाच्यः।आधानलग्नात् सप्तमराशिस्थे ग्रहेण सप्तमदृष्टे ग्रहेण वा मैथनभावः वदेत्।यथा सप्तस्थः सप्तमदृष्टः वा ग्रहः शुभःतर्हि हासयुक्तसविलासरतिः, असत् ग्रहःतर्हि सरोषयुतः, सदसत् ग्रहः तर्हि मिश्रितभावः, न केनापि दृष्टः युतःतर्हि न सरोषः न सविलासः वा जायते।

**"यथा अस्तराशिः मिथुनं समेति तथैव वाच्यो मिथुनप्रयोगः ।**
**असद्ग्रहावलोकितसंयुते अस्ते सरोष-इष्टैः सविलासहासः । ।(इन्द्रवज्रा)"**

**अन्वयः**=अस्तराशिः यथा मिथुनं समेति तथा एव मिथुनप्रयोगो वाच्यः। अस्ते असद् ग्रह आलोकिते संयुते वा सरोषैः, इष्टैः सविलासैः हासैः (मिथुनप्रयोगो वाच्यः।)

| उदाहरणम्-2 | | | |
|---|---|---|---|
| लग्न | | | |
| चन्द्रः | | | |
| | | | कुजः |
| | | जन्यर्क्षः | |

**अन्वयार्थः**=अस्तराशिः=सप्तमराशिः,यथा मिथुनं समेति=सप्तमराशिसम्बनधितः जीवः यथा मिथुनं करोति, तथा एव =तद्वत्, मिथुनप्रयोगो वाच्यः=मैथुनं वाच्यम्। अस्ते असद्ग्रहावलोकिते=सप्तमभावे पापेन दृष्टे, संयुते वा =अथवा युते , सरोषैः=**रोषयुतैः**, इष्टैः =**सरसेन**, सविलासैः=**विलाससहितैः**, हासैःमिथुनप्रयोगो वाच्यः।

**भावः**=आधानलग्नात् सप्तमराशिः उक्त जन्तुः यथा मिथुन समेति तथा एव दम्पत्योः मैथुनम्इति फलादेशः। अस्ते असद् ग्रह अवलोकिते संयुते वा तर्हि दम्पत्योः सरोषैः, सप्तमस्थैः शुभैः(इष्टैः) सविलासैः हासैः मिथुनप्रयोगो वाच्यः।

**बोधप्रश्नाः।**

9. आधानलग्नात् मैथुनचिन्तनं कथं क्रियते?
10. सुरतभावः केन विधिना चिन्त्यते?
11. आधानलग्नः यदि मेषः तर्हि कीदृशो मैथुनम् इति ज्ञेयः?

**उदाहरणम्-2।**

अस्मिन् उदाहरणे मीनलग्नः। मीनराशितः सप्तमगतः राशितुल्यः मैथुनम् ज्ञातव्यम्। सप्तमाराशिः कन्या द्विपदराशिः भवति। द्विपदानां योग्यमैथुनमिति ज्ञातव्यः।

8.7. **गर्भसम्भवासम्भवत्वम्।**

भगवतः अनुग्रहतः सञ्जायते सुसन्तानः। तच्च प्राग्जन्मकर्माणा आधारितः। ग्रहाणां स्थितिः आधृत्यगर्भसम्भवज्ञानविधः शास्त्रेषु कथितः।तच्च रविः, चन्द्रः, शुक्रः, कुजः(अवनिजः),एतैः ग्रहैः स्वभागगैः स्वनवांशे स्थितैः गर्भसंभववाच्याः।गुरौ त्रिकोणोदयसंस्थितेपि बृहस्पतौ गर्भाधानलग्ने पञ्चमे नवमे वा स्थिते गर्भसम्भवः वाच्याः।एवं योगद्वयेपि गर्भाधाने सञ्जाते अपत्यं हि भवति। किन्तु विबीजिनां बीजक्षेत्रबलरहितानां स्त्रीपुरुषाणाम् इमे योगाः हिमांशोः कराः इव। चन्द्रस्य मनोहरकिरणानि विदृशाम् अर्थात् दृष्टिहीनान् इव अफलाः फलरहिताः भवन्ति।

**अवधेयौ अंशौ।**

* रविः, चन्द्रः, कुजः,शुक्रः, च एतैः ग्रहैः स्वनवांशे स्थितैः गर्भसंभववाच्याः।
* आधानलग्नतः देवगुरुः त्रिकोणे उदये लग्ने वा स्थिते गर्भसम्भवो वाच्यः।

**रवीन्दुशुक्रावनिजैः स्वभागगैर्गुरौ त्रिकोणोदयसंस्थितेऽपि वा ।।**
**भवत्यपत्यं हि विबीजिनामिमे करा हिमांशोर्विदृशामिवाफलाः ।। ४.३ ।।**

**पदच्छेदः=**

रवि-इन्दु-शुक्र-अवनिजैः स्व भागगैः गुरौ त्रिकोण उदय-संस्थिते अपि वा।भवति अपत्यं हि विबीजिनाम् इमे कराः हिम-अंशोः विदृशाम् इव अफलाः।।(वंशस्थ)

**अन्वयः=**रविः,इन्दुः, शुक्रः, कुजः,च एते स्वभागगैः गुरौ त्रिकोण उदयसंस्थिते अपि अपत्यं, विदृशाम् हिमांशोः कराः इव विबीजिनाम् अफलाः भवति।

**अन्वयार्थः=**रविः=सूर्यः, इन्दुः=चन्द्रः, शुक्रः=भृगुसुतः, कुजः=अवनिजः, एते स्वभागगैः=स्वनवांशैः, गुरौ=देवगुरौ त्रिकोण=पञ्चमनवमस्थानयोः अन्यतमे वा,उदयसंस्थिते=लग्नसंस्थितेऽपि वा अपि अपत्यं, विदृशाम् हिमांशोः कराः इव विबीजिनाम् अफलाः भवति।

**भावः**=रविः चन्द्रः शुक्रः कुजः च एते स्वलनवांशस्थैः त्रिकोणलग्नयोः अन्यतमे वा स्थिते विदृशाम् इव अफलाः भवन्ति।

**व्याकरणांशः-**

**विबीजिनाम्-** विगतः बीजःविबीजः तेषां विबीजिनाम्।

**अफलाः**=न फलाः । नञ् समासः।

चन्द्रकिरणानां मनोहरता, यथानेत्रहीनानां जानानां द्रष्टुं न शक्यं तथा एषः योगः विबीजिनाम् अयुक्तः इति अत्र उपमा अलङ्कारो प्रयुक्तः।**उपमा अलङ्कारः** सादृश्यत्वं व्यञ्जयति। अत्र चन्द्रकिरणनाम् मनोहरताम् अन्धानां यथा विफलम्, तथैव विबीजिनाम् अयं योगः अयुक्तः इति सादृश्यम्। अन्धत्वम् एवं शारीरकबीजहीनत्वम् अनयोः सादृश्यं कथितः। अपि च चन्द्रकिरणाः योगाः परस्परं सादृश्यं कथितः।

**बोधप्रश्ने ।**

12. **गर्भाधानसम्भवयोग्यं योगम् लिखत।**
13. **कैः ग्रहैः गर्भसम्भवो वाच्यः?**

8.8. **स्त्रीपुरुषयोः रोगप्रदो योगः।**

**दिवाकरेन्द्वोः स्मरगौ कुजार्कजौ गदप्रदौ पुंगलयोषितोस्तदा ।।**
**व्ययस्वगौ मृत्युकरौ युतौ तथा तदेकदृष्ट्या मरणाय कल्पितौ ।। ४.४ ।।**

तदा गर्भाधानसमये ग्रहस्थितौ दिवाकरेन्द्वोः रविचन्द्रयोः स्मरगौ (सप्तमे स्थितौ), कुजर्कजौ, कुजशनी, क्रमेण पुङ्गलयोषितयोः, पुरुषनार्योः, गदप्रदौ भवतः। दिवाकरात् स्मरगौ कुजार्कजौ पुरुषस्य गदप्रदौ  इन्दोः स्मरगौ कुजार्कजौ स्त्रियाः गदप्रदौ  दिवाकरेन्द्वोः व्ययस्वगौ कुजार्कजौ मृत्युकरौ भवतः। दिवाकरात् द्वादशद्वितीयस्तौ कुजार्कजौ पुरुषस्य मृत्युकरम् इन्द्वोः द्वादशद्वितीयस्थौ कुजार्कजौ स्त्रियाः मृत्युकरः तथा युतौ कुजार्कजौ तदेकदृष्ट्या च मरणाय कल्पितौ भवतः। रवेः कुजशन्योः मध्ये एकस्या युतिः परस्य दृष्टिः वर्तते चेत् पुरुषस्य मरणम्। चन्द्रस्य कुजशन्योः मध्ये एकस्य युतिः अपरस्य दृष्टिः  वर्तते स्त्रियाः मरणम्।

8.9. **स्त्रीपुरुषयोः मरणप्रदो योगः।**

**अभिलषद्भिः उदयर्क्षम् असद्भिः मरणमेति शुभदृष्टिमायाते ।**
**उदयराशिसहिते च यमे स्त्री विगलितोडुपतिभूसुतदृष्टे । ।(वंशस्थ)**

8.10. **पित्रादिसंज्ञाः शुभाशुभत्वञ्च ।**

एकस्मिन् कुटुम्बे बालो जाते, बालस्य प्रभावः कुटुम्भसदस्येषु भविष्यति। तेन जननहेतुः मातरं पितरं वा गुणदोषो वर्तते। तच्च ज्ञातव्यम्। अस्य ज्ञानविधिम् अथ उच्यते। दिवा जातस्य अर्कशुक्रौ पितृमातृसंज्ञितौ भवतः। रात्रौ जातस्य शनिः चन्द्रः च क्रमशः पितृमातृसंज्ञितौ भवतः। दिवा निषिक्तस्य जातस्य वा अर्कशुक्रौ पितृमातृसंज्ञितौ भवतः। निशिशनैश्चरन्दू पितृमातृसंज्ञितौ भवतः। तत् विपर्ययात् वैपरीत्येन तौ पितृव्यमातृष्वसृसंज्ञितौ भवतः। अथ क्रमेण आजयुग्मर्क्षगतौ तयोः शुभौ भवतः।

**दिवा =रविः पिता, शुक्रः माता,शनैः पितृव्यः, चन्द्रः मातृष्वसा च भवति।**

**रात्रिः=शनिःपिता, चन्द्रः माता, रविः पितृव्यः शुक्रः मातृष्वसा च भवति।**

दिवा निषिक्तस्य जातस्य वा अर्कशुर्कौ पितृमातृसंज्ञितो भवतः। निशि शनैश्चरः, तौ इन्दुपितृमातृसंज्ञितो भवतः। निशि शनैश्चरेन्दौ पितृमातृसंज्ञितो भवतः।अथ क्रमेण ओजयुग्मर्क्षगतौ तयोः शुभे। दिवा रविः, पिता शुक्रः।माता शनैश्चरः, पितृव्यः चन्द्रः मातृष्वसा। रात्रौ शनैश्चरः पिता, चन्द्रः माता भवति।रविशनी ओजराशौ भवतः चेत् पितृपितृव्यः शुभप्रदौ शुक्रचन्द्रौ युग्मराशौ भवतः चेत् मातृमातृष्वसोः शुभप्रदौ।।

**श्लोकः**

**दिवार्कशुक्रौ पितृमातृसञ्ज्ञितौ शनैश्चरेन्दू निशि तद्विपर्ययात् ।।**

**पितृव्यमातृष्वसृसञ्ज्ञितौ च तावयथौजयुग्मर्क्षगतौ तयोः शुभौ ।। ४.५ ।।**

**पदच्छेदः।**

दिवा-अर्क-शुक्रौ पितृ-मातृ-संज्ञितौ शनैश्चर-इन्दू-निशि तद् विपर्ययात् ।पितृव्यमातृश्वश्रूसंज्ञितौ च तौ अथ ओज-युग्म-ऋक्ष गतौ तयोः शुभौ । ।(वंशस्थः)

**अन्वयः**=दिवार्कौ शुक्रौ पितृमातृसंज्ञितौ, शनैश्चरेन्दू निशि (संज्ञितौ भवतः), पितृव्य मातृव्य स्वसृसंज्ञितौ अथ ओज युग्म ऋक्ष गतौ तयोः शुभौ (भवतः) ।

**पदार्थः**= दिवा=दिवा जन्मं सम्प्राप्तस्य भावीचिन्तने, अर्कशुक्रौ=रविः भृगुसुतः च, पितृमातृसंज्ञितौ=पितुः शुभाशुभचिन्तनम् मातः शुभाशुभचिन्तनम्, शनैश्चरेन्दू=सूर्यपुत्रः चन्द्रः च, निशि (संज्ञितौ भवतः)=रात्र्यां , पितृव्य मातृव्य स्वसृसंज्ञितौ अथ ओज युग्म ऋक्ष गतौ तयोः शुभौ (भवतः) ।

**भावः**=दिवाजातस्य भावीचिन्तनप्रक्रिया कथितः।पितुःचिन्तनं रविणा, मातुः चिन्तनं शुक्रेण,पितृव्यस्य चिन्तनंशनिना,मातृष्वसा चिन्तनं चन्द्रेणकथितः। रात्रौ जातस्य शनिना पितृचिन्तनं , चन्द्रेण मातृचिन्तनं,रविणा पितृव्यः चिन्तनं, शुक्रेण मातृष्वसा चिन्तनं,च क्रियते।

**बोधप्रश्नाः।**

14. दिवा पितृसंज्ञकः ग्रहः कः भवति?
15. दिवामातृसंज्ञकः ग्रहः कः भवति?
16. निशि पितृमातृसंज्ञकौ कौ भवतः?
17. दिवा पितृव्यमातृव्यः के भवतः?

**8.11. मरणप्रदाः योगाः ।**

भगवान् परमशिवः पार्वत्याःगर्भगतकार्तिकेयस्य संरक्षणायै अनेकप्रकारकानां भूत-गन्धर्वादीनां रचयामास। प्राचीनकालात् आरभ्य अद्यावदि अस्माभिः गर्भिण्याः संरक्षणायै अनेकप्रकारकान् औषधिजपहोमादयः क्रियन्ते। ज्यौतिषशास्त्राधारेण गर्भिण्याःक्लेशादिकम् अधानलग्नवशात् ज्ञानविधिम् अत्र उच्यते। अत्र आधानकालवशात् मातुः मरणयोगद्वयं कथितः।

**8.12. तत्रप्रथमो योगः ।**

अथ आधानकालवशात् मातुः मरणयोगः कथितः।लग्नात् शरीरं चिन्त्यते। तच्च असद्भिः पापग्रहैः आधानलग्नम्अभिलषद्भिः सति,शरीरस्य हानिः, मरणं प्राप्नोति।उदयर्क्षं नाम आधानलग्नंभवति। अभिलषद्भिः अर्थात् प्रवेष्टुम् आकांक्षिभिः इति अर्थः। उदयर्क्षम् इति शब्दः द्वितीयविभक्तौ प्रयुक्तः। कर्तुः ईप्सिततमं कारकं कर्मसंज्ञा। कर्मणि द्वितीया इति। अस्मिन् योगे द्वितीयविभक्तिः उदयर्क्षम् शब्दे प्रयुक्तः। ईप्सिततमं भवति उदयर्क्षम्। अतः आधानलग्नम् उदयलग्नं वा प्रवेष्टुम् उत्सुकः ग्रहः इति अर्थः सिद्ध्यति।यः ग्रहः प्रश्नलग्नम्, आधानलग्नम् उदयलग्नं वा अभिलषद्भिःसः इति अर्थं सिद्ध्यति।लग्नात् द्वदशस्थाः ग्रहाःलग्नराशिप्रवेशाभिलषिताः भवन्ति। असद्भिः पापग्रहैः व्ययभावस्थितैः इति अर्थः।लग्नं शुभदृष्टम् अर्थात् शुभगृहदृष्टिंन प्राप्ते, गर्भिण्यै क्लेशो वर्तते। लग्ने शुभदृष्टिःप्राप्ते, अर्थात् आवृप्ते च सति स्त्री गर्भवती नारी मरणमेति।यदि शुभग्रहेण दृष्टे किम्? गर्भिणी मरणं न प्राप्नोति इति। अत्र मरणकाराकः ग्रहः लग्नं प्रवेष्टुम् उत्सुकः ग्रहः भवति।

**।।गर्भिण्यः मरणम्।।**

द्वदशस्थो मार्गी पापग्रहः द्वितीयस्थः वक्रीपापः वा यदिशुभेन अदृष्टे तर्हि मरणम्
इति।

अत्र भवता मन्तव्यः तथ्यः-

- उदयराशिं प्रवेष्टुमिच्छुकः पापाग्रहः, लग्ने शुभेन न दृष्टे, गर्भिण्याः आरोग्यचिन्तने मरणम् एति।

अत्र सन्देहः तच्च- द्वितीयभावस्थे पापे वक्रे भूते लग्नं प्रवेष्टुकामः खलु?इति जिज्ञासा स्वरूपम्। तच्च आख्यायते। सोऽपि स्वीकार्यः। यदि द्वितीयगते पापे वक्रे सोऽपि मारको भवति। द्वादशस्थे पापे वक्रे मारको न भवति इति अभावसिद्धान्तः।

**बोधप्रश्नाः।**

18. **लग्नाधारेण गर्भिण्याः मृत्युयोगं लिखत।**
19. **व्ययभवनगते पापे अधानलग्ने शुभदृष्टे गर्भिण्याः स्वस्थ्यचिन्तनं कुरुत।**

8.13. **द्वितीयो योगः ।**

उदयराशिनाशरीरस्य योगक्षेमादि चिन्त्यते।भवान् जानाति यत् शनिकुजौ पापग्रहौ भवतः। लग्नस्थे अर्थात् उदयराशिसहिते शनौ, लग्नं क्षीणेन्दुना कुजेन च दृष्टे स्त्री मरणम् एति। क्षीणचन्द्रः अपि पापग्रहः इति स्मरति खलु?कुजेन क्षीणेन्दुना लग्नं दृष्टे , सच लग्नराशिः शनिना युते स्त्री स्वास्थ्यस्य हानिः मृत्युः वा जायते इति फलादेशः भवता कर्तव्यः।कुजेन दृष्टे इति कथितम्। *दृष्टे नाम कथम्?*इति आख्यायते-लग्नात् सप्तमस्थे ग्रहः लग्नं पूर्णतया पश्यति इति पूर्वापाठेन अधीतवान्। अतः सिद्धः यत् आधानलग्नात् सप्तमस्थे कुजे क्षीणेन्दुः न स्त्रियः हितकरः इति, अपि च कुजस्य विशेषदृष्टिः भवति खलु? कुजस्य विशेषदृष्टिः ग्रह्या किम्? इति जिज्ञासा। तच्च लिख्यते कुजस्य विशेषदृष्टिः ग्राह्या। चतुरस्रं भूमिसुतः अथवा कुजः पश्यति इति जानाति। यदि लग्नगतकुजः चतुर्थदृष्ट्या अवलोक्यते तर्हि लग्नात् कस्मात् भवने दृष्टिः भवितव्या? तच्च उच्यते दशमस्थाने इति। यदि कुजः अष्टमदृष्ट्या पश्येत, तर्हि लग्नात् कस्मात् भवने स्यात्? इति जिज्ञासा। तच्च उच्यते, लग्नात् षष्ठे भवने स्थिते कुजेन लग्नम् अष्टमभावदृष्ट्या द्रष्टुं शक्यते। अस्तु अनेन भवता ज्ञातं यत् आधानलग्नात् षष्ठभावगतः कुजः, आधानलग्नात् दशमभावगतकुजः, आधानलग्नात् सप्तमभावगतः कुजः न शुभकरः। अपि लग्नात् सप्तमस्थानगतः क्षीणेन्दुः च अशुभदः इति। अपि च लग्नगतः शनिः च अशुभदः इति। अत्र ध्येयो अंशः-

- उदयसहिते यमे अर्थात् आधानलग्ने शनौ (विगलितोडुपभूसुतदृष्टेः) क्षीणचन्द्राङ्गराभ्यां दृष्टे च स्त्री मरणमेति।

अत्र जिज्ञासा, पूर्वपक्षे तु कुजचन्द्रयोः दृष्टे इति कथितः। कुजचन्द्रयोः पादार्धपादोनदृष्टिः च कथिता वर्तते। पाददृष्ट्यादीनां ग्राह्यं किम्? इति जिज्ञासायां गद्यते यत् फलेषु पादम् आदि ग्राह्यम्। तच्च ख्यातः **बलाबलविकल्पेन तयोः चिन्तयेत्।**अस्तु, फलम्कथितम् यथा- स्वास्थ्य पीडा कथिता। कदा स्वास्थ्यपीडा इति जिज्ञासा? **"दिनकररुधिरौ प्रवेशकाले,रविसुतशशिनौ विनिर्गमस्थौ"** इत्यस्मिन् श्लोके कथितः। तेन उदयराशिसहितः

स्वास्थ्यहानिकारकः शनिः इत्यतः शनिः कदा लग्नस्फुटात् निर्गच्छति तस्मिन् समये मारकः इति ज्ञेयः।अतः तच्च श्लोकं कण्ठस्थीकरणं कार्यम्। तच्च अग्रे लिख्यते-

**अभिलषद्भिरुदयर्क्षमसद्भिर्मरणमेति शुभदृष्टिमयाते ।।**

**उदयराशिसहितेच यमे स्त्री विगलितोडुपतिभूसुतदृष्टे ।। ४.६ ।।**

**पदच्छेदः**=अभिलषद्भिःउदय-ऋक्षम्असद्भिःमरणम्एतिशुभदृष्टिम्अयाते।उदयराशिसहितेचयमेस्त्रीविगलितउडुपतिभूसुतदृष्टे।

**अन्वयः**= असद्भिः उदयर्क्षम्अभिलषद्भिः शुभदृष्टिम् अयाते,मरणम् एति। यमे उदयराशिसहिते विगलितोडुपति **भूसुतदृष्टे मरणं प्राप्नोति।**

**अन्वयार्थः** =असद्भिः=पापग्रहैः, उदयर्क्षम्=उदयराशिम्,अभिलषद्भिः=इच्छुकैः, मरणं=गर्भिण्याः मृत्युः, एति=प्राप्नोति। शुभदृष्टिम्=शुभग्रहः दृष्टम्, अयाते=न याते, यमे=शनिः, उदयराशिः=उदयलग्नम् आधानलग्नं वा, सहिते=प्राप्ते, विगलित उडुपति=उडुनामनक्षत्रम् उडूनां पतिः अर्थात् नक्षत्राणां पतिःइति वाच्यार्थः। सः चन्द्रः इति लक्ष्यर्थः।तस्य विशेषणं विगलितम् इति सः क्षीणचन्द्रः। **भूसुतदृष्टे**=कुजदृष्टे**मरणं जायते इत्यर्थः।**

**भावः**=उदयर्क्षम्अभिलषद्भिः असद्भिः,शुभदृष्टिम् अयाते,मरणम् एति। यमे उदयराशिसहिते**क्षीणचन्द्रे कुजदृष्टे मरणं जायते।**

| | | | |
|---|---|---|---|
| | | लग्न शनिः | |
| | | | |
| | | | |
| | कुजः चन्द्रः | | |

**बोधप्रश्नाः।**

20. **अभिलषद्भिः इति शब्दस्य अर्थः कः?**
21. **पापग्रहः क्व अभिलषद्भिः गर्भिणी स्त्रियः मरणहैतुकं जायते?**
22. **असद्भिः शब्देन के ग्रहाः कथिताः?**
23. **लग्ने प्राप्ते उत्सुके पापे गर्भिण्याः क्षेमहानिः कदा न जायते?**
24. **आधानलग्नगते शनौ सप्तमस्थे कुजे गर्भिण्याः स्वास्थ्यचिन्तनम् लिखत।**
25. **अधानलग्नगते यमे क्षीणचन्द्रेण गुरुणा च दृष्टे गर्भिण्याः स्वस्थ्यं कीदृशं भवति?**

8.14. **तृतीयो योगः पापद्वयमध्यसंस्थितिः।**

लग्नराशिना शरीरं चन्द्रेण मनश्च चिन्त्यते। क्वचित् सन्दर्भेषु, मनो बलेन महताप्रयासेन एव कार्यं सिद्ध्यति। गर्भिण्याः शुभाशुभत्वम् आधानलग्नवशात् चिन्तनीयम्। **पापमध्यस्थितिः** इति ज्योतिषग्रन्थेषु उक्ता। चन्द्रः, लग्नाधिपः च उभौ पापग्रहाणां मध्ये स्थितिः जाते गर्भिण्याः मृत्युः इति कथितः। लग्नस्थे इन्दुः स्यात्। लग्नेन्दौ प्राग् एक पापः स्यात्। लग्नेन्दौ तदनन्तरम् अपरः पापः स्यात्। कश्चित् पापः लग्नेन्दौ पूर्वं स्यात्। उदहराणार्थं मेषराशौ स्थिते कुजे वृषभस्थे लग्नाधिपः बुधे चन्द्रे च, मिथुनस्थे केतौ पापमध्यसंस्थितिः जायते। पापग्रहयोः मध्यस्थिते लग्स्थे चन्द्रे स्त्री मरणम् एति सिद्धान्तः। अत्र जिज्ञासा स्वरूपं*"यदि चन्द्रः पृथग् पापमध्यस्थिते, लग्नं पृथग् पापमध्यस्थिते,तर्हि गर्भवती विपद्यते किम्?"*तच्चकथ्यते- युगपत् पृथगेव वा, पापद्वयमध्यसंस्थितौ लग्नेन्दू, न सौम्यवीक्षितौ चेत् गर्भयुता नारी विपद्यते। यदि सौम्यग्रहेण दृष्टे तर्हि गर्भवती न मरणम् एति न विपद्यते वा इति। अत्र शङ्कास्वरूपम्–लग्नचन्द्रौ पापानां मध्ये इति कथितः। एकस्ममिन् राशौ यदि पापमध्यस्थितिः स्यात् तर्हि कथम्? तच्च एकस्मिन् राशौ, निकटे पापग्रहयोः मध्ये वा कथितः।

**पापद्वयमध्यसंस्थितौ लग्नेन्दू न च सौम्यवीक्षितौ ।।**
**युगपत्पृथगेव वा वदेन्नारी गर्भयुता विपद्यते ।। ४.७ ।।**

**पदच्छेदः**=पापद्वयमध्यसंस्थितौलग्नइन्दूनचसौम्यवीक्षितौ ।युगपत्पृथग्एववा वदेत् नारीगर्भयुताविपद्यते ।

| | | | |
|---|---|---|---|
| शुक्रः | कुजः | लग्नम् चन्द्रः | शनिः |
| | | | गुरुः |
| | | | |
| | | | |

**अन्वयः**=पापद्वयमध्यसंस्थितौयुगपत्पृथग्एव वा लग्नेन्दूनचसौम्यवीक्षितौ गर्भयुतानारीविपद्यते(इति)वदेत् ।

**अन्वयार्थः**

=पापद्वयमध्यसंस्थितौ=लग्नेन्दूस्थानात् निकटे पापग्रहयोः मध्येयुगपत्=सहस्थितिः अर्थात् लग्नेन्दू सहस्थितिः पापमध्यस्थितिः,

> युगपत् पृथगेव वा, पापद्वयमध्यसंस्थितौ लग्नेन्दू, न सौम्यवीक्षितौ,तदानीं गर्भयुता नारी विपद्यते।

पृथग्=लग्नेन्दू प्रत्येकौ पापमध्यस्थितौ, एव लग्नइन्दू=लग्नम् इन्दुः च,वा=अस्मिन् सन्दर्भे लग्नेन्दूपापमध्यस्थितिः युगपत् अथवा पृथग् इति अर्थः, नचसौम्यवीक्षितौ=सौम्यग्रहेण न वीक्षितौ,वदेत् गर्भयुतानारी=गर्भसहितः स्त्री,विपद्यते=आपदि भवति इत्यर्थः।

**भावः**=लग्नेन्दू युगपत् पृथग् एव वा पापद्वयमध्यसंस्थितौ, सौम्यग्रहेण न वीक्षितौ स्यातां तर्हि गर्भयुता नारी विपद्यतेइति भावः।

**बोधप्रश्नाः**

26. **पापमध्यगते आधानलग्ने प्रश्नलग्ने वा गर्भिण्याः स्वास्थ्यं कीदृशम्?**
27. **चन्द्रेण गर्भिण्याः स्वास्थ्यचिन्तनं कथं चिन्त्यते?**
1. **कदा गर्भिण्याः व्यापत्ति भविष्यति?**

8.15. **चतुर्थो योगः क्रूरे शशिनः ।**

शशिनः अर्थात् चन्द्रात् क्रूरग्रहाः चतुर्थस्थानगताः भवेयुः अष्टमस्थः कुजः गर्भिण्याः मृत्युहेतुदः भवति।लग्नात् क्रूरग्रहाः चतुर्थस्थानगताः भवेयुः अष्टमस्थः कुजः गर्भिण्याः मृत्युहेतुदो भवति। तदुक्तं यथा-

| | | | |
|---|---|---|---|
| केतुः | | | |
| | | | कुजे |
| | | | चन्द्रः |
| लग्ने | रविः शनिः | | राहुः |

**क्रूरे शशिनश्चतुर्थगे लग्नाद्वा निधनाश्रिते कुजे ।।**

लग्नात् बन्धुस्थानगते कुजे द्वादशभभावगते अर्के चन्द्रे गर्भिण्याः मृत्युदः। लग्नात् बन्धुगे अर्थात् चतुर्थस्ते भौमे, अन्त्यगे अर्थात् द्वादशस्थानस्थे अर्के, यत्र तत्रस्थे क्षीणेन्दौ, निर्बले चन्द्रे गर्भिण्याः मृत्युकारकः तृतीयो योगः।

**"क्रूरे शशिनश्चतुर्थगे लग्नाद्वा निधनाश्रिते कुजे ।।**

**बन्ध्वन्त्यगयो: कुजार्कयो: क्षीणेन्दौ निधनाय पूर्ववत् ।। ४.८ ।।"**

**पदच्छेदः=क्रूरे शशिनः चतुर्थगे लग्नात् वा निधनाश्रिते कुजे बन्धु अन्त्यगयो: कुजार्कयो: क्षीणेन्दौ निधनाय पूर्ववत् । ४.८ ।**।क्रूरे शशिनः चतुर्थगेलग्नाद्वानिधनआश्रितेकुजे ।बन्धु अन्त्यगयोःक्षीणइन्दौनिधनाय पूर्ववत् ।।(वैतालिया)

**अन्वयः**=शशिनः लग्नात् वा क्रूरे चतुर्थगे, कुजे निधनाश्रिते, बन्ध्वन्त्यगयोः क्षीणेन्दौ पूर्ववन्निधनाय।

**अन्वयार्थः**=शशिनः=चन्द्रात्, लग्नात्=आधानलग्नात्, वा क्रूरे=पापग्रहाः, चतुर्थगे=चतुर्थभवनगते, कुजे=मङ्गले, निधनाश्रिते=अष्टमस्थानगते, बन्धु-अन्त्यगयोः=चतुर्थद्वदशयोः, क्षीणेन्दौ=क्षीणचन्द्रौ पूर्ववन्निधनाय।

**भावः**=मनःकारकःशशिः, शरीरकारकः लग्नात् वा क्रूरे चतुर्थगेकुजे निधनाश्रितेगर्भिण्यो मृत्युदः।बन्धुस्थाने अर्थात् चतुर्थस्थे कुजे, अन्त्यगयोः द्वदशगयोः अर्के क्षीण-इन्दौ पूर्ववन्निधनाय भवति इति भवति।

8.16. **पञ्चमो योगः शस्त्रकृतमरणयोगः।**

क्वचित् सन्दर्भेषु गर्भिण्याः शस्त्रहेतुकेन मृत्युः जायते। आधानलग्नवशात् तादृशयोगचिन्तनप्रकारं कथितः।आधानलग्नवशात् मातुः शस्त्रनिमित्तं मरणयोगःकथितः।लग्ने कुजे, सप्तमे अर्के, गर्भयुताय स्त्रियः शस्त्रकृतमरणो जायते। लग्नभावेन शरीरस्य चिन्ता विधीयते। कुजेन विषशस्त्रघातकार्याणि चिन्त्यते। अतः लग्ने कुजे शस्त्रेण हानिः जायते। सप्तमस्थे अर्के सति लग्ने तस्या दृष्टिर्जायते। लग्नगतं पापग्रहं पापेन दृष्टे शरीरहानिः एव जायते। अत्र भवतः ध्येयः तथ्यः-

- आधानलग्नात् लग्नगते कुजे, चतुर्थगते रवौ, गर्भिण्याः मृत्युः शस्त्रेण जायते।

**"उदयास्तगयोः कुजार्कयोर्निधनं शस्त्रकृतं वदेत्तथा ।।"**

8.17. **गर्भस्त्रवयोगः ।**

आधानलग्नात् परं गर्भिण्याः नवमासाधिपाः कथितः। मासधिपतिः यदि बली गर्भपुष्टिः जायते।मासाधिपतिः यदि निपीडितो सति गर्भहानिः कथयेत्। अत्र शङ्का स्वरूपः एवं वर्तते- *"यदि मासाधिपतिग्रहः निपीडितः तदानीं गर्भस्रावः इति कथितः। तर्हि केनप्रकारेण एको ग्रहः निपीडितो जायते। उत कथम् एकः ग्रहः पीडितो भवति?"*तच्च लिख्यते, यदि ग्रहयुद्धे पराजितो तर्हि स ग्रहो निपीडितो भवति। उल्कयाअभिहतः ग्रहो अपि सोऽपि निपीडितो जायते। निषेककाले यदि कश्चित् ग्रहः यद्धे पराजितो जातः तर्हि जितग्रहोक्त मासे गर्भस्त्रवणमादिशेत्। गर्भमासे मरणं पूर्वयोगेषुयुक्तं भवती स्त्रीरणं समादिशेत् अथवा स्त्रवणम् अर्थात् गर्भस्रावं समादिशेत् इति पाठः।

**उदयास्तगयोः कुजार्कयोर्निधनं शस्त्रकृतं वदेत्तथा ।।**

**मासाधिपतौ निपीडिते तत्कालं मरणं समादिशेत् ।। ४.९ ।।**

**पदच्छेदः**= उदय-अस्तगयोः कुज-अर्कयोः निंधनं शस्त्रकृतं वदेत्तथा।मासाधिपतौ निपीडिते तत्कालं मरणं समादिशेत् ।

**अन्वयः**= उदय-अस्तगयोः कुज-अर्कयोः निंधनं शस्त्रकृतं वदेत्।तथा मासाधिपतौ निपीडिते तत्कालं मरणं समादिशेत् ।

**अन्वयार्थः**= उदय=अस्मिन् प्रसङ्गे आधानलग्नमिति, अस्त=अस्मिन् प्रसङ्गे आधानलग्नात् सप्तमे भवने,कुज-अर्कयोः=भूमिसुतः एवम् उष्णकिरणयोः, शस्त्रकृतं निंधनं=शस्त्रहेतुना जातः मरणम् इति फलम् वदेत्।तथा मासाधिपतौ =आधानलग्नात् आरभ्य नवमासाधिपाः, निपीडिते=मासाधिपः ग्रहः विनष्टे इति अर्थः। तत्कालं मरणं=अस्मिन् प्रसङ्गे यस्मिन् समये ग्रहो विनष्टो जायते तस्मिन् समयं मरणप्रदम् इति, समादिशेत्=फलादेशं कथयेत्।

भावः=उदयगते कुजे अर्के अस्तगते शस्त्रकृतं निधनं भविष्यति। यस्मिन् मासाधिपतिः निपीडिते येन ग्रहेण तेन उक्त मासे गर्भस्त्रवणम् आदिशेत्।

- शशाङ्कलग्नोपगतैः तथा त्रिकोणजायार्थसुखास्पदस्थितैः शुभग्रहैः, पापैः त्रिकोणलाभर्क्षगतैः, लग्नं चन्द्रं वा रविणादृष्टे च गर्भः सुखी स्यात्।

**बोधप्रश्नः।**

2. **शस्त्रहेतुकं मरणं कदा भविष्यति?**
3. **मासाधिपतयः कथं पीडिताः जायन्ते?**

**व्याकरणांशः-**

**कुजार्कयोः +निधनं =कुजार्कयोर्निधनम्विसर्गसन्धिः।**

8.18. **गर्भपुष्टिकरः योगः ।**

गर्भपुष्टिः क्षेमज्ञानविधिम् श्लोकेऽस्मिन् कथितः। चन्द्रेण मनसः चिन्तनं क्रियते। लग्नेन शरीरपुष्टिः चिन्त्यते। यदिचन्द्रः लग्नं वा शुभग्रहेण युते शरीरपुष्टिः जायते। *"कथम् इदंसम्भवति?"* इति उत्तरपक्षः। अयः जले निमज्जति, परन्तु यदि वृक्षखण्डेन संलग्नः अयः न जले निमज्जति, इति दृष्टान्तः। तथा एव शुभग्रहेण युते लग्ने चन्द्रे वा गर्भिण्याः गर्भपुष्टिः जायते। यस्मिन् राशौ चन्द्रो स्थितः तस्मिन् राशौ यदि शुभग्रहाः स्थिते तदानीं गर्भपुष्टिरिति। शुभग्रहाः के? इति जिज्ञासा। तच्च बुधगुरुसितैः इति । लग्नात् शरीरस्य सौख्यादयः चिन्त्यते। आधानालग्नसमये प्रश्नलग्ने वा लग्नव्यवस्थितैः शुभग्रहैः अपि गर्भपुष्टिः चिन्त्यते।अत्र साधितांशौ-

- यत्र राशौ चन्द्रः स्थितः तत्रैव शुभग्रहैः व्यवस्थितैः गर्भपुष्टिः जायते।
- यत्र राशौ लग्नःव्यवस्थितः तत्रैव शुभग्रहैः व्यवस्थितैः गर्भपुष्टिः जायते।

त्रिकोणस्थानम् अर्थात् नवमपञ्चस्थानयोः, जायास्थानम् अर्थात् सप्तमस्थानम्, अर्थस्थानम् अर्थात् प्राप्तिः पूर्वपुण्यस्थानम् इत्यादि द्वितीयभावः,सुखस्थानम् अर्थात् चतुर्थभावः, आस्पदस्थैः अर्थात् दशमस्थानस्थम् एषु सथानगतेषुप्राप्तेषु शुभैः शुभो भवति।अत्र प्राप्तः अंशः-

- लग्नात् चन्द्रात् वा द्वितीये, चतुर्थे, पञ्चमे, सप्तमे, नवमे, दशमे एषु स्थानेषु अन्यतमेषु प्राप्ते शुभैः गर्भण्याः गर्भो पुष्टिः जायते।

लग्नात् चन्द्रात् वा तृतीयभावैः, एकादशभावगतैः पापैः,लग्नं चन्द्रं वा सूर्येणनिरीक्षिते गर्भपुष्टिः कथयेत्। तच्च कथितः-तृतीयलाभर्क्षगतैः पापकैः रविणानिरीक्षितः गर्भो सुखी स्यात्।

**शशाङ्कलग्नोपगतैः शुभग्रहैस्त्रिकोणजायाऽर्थसुखास्पदस्थितैः ।।**

**तृतीयलाभर्क्षगतैश्च पापकैः सुखी तु गर्भो रविणानिरीक्षितः ।। ४.१० ।।**

**पदच्छेदः**=शश-अङ्क-लग्न-उपगतैः शुभ-ग्रहैः त्रि-कोण-जाया-अर्थ-सुख-आस्पद-स्थितैः। तृतीय-लाभ-ऋक्ष-गतैः च पापकैः सुखी तु गर्भो रविणा निरीक्षितः ।

**अन्वयः**=शशाङ्कलग्नोपगतैः शुभग्रहैः त्रिकोणजायाऽर्थसुखास्पदस्थितैः तृतीयलाभर्क्षगतैः च पापकैः रविणानिरीक्षितः तु गर्भो सुखी ।

**अनव्यार्थः**=शशाङ्कलग्नोपगतैः=चन्द्रलग्नप्राप्तैः, शुभग्रहैः=बुधगुरुशुक्रैः, त्रिकोण=पञ्चमनवमस्थानं त्रिकोणस्थानम् इति कथ्यते। जाया=जाया शब्देन सप्तमभावः मन्यते। अर्थ=पूर्वपुण्यफलेन प्राप्तिः द्वितीयभावेन एव चिन्त्यते। सुखास्पदस्थितैः=चतुर्थदशमभवयोः व्यवस्थितैः शुभैः, तृतीयलाभर्क्षगतैः=तृतीयभावः एवम् एकादशभावैः प्राप्तैः, च पापकैः=पापग्रहैः, रविणानिरीक्षितः=रविणा दृष्टे तु गर्भो सुखी स्यात्।

**भावः**=लग्ने चन्द्रे वा स्थिते शुभग्रहैः गर्भपुष्टिः जायते। लग्नात् चन्द्रात् वा द्वितीये चतुर्थे पञ्चमे सप्तमे नवमे दशमे एषु स्थानेषु प्राप्ते शुभैः गर्भण्याः गर्भो पुष्टिः जायते । तृतीये एकादशे राशौ पापैः प्राप्ते,लग्नं चन्द्रं वा रविणा निरीक्षिते गर्भपुष्टिः जायते।

**बोधप्रश्नाः।**

4. **लग्नभाववशात् चन्द्रभाववशात् वा गर्भपुष्टिः कथं चिन्त्यते?**
5. **कुत्रस्थिताः शुभाः गर्भक्षेमं जनयन्ति?**
6. **कुत्रस्थिताः पापाः गर्भस्वास्थं जनयन्ति?**
7. **आदानलग्नं केन दृष्टे गर्भक्षेमो जायते?**

**व्याकरणांशः।**

8.19. **ग्रन्थस्य मूलपाठः।**

**कुजेन्दुहेतुप्रतिमासमार्तवं गते तु पीडर्क्षमनुष्णदीधितौ ।।**

**अतोऽन्यथास्थे शुभपुंग्रहेक्षिते नरेण सँय्योगमुपैति कामिनी ।। ४.१ ।।**

**यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुनप्रयोगः ।।**

**असद्ग्रहालोकितसंयुतेऽस्ते सरोष इष्टैः सविलासहासः ।। ४.२ ।।**

**रवीन्दुशुक्रावनिजैः स्वभागगैर्गुरौ त्रिकोणोदयसंस्थितेऽपि वा ।।**

**भवत्यपत्यं हि विबीजिनामिमे करा हिमांशोर्विदृशामिवाफलाः ।। ४.३ ।।**

**दिवाकरेन्द्वोः स्मरगौ कुजार्कजौ गदप्रदौ पुंगलयोषितोस्तदा ।।**

**व्ययस्वगौ मृत्युकरौ युतौ तथा तदेकदृष्ट्या मरणाय कल्पितौ ।। ४.४ ।।**

**दिवार्कशुक्रौ पितृमातृसञ्ज्ञितौ शनैश्चरेन्दू निशि तद्विपर्ययात् ।।**
**पितृव्यमातृष्वसृसञ्ज्ञितौ च तावयथौजयुग्मर्क्षगतौ तयो: शुभौ ।। ४.५ ।।**
**अभिलषद्भिरुदयर्क्षमसद्भिर्मरणमेति शुभदृष्टिमयाते ।।**
**उदयराशिसहितेच यमे स्त्री विगलितोडुपतिभूसुतदृष्टे ।। ४.६ ।।**
**पापद्वयमध्यसंस्थितौ लग्नेन्दू न च सौम्यवीक्षितौ ।।**
**युगपत्पृथगेव वा वदेन्नारी गर्भयुता विपद्यते ।। ४.७ ।।**
**क्रूरे शशिनश्चतुर्थगे लग्नाद्वा निधनाश्रिते कुजे ।।**
**बन्ध्वन्त्यगयो: कुजार्कयो: क्षीणेन्दौ निधनाय पूर्ववत् ।। ४.८ ।।**
**उदयास्तगयो: कुजार्कयोर्निधनं शस्त्रकृतं वदेत्तथा ।।**
**मासाधि पतौ निपीडिते तत्कालं मरणं समादिशेत् ।। ४.९ ।।**
**शशाङ्कलग्नोपगतै: शुभग्रहैस्त्रिकोणजायाऽर्थसुखास्पदस्थितै: ।।**
**तृतीयलाभर्क्षगतैश्च पापकै: सुखी तु गर्भो रविणानिरीक्षित: ।। ४.१० ।।**

9. **सारांशः।**

ब्रह्माण्डपिण्डाण्डयोः अन्योन्यसम्बन्धाधृत्य नैकाः सिद्दान्ताः वर्तन्ते। अस्मिन् अध्याये जीवोत्पत्तिहैतुकस्ययद् आर्तवस्य हेतुः चन्द्रः कुजः च इति वर्णितः। अध्याये अस्मिन् आदौ गर्भाधानहेतुक्षेत्रविचारः कथितः। कुजः पित्तकारको भवति।**चन्द्रः रक्तकारकः भवति।**पित्तेन रक्ते क्षुभिते शरीरे रजोदर्शनं जायते। **कुजचन्द्रौ आर्तवकारकौ भवतः।** यस्याः जन्मराशितः अनुपचयस्थानप्राप्ते चन्द्रे, कुजे दृष्टे गर्भधारणयोग्यो आर्तवो जायते।पुरुषजन्मराशेः उपचयस्थचन्द्रमा यदि भवति तस्मिन् शुभेन सौम्येन पुंग्रहेण गुरुणेक्षिते कामिनी नरेण सह संयोगमुपैति। ततः आधानलग्नवशात् मैथुनविधिम् कथितम्। आधानलग्नात् सप्तमराशितुल्यं मिथुनप्रयोगो वाच्यः।आधानलग्नात् सप्तमराशिस्थे ग्रहेण सप्तमदृष्टे ग्रहेण वा मैथनभावः वदेत्।यथा सप्तमस्थः सप्तमदृष्टः वा ग्रहः शुभःतर्हि हासयुक्तसविलासरतिः, अथवा सप्तमस्थः सप्तमदृष्टः वा ग्रहः असत् ग्रहःतर्हि सरोषयुतः,अथवासप्तमस्थः सप्तमदृष्टः वा ग्रहः सदसत् ग्रहः तर्हि मिश्रितभावः, न केनापि दृष्टः युतःतर्हि न सरोषः न सविलासः वा जायते। ततः गर्भसम्भवयोगाः लिखितः। रविः, चन्द्रः, कुजः, शुक्रः,च एतैः ग्रहैः स्वनवांशे स्थितैः गर्भसंभववाच्याः।आधानलग्नतः देवगुरुः त्रिकोणे उदये लग्ने वा स्थिते गर्भसम्भवो वाच्यः।गर्भिण्यः मरणं, हानिः, स्वास्थचिन्तनं, च कथितः।उदयराशिं प्रवेष्टुमिच्छुकः पापाग्रहः, लग्ने शुभेन न दृष्टे, गर्भिण्याः आरोग्यचिन्तने मरणम् एति।द्वदशस्थो मार्गी पापग्रहः द्वितीयस्थः वक्रीपापः वा यदिशुभेन अदृष्टे तर्हि मरणम् इति।आधानलग्नेशनौ क्षीणचन्द्राङ्गराभ्यां दृष्टे च स्त्री

मरणमेति। युगपत् पृथगेव वा, पापद्वयमध्यसंस्थितौ लग्नेन्दू, न सौम्यवीक्षितौ, तदानीं गर्भयुता नारी विपद्यते। आधानलग्नात् लग्नगते कुजे, चतुर्थगते रवौ, गर्भिण्याः मृत्युः जायते। गर्भिण्याः स्वास्थ्यम्, गर्भपुष्टिः विशदितः। यत्र राशौ चन्द्रः स्थितः तत्रैव शुभग्रहैः व्यवस्थितैः गर्भपुष्टिः जायते।यत्र राशौ लग्नः व्यवस्थितः तत्रैव शुभग्रहैः व्यवस्थितैः गर्भपुष्टिः जायते। लग्नात् चन्द्रात् वा द्वितीये चतुर्थे पञ्चमे सप्तमे नवमे दशमे एषु स्थानेषु प्राप्ते शुभैः गर्भण्याः गर्भो पुष्टिः जायते।शशाङ्कलग्नोपगतैः तथा त्रिकोणजायार्थसुखास्पदस्थितैः शुभग्रहैः, पापैः त्रिकोणलाभर्क्षगतैः, लग्नं चन्द्रं वा रविणादृष्टे च गर्भः सुखी स्यात्।भौतिकोपकरणैः विना, अस्माकं पूर्वजाः, शास्त्राधारेण गर्भस्य कथं लिङ्गं जानन्ति स्म? इत्यादीन् विचारान्अग्रिमे अध्याये पठामः।

10. **शब्दावली ।**

प्रतिमासः=मासं मासं प्रतिमासम्।

आर्तवं =ऋतौ भवं आर्तवम्।

अनुष्णदीधितिः=चन्द्रः इति न उष्णदीधितिः।

स्वभागः=स्वनवांशः। भागशब्दस्य अंशः इति शास्त्रेषु कथितः।

विबीजिनाम् =विगतः बीजिनाम्।

करा =किरणाः।

हिमांशो=हिमस्य अंशवः हिमांशवः।

र्विदृशाम् =दृष्टिहीनानाम् ।

इवा अफलाः =तथा एव न फलदायकाः।

अभिलषद्भिः=इच्छायुक्तैः।

उदयर्क्ष =उदयलग्नम् ।

असद्भिः=अस्मिन् शास्त्रे पापग्रहैः इति अर्थः। क्षीणेन्दुः रविः कुजः शनिः एतेषाम् असद्भिः इति कथ्यते।

मरणम्=मृत्युम् ।

यमे=अस्मिन् शास्त्रे शनिः इति।

उडुपतिः=नक्षत्राणां पतिः।

भूसुतदृष्टे=कुजेन दृष्टे।

11. **बोधप्रश्नोत्तराणि ।**

1. निषेकः इति शब्दस्यार्थः**गर्भाधानमि**ति।
2. चन्द्रेण रक्तं, कुजेन पित्तं, प्रभावितो भवति। पित्तेन रक्ते क्षुभिते शरीरे रजोदर्शनं जायते।
3. चन्द्रेण ग्रहेण रक्तः प्रभावितो जायते।
4. पित्तं भौमेन ग्रहेण प्रभावितो जायते।
5. चन्द्रेण रक्तं, कुजेन पित्तं, प्रभावितो भवति। पित्तेन रक्ते क्षुभिते शरीरे आर्तवं जोयते।
6. ग्रहस्थानात् तृतीय-षष्ठ-दशम-एकादशभावाः उपचयस्थानानि इति कथ्यन्ते।
7. ग्रहस्थानात् प्रथमः, द्वितीयः, चतुर्थः,पञ्चमः, सप्तमः अष्टमः, नवमः, द्वादशः च अनुपचयराशयः वर्तन्ते।
8. पीडर्क्षशब्दस्यार्थः अनुपचयस्थानानि इति कथ्यन्ते।
9. आधानलग्नात् सप्तमराशितुल्यं मिथुनप्रयोगो वाच्यः।
10. आधानलग्नात् सप्तमराशिस्थे ग्रहेण सप्तमदृष्टे ग्रहेण वा सुरतभावः वदेत्। यथा सप्तस्थः सप्तमदृष्टः वा ग्रहः शुभःतर्हि हासयुक्तसविलासरतिः, असत् ग्रहःतर्हि सरोषयुतः, सदसत् ग्रहःतर्हि मिश्रितभावः, न केनापि दृष्टः युतःतर्हि न सरोषः न सविलासः वा जायते।
11. आधानलग्नः यदि मेषः तर्हि मेषतः सप्तमराशिः तुला इत्यतः मानवीयमैथुनप्रक्रिया इति ज्ञेयः।
12. आधानलग्नतः देवगुरुः त्रिकोणे उदये लग्ने वा स्थिते गर्भसम्भवो वाच्यः।
13. रविः, चन्द्रः, कुजः,शुक्रः,च एतैः ग्रहैः स्वनवांशे स्थितैः गर्भसंभववाच्याः।
14. दिवापितृसंज्ञकः ग्रहः अर्कः भवति।
15. दिवामातृसंज्ञकः ग्रहः शुक्रः भवति।
16. निशिपितृमातृसंज्ञकौ शनिः इन्दुः भवतः।
17. दिवा पितृव्यमातृव्यः शनैः पितृव्यः चन्द्रः मातृष्वसा भवतः।
18. उदयराशिं प्रवेष्टुम् इच्छुकः पापाग्रहः, लग्ने शुभेन न दृष्टे, गर्भिण्याः आरोग्यचिन्तने मरणम् एति।
19. व्ययभवनगते पापे अधानलग्ने शुभदृष्टे गर्भिण्याः स्वस्थ्यचिन्तनं कुरुत।

20. अभिलषद्भिः इति शब्दस्य अर्थः इच्छुकैः।
21. पापग्रहः आधानलग्नम् पउदयलग्नम् वा अभिलषद्भिः गर्भिणी स्त्रियः मरणहैतुकं जायते।
22. असद्भिः शब्देन क्षीणेनदुअर्कमहीसुतैर्कतनायाः ग्रहाः कथिताः।
23. लग्ने प्राप्ते उत्सुके पापे गर्भिण्याः क्षेमहानिः शुभदृष्टे न जायते।
24. आधानलग्नगते शनौ सप्तमस्थे कुजे गर्भिण्याः स्वास्थ्यचिन्तनम् लिखत
25. अधानलग्नगते यमे क्षीणचन्द्रेण गुरुणा च दृष्टे गर्भिण्याः स्वस्थ्यं कीदृशं भवति?
26. पापमध्यगते आधानलग्ने प्रश्नलग्ने वा गर्भिण्याः स्वास्थ्यं कीदृशम्।
27. शुभसहिते चन्द्रेण गर्भिण्याः स्वस्था भवति।
28. उदयसहिते यमे अर्थात् आधानलग्ने शनौ (विगलितोडुपभूसुततिदृष्टेः) क्षीणचन्द्राङ्गराभ्यां दृष्टे च स्त्री मरणमेति।
29. आधानलग्नात् लग्नगते कुजे, चतुर्थगते रवौ, गर्भिण्याः मृत्युः शस्त्रेण जायते।
30. यदि ग्रहयुद्धे पराजितो तर्हि स ग्रहो निपीडितो भवति। उल्कयाअभिहतः ग्रहो अपि सोऽपि निपीडितो जायते।
31. यत्र राशौ चन्द्रः स्थितः तत्रैव शुभग्रहैः व्यवस्थितैः गर्भपुष्टिः जायते।यत्र राशौ लग्नः व्यवस्थितः तत्रैव शुभग्रहैः व्यवस्थितैः गर्भपुष्टिः जायते।
32. लग्नात् चन्द्रात् वा द्वितीये चतुर्थे पञ्चमे सप्तमे नवमे दशमे एषु स्थानेषु प्राप्ताः शुभाः गर्भण्याः गर्भो पुष्टिं जनयन्ति।
33. तृतीयभावगते एकादशभावगते पापाः गर्भस्वास्थं जनयन्ति।
34. आधनलग्नं रविण दृष्टे गर्भक्षेमो जायते।

।।शुभं भूयात्।।

## *गर्भस्य लिङ्गं, सङ्ख्या, मासाधिपतयः च।*

9. पाठसंरचना।

9.1. प्रस्तावना।

9.2. उद्देश्यम् ।

9.3. गर्भस्यलिङ्गज्ञानम्।

9.3.1. पुञ्जन्मकरायोगाः।

9.3.2. स्त्रीजन्मकराः योगाः।

9.3.3. क्लीबयोगाः ।

9.4. गर्भसंख्याज्ञानम्।

9.4.1. यमलजननयोगाः।

पुरुषयमलयोगाः।

यमलयोगाः।

मिथुनयमलयोगाः।

9.4.2. गर्भत्रयसम्भवयोगाःबोधप्रश्नाः।

9.5. गर्भस्य अवस्थाः अधिपतिश्च।

9.6. गर्भस्य शुभाशुभत्वम्।

9.7. ग्रन्थस्य मूलपाठः।

9.8. सारांशः ।

9.9. शब्दावली।

9.10. अभ्यासप्रश्नाः।

9.1. **प्रस्तावना।**

ब्रह्मचर्यः, वानप्रस्थः,संन्यासः, चइतिआश्रमत्रयाणाम् आश्रयः, आधारभूताश्रमोच भवति गृहस्थाश्रमः । अतः एव कथितः,"**धन्यो हि गृहस्थाश्रमः**" इति ।**आचार्यस्य प्रियं धनम् आहृत्य प्रजा तन्तु मा व्यवच्छेत्सीः-तै उपनिषत्** 1 . 11इति। सत्सन्तानं सम्प्राप्य तेन

कुलस्योन्नतिः,तेन समाजस्य उन्नतिः,तेन राष्ट्रोन्नतिः च भविष्यति। कुलदीपको सन्तानस्य श्लाघितं सुभाषितकारेण यथा-“***प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः।त्रैलोक्ये दीपको धर्मः सुपुत्रो कुलदीपकः।।***” सुसन्तानस्य श्लाघनम् एवमपि कृतम् अस्ति-***स जातो येन जातेन याति वंशः समुन्नतिम्। परिवर्तीनि संसारे मृतः को वा न जायते।।***आयुः, कर्म, वित्तं, विद्या, निधनम्, पञ्चैतान्यपि प्राग्जन्मकर्माधारेण देहिनः सिद्धयन्ति। तच्च कथितम्–“***आयुः कर्म च वित्तं च विद्या निधनमेव च। पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः।।*** ” पूर्वजन्मकृतं कर्मदैवमिति कथितः। तस्मात् पुरुषकारेण विना दैवं कार्यं सफलतां न प्राप्नोति। तच्च कथितं सुभाषितकारेण- “*पूर्वजन्मकृतं कर्म तत् दैवमिति कथ्यते। तस्मात् पुरुषकारेण विना दैवं न सिध्यति।।*”गर्भाधानकालाधारेण,पूर्वजन्मार्जितं कर्मानुसृत्य सन्तानस्य लिङ्ग-स्वास्थ्य-क्षेमादीनां ज्ञानविधिम् अस्मिन् अध्याये अध्येष्यति।

### 9.2.उद्देश्यम् ।

अस्य पाठस्य अध्यनेन भवान् -

- पुञ्जन्मकरायोगानां ज्ञाने समर्थो भविष्यति।
- स्त्रीजन्मकराणांयोगानां ज्ञातुं दक्षो भविष्यति।
- क्लीबयोगानां ज्ञाने निपुणो भविष्यति।
- गर्भसंख्यानिर्धारणपटुः भविष्यति।
- यमलजननयोगानां सञ्ज्ञानानां ज्ञाता भविष्यति।
- पुरुषयमलयोगानां विधिज्ञः भविष्यति।
- यमलयोगानां ज्ञातुं समर्थो भविष्यति।
- मिथुनयमलयोगानां ज्ञाने निपुणो भविष्यति।
- गर्भत्रयसम्भवयोगानां विज्ञाने निपुणो भविष्यति।
- गर्भावस्थाः विज्ञाने दक्षः भविष्यति।
- गर्भस्य मासाधिपतीनां ज्ञातुं समर्थो भविष्यति।
- गर्भस्य शुभाशुभत्वं ज्ञातुं प्रभविष्यति।

### 9.3.गर्भस्यलिङ्गज्ञानम् ।

आधुनिककाले अनेकविधयन्त्रैः गर्भलिङ्गज्ञानःभवति।आधुनिकविज्ञानानुसारेण गुणसूत्राणाम् आधारेण लिङ्गज्ञानं क्रियते। सर्वेषु जन्तषु गुणसूत्राणि वर्तन्ते।

पुरुषशुक्राणवेY, स्त्री शुक्राणवेX नाम्ना आहूतः। y गुणसूत्राः पुरुषसंज्ञकाः , x गुणसूत्राः स्त्रीसंज्ञकाः भवन्ति। x गुणसूत्रेण(chromosome),x गुणसूत्रः संयुक्ते स्त्रीशिशुः उत्पद्यते।y गुणसूत्रेण सहxगुणसूत्रः संयुते पुरुषजन्म जायते। परन्तु आधुनिकोपकरणैः विना, प्राचीनकाले गर्भस्य लिङ्गज्ञानविधिं कथितम्। ज्योतिषशास्त्रवशात् गर्भस्य लिङ्गविचारः अग्रे वर्ण्यते।

9.3.1 **पुञ्जन्मकरायोगाः।**

शरीरं केन भावेन चिन्त्यते? लग्नेन चिन्त्यते। आत्माकारकः ग्रहः कःभवति? रविः भवति। मनः कारकःग्रहः कःभवति? चन्द्रः खलु। सन्तानकारकः ग्रहः कःभवति?गुरुः खलु। इदानीम्, लग्नम्, रविः, गुरुः, चन्द्रः,च वशात् सन्तानचिन्ता करणीया अस्ति। कथं पुरुषजन्मो योगाः भवन्ति? इति पृच्छायां लिख्यते-

पुरुषराशयः केभवन्ति?तच्च स्मरतु, पुंस्त्रीक्रूराक्रूराः इत्यस्मिन् श्लोके कथितः, राशिषु मेषः, मिथुनः, सिंहः, तुला वृश्चिकः, धनुः,कुंभः, च एते पुरुषराशयः भवन्ति।ग्रहेषु पुरुषग्रहाः के भवन्ति? स्मरतु,**बुधसूर्यसुतौ नपुंसकाख्यौ** इत्यस्मिन् श्लोके कथितः। ते- अर्कारजीवाः पुरुषग्रहाः भवन्ति।लग्नम्, चन्द्रः, पुरुषग्रहाः च पुरुषराशिषु पुरुषनवांशेषु भवेयुः तदानीं पुरुषजन्म भवति।उदयलग्नम्, आधानलग्नम् वा, रविः, गुरुः, चन्द्रः, एते विषमराशौ विषमनवांशैः व्यवस्थितैः पुञ्जन्म भवति। कीदृशाः लग्नार्कगुर्विन्दुभिः? इति च कथितः।बलिभिः इति। यदि लग्नार्कगुर्विन्दुभिः यदि निर्बलत्वेकथम्?तर्हि पुञ्जन्मोन सिद्ध्यति। अतः अत्र प्राप्तः सिद्धान्तः, ओजर्क्षे पुरुषांशकेषुबलिभिः लग्नार्कः गुर्विन्दुभिः पुंजन्म प्रवदेत्।अत्र शङ्काः-किम् अत्र राशिगुणवशात् निरूप्यते? इति। तच्च कथ्यते न राशिवशात् भवति। पुरुषग्रहाः गुर्वर्काः,भवन्ति। गुरुः, रविः, च विषमराशौ स्थितौ विषमनवांशकगते तर्हि पुञ्जन्म कुर्वतः। अत्र पुञ्जन्मकारकौ पुरुषराशिः पुरुषनवांशस्थौ **गुर्वर्कौ** भवतः।लग्नस्य लग्नांशकस्य ओजत्वे चन्द्रस्यापि साधरणस्य राश्यंशकयोः ओजत्वे पुरुषकारकत्वं स्पष्टम्।"प्रवदेत्" इत्यत्र **प्र** इति उपसर्गवशात् प्रकर्षेण वदेत् इति अर्थः भवति। जीवार्कौ, पुंकारकः, एवं लग्नम्, लग्नांशकः, चन्द्रः च पुं राश्यांशकेषु स्थितत्वात् "पुं जन्म प्रवदेत्" अर्थात् पुं जन्म भवति एव,इति सिद्धान्तः।

पुञ्जन्मकरः अन्यः योगो अपि कथितः। तच्च लग्नात् विषमराशिषु अन्यतमे स्थिते शनौ अपि पुरुषजन्मप्रदायको भवति।यद्यपि शनिः नपुंसकग्रहः तथापि लग्नात् विषमभावस्थः सौरः पुरुषजन्मप्रददायको भवति।रविचन्द्रकुजगुरु-शुक्राणां मध्ये बलवान् पुंग्रहो, पुत्रस्थानं पश्यति, प्राप्तः वा चेत् "पुं" जन्म कथयेत्। अधः बिन्दुरूपेण लिख्यते।-

- आधानलग्नम्, उदयलग्नम्, वा अर्कः, गुरुः, चन्द्रः,च विषमराशौ विषमनवांशैः व्यवस्थितैः पुञ्जन्म प्रवदेत्।
- गुर्वार्कौ एतौ उभावपि विषमराशौ गतौ विषमनवांशकगतौ पुरुषं कुर्युः।
- लग्नं विहाय लग्नात् विषमराशौ स्थितः तृतीयपञ्चमसप्तमनवम-एकादशस्थानानि एतेषु अन्यतमे स्थिते सौरोपि पुंजन्मकरः।

| उदाहरणम्-1 (12-2-1984 7.30IST) पुं जन्म | | | |
|---|---|---|---|
| | | | |
| लग्न-9 | | | |
| | | | |
| गुरुः शुक्रः-9 | | शनिः-1कुजः-1 | |

- रविचन्द्रकुजबुधगुरुशुक्राणां मध्ये यदि पुरुषग्रहाः बलिनः पञ्चमं दृष्टः युतो वा सति पञ्जन्म कथयेत्।

उदाहरणम्-1

अस्मिन् उदाहरणे लग्नम्, गुरुः, कुजः, शनिः, च पुरुष राशौ पुरुष अंशकेषु व्यवस्थिताः सन्ति। लग्नात् नवमे राशौ शनिः स्थितः। अतः विहायलग्नं विषमर्क्षसंस्थः सौरः अपि पुंजन्मकरः इति। अतः जातकः पुरुषः इति वदेत्।

**बोधप्रश्नाः**

1. पुंजन्मकरान् योगान् लिखत।
2. लग्नात् पञ्चमस्थानस्थे शनौ कस्य जन्मो जायते?(पुरुषजन्मो उत स्त्री जन्मः जायते)
3. शनि यद्यपि नपुंसकः तथापि शनिना कथं पुंजन्मयोगो भवति?
4. ओजर्क्षे पुरुषांकेषु कैः पुंजन्म प्रवदेत्?
5. गुर्वर्कौ कुत्रस्थै नरं जनयति?
6. शनिः लग्नात् केषु भावेषु पुंजन्मकरः भवति?

### 9.3.1. स्त्रीजन्मकराः योगाः।

प्रागुक्तयोगसदृशः अन्यः योगः कथितः। **"स्त्रीराशयः के?"**इति आदौ स्मरन्तु।तच्च कथितः-"**क्रूरः सौम्यः पुरुषवनिते ते चरागद्विदेहाः**"इत्यस्मिन् श्लोके। द्वादशराशिषु वृषकर्ककन्यावृश्चिकमकरमीनाः एते स्त्रीराशयः भवन्ति। **युग्मांशकगतैः** अर्थात् स्त्रीराशिषु

स्त्रीनवांशकेषु प्राप्ताः, चन्द्रलग्नयोः लग्नस्य स्त्रीत्वं, चन्द्रस्यापि स्त्रीग्रहत्वात्, स्त्री राश्यंशकत्वात् स्त्रीत्वं वक्तव्यम्। अर्कगुर्वोः स्त्री-आश्रितराश्यंशकयोः स्त्रीत्वं कथितम्।लग्नम्, रविः,गुरुः, चन्द्रःच एभिः युग्मांशकगतैः संस्थितैःतदा अवश्यं"**योषिताम्**" अर्थात्अर्थात् स्त्रीजन्म वर्तते। तच्च स्पष्टतया कथितः। यथा-

- युग्मेषु,लग्नार्कगुर्विन्दुभिः समांशकगतैःअर्थात् युग्मराशिनवांशकगतैः योषितः जन्म प्रवदेत्।

अत्र अपि अर्कः, गुरुः, स्त्रीराशौ व्यवस्थिते, स्त्रीनवांशकगतेस्त्रीत्वं जनयतः।लक्षणस्याधिक्ये स्त्री भवति।

स्त्रीग्रहाः के? इति स्मरन्तु। तच्च कथितः "**बुधसूर्यसुतौ नपुंसकाख्यौशशीशुक्रौ युवती**" इत्यस्मिन् श्लोके कथितः।यदि स्त्रीग्रहौ कुजः च, स्त्रीराशौ स्त्री नवांशे व्यवस्थिते,स्त्री तर्हिस्त्रीजन्मकरः भवति।बलिनः इन्दुसितमङ्गलाः, युग्मे नवांशे युग्मराशौ भवन्ति चेत् स्त्रियं जनयन्ति।**रविचन्द्रकुजगुरुशुक्रेषु** स्त्रीग्रहौ बली भूत्वा पञ्चमं दृष्टेयुते वा, स्त्रीजातमिति कथयेत्।लग्नार्कगुरुचन्द्राः एव द्विस्वभावनवांशकस्थिताः बुधदृष्ट्या यमलौ कुर्वतः। यमलौ पुरुषौ स्त्रियौ वा इति जिज्ञासा?। तच्च आख्यायते- द्विस्वभावः राशयः **मिथुनकन्याधनुमीनाः**इति। एषु राशिषु मिथुनधन्विनौ पुरुषांशकौ भवतः। कन्यामीनौ स्त्री अंशकौ भवतः।आदित्यजीवौ द्विस्वभावस्थितौ द्विस्वभावनवांशकस्थौ यदि बुधेन दृष्टे तर्हि यमलौ कुर्वतः।एत एव यदि मिथुनधन्विनौ अर्थात् पुरुषद्विस्वभावनवांशकस्थौ भवेयुः तर्हि, पुरुषयमलौ भवतः। स्त्रीद्विस्वभावराशयःअर्थात् कन्यामीनांशगताः शशिशुक्रभौमाः बुधेन यदि दृष्टे तर्हि स्त्रीयमलौ जायते।

द्वौ एव वर्गौ यथा दर्शितस्थौ तर्हि एको पुरुषः द्वतीया च कन्या।

**"ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्क गुर्विन्दुभिः। पुंजन्म प्रवदेत् समांशकगतैर्युग्मेषु तैर्योषितः |**

**गुर्वर्कौविषमेनरंशशिसितौवक्रश्चयुग्मेस्त्रियम्|**

**द्यङ्गस्थबुध वीक्षणाच्च यमलौ कुर्वन्ति पक्षे स्वके || ११||**

**विहायलग्नंविषमर्क्षसंस्थःसौरोऽपिपुंजन्मकरोविलग्नात्|**

**प्रोक्तग्रहाणाम्अवलोक्यवीर्यंवाच्यःप्रसूतौपुरुषोऽङ्गनावा||१२||"**

**पदच्छेदः**=ओज-ऋक्षे पुरुष-अंशकेषु बलिभिः लग्न-अर्क-गुरु-इन्दुभिः पुञ्जन्म प्रवदेत् सम-अंशक-गतैः युग्मेषु तैः योषितः।गुरु-अर्कौ विषमे नरं शशि सितौ वक्रः च युग्मे स्त्रियम्।द्वि-

अङ्गस्थ-बुध-वीक्षणाः च यमलौ कुर्वन्ति पक्षे स्वके।विहाय लग्नं विषम-ऋक्ष-संस्थः सौरो अपि पुं जन्म करो विलग्नात् ।प्रोक्त ग्रहाणाम् वीर्यम्अवलोक्य प्रसूतौ पुरुषो अङ्गना वा वाच्यः।**अन्वयः**=ओज-ऋक्षे पुरुष-अंशकेषु बलिभिः लग्न-अर्क-गुरु-इन्दुभिः पुंजन्म, तैः सम-अंशक-गतैः युग्मेषु योषितः जन्मप्रवदेत्। गुरु-अर्कौ विषमे नरं, शशिसितौ वक्रः च युग्मे स्त्रियं,प्रवदेत्। द्वयङ्गस्थबुधवीक्षणाः च स्वके पक्षे यमलौ कुर्वन्ति।लग्नं विहाय विषम-ऋक्ष-संस्थः सौरो अपि पुं जन्मकरः।प्रोक्त ग्रहाणाम् वीर्यम् अवलोक्य प्रसूतौ पुरुषो अङ्गना वा वाच्यः।

**अन्वयार्थः**= ओजर्क्षे=पुरुषराश्यंशकेषु, बलिभिः= षड्वर्गबलिभिः, लग्नार्कगुर्विन्दुभिः=आधानलग्नं जननलग्नं वा, पुं जन्म=पुरुषजन्मः, तैः=लग्नरविगुरुचन्द्राः,समांशकगतैः=स्त्री अंशकगतैः अर्थात् कन्यामीनाशकगतैः, युग्मेषु =कन्यामीनराशौ, योषितः जन्म=स्त्रीजन्म, प्रवदेत्=कथयेत्। गुर्वर्कौ=जीवसूर्यौ पुरुषजन्मकारकौ, विषमे=विषमनवांशके अर्थात् धनुमिथुनौ, नरं=पुरुषजन्म, शशिसितौ=चन्द्रसितौ, वक्रः=अस्मिन् सन्दर्भे आरो वक्रः अर्थात् कुजः इति। युग्मे=स्त्री द्विस्वाभावराशौ अर्थात् कन्याधन्विनौ, स्त्रियं=स्त्रीयमलौ जन्म,प्रवदेत्=फलदेशम् । द्वयङ्गस्थ=द्विस्वभावराशयः,बुधवीक्षणाः=बुधग्रहेण रविगुरुणानिरीक्षिताः,च स्वके पक्षे यमलौ कुर्वन्ति ।लग्नं विहाय विलग्नात् =जन्मलग्नात् आधानलग्नात् वा विषमर्क्षसंस्थः=लग्नात् प्रथमतृतीयादिविषमभावे व्यवस्थितः, सौरो=शनिः, अपि पुंजन्म=पुरुषजन्मकरः भवति।प्रोक्तग्रहाणाम्=प्राग् कथितग्रहाणाम् अर्थात् रविः, चन्द्रः, कुजः, गुरुः, शुक्रः, च शनिःवीर्यम्=कारकग्रहाणाम्,अवलोक्य=बलम् विज्ञाय, प्रसूतौ=जातः बाल, पुरुषो अङ्गना वा=पुरषजन्मो स्त्रीजन्म वा वाच्यः=इति फलादेशः वक्तव्यः।

**भावः**=पुरुषराशौ पुरुषांशकेषु बलिभिः लग्नार्कगुर्विन्दुभिः पुंजन्म, तैः समांशकगतैः युग्मेषु स्थितैः योषितः जन्म प्रवदेत्। गुर्वर्कौ विषमे नरं,शशिसितौ वक्रः च युग्मे स्त्रियं,प्रवदेत्। द्वयङ्गस्थबुधवीक्षणाः च स्वके पक्षे यमलौ कुर्वन्ति।लग्नं विहाय विषमर्क्षसंस्थः सौरो अपि पुंजन्म करः।प्रोक्तग्रहाणाम् वीर्यम् अवलोक्य प्रसूतौ पुरुषो अङ्गना वावाच्यः।

**बोधप्रश्नाः**

7. स्त्रीजन्मकारकौ के ?
8. चन्द्रशुक्रौ कुत्रस्थिते स्त्रीजन्म भवति?
9. पञ्चमं केभिः दृष्टे युते स्त्रीजन्म जायते?
10. लग्नार्कगुर्विन्दुभिः कुत्रत्यैः स्त्रीजन्म जायते?

### 9.3.2. क्लीबयोगाः ।

हिजडा, हिजरा,अरवन इत्यादिनाम्ना तृतीयलिङ्गं भारतीयाः मन्यन्ते। भारतदेशे 5 मिलियन् जनाः क्लीबाः वर्तन्ते। तेषां संरक्षणायभारतसर्वकारेण अनेके नियमाः रचिताः वर्तन्ते।क्लीबानां"तृतीयलिङ्गम्"इति आरक्षितं वर्तते। "अल्पसंख्यातानाम्" यः वर्गः वर्तते तस्मिन् वर्गे तेषाम् आरक्षणादिकम् अन्तर्भवति। वराहमिहिराचार्यः एतेषां पुरुषत्ववर्धनाय औषधविधानं च अकथयत्। तच्च-"तिलाश्वगंधाकपिकच्छुमूलैर्विदारिकाषष्टियोगः।आजेन पिष्टः पयसा घृतेन पक्कं वेछष्कुकातिवृष्या।"(बृहत्संहिता)।अस्मिन् अध्याये ग्रहस्थितिः आधारेण क्लीबयोगानां विचारे ज्ञास्यामः।

विषमराशौ जीवार्कौव्यवस्थितौ, पुरुषजन्मकारकौ भवतः इति आदौ कथितः। समराशिस्थिते शशीशुक्रौ स्त्रीजन्मकारको इति कथितः। साम्प्रतं क्लीबजननयोगः लिख्यते। समराशिगतश्शशिः, विषमराशिस्थरविःच अन्योन्यंयदि पश्यतः चेत् क्लीबो जायते।मेषस्थे अन्तिमे स्थिते रवौ, विषमस्थे रविः भवति। वृश्चिकस्थेआदौ शशी स्थिते षड्राशि अन्तरितो भवति। तेन अन्योन्यं पश्यतः शशिरवी, क्लीबयोगः जायते।तच्च-

1. युग्मोजर्क्षगतौशशिरवीअन्योन्यंयदिपश्यतःतदाएकःक्लीबयोगः,यथाक्रमंयुग्मराशौचन्द्रः ,ओजराशौरविःभवेतांतयोःमध्येअन्योन्या दृष्टिःचस्यात्।

समराशौ व्यवस्थितः शनिः, विषमराशौ व्यवस्थितः बुधः,यदि अन्योन्यं पश्यतः तर्हि क्लीबः जायते। युग्मराशिस्थितः शनैश्चरस्य ओजरास्थितबुधस्य च अन्योन्यं दृष्टिः स्यात् तदा क्लीबो जायते।तच्च-

2. युग्मौजर्क्षगतौ अर्किसौम्यो यदि अन्योन्यं पश्यतः तदा द्वितीयः क्लीबयोगः।

रविः समराशिनवांशकस्थे प्रबले स्त्रीजन्मकारकः इति अधीतः। समराशौ व्यवस्थितः रविः, ओजराशौ स्थितः कुजः च यदि अन्योन्यं पश्यतः तर्हि क्लीबः भवति। तच्च-

3. असमेस्थितः वक्रः, समगं दिनेशं यदि अन्योन्यं पश्यति तदा तृतीयः क्लीबयोगः जायते।

आधानलग्नम्, जन्मलग्नम्वा,अर्केन्दुजीवाःएतेसन्तानहेतवःभवन्ति।आधानलग्नं जन्मलग्नम् वा, असमे स्थिते पुरुषजन्मकरः भवति। लग्नं, चन्द्रः च यदि असमराशौ व्यवस्थितौ, समराशौ व्यवस्थितः कुजः च अन्योन्यं पश्यतः तर्हि क्लीबः भवति।

4. असमे चन्द्रोदयौ स्थितौ ,चन्द्रम् उदयलग्नं च भवेताम् भूम्यात्मजेन ईक्षितौ च तां तदानीं चतुर्थो क्लीबयोगो जायते।

युग्मराशौ स्थिते इन्दुशशिजौ स्त्रीजन्मकारको जायते। ओजराशौ स्थितः कुजः समराशौ व्यवस्थितः यदि अन्योन्यं पश्यतः तर्हि स्त्रीजन्मकारकः भवति।

5. युग्मोजर्क्षगतौ इन्दुशशिजौ भूम्यात्मजेनेक्षितौ चेत् पञ्चमक्लीबयोगः।

शुक्रः चन्द्रः च, स्त्री ग्रहौ भवतः।स्त्रीग्रहौ लग्नेन सह पुरुषराश्यंशके क्लीबयोगः कथितः। लग्नं चन्द्रः च, असमराशौ असमनवांशे व्यवस्थिताः तदानीं षष्ठः क्लीबयोगो जायते।

6. सितलग्नशीतकिरणाः अर्थात् शुक्रलग्नचन्द्राः यत्र तत्र राशौ पुम्भागे अर्थात् पुरुषराशी पुरुषनवांशके स्थितां यदि भवेयुः तदानीम् अपि क्लीबयोगाः स्मृताः।

| | **युग्मराशिः।** | **ओजराशिः।** | **योगाः।** |
|---|---|---|---|
| 1 | शशिः। | रविः। | **प्रथमक्लीबयोगः।** |
| 2 | **शनिः।** | **बुधः।** | **द्वितीयक्लीबयोगः।** |
| 3 | **कुजः।** | **रविः।** | **तृतीयक्लीबयोगः।** |
| 4 | **चन्द्रोदयौ।** | **कुजः।** | **चतुर्थक्लीबयोगः।** |
| 5 | **चन्द्रबुधौ।** | **कुजः ।** | **पञ्चमक्लीबयोगः।** |
| 6 | - | **सितलग्नशीतकिरणाः।** | **षष्ठक्लीबयोगः।** |

अस्मिन् कोष्ठकं ध्यानेन पश्यन्तु। रविः युग्ममासेषु क्लीबयोगः न जनयति। रविमेषमिथुनादिओजमासेषुक्लीबत्वं जनयति। प्रथमयोगः तावत् पौर्णम्यां तिथौ एव भवितुम् एव अर्हति। द्वितीययोगे परस्परं क्लीबग्रहौ पश्यतः। तेन अपि क्लीबो कथितः। ओजराशौ स्थिते रवौ कुजेन दृष्टे वा शशिना दृष्टे वा क्लीबो जायते। शनिगुरुशुक्राःच ओजराशौ व्यवस्थिताः क्लीबो न जनयन्ति।चन्द्रबुधौ कुजेन दृष्टे क्लीबः इति पञ्चमो सिद्धान्तः। बुधः अर्कात् 2 राशितः अधिकान्तरं न गच्छति इत्यतः;(60अंशः राशिद्वयं/12अंशः तिथिः=5 तिथिः।)अतःशुक्लपक्षे पञ्चमीं यावत्, कृष्णपक्षे दशमीं यावत् वा चन्द्रो निर्बलो जायते। निर्बले चन्द्रे यदि नपुंसकग्रहबुधयुते पुरुषग्रहकुजेन दृष्टे क्लीबो भवति।चन्द्रः बुधयुते लग्नगते वा कुजेन दृष्टे क्लीबो जायते।

**अन्योन्यंयदिपश्यतःशशिरवीयद्यर्किसौम्यावपिवक्रोवासमगंदिनेशमसमे चन्द्रोदयौ चेत् स्थितौ |**

**युग्मौजर्क्षे गतावपीन्दुशशिजौ भूम्यात्मजेनेक्षितौ**

**पुम्भावेसितलग्नशीतकिरणाःषट्क्लीबयोगाःस्मृताः|| १३||**

**पदच्छेदः**=अन्योन्यंयदिपश्यतःशशिरवी यदि अर्कि-सौम्याअपिवक्रोवासमगंदिन-ईशम्असमेचन्द्र-उदयौचेत्स्थितौ।युग्मओज-ऋक्ष-गतौअपिइन्दु-शशिजौभूम्यात्मजेनईक्षितौपुम्भावेसित-लग्न-शीत-किरणाःषट्क्लीब-योगाःस्मृताः।।

लग्नं सर्वे ग्रहाः च द्विस्वभावराशीनां (मिथुनकन्याधनुमीनराशीनाम्) नवांशकेषुगताः भवन्ति, स्वनवांशकस्थितं बुधं पश्यति तदानीं गर्भेत्रितयम् वाच्यम्। ज्ञः अधिष्ठित नवांशकः, राशिः अनुसारं सन्तानम्

**अन्वयः**=अन्योन्यंयदिपश्यतःशशिरवी,आर्किसौम्याः अपि,वा वक्रोसमगंदिनेशम्-असमे,चन्द्रोदयौचेत्स्थितौ,युग्मोजर्क्षगतौ अपिइन्दुशशिजौ भूम्यात्मजेनेक्षितौ,पुम्भावेसितलग्नशीतकिरणाः,षट्क्लीब योगाःस्मृताः।

| उदाहरणम्-3 क्लीबयोगाः। | | | |
|---|---|---|---|
| | चन्द्रः। | | |
| | | | |
| | | | |
| | रविः। | | |

**अन्वयार्थः**=अन्योन्यं=परस्परम्,यदिपश्यतः=दृष्टिः स्यात्,शशिरवी=चन्द्रार्कौ,आर्किसौम्याः=शनिबुधौअपि,वक्रो=कुजः असमे वा,वासमगंदिनेशम्=समराशौ व्यवस्थितौ रवौ-असमे,चन्द्रोदयौ=चन्द्रलग्नौ,चेत्स्थितौयुग्मोजर्क्षगतौ=समविषमराशौ,अपिइन्दुशशिजौ=चन्द्रबुधौ, भूम्यात्मजेनेक्षितौ=कुजेन दृष्टे,पुम्भावेसितलग्नशीतकिरणाः= शुक्रलग्नचन्द्राः,षट्-क्लीबयोगाः स्मृताः।

**भावः**=अन्योन्यंयदिपश्यतःसमगं शशि,असमे रवि तर्हि क्लीबः जायते। समगे अर्किविषमेसौम्यः,समेकुजःअसमे दिनेशम्,असमे चन्द्रोदयौसमे कुजचेत्स्थितौ।युग्मे चन्द्रबुधौ,ओजर्क्षगतः कुजः,पुम्भावेसितलग्नशीतकिरणाःषट्-क्लीबयोगाः स्मृताः।

उदाहरणम्3 = उदाहरणे अस्मिन् मेषस्यान्तिमे अंशे स्थितः चन्द्रः भावस्फुटे वृषभराशौ भवति। तदानीं षड्राशि अन्तरितः वृश्चिकस्थं रविं पश्यति। अतः योगोऽयम् सिध्यति।

**बोधप्रश्नाः।**

11. क्लीबजन्मः चन्द्रार्कयोः स्थितिवशात् जातः। तदाकस्मिन तिथौ भवितुम् अर्हति?
12. युग्मराशिगते शनौ केन दृष्टे क्लीबो जनयति?
13. रविः ओजराशौ स्थितः। कयोः अन्यतमयोः दृष्योः क्लीबो जायते?
14. कुत्रस्थे चन्द्रे कुजेन दृष्टे क्लीबजन्म भवति?

15. चन्द्रः बुधयुते लग्नगते वा केन दृष्टे क्लीबो जायते?

## 9.4.गर्भसंख्याज्ञानम् ।

ज्योतिर्विज्ञानेनगर्भसंख्याविज्ञानप्रक्रियाअग्रेकथिता। अस्मिन् ग्रन्थे यमलयोगः, गर्भे त्रितययोगः, अपि अनेकयोगाः इति विभक्ताः वर्तन्ते। तत्रादौ यमलजननयोगाः।

### 9.4.1. यमलजननयोगाः ।

चन्द्रसितौ समराशौ व्यवस्थितौ, बुधः,अङ्गारकः,जीवः, उदयः च एते विषमराशौ स्थिताः तदा,पुरुषस्त्री यमलौ जनयतः। लग्नेन्दू समगौ नृग्रहेण दृष्टौ गर्भस्थं मिथुनं वाच्यम्। ज्ञः, आरः, जीवः, उदयः च सर्वे समराशिषुस्थिताः तदा यमलौ जनयतः। बलिनौगुरुः,अर्कौच विषमे,अर्थात्ओजराशौभवतः,चेन्नरंजनयतः। एते जीवार्कौ एव द्वङ्गसंस्थः अर्थात् उभयराशिः नवांशः च प्राप्ताः, मिथुनकन्याधनुमीनबुधवीक्षणः च स्वके पक्षे यमलौ कुर्वन्ति।

*पुरुषयमलयोगाः*=यत्रयत्रराशौबलिनौगुर्वर्कौउभयराशिनवांशंप्राप्यबुधदृष्टौचेत्पुरुषयमलौजनयतः।

***स्त्रीयमलयोगाः***=*बलिनःशशिसितवक्राःयत्रयत्रराशौउभयराशिनवांशंप्राप्यबुधः दृष्टाचेत्स्त्रीयमलोजनयतः।*

पुरुषः ग्रहौ उभयनवांशकस्थे स्थिते,पुरुषयमलौ जायते। स्त्रीग्रहौ स्त्रीनवांशकस्थे स्थिते स्त्रीयमलौ जायते।

| | | |
|---|---|---|
| | युग्मराशिः | **ओजराशिः।** |
| | चन्द्रसितौ | |
| | | **ज्ञारजीवोदयाः।** |
| | नृनिरीक्षितौ लग्नेन्दू, | |

**युग्मेचन्द्रसितौ तथौजभवने स्युः ज्ञारजीवोदयालग्नेन्दू नृनिरीक्षितौ च समगौ युग्मेषु वा प्राणिनः |**
**कुर्युस्ते मिथुनं ग्रहोदयगतान् द्व्यङ्गांशकान् पश्यतिस्वांशेज्ञे त्रितयं ज्ञगांशकवशात् युग्मं त्वमिश्रैः**
**समम्॥ १४॥**

**पदच्छेदः**=युग्मेचन्द्रसितौतथाओजभवने स्युः ज्ञार-जीव-उदयालग्न-
इन्दूनृनिरीक्षितौचसमगौयुग्मेषुवाप्राणिनः। कुर्युःतेमिथुनंग्रहउदयगतान् द्वि
अङ्गअंशकान्पश्यतिस्व-अंशेज्ञेत्रितयं ज्ञः अंशक-वशाद्युग्मं तु अमिश्रैःसमम्।

**अन्वयः** =युग्मेचन्द्रसितौतथाओजभवनेज्ञारजीवोदयास्युः लग्नेन्दूनृनिरीक्षितौच,समगौयुग्मेषुवा प्राणिनःकुर्युः ।तेमिथुनंग्रहोदयगतान् व्द्यङ्गांशकान्पश्यतिस्वांशेज्ञे त्रितयम् (जनयन्ति) ज्ञः अंशकवशाद्युग्मं, तु अमिश्रैः समम् (जनयति)।।

**अन्वयार्थः**=युग्मे=युग्मराशौ,
चन्द्रसितौ=चन्द्रशुक्रौ,तथाओजभवने=विषमभवने,ज्ञारजीवोदया=बुधकुजगुरुलग्न,स्युः लग्नेन्दू=लग्नचन्द्रौ चनृनिरीक्षितौ=पुरुषराशिणादृष्टौ,समगौ=युग्मेषुवा, प्राणिनः=कुर्युः। तेमिथुनंग्रहोदयगतान्=लग्नस्थग्रहगतान्, व्द्यङ्गांशकान्=द्विस्वभावः अंशकान्, पश्यति=,स्वांशे=स्वनवांशे, ज्ञे=बुधे, त्रितयम्=गर्भे त्रिपिण्डम्(जनयन्ति) ज्ञः अंशकवशाद्=बुधः युग्मं, तु अमिश्रैः समम् (जनयति)।।

**भावः**=युग्मे चन्द्रसितौ तथा ओजभवने ज्ञारजीवोदया स्युः लग्नेन्दूनृनिरीक्षितौ च, समगौ युग्मेषु वा प्राणिनः कुर्युः। ते मिथुनं ग्रहोदयगतान् व्द्यङ्गांशकान् पश्यति स्वांशे ज्ञे त्रितयम् , ज्ञः अंशकवशाद् युग्मं, तु अमिश्रैः समम् (जनयति)।।

**बोधप्रश्नाः**

16. चन्द्रसितौ कुत्र स्थितौयमलजननं भवति?
17. ओजभवने स्थिताः केयमलजननंभवति?
18. "**नृ निरीक्षितौ**" इत्यस्मिन् वाक्ये नृनाम कौ?
19. युग्मेषु इति शब्दस्यार्थः कः?

### *गर्भत्रयसम्भवयोगाः।*

प्राक् यमलजननयोगः कथितः। अग्रेश्लोकः गर्भे त्रितययोगो कथितः। द्वङ्गंशाकान् स्वांशे ज्ञे पश्यति चेत् गर्भस्थत्रितयं वाच्यम्।ग्रहाः सर्वे एव द्विस्वभावनवांशकेषु प्राप्ताः लग्नं द्वंशकेषु गताः, ग्रहोदयगतान् द्विस्वभावनवांशकान् स्वनवांशकस्थे बुधे पश्यति सति तदा त्रितयं वक्तव्यम्।ग्रहाः, उदयलग्नं उभयराशिनवांशकगताः(मिथुनः, कन्या, धनुः, मीनः)चभवेयुः, तान् स्वरशिनवांशस्थ मिथुन-कन्या बुधः पश्यति चेत् गर्भस्थं त्रितयंवाच्यम्।

गर्भस्थःपिण्डस्य लिङ्गःकः? इति जिज्ञासास्वरूपम्। बुधःयस्य नवांशके व्यवस्थितः तस्य यल्लिङ्गांशकः तल्लिङ्गं तत्र गर्भे युग्मं वक्तव्यम्। यथा मिथुनराशिः पुरुषराशिः, बुधः

मिथुनराशि अंशके यदि व्यवस्थितःस पुल्लिङ्गः तर्हि गर्भे पुंसः द्वयम् इति वाच्यम्।एकः तत् विपरीतः।मिथुनांशकस्थो बुधो यदा ग्रहोदयगतान् द्विस्वभावांशकान् पश्यति तदा गर्भे दारकद्वयं दारिका चैका वक्तव्या।मिथुनराशिनवांशस्थः बुधः उभयराशिनवांशगतान् ग्रहोदयान् पश्यति चेत् त्रितयो द्वौ पुरुषौ एकास्त्री जायते।कन्या एवं मीनःच स्त्री राशिः वर्तेते। कन्यानवांशकस्थः उत मीननवांशकस्थः बुधो द्वङ्गांशकव्यवस्थितान् पश्यति, तदा गर्भे स्त्रीसन्तानद्वयं पुरुषसन्तानमेकं वक्तव्यम्। कन्या उत मीनराशिनवांशस्थः बुधः उभराशिनवांशकगतान् ग्रहोदयान् पश्यति चेत् त्रितये द्वे स्त्रियौ एकः पुरुषः जायते।अमिश्रैः समं वाच्यम्।

कलल-घन-अङ्कुर-अस्थि-चर्म-अङ्गज-चेतन-अशन-उद्वेग-प्रसवाः इति गर्भस्य दशममासावस्थाः उक्ताः। शुक्र-आर-जीव-अर्क-इन्दु-सौरि-उदयप-चन्द्रसूर्यनाथाः क्रमशः गर्भस्य मासाधिपतयः भवन्ति। मासाधिपतीनाम् बलाबलवशात् गर्भक्षेमो जन्यते।

अमिश्रैः नाम कथम्?इति उच्यते। ग्रहोदयः, बुधः मिथुननवांशकः व्यवस्थितः; बुधः मिथुनधन्वंशकव्यवस्थितान् ग्रहोदयान् पश्यति; तदा गर्भे पुत्रत्रयं भवति। कन्यांशकव्यवस्थितः बुधः, कन्या उत मीनांशकव्यवस्थितान् ग्रहोदयान् पश्यति, तदा गर्भे स्त्रीसन्तानत्रयं वाच्यम्।मिथुनराशिनवांशस्थः बुधः, मिथुनः धनुः वा नवांशकगतान् ग्रहोदयान् पश्यति चेत् गर्भस्थं त्रितयमपि स्त्रियं विद्यात्।

महाभारते गन्धार्याः गर्भे शतादिकपिण्डमासीत् इति। अत्रापि तादृशाः योगाः विवृतमस्ति।धनुराशेः अन्तिमे भागे लग्ने, सर्वेग्रहैः धनुराशिनवांशं प्राप्तेषु, बलवता बुधेन शनिना युते दृष्टैः प्रभूताः कोशाः संस्थिताः भवन्ति।

**धनुर्धरस्यान्त्यगते विलग्ने ग्रहैस्तदंशोपगतैर्बलिष्ठैः।**
**ज्ञेनार्किणा वीर्ययुतेनदृष्टैः सन्ति प्रभूतापि कोश संस्थाः** ॥ १५॥

**पदच्छेदः** =धनुः-धरस्य अन्त्य-गते विलग्ने ग्रहैः तद-अंश-उपगतैः बलिष्ठैः। ज्ञेन अर्किणा वीर्य-युतेन दृष्टैः सन्ति प्रभूता अपि कोश-संस्थाः ।

**अन्वयः** =धनुर्धरस्य अन्त्यगते विलग्ने ग्रहैः तत्अंशोपगतैः बलिष्ठैः ज्ञेन अर्किणा वीर्ययुतेन दृष्टैःप्रभूता अपि कोशसंस्थाःसन्ति।

**अन्वयार्थः**=धनुर्धरस्य=धनुराशेः, अन्त्यगते=अन्तिमे, विलग्ने=लग्ने, ग्रहैः=ग्रहैः, तत्अंशोपगतैः=अंशोप्राप्तैः, बलिष्ठैः=बलवान् ग्रहैः,ज्ञेन=बुधेन, अर्किणा=शनिना,

वीर्ययुतेन=बलयुतेन, दृष्टैः=वीक्षितैः,प्रभूताः=अनेकानि गर्भपिण्डानि अपि कोशसंस्थाः=गर्भकोशसंस्थाःसन्ति।

**भावः**=धनुर्धरस्य अन्त्यगते विलग्ने ग्रहैः तत्अंशोपगतैः बलिष्ठैः ज्ञेन अर्किणा वीर्ययुतेन दृष्टैःप्रभूता अपि कोश संस्थाःसन्ति।

**बोधप्रश्ने**

11. **स्वांशे ज्ञे** इत्यत्र स्वांशे नाम कयोः राश्योः स्थिते बुधे?

12. अनेकगर्भपिण्डयोगं लिखत।

**9.5.गर्भस्य अवस्थाः अधिपतिश्च ।**

गर्भाधानकालात् प्रभृति दशममासं यावत् एकं जीवं भुवौअनेतुंमहत्प्रयत्नं विधास्यते। प्रथममासात् प्रभृति सप्तग्रहाणां प्रभावः ग्रन्थेऽस्मिन् वर्णितः अस्ति।गर्भावस्थाः, सप्तग्रहाणां मध्ये सम्बन्धः,च कीदृशः? इति।गर्भाधानमासमारभ्य दशमासप्रसूतिमासपर्यन्तं मासाधिपाः एवं निगद्यन्ते।यथाशुक्रादितः रविः पर्यन्तं सप्तग्रहाः, भिन्न भिन्न मासेषु अधिपतयः भवन्ति। शुक्राद्याः ग्रहाः प्रथममासात् प्रभृति कललादीनां गर्भावस्थानाम् अधिपाः भवन्ति।एकं शरीरनिर्माणायगर्भस्य दशावस्थाः अस्मिन् ग्रन्थे उक्ताः।

शुक्रशोणितमिश्रिते कलल इति कथ्यते।तत्तु प्रथमे मासे भवति तस्य मासस्य शुक्रः अधिपः। द्वितीयमासे घनता काठिण्यं भवति, तस्य मासस्य कुजः अधिपो भवति। तृतीयो मासे अङ्कुरः जायते। अङ्कुरः नाम हस्तादि अवयवानाम् उत्पत्तिः भवति। तृतीयमासाधिपः गुरुः भवति। चतुर्थमासे अस्थिसम्भवः। तत्र सूर्यः अधिपः।पञ्चमे मासे चर्म सम्भवः।चन्द्रः अधिपः। षष्टे मासे अङ्गजः अर्थात् लोमजन्मः, तत्र शनिः अधिपः। सप्तमेमासे चेतनताः सम्भवति। एकस्मिन् जीवशरीरे अपरः जीवः प्रविशति। मातृगर्भे गर्भपिण्डे अन्यः चेतनाप्रविशति। तत्र बुधः अधिपतिः। अष्टममासात् प्रभृति अशन-उद्वेग-प्रसवाः च, उदयपति-चन्द्रसूर्यनाथाः स्वामिनः क्रमशः निगदिताः। अष्टमासात् प्रभृति गर्भः सजीवः भवति।अष्टममासे गर्भस्थ जन्तुः अशनं भुञ्जति। तत्रमात्रा भुक्तपीतं सेवितं सर्वं तस्य नाभिलग्ननालेन गर्भगते जन्तवे सङ्क्रमते। अतः मात्रा शुद्धश्रेष्ठम् आहारं स्विकुर्यात्। न केवलं शुद्धसात्विकः आहारः अपि तु श्रेष्ठजीवनशैलीम् आचरेत्।अष्टममासस्यगर्भाधानलग्नाधिपतिः यः ग्रहः सः मासाधिपतिः भवति।नवमे गर्भस्थस्य उद्वेगो भवति। तत्र चन्द्रः अधिपः भवति। दशमे मासि प्रसवो भवति। तत्र सूर्यः अधिपः भवति। अधः कोष्टकाधारेण लिख्यते।

**कललघनाङ्कुरास्थिचर्माङ्गजचेतनताः सितकुजजीवसूर्यचन्द्रार्किबुधाः परतः|**
**उदयपचन्द्रसूर्यनाथाःक्रमशोगदिताभवन्तिशुभाशुभंचमासाधिपतेःसदृशम्|| १६||**

**पदच्छेदः**=कलल-घन-अङ्कुर-अस्थि-चर्म-अङ्गज-चेतनताःसित-कुज–जीव-सूर्य-चन्द्र-अर्कि-बुधाःपरतः।उदयपचन्द्रसूर्यनाथाःक्रमशोगदिताभवन्तिशुभाशुभंचमासअधिपतेःसदृशम्।

**अन्वयः** =कललघनाङ्कुरास्थिचर्माङ्गजचेतनताः, सितकुजजीवसूर्यचन्द्रार्किबुधाः,उदयपचन्द्रसूर्यनाथाः परतः (स्वामिनः)क्रमशोगदिताशुभाशुभंचमासाधिपतेःसदृशंभवन्ति।

**अन्वयार्थः**= सितकुजजीवसूर्यचन्द्रार्किबुधाः=शुक्रकुजगुरुरविचन्द्रशनिबुधाः,उदयपचन्द्रसूर्यनाथाः=लग्नाधिपचन्द्रसूर्यनाथाः, परतः (स्वामिनः)=अधिपाः, गदिताः=उक्ताः,शुभाशुभंचमासाधिपतेः= गर्भमासाधिपतेः,सदृशम्=तादृशम् भवन्ति|

| मासाः। | गर्भस्वरूपम् । | अधिपतयः। |
|---|---|---|
| प्रथमः | कलल | सितः |
| द्वितीयः | घन | कुजः |
| तृतीयः | अङ्कुरः | जीवः |
| चतुर्थः | अस्थिः | चन्द्रः |
| पञ्चमः | चर्म | सूर्यः |
| षष्ठः | अङ्गज | चन्द्रः शनिः |
| सप्तमः | चेतनः | बुधाः |
| अष्टमः | अशनम् | उदयपः लग्ननवांशाधिपःच |
| नवमः | उद्वेगः | चन्द्रः |
| दशमः | प्रसवः | सूर्यः |

**भावः**=प्रथममासात् प्रभृतिगर्भस्य स्थितिः अधिपतिः कथितः।मासे प्रथमे कललः तत्र सितः,द्वितीये घनः तत्र कुजः,तृतीये अङ्कुरः तत्र जीवः,चतुर्थेअस्थिःतत्र सूर्यः,पञ्चमेचर्मः तत्र चन्द्रः,षष्ठे अङ्गजः तत्रार्किः,सप्तमे चेतनाताः बुधाः भवन्ति।ततः परतः मासाः-उदयपलग्ननवांशपाःचन्द्रः

सूर्यनाथाःभवन्तिएवंक्रमशःनिगदिताः। गर्भाधानकालिकग्रहस्थिताःमासाधिपातेः सदृशं बलभावस्थित्यादिसमानं शुभाशुभं भवति।

**बोधप्रश्नाः**=

13. गर्भाधानात् प्रभृति गर्भस्य अवस्थाः मासाधिपतयः च लिखत।
14. चेतनता कस्मिन् मासे भवति?
15. प्रथममासे गर्भस्य अवस्था का?अधिपश्च कः?
16. द्वितीयमासे गर्भस्य अवस्था का? अधिपश्च कः?
17. तृतीयमासेगर्भस्य अवस्था का?अधिपश्च कः?
18. चतुर्थमासेगर्भस्य अवस्था का?अधिपश्च कः?
19. पञ्चममासे गर्भस्य अवस्था का?अधिपश्च कः?
20. षष्ठेमासेगर्भस्य अवस्था का?अधिपश्च कः?
21. अष्टमेमासेगर्भस्य अवस्था का? अधिपश्च कः?
22. नवमे मासेगर्भस्य अवस्था का? अधिपश्च कः?
23. दशमेगर्भस्य अवस्था का?अधिपश्च कः?

**9.6.गर्भस्य शुभाशुभत्वम् ।**

गर्भमासाधिपतौ निपीडिते तत्कालं स्रवणं समादिशेत्। आधानकाले यो ग्रहो निपीडितो भवति तन्मासि गर्भस्य पतनम्। कलुषे नन्दरश्मौ विवर्णे पीडनम्। निर्मले अंशुजाले सम्पन्ने बलवति पुष्टिरिति। तच्च-

**"शुभाशुभंचमासाधिपतेःसदृशम्||"**

**बोधप्रश्नाः**

24. कदागर्भस्यहानिःभवितुम् अर्हति इति आचार्यःकथयति?

9.7. **ग्रन्थस्य मूलपाठः** -

**ओजर्क्षे पुरुषांशकेषु बलिभिर्लग्नार्कगुर्विन्दुभिःपुंजन्मप्रवदेत् समांशकगतैर्युग्मेषु तैर्योषितः |**
**गुर्वर्कौ विषमे नरं शशिसितौ वक्रश्च युग्मे स्त्रियम्|व्यङ्गस्थबुध वीक्षणाच्च यमलौ कुर्वन्ति पक्षे स्वके || ११||**

**विहाय लग्नं विषमर्क्षसंस्थः सौरोऽपि पुंजन्म करो विलग्नात् |**

**प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यः प्रसूतौ पुरुषोऽङ्गना वा || १२||**

**अन्योऽन्यं यदि पश्यतः शशिरवीयद्यर्किसौम्यावपि वक्रो वासमगं दिनेशमसमे चन्द्रोदयौ चेत् स्थितौ |**

**युग्मौजर्क्षगतावपीन्दुशशिजौ भूम्यात्मजेनेक्षितौपुम्भावे सितलग्नशीतकिरणाः षट्क्लीबयोगाः स्मृताः || १३||**

**युग्मे चन्द्रसितौ तथौजभवने स्युर्ज्ञारजीवोदयालग्नेन्दू नृनिरीक्षितौ च समगौ युग्मेषु वा प्राणिनः |**

**कुर्युर्ते मिथुनं ग्रहोदयगतान् द्व्यङ्गांशकान् पश्यति स्वांशेज्ञे त्रितयं ज्ञगांशकवशाद् युग्मं त्वमिश्रैः समम् || १४||**

**धनुर्धरस्यान्त्यगतेविलग्नेग्रहैस्तदंशोपगतैर्बलिष्ठैः|ज्ञेनार्किणावीर्ययुतेनदृष्टैः सन्ति प्रभूतापि कोशसंस्थाः || १५||**

**कललघनाङ्कुरास्थिचर्माङ्गजचेतनताः सितकुजजीवसूर्यचन्द्रार्किबुधाः परतः |**

**उदयपचन्द्रसूर्यनाथाः क्रमशो गदिता भवन्ति शुभाशुभं च मासाधिपतेः सदृशम् || १६||**

### 9.8.सारांशः ।

पाठेऽस्मिन्आदौ पुञ्जन्मकरो योगाः कथिताः। ते च, गुर्वार्कौ एतौ उभावपि विषमराशौ गतौ विषमनवांशकगतौ पुरुषं कुर्युः। लग्नं विहाय लग्नात् विषमराशौ स्थितः तृतीयपञ्चमसप्तमनवमेकादशस्थानानि एतेषु अन्यतमे स्थिते सौरोपि पुंजन्मकरः।रविचन्द्रकुजबुधगुरुशुक्राणां मध्ये यदि पुरुषग्रहाः बलिनः पञ्चमं दृष्टः युतो वा सति पञ्जन्म कथयेत्।अत्र सूर्यगुरौ पुञ्जन्मकरौ भवतः।लग्नार्कगुर्विन्दुभिः युग्मेषु समांशकगतैः अर्थात् युग्मराशिनवांशकगतैः योषितः जन्म प्रवदेत्। ततः स्त्रीजन्मवदेत्। युग्मोजर्क्षगतौ शशिरवी, अन्योन्यं यदि पश्यतः तदा एकः क्लीबयोगः यथाक्रमं युग्मराशौ चन्द्रः, ओजराशौ रविः भवेतां तयोः मध्ये अन्योन्यदृष्टिः च स्यात्।क्लीबयोगाः ततः कथिताः।ते च षड्युग्मौजर्क्षगतौ अर्किसौम्यो यदि अन्योन्यं पश्यतः तदा द्वितीयः क्लीबयोगः। असमे स्थितः वक्रः, समगं दिनेशं यदि अन्योन्यं पश्यतः तदा तृतीयः क्लीबयोगः जायते। असमे चन्द्रोदयौ स्थितौ,चन्द्रम् उदयलग्नं च भवेताम् भूम्यात्मजेन ईक्षितौ च तां तदानीं चतुर्थो क्लीबयोगो जायते। युग्मोजर्क्षगतौ इन्दुशशिजौ भूम्यात्मजेनेक्षितौ चेत् पञ्चमक्लीबयोगः। सितलग्नशीतकिरणाः अर्थात् शुक्रलग्नचन्द्राः यत्र तत्र राशौ पुम्भागे अर्थात् पुरुषराशी पुरुषनवांशके स्थितां यदि भवेयुः तदानीम् अपि क्लीबयोगाः स्मृताः।ततः गर्भस्थसंख्याज्ञानात्मकयोगाः लिखिताः। युग्मयोगाः,

गर्भे त्रितययोगाः,कथिताः। युग्मे चन्द्रसितौ तथा ओजभवने ज्ञारजीवोदया स्युः लग्नेन्दूनृनिरीक्षितौ च, समगौ युग्मेषु वा प्राणिनः कुर्युः। ते मिथुनं ग्रहोदयगतान् व्यङ्गांशकान् पश्यति स्वांशे ज्ञे त्रितयं, ज्ञः अंशकवशात् युग्मं, तु अमिश्रैः समं जनयति। ग्रहाः सर्वे एव द्विस्वभावनवांशकेषु प्राप्ताः लग्नं द्वांदशकेषु गताः, ग्रहोदयगतान् द्विस्वभावनवांशकान् स्वनवांशकस्थे बुधे पश्यति सति तदा त्रितयं वक्तव्यम्। बुधः व्यवस्थिनवांशकोक्तलिङ्गः जायते। कलल-घन-अङ्कुर-अस्थि-चर्म-अङ्गज-चेतन-अशन-उद्वेग-प्रसवा इति गर्भस्य दशममासावस्थाः उक्ताः। शुक्र-आर-जीव-अर्क-इन्दु-सौरि-उदयप-चन्द्रसूर्यनाथाः क्रमशः गर्भस्य मासाधिपतयः भवन्ति। मासाधिपतीनां बलाबलवशात् गर्भक्षेमो जन्यते।

**9.9.बोधप्रश्नोत्तराणि।**

1. पुञ्जन्मकराः योगाः -आधानलग्नम्, उदयलग्नम्, वा अर्कगुरुन्द्राः, च विषमराशौ विषमनवांशैः व्यवस्थितैः पुञ्जन्म प्रवदेत्।गुर्वार्कौ एतौ उभावपि विषमराशौ गतौ विषमनवांशकगतौ पुरुषं कुर्युः।लग्नं विहाय लग्नात् विषमराशौ स्थितः तृतीयपञ्चमसप्तमनवमेकादशस्थानानि एतेषु अन्यतमे स्थिते सौरोपि पुंजन्मकरः। रविचन्द्रकुजबुधगुरुशुक्राणां मध्ये यदि पुरुषग्रहाः बलिनः पञ्चमं दृष्टः युतो वा सति पञ्जन्मं कथयेत्।
2. लग्नात् पञ्चमस्थानस्थे शनौ पुरुषः जन्म जायते।
3. शनि यद्यपि नपुंसकः तथापि लग्नं विहाय वषमर्क्षसंस्थः शनिः पुञ्जन्मयोगो भवति।
4. ओजर्क्षे पुरुषांकेषु लग्नार्कगुर्विन्दुभिः पुंजन्म प्रवदेत्।
5. गुर्वर्कौ विषमे नरं जनयति।
6. शनिः लग्नात् ओजभावेषु भावेषु पुजन्मकरः भवति।
7. स्त्रीजन्मकारकौ शशिसितौ भवति।
8. चन्द्रशुक्रौ युग्मे स्त्रीजन्म भवति।
9. पञ्चमं स्त्रीग्रहाः दृष्टे युते स्त्री जन्मो जायते।
10. लग्नार्कगुर्विन्दुभिः युग्मराशौ व्यवस्थितैः स्त्रीजन्म जायते।
11. क्लीबजन्मः चन्द्रार्कयोः स्थितिवशात् जातः। तदा ओजमासे पौर्णमी भवितुम् अर्हति?
12. युग्मराशिगते शनौ बुधेन दृष्टे क्लीबो जनयति।
13. रविः ओजराशौ स्थितः। शशिकुजयोः अन्यतमयोः दृष्ट्योः क्लीबो जायते।

14. युग्मस्थे चन्द्रे कुजेन दृष्टे क्लीबजन्म भवति।

15. चन्द्रः बुधयुते लग्नगते वा केन दृष्टे क्लीबो जायते।

16. चन्द्रसितौ व्यङ्गांशकस्थितौ यमलजननं भवति।

17. ओजभवने स्थिताः लग्नार्कगुर्विन्दुभिः यमलजननं भवति ।

18. "नृ निरीक्षितौ"इत्यस्मिन्वाक्येनृनामगुरुकुजौ।

19. युग्मेषु इति शब्दस्यार्थः वृषभादि युग्मराशिषु इति।

20. स्वांशे ज्ञे इत्यत्र स्वांशे नाम मिथुनकन्ये अन्यतमयोः स्थिते बुधे।

21. अनेकगर्भपिण्डयोगं लिखत।

22. कलल-घन-अङ्कुर-अस्थि-चर्म-अङ्गज-चेतन-अशन-उद्वेग-प्रसवाः इति गर्भस्य दशममासावस्थाः उक्ताः। शुक्र-आर-जीव-अर्क-इन्दु-सौरि-उदयप-चन्द्रसूर्यनाथाः क्रमशः गर्भस्य मासाधिपतयः भवन्ति। मासाधिपतीनाम् बलाबलवशात् गर्भक्षेमो जन्यते।चेतनताः सप्तमे मासे भवति।

23. प्रथममासे गर्भस्य अवस्था कलल। अधिपश्च सितः।

24. द्वितीयमासे गर्भस्य अवस्था घन। अधिपश्च कुजः।

25. तृतीयमासे गर्भस्य अवस्था अङ्कुरः। अधिपश्च जीवः

26. चतुर्थमासे गर्भस्य अवस्था अस्थिः। अधिपश्च चन्द्रः।

27. पञ्चममासे गर्भस्य अवस्था चर्म। अधिपश्च सूर्यः।

28. षष्ठे मासे गर्भस्य अवस्था अङ्गजाः जन्यन्ति। अधिपश्च शनिः।

29. अष्टमे मासे गर्भस्य अवस्था अशनः। अधिपश्च बुधः।

30. नवमे मासे गर्भस्य अवस्था उद्वेगः। अधिपश्च उदयपः लग्ननवांशाधिपः।

31. दशमे गर्भस्य अवस्था प्रसवः। अधिपश्च सूर्यः।

32. गर्भमासाधिपतौ निपीडिते तत्कालं स्रवणं समादिशेत्। आधानकाले यो ग्रहो निपीडितो भवति तन्मासि गर्भस्य पतनम्।

**9.10. अभ्यासप्रश्नाः।**

I. पुरुषाणां जातके लग्नार्कगुरुचन्द्राः कस्मिन् राश्यंशके स्थिताः परिशीलयत।

II. स्त्रीणां जातके शशिसिताः कस्मिन् राश्यंशके स्थिताः इति परिशीलयत।

III. क्लीबजातकसङ्ग्रहणं कुरुत।

IV. पञ्चाङ्गाधारेण ग्रहाणां पीडनम्, युद्धम्, आदयः कदा भवेयुः इति सारिण्याः निर्माणं कुरुत।

**ॐॐॐश्रीसरस्वत्यै नमः ॐॐॐ**

# 10.पाठसंरचना।

- 10.1. प्रस्तावना।
- 10.2. उद्देश्यम् ।
- 10.3. अधिकाङ्गयोगः ।
- 10.4. मूकयोगः ।
- 10.5. चिरलब्धवाग्योगः ।
- 10.6. सदन्तयोगः।
- 10.7. कुब्जयोगः।
- 10.8. पङ्गुयोगः।
- 10.9. जडयोगः।
- 10.10. वामनयोगः।
- 10.11. हीनाङ्गयोगः।
- 10.12. नेत्रवैकल्ययोगः।
  - 10.12.1. जात्यन्धयोगः।
  - 10.12.2. बुधबुध्-अक्षयोगः।
  - 10.12.3. वामाक्षिकाणयोगः।
  - 10.12.4. दक्षिणाक्षिकाणयोगः।
- 10.13. प्रोक्तयोगानाम्अपवादः।
- 10.14. प्रसवकालनिर्णयः।
- 10.15. दीर्घकालप्रसवयोगः।
  - 10.15.1. वर्षत्रयेणप्रसवः।
  - 10.15.2. द्वादशेवर्षेप्रसवः।
  - 10.15.3. सारांशः।
  - 10.15.4. शब्दावली।
  - 10.15.5. बोधप्रश्नोत्तराणि।

अभ्यासप्रश्नाः

## 10.1. प्रस्तावना ।

अथ गर्भाधानसंस्कारात्, गर्भाधानकालवशात् जनिष्यमाणजन्तोः स्वास्थ्यं चिन्त्यते। स्वास्थ्यम् इतिशब्दस्य कोऽर्थः? इति विचिकित्सायां सुश्रुतसंहितायां कथितमिदं वचनम्- **"समदोषसमाग्निश्चि समधातुमलक्रियः।प्रसन्नात्मेन्द्रियमनाः स्वस्थइत्यभिधीयते।।** "न केवलं शारीरिकस्वास्थ्यम्,अपि तु आत्मनः प्रसन्नता, इन्द्रियाणां प्रसन्नता च अत्र उक्ता। पाठेऽस्मिन् गर्भाधानकालवशात् जनिष्यमाणस्य जन्तोः शारीरिकविकलता विषदिता। तच्च वेद-

केचित् जन्मनः प्रभृति शारीरिकवैकल्ययुक्ताः सन्ति। कालान्तरे स्वस्थाः भवन्ति। केचित् जन्मानः प्रभृति स्वस्थाः,कालान्तरे अस्वस्थाः जायन्ते। केचित् आजीवनं स्वस्थाः भवन्ति। केचित्तुआजीवनम् अस्वस्थाः भवन्ति।विचारेऽस्मिन् गीताचार्यस्यवचनमिदं स्मार्यते "योगक्षेमंवहाम्यहम्"इति।किंवायोगक्षेमः?इतिजिज्ञासितेसतितदुच्यते- "अलब्धस्यलाभःयोगःलब्धस्यपरिपालनंक्षेमः"इति।आरोग्यस्य प्राप्तिः योगः प्राप्तस्य परिपालनं क्षेमः इति अन्वेतुम् अर्हति। भारतीयसम्प्रदायेषुचतुर्विधपुरुषार्थानांप्रधान्यता दत्ता, अतःपुरुषार्थसाधनार्थंशरीरंसंरक्षणीयम्भवति।शारीरिकस्वास्थ्यसंरक्षणायआयुर्वेदः,मानसिकस्वास्थ्यसंरक्षणाययोगः, तापत्रयक्लेशनाशनायज्योतिषं चसमुदिताःसन्ति। सम्पूर्णफलितज्योतिषशास्त्रं पूर्वस्मिन् जन्मनि अर्जितकर्मानुसारेण इहजन्मनः भावीफलं व्यञ्जयति। स्वकर्मफलं भोक्तुं जन्तवः जायन्ते इति सिद्धान्तस्य स्वरूपः।स्वप्राग्जन्मार्जितकर्म अपि व्याधिरूपेण बाधते इति प्रश्नमार्गकरः-

**"पूर्वजन्मार्जितं कर्म व्याधिरूपेण बाधते।तत् शान्तिरौषधैः दानैः जपहोमतपादिभिः।।"इति।**

ग्राहाणां शरीरे प्रभावः वर्तते।

ग्रहाणांवातपित्तकफत्रिदोषेषुकारकत्वम्उक्तम्-

**पित्तंवातयुतंकरोतिदिनकृद्वातंकफंशीतगुः।पित्तंभूमिसुतस्तथाशशिसुतोवातञ्चपित्तंकफम्।।**

**जीवोवातकफौसितोऽनिलकफौवातंचपित्तंशनिः।क्षीणेन्दुस्थितराशिनाथकथितंपूर्णःकफंतोयभे।।**

केन प्रकारेण रोगोद्भवः? इति जिज्ञासा। रोगदायकाः ग्रहाः स्वधात्वादिकारकेषु रोगोद्भवाः वाच्याः। निजागन्तुकभेदतः द्विविधाः रोगाः दृश्यन्ते। तत्र अपि द्विविधः, दृष्टनिमित्तजाः अदृष्टनिमित्तजाश्चेति। तदुक्तं यथा-**"रोगास्तु द्विविधाः ज्ञेया निजागन्तुकभेदतः।**

**निजाश्चगन्तुकश्चापि प्रत्येकं द्विविधाः पुनः।।**"निजरोगे शरीररोगाः, चित्तोत्थरोगाः इति भेदः। आगन्तुकरोगे दृष्टनिमित्तजन्यादृष्टनिमित्तजन्यौ इतिद्विविधः। एवं व्याधयः चतुर्विधाः विभक्ताः।

प्राग्-जन्मकर्मफलवशात् क्वचित् जनाः शारीरिकतया विशेषक्षमाः भवन्ति। गर्भाधानसमयवशात् जन्मकुणडलीवशात् वा शारीरक-अक्षमाणां विज्ञानप्रक्रिया पाठेऽस्मिन् उल्लिखिता। शारीरक-अक्षमाणां जन्मकुण्डल्याम् अनेके योगाः सन्ति।वराहमिहिराचार्यः शारीरकाक्षमाणांवर्गीकरणं चकार। ते चअधिकाङ्गयोगः,मूकयोगः, चिरलब्धवाग्योगः, सदन्तयोगः कुब्जयोगः, पङ्गुयोगः, जडयोगः, वामनयोगः हीनाङ्गयोगः, नेत्रवैकल्ययोगः, जात्यन्धयोगः बुद्-बुदाक्षयोगः, वामाक्षिकाणयोगः, दक्षिणाक्षिकाणयोगः च ग्रन्थेऽस्मिन् दृश्यन्ते।अपिच प्रोक्तयोगानाम् अपवादम् अपि कथितम्।एवं शारीरिकवैकल्यते ज्ञाते प्राग् एव चिकित्सादयः कुर्युः। गर्भस्थे जन्तोः प्रसवकालोपि ज्ञातव्यः ।

गर्भाधानसमयवशात् गुर्व्याः गर्भिण्याः प्रसवकालस्य निर्देशः च पाठेऽस्मिन् कथितः।गर्भधारणसमयःसाधारणतयानिषेकान्नवमासाः यावन्मिताःभवन्ति।प्रसवःदशमेमासिजायते।परन्तुदीर्घकालप्रसवयोगः, वर्षत्रयेणप्रसवः, द्वादशेवर्षेप्रसवःयोगोऽपिपाठेऽस्मिन् विवृतः। मानवः विवेचनशक्तियुक्तः। सः समाजं समजं च सहैव परिपालयेत्।

गजगर्भः साधरणतया वर्षत्रयात् द्वादशवर्षं यावत् कालो भविष्यति। मानवः गजः अनयोः आयुः कालः समानः तच्च 120 वर्षाणि

एवंज्ञात्वासमतोलनेनजीवनंयापनीयम्।प्राचीनभारतीयऋषिमुनिभिःतपोबलेनया जीवनशैलीवर्ततेतत्रगुणाःएववर्तन्ते।कालेसात्त्विकाहारसेवनम्, पञ्चेन्द्रियेषुनियन्त्रणम्, सत्यवाक्, सुसमीचीनचिन्तनम्, सदाचारः इत्यादेःअनुसरणेनत्रिकरणशुद्धिरपितापत्रयनिवारणपूर्वकपुरुषार्थानांसिद्धिर्भवति।आत्मनः मोक्षायजगतःहितायच प्राचीनभारतीयानांजीवनलक्ष्यमासीत्।अतःअत्युत्तमजीवनशैलीमिमामनुसृत्यजीवनलक्ष्यं प्राप्नुमः।

("हितं मनोहारि च दुर्लभं वचः इति" इति भारविः।अतः शारीरिकवैकल्यतायाःवर्णनसन्दर्भेषु श्रोतारः दुःखिता न स्युः। अतः पाठेऽस्मिन् अक्षमाः, विकलाङ्गः इत्यादिपदेन न उल्लिख्यन्ते।तेषां यन्त्रेण अथवा इतरोपायानां माध्यमेन जीवने सामञ्जस्यं सम्पादनीयम् इत्यतः, विशेषक्षमाः इति शब्दः प्रयुञ्जामहे। येन मृदुमनस्कः अध्येता अपि दुःखितो मा भूत् इति धिया।)

## 10.2 उद्देश्यम् ।

अस्य पाठस्य अध्यनेन भवान् गर्भाधानकालवशात् जायमानजन्तोः शारीरिकक्षमतायाः विचारे ज्ञातुं समर्थो भविष्यति। ते च

- अधिकाङ्गयोगस्य ज्ञाने समर्थो भविष्यति।
- मूकयोगस्य ज्ञाने पटुः भविष्यति।
- चिरलब्धवाग्योगस्य ज्ञाने प्रभुः भविष्यति।
- सदन्तयोगस्य ज्ञाने निपुणो भविष्यति।
- कुब्जयोगस्य ज्ञाने वेत्ता भविष्यति।
- पङ्गुयोगस्य ज्ञाने कोविदः भविष्यति।
- जडयोगस्य ज्ञाने दक्षः भविष्यति,
- वामनयोगस्य ज्ञाने समर्थो भविष्यति।
- हीनाङ्गयोगस्य ज्ञाने कुशलो भविष्यति।
- नेत्रवैकल्ययोगस्य ज्ञाने विज्ञाता भविष्यति।
- जात्यन्धयोगः इति योगज्ञाने समर्थो भविष्यति।
- बुद्-बुद् अक्षयोगज्ञाने दक्षः भविष्यति।
- वामाक्षिकाणयोगे निपुणो भविष्यति।
- दक्षिणाक्षिकाणयोगेनिपुणो भविष्यति।
- प्रोक्तयोगानाम् अपवादान् ज्ञास्यति।
- गुर्व्याः गर्भिण्याः प्रसवकालनिर्णये समर्थो भविष्यति
- दीर्घकालप्रसवयोगे सुविदितो भविष्यति
- वर्षत्रयेण प्रसवयोगं वेत्ति।
- द्वादशे वर्षे प्रसवयोगम् अभिजानाति।

**दशमः पाठः।**

*10.3 अधिकाङ्गयोगः।*

गर्भाधानलग्नवशात् उदयलग्नवशात् वा जन्तोः स्वास्थ्यचिन्तनंविधीयते।ज्ञे अर्थात् बुधे, लग्नात् त्रिकोणे स्यात्।त्रिकोणगे नामनवमे पञ्चमे वा स्यात्। विबलैः अर्थात् निर्बलैः भवेयुः। कै निर्बलैः? इति जिज्ञासा भवत्येव। परैः अर्थात् सर्वैः ग्रहैः निर्बलैः स्यात्। आधानलग्नात् उदयलग्नात् वा, बुधः त्रिकोणगतः इतरेग्रहाः निर्बलाः तस्मिन् काले प्रसूतस्य मुखाङ्घ्रिहस्तद्विगुणःभवति।

* लग्नात् ,ज्ञेत्रिकोणगेअर्थात् पञ्चमेनवमेवास्थिते,अपरेअन्यैःसर्वैः ग्रहैः विबलैः बलरहितैः, तदा निषिक्तः गर्भः मुखाङ्घ्रिहस्तद्विगुणः भवेत्।

आधानलग्नात् क्वचित् ग्रहाः विबलैः कीदृशो जायेत? इति जिज्ञासा भवति।लग्नात् बुधः त्रिकोणगः, कुजगुरूविबलौ चेत्, मुखस्यद्विगुणता, चन्द्रशुक्रौ विबलौचेत् अङ्घ्रिद्वैगुण्यं, रविशनी विबलौ चेत् हस्तद्वैगुण्यम्, अन्ये सर्वे विबलाः चेत् मुखाङ्घ्रिहस्तद्वैगुण्यं भवति।

| | **बुधे त्रिकोणगे दुर्बलाःग्रहाः।** | **अङ्गविभागः।** |
|---|---|---|
| 1 | कुजगुरू | मुखस्यद्विगुणता। |
| 2 | चन्द्रशुक्रौ | अङ्घ्रिद्वैगुण्यम्। |
| 3 | रविशनी विबलौ | हस्तद्वैगुण्यम्। |
| 4 | अन्ये सर्वे विबलाः | मुखाङ्घ्रिहस्तद्वैगुण्यम्। |

तच्च कथितम् –

**"त्रिकोणगे ज्ञे विबलैस्तथा परैर्मुखाङ्घ्रि हस्तैर्द्विगुणस्तदा भवेत्।"**

### *10.4.* *मूकयोगः।*

वृषभराशौ चन्द्रे व्यवस्थिते, अशुभग्रहैः भसन्धिगतैः, जन्तुः मूको भविष्यति।गवि स्थिते चन्द्रे, अशुभैः भसन्धिगैः कर्कवृश्चिकमीनानाम् अन्त्यनवांशस्थैः, पापग्रहैः, निषिक्तः गर्भः अवाक् (मूकः) भवति। तच्च कथितः-

**"अवाग् गवीन्दावशुभैर्भ संधिगैः।"**

अत्र श्लोके अशुभैः इति तृतीया विभक्तिः प्रयुक्ता। क्रियासिद्धौ प्रकृष्टोपकारं करणसंज्ञा स्यात्। साधकतमं करणम् । करणे तृतीयाविभक्तिः प्रयोक्तव्या। अवाग् कारके अशुभैः इति सिद्ध्यति। अशुभैः इत्यत्र बहुवचनं प्रयुक्तम्। "अशुभग्रहः यदि भसन्धौ भवतितदा कीदृशो जायते?" इति शङ्का। तच्च ख्यायते- भसन्धौ ,एकेन ग्रहेण वाक् अलसता, द्वाभ्यां वाचः अल्पत्वं, त्रिभिः पापैः मूकता च उक्तः।उदाहरणम्- वृषभराशौ व्यवस्थिते चन्द्रे आर-अर्क-अर्किणः भसन्धौ स्थिताः सन्ति। अतो जातः अवाग् भवति।

उदाहरणम् अवाग्।

| | | | |
|---|---|---|---|
| | कुजः। | चन्द्रः। | |
| | | | रविः शनिः। |
| | | | |
| | | | |

### *10.5.* *चिरलब्धवाग्योगः।*

जन्मकाले मूकः भूत्वा

समयानान्तरं पुनः वाक्-शक्ति प्राप्तियोगः अधुना कथ्यते। यत् कर्मकृतं तस्य फलं भोक्तव्यमेव।अतः कालानन्तरे यावत् मूकत्वयोगो जातके भूत्वा क्षीणे कर्मणि पुनः वाग्-शक्तिः प्राप्यते। तादृशयोगः उच्यते वृषभराशौ चन्द्रे व्यवस्थिते,अशुभग्रहैः भसन्धिगतैः, जन्तुः मूको भविष्यति।गवि स्थिते चन्द्रे, अशुभैः भसन्धिगैः कर्कवृश्चिकमीनानाम् अन्त्यनवांशस्थैः पापग्रहैः निषिक्तः गर्भः अवाक्(मूकः) भवति। यदि शुभग्रहेण दृष्टे, भवति तर्हि चिरात् गिरं प्राप्नोति।तच्च-मूकयोगे शुभेक्षितैः ग्रहैः चेत्, शुभग्रहदृष्टः चन्द्रः, राशिसन्धिस्ताः पापग्रहाश्च भवन्ति चेत् गर्भस्थस्थस्यशिशोः चिरात् अर्थात् बहुवर्षान्तरं गिरं कुरुते।

**"शुभेक्षितश्चेत् कुरुते गिरं चिरात्।। १७।।"**

**श्लोकः-**

**त्रिकोणगे ज्ञे विबलैस्तथा परैर्मुखाङ्घ्रि हस्तैर्द्विगुणस्तदा भवेत्।**

**अवाग् गवीन्दावशुभैर्भ संधिगैः शुभेक्षितश्चेत् कुरुते गिरं चिरात्।। १७।।**

**पदच्छेदः-**

त्रि-कोणगेज्ञेविबलैःतथापरैःमुख-अङ्घ्रि-हस्तैःद्विगुणःतदाभवेत्।अवाग्-गविइन्दौअशुभैःभ-संधिगैःशुभैः ईक्षितःचेत्कुरुतेगिरंचिरात्।।(वंशस्थ)

**अन्वयः**=त्रिकोणगे ज्ञे विबलैस्तथा तदा परैर्मुखाङ्घ्रिहस्तैर्द्विगुणः भवेत् । गवीन्दावशुभैर्भसंधिगैः अवाग्, शुभेक्षितश्चेत् गिरं चिरात् कुरुते।

**अन्वयार्थः=** त्रिकोणगे=त्रिकणभवने अर्थात् पञ्चमनवमभवनयोः, ज्ञे=बुधे, विबलैः=विगतैः बलैः, तथा तदा परैः=इतरग्रहैः, हस्तैः=पाणिभिः,द्विगुणा=द्विगुणिता भवेत्।गवि=वृषभराशिस्थे, इन्दौ=चन्द्रे, अशुभैः=क्षीणेन्द्वर्कमहीसुतार्कतनयैः, भसंधिगैः=कर्कवृश्चिमीनराशीनाम् अन्तिमे नवांशे, अवाग्=मूकः नवाग् यस्य सः, शुभेक्षितः चेत्= शुभग्रहेण दृष्टे , गिरं=वाक्, चिरात्=बहुकालानन्तरम्, कुरुते=प्राप्नुयात्।

**भावः**= त्रिकोणगे ज्ञे विबलैस्तथा तदा परैर्मुखाङ्घ्रि हस्तैर्द्विगुण भवेत्।गवीन्दावशुभैर्भ संधिगैः अवाग्, शुभेक्षितश्चेत् गिरं चिरात् कुरुते।

**बोधप्रश्नाः**

1. मुखाङ्घ्रिहस्तद्विगुणयोगेलग्नात्बुधःकत्रस्थितःभवेत्?
2. अवाग्योगःभसन्धौकैःग्रहैःस्थितैःसङ्गच्छते?
3. बहुकालात्अनन्तरंवाक्यप्राप्तिःयोगंलिखत।

10.6**सदन्तयोगः** ।

* बुधस्य राश्यंशकसंस्थितौ रविजरुधिरौ सदन्तं कुरुते।

तच्च कथितः –“**सौम्यर्क्षांशे रविजरुधिरौ चेत् स दन्तोऽत्र जातः।**“ अत्र सन्देहः। रविजरुधिरौ यदि पृथग्-पृथग् बुधस्य राश्यंशके व्यवस्थितौ तर्हियोगो साफल्यः भवतिकिम्? आधानकाले जन्मकाले वा रविजरुधिरौ यदि बुधस्य राशौ अंशके वा संस्थितौ तदा सदन्तो जायते। तौ रविजरुधिरौ पृथग् पृथग् स्थितो वा एकत्र स्थितेऽपि वा तदा सदन्तो जायते। सदन्तः इत्यत्र टीकासु द्विविधा अर्थाः दृश्यन्ते। एकः दन्तेन सहितः इति । अपरस्तु सद् अन्तःकरणवान् इति । प्रायः प्रथममेवसाधुः इति प्रतिभाति।**सदन्तजाता कुलनाशकारी** इत्यादि उक्तिः प्रसिद्धा। उदाहरणे अस्मिन् रविजरुधिरौ स्थितौ।अर्थात् मिथुनराशौ शनिकुजौ स्थितौ।अतः सदन्तो जायते।

उदाहरणम् सदन्तयोगः।

| | | | |
|---|---|---|---|
| | | | शनिः कुजः। |
| | | | चन्द्रः लग्नम्। |
| | | | |
| | | | |

### *10.7. कुब्जयोगः।*

चन्द्रः स्वर्क्षेअर्थात् आत्मीयराशौ, कर्कटस्थिते तथाभूते; मन्दमाहेयदृष्टे चन्द्रे गर्भस्थः कुब्जःजायते।स्वर्क्षः नाम कर्कराशिस्थः चन्द्रः, तनुगतः अर्थात् लग्नगतः,मन्दमाहेय दृष्टः लग्नं वा कुब्जः भवति।मन्दः नाम शनिना दृष्टः लग्नम् , कुजेन दृष्टम् लग्नम् चेत् कुब्जः भवति। अत्र भवतः अवधेयः अंशः-

**आधानसमये जन्मसमये कर्कराशौ लग्नस्थे चन्द्रे, मन्दमाहेयदृष्टे गर्भस्थो कुब्जः भवति।**

”**कुब्जः स्वर्क्षे शशिनि तनुगे मन्दमाहेयदृष्टे।**”

उदाहरणम्-कुब्जयोगः।

| | | | |
|---|---|---|---|
| | | | |
| | | | चन्द्रः लग्नम्। |
| | | | |
| कुजः | | शनिः | |



उदाहरणे अस्मिन् शशिः स्वराशौ व्यवस्थितः। कुजः शनिः च लग्नं चन्द्रं दृष्टवन्तौ। अतः कुब्जः जनिष्यति।


*10.8.* **पङ्गुयोगः।**

उदाहरणम्- पङ्गुयोगः।

| | | | |
|---|---|---|---|
| लग्नम् | | | |
| | | | |
| | | | |
| | | | शनिकुजचन्द्राः |

आधानसमये जननसमये वा मीनलग्नेयमशशिकुजैः वीक्षिते पङ्गुर्भवति। यदिआधानकाले जननकाले वा मीनलग्नं, यमेन अर्थात् शनिना, शशिना अर्थात् चन्द्रेण, कुजेन च वीक्षितं अर्थात् दृष्टं तदानींगर्भस्थो पङ्गुः पादविकलो जायते। तच्च कथितम्-

**"पङ्गुर्मीने यमशशिकुजैर्वीक्षिते लग्नसंस्थे ।।"**



उदाहरणे अस्मिन् मीनलग्नम् अस्ति। शनिशशिकुजाः च लग्नम् पश्यन्ति। अतः जातः पङ्गुः भविष्यति।

*10.9.* **जडयोगः।**

*सन्धौ पापे शशिनि च सौम्यदृष्टिः न चेत् जडः भवति। तच्च कथितम्-***"सन्धौ पापे शशिनि च जडः स्यान् न चेत् सौम्यदृष्टः।।"** *अत्र "सन्धौ" अर्थात् राशिसन्धिः कथितः। कर्कवृश्चिमीनान्त्यनवांशान् सन्धिः इति जातकग्रन्थेषु कथितः। तस्मिन् सन्धौ क्षीणेन्दु-अर्कमहीसुतार्कतनयेषु व्यवस्थितेषु तत्र चन्द्रे प्राप्ते, जडः गर्भस्थो जन्तुः, जडः श्रोत्रेन्द्रियहीनः जायते।राशिसन्धौ एकस्मिन् पापग्रहे चन्द्रे च, कर्कवृश्चिकमीनानाम् अन्त्यनवांशगते, तयोः पापेचन्द्रे च, शुभदृष्टिः न चेत् श्रोतुम् अशक्तः जडः जायेत।अत्र भवता स्मर्तव्यः तथ्यः-*

* **आधानलग्नकालेराशिसन्धौ पापे,तत्रैव शशिनि जडो जायते।**

***स्यान्न चेत् सौम्यदृष्टिः*** *इत्येषः अंशः;यदा सर्वे अशुभयोगकर्तारः ग्रहाः सैम्यग्रहैः दृष्टाः न भवन्ति, तदानीमेव अशुभयोगं पूर्णतया वदेत्।बलिभिः सौम्यैःदृष्टः चेत्, अशुभयोगफलं न*

*वदेत्। मध्यबलैः हीनबलैः, वा शुभग्रहैः अशुभयोगकर्तारः ग्रहाः दृष्टाः, चेत् अशुभयोगाः असमग्रफलाः भवन्ति।*

| योगः। | लग्नम्। | निरीक्षणम्। | इतरांशाः। |
|---|---|---|---|
| सदन्तयोगः। | | | सौम्यर्क्षांशे । शनिकुजौ। |
| कुब्जयोगः। | कर्कलग्नस्थः चन्द्रः। | शनिकुजौ। | |
| पङ्गुः। | मीनः। | शशिशनिकुजैः। | |
| जडः। | | | सन्धौ पापैः शशी च। |

**"सौम्यर्क्षांशे रविजरुधिरौ चेत् सदन्तोऽत्र जातः कुब्जः स्वर्क्षे शशिनितनुगे मन्दमाहेयदृष्टे ।।**
**पङ्गुर्मीने यमशशिकुजैर्वीक्षिते लग्नसंस्थे सन्धौ पापे शशिनि च जडः स्यान्न चेत् सौम्यदृष्टिः।।**
**१८।।"**

**पदच्छेदः**=सौम्य-ऋक्ष-अंशे रविज-रुधिरौ चेत् सदन्तो अत्र जातः कुब्जः स्व-ऋक्षे शशिनितनुगे मन्दमाहेय दृष्टे ।पङ्गुः मीने यम-शशि-कुजैः वीक्षिते लग्न-संस्थे संधौ पापे शशिनि च जडः स्यान्-न चेत् सौम्य-दृष्टिः । ।

**अन्वयः**=सौम्यर्क्षांशे रविजरुधिरौ चेत् अत्र सदन्तः, स्वर्क्षे शशिनि तनुगे मन्दमाहेय दृष्टे कुब्जः जातः।मीने यमशशिकुजैः वीक्षिते पङ्गुः,लग्नसंस्थे सन्धौ पापे शशिनि च सौम्यदृष्टिः नो चेत् जडः स्यात्।(सौम्यदृष्टिः न चेदिति सर्वत्र प्रत्येकम् अन्वयः)

**अन्वयार्थः**=सौमर्क्षांशे=बुधस्य राश्यंशगे, रविजरुधिरौ=शनिकुजौ, चेत् अत्र सदन्तो=दन्तेन सहितः, जातः, स्वर्क्षे=आत्मीयराशौ, (अस्मिन् सन्दर्भे कर्कटराशौ) शशिनि=चन्द्रः, तनुगे=लग्नगे, मन्दे=शनौ, माहेये=कुजे, दृष्टे=परिवीक्षिते कुब्जः=कुब्जः जायते।मीने=मीनलग्ने, यमः=शनिः, शशिः=चन्द्रः, कुजैः=मङ्गलैः, वीक्षिते=दृष्टे, पङ्गुः=पादेन विकलः,लग्नसंस्थे =लग्नगते, सन्धौ=राशिसन्धौ, पापे=पापग्रहाः, शशिनि=चन्द्रः अपि स्थिते, जडः= स्यात्,न चेत् सौम्य दृष्टः=न शुभग्रहेण दृष्टः भवेत्।

**भावः**=सौम्यर्क्षांशे रविजरुधिरौ स्तः चेत् सदन्तो जायते।कर्कटकलग्नः,तत्रप्राप्तः चन्द्रः, मन्दमाहेयदृष्टः, गर्भस्थो कुब्जः।मीनलग्ने शनिशशिकुजैः वीक्षिते गर्भस्थो पङ्गुः जायते।लग्नसंस्थे संधौ पापे शशिनि च जडः,चेत् न सौम्यदृष्टः स्यात्।

(जडः अलसः भवति। मनोबलवर्धनेन जडः नभवेत् इति प्रतिभाति। यदि चन्द्रो राशिसन्धौ न व्यवस्थिते तदा जडत्वं न भवति।)

**बोधप्रश्नाः**

4. बुधस्य राश्यंशकसंस्थितौ कौ सदन्तयोगः जनयतः?
5. आधानसमये जन्मसमये कर्कराशौ लग्नस्थे चन्द्रैकदृष्टेगर्भस्थो कुब्जः भवति।
6. आधानकाले जननकले वा मीनलग्नं केन वीक्षितं चेत्गर्भस्थो पङ्गुः पादविकलो जायते?
7. आधानलग्नकाले कीदृश्यां ग्रहस्थित्यां जडो जायते?

### *10.10. वामनयोगः ।*

मकरराशेः अन्त्यनवांशके विलग्नस्थे नवमनवांशकोदयमाने, चन्द्रेण,सूर्येण, शनिना, चएतैः अवलोकिते वामनको गर्भस्थो वाच्यः।तथा हि-

**"सौरशशाङ्कदिवाकरदृष्टेवामनकोमकरान्त्यविलग्ने।"**



उदाहरणे अस्मिन् मकरलग्नं वर्तते। कर्कराशौ स्थितौ रविचन्द्रौ मकरलग्नं पश्यतः। वृश्चिकस्थः शनिः मकरलग्नं पश्यति। तस्मात् वामनो जायते।

### *10.11. हीनाङ्गयोगः।*

उदाहरणम् वामनयोगः।

| | | | |
|---|---|---|---|
| | | | |
| | | | चन्द्ररवी। |
| लग्नम्। | | | |
| | शनिः। | | |

अस्मिन् श्लोके भुजरहितस्य,अङ्घ्रिहीनस्य, शिरोहीनस्य च जननयोगः व्याचक्षितः। स च द्रेष्काणस्य आधारेण। तत्र आदौ द्रेष्काणानां ज्ञानंकस्मिन् श्लोकेकथितम् इति स्मरतु। "**द्रेक्काणाः स्युः स्वभवनात् सुतत्रित्रिकोणाधिपानाम्**"।द्वितीयद्रेक्काणाधिपः पञ्चमभवनाधिपः, तृतीयद्रेक्काणाधिपः नवमभवनाधिपः च भवति।धीः अर्थात् पञ्चमभावःभवति। पञ्चमभावेन धीः, प्रज्ञा, विद्या, प्रतिभा आदयः विचिन्त्यन्ते। द्वितीयद्रेक्काणाधिपः पञ्चमभवनाधिपः भवति। अथवा पञ्चमद्रेक्काणो नाम द्वितीयद्रेष्काणः भवति। द्रेष्काणाः त्रयाः एव भवन्ति। पञ्चमद्रेष्काणः नाम द्रेष्काणत्रयं पूर्णं जातम्। ततः द्वयम् अवशिष्टम्। अतः पञ्चमद्रेष्काणः नाम

मध्यद्रेष्काणःभवति।नवमद्रेष्काणः नाम अन्तिमद्रेष्काणः भवति। उदयद्रेष्काणः अर्थात् प्रथमद्रेष्काणः भवति।

लग्नस्य प्रथमद्रेष्काणे, द्वितीयद्रेष्काणे, तृतीयद्रेष्काणे च पापसहितैः, भुजाङ्घ्रिशिरसाम् एकस्यापि नाशो भवति। अर्थात् लग्नंसौरः अर्थात् शनिः, शशाङ्कः अर्थात् चन्द्रः, दिवाकरः अर्थात् रविः, च दृष्टाः स्यात्, एवं विधे लग्नं यस्मिन् द्रेष्काणे वर्तते? इति ज्ञातव्यः। प्रागुक्ते लग्नं यदि प्रथमद्रेष्काणे स्यात्, तत्र यदि पापयुतैः तर्हि अशिरः स्यात्। लग्नम्यदि मध्यद्रेष्काणे तत्र पापयुतैः तर्हि अभुजः स्यात्। लग्ने अन्त्यद्रेष्काणे उदये तत्र पापैः अनङ्घ्रिः स्यात्।अत्र भवता स्मर्तव्यः अंशः-

* लग्ने, धीः-नवम-उदयगैः च दृकाणैः पापयुतैः सौरशशाङ्कदिवाकरदृष्टे च क्रमेण अभुजः, अनङ्घ्रिः,अशिरः च स्यात्।
* लग्नपञ्चमभावदृकाणे कुजयुते सौरशशाङ्कदिवाकरदृष्टे जातः अभुजः स्यात्।
* अन्त्यलग्ननवमभावदृकाणेकुजयुते सौरशशाङ्करदिवाकरदृष्टे जातः अनङ्घ्रिः स्यात्।
* राशेः अन्त्यलग्नद्रेक्काणे कुजयुते सौरशशाङ्कदिवाकरदृष्टे जातः अशिरः स्यात्।

| **अङ्गवैकल्यः** | **लग्नद्रेष्काणः पापयुक्ते** | **दृष्टिः** |
|---|---|---|
| **हस्तबाधा** | आदिद्रेष्काणे | सौरशशाङ्कदिवाकराः |
| **भुजबादा** | मध्यद्रेष्काणे | शनिः चन्द्रः रविः च |
| **अङ्घ्रिबाधा** | तृतीयद्रेष्काणे | सौरशशाङ्कदिवाकराः |

उदाहरणम्- अङ्गवैकल्ययोगः।

| | | | |
|---|---|---|---|
| | | | चन्द्रः |
| | 4-12-1982 | | |
| लग्नं कु | Melborne australia 9.34 am | | |
| मान्दि के | र बु गु शु | श | |

**सौरशशाङ्कदिवाकरदृष्टे वामनको मकरान्त्यविलग्ने ।धीनवमोदयगैश्च दृकाणैः पापयुतैरभुजाङ्घ्रिशिराः स्यात् ।। १९।।**

**पदच्छेदः= सौर-शशाङ्क-दिवाकर-दृष्टे वामनको मकर-अन्त्य-विलग्ने।धीः नवम-उदयगैः च दृकाणैः पाप-युतैः अभुज-अङ्घ्रि-शिराः स्यात् ।।(दोधक)**

अन्वयः=**मकरान्त्यविलग्नेसौरश्शशाङ्कदिवाकरदृष्टे(गर्भस्थः)वामनक ,धीः नवम उदयगैः च दृकाणैः पाप युतैः अभुजाङ्घ्रिशिराः स्यात् ।।**

**अन्वयार्थः= मकरान्त्यविलग्ने** =मकरराशेःअन्तिमेअंशे उदये, **सौरश्शशाङ्कदिवाकरदृष्टे**=शनिना चन्द्रेण रविणा च लग्नं निरीक्षिते;**(गर्भस्थः)वामनकः**=गर्भस्थः नवजातो वा

अल्पमूर्तिः,**धीः**=पञ्चमभावः अत्र तु द्वितीयद्रेक्काणः, **नवमोउदयगैः**=नवम लग्नगैःच , **दृकाणैः**=द्रेष्काणैः, **पापयुतैः**=अशुभग्रहसंयुतैः, **अभुजाङ्घ्रिशिराः**=भुजेनपादेन शिरसा च विकलाः स्यात् ।।

**भावः**=आधानलग्नम् जननलग्नम् वा मकरराशिलग्नम्सूर्यचन्द्रशनयः यदि पश्यन्ति तदा वामनकः भवति।मकरराशेः अन्त्यलग्ने, धीनवमोदयगैः च दृकाणैः कुजेन युते सौरशशाङ्कदिवाकरदृष्टे च क्रमेण अभुजः, अनङ्घ्रिः, अशिरः च स्यात्।

**बोधप्रश्नाः**

8. मकरान्त्यलग्ने कैः दृष्टे वामनस्य जननं भवति।
9. लग्ने अभुजजन्मयोगं लिखत।
10. लग्ने अनङ्घ्रियोगं लिखत।
11. लग्ने अशिरयोगं लिखत।

**व्यापकार्थः**=सौरशशाङ्कदिवाकरदृष्टे मकरान्तयलग्नात् धीनवमोदयराशिषु अर्थात् मकरलग्नात् पञ्चमराशिः, नवमराशिः, उदयराशिः, चएषु राशिषु प्रथमद्रेक्केणे, पापायुक्तेषु शिरोबाधा, द्वितीयद्रेष्काणेषु पापयुक्तेषु, हस्तबाधा, तृतीयद्रेष्काणेषु अङ्घ्रिबाधा जायते। धीराशिगतेषु त्रिषु द्रेष्काणेषु पापयुक्तेषु हस्तबाधा नवमराशिगतेषु त्रिषु द्रेष्काणेषु पापयुक्तेषु अङ्घ्रिबाधा इत्यादि द्रष्टव्यम्।



उदाहरणे अस्मिन् मकरलग्नस्य द्वितीयद्रेष्काणे उदयः। मिथुनस्थः, चन्द्रः, लग्नम्, अष्टमस्थानं पादोनदृष्ठ्या पश्यति। शनिः स्थित्वा तुलायां, चतुर्थभवनं पादोनदृष्ठ्या पश्यति।रविः वृश्चिकराशौ व्यवस्थितः पाददृष्ठ्या अवलोकयति। जातः अभुजः अनङ्घ्रिः च भवति। परन्तु दृष्टेः न्यूनतात्वात् स्वल्पपादः, स्वल्पभुजः च विद्यते। तस्य छायाचित्रं च दत्तं वर्तते।

अधः तस्य अन्तर्जालसङ्केतः प्रदत्तः-

http://blogs.fanbox.com/SinglePost.aspx?pbid=2051772&post=2673480&mode=&link=-1&page=-1&dt=010108&mlid=-1&vet=-1&src=-1&bts=39&fs=-1&apid=2673480&rh=google.co.in&PageTimer_Request=1401860570196

### *10.12. नेत्रवैकल्ययोगः।*

"चक्षोः सूर्यो अजायत।" श्री वेदपुरुषस्य चक्षुः सूर्यः वर्तते। रविचन्द्रौ नेत्रकारकौ भवतः। रविचन्द्रयोः स्थितिवशात् नैत्रवैकल्यं चिन्तनीयम्।

#### *10.12.1. जात्यन्धयोगः।*

जन्मनः केचन जनाः अन्धाः भवन्ति। प्रचीनकाले आधानलग्नवशात् जन्मलग्नवशात् वा जन्तूनां भावीचिन्तनं कुर्वन्ति स्म। अस्मिन् प्रसङ्गे नयनराहित्यमेकं योगं विषदितम् अस्ति। तच्च ज्ञास्यामः-

सिंहे लग्ने रविचन्द्रेणयुते, कुजशनिभ्यांदृष्टे, नयनरहितः भवति। रविचन्द्रौ कदा युतौ भवतःअमायां तिथौ, रविचन्द्रौ संयुतौ भवतः।कुजस्य, शनेः च विशेषदृष्टी भवति। यदि रविचन्द्रौ युतौ सिंहलग्ने,सौराङ्गारकाभ्यां दृष्टे जातः,जन्मात् प्रभृति अन्धः भविष्यति। अत्र भवता स्मर्तव्यः तथ्यः-

उदाहरणम्-जात्यन्धयोगः।

| | | | |
|---|---|---|---|
| | | कु1 | श |
| कु3 श | | | |
| कु2 | | | ल र च |
| | श | | |

* सिंहेलग्ने,रविशशियुते, कुजार्किनिरीक्षिते नयनरहितः भवति।अत्ररविचन्द्रौदक्षिणवामनेत्रकारकौ। सिंहे लग्ने रविचन्द्रयुते सौराङ्गारकाभ्यां निरीक्षिते दक्षिणवामनयनरहितः भवति।**तच्च कथितम् यथा-**

**"रविशशियुतेसिंहेलग्नेकुजार्किनिरीक्षितेनयनरहितः।"**

#### *10.12.2. बुद्बुद- अक्षयोगः।*

*सिंहलग्ने अर्कचन्द्राभ्यां युक्ते सौम्यासौम्यैः अर्थात् शुभपापग्रहैः दृष्टैः गर्भस्थः सबुद्बुदलोचनः पुष्पिताक्षो भवति।रविशशियुते सिंहे लग्ने, सौराङ्गारकदृष्टे, सौम्यसौम्यैः दृष्टे, सबुद्-बुदलोचनः भवति। बुद्-बुदसहिताक्षियुक्तः अर्थात् नेत्रदोषवान् भवति।रविचन्द्रौ क्रमेण वामदक्षिणाक्षिकाणौ*

*भवतः। सिंहे लग्ने नेत्रकाराकौ रविचन्द्रौ प्राप्ते, तत्र सौरः अर्थात् शनिः, अङ्गारकः अर्थात् कुजः च दृष्टाः, गर्भस्थः अन्धो भविष्यति। अस्मिन् प्रसङ्गे शुभग्रहाः गुरुशुक्रयोः अन्यतमः दृष्टः तदा बुद्बुदलोचनः भवति। तर्हि शुभग्रहाणां दृष्टिवशात् अनन्धः भवति इति।अत्र पुष्पितलोचनः भवति। न तु अन्धः। न स्पष्टदृष्टिवान् च। यतः असौम्यैः ग्रहैः दृष्टिहानिः, सौम्यैः दोषनाशत्वात् दुर्बलदृष्टिः कथितः। तच्च कथितः ग्रन्थोक्तिः-*

**"रविशशियुतेसिंहेलग्नेकुजार्किनिरीक्षितेनयनरहितःसौम्यासौम्यैःसबुद्बुदलोचनः।"**

### *10.12.3. वामाक्षिकाणयोगः।*

अन्धः नाम नेत्रद्वये हीनः भवति। काणः नाम एकनेत्रहीनः भवति। चन्द्रः वामनेत्रकारकः, सूर्यः दक्षिणनेत्रकारकः च भवतः। केवले सिंहलग्ने चन्द्रप्राप्ते, तत्र सौराङ्गराकदृष्टे तदा वामाक्षिकाणः भवति। अपरः योगो अपि कथितः। वामनेत्रकारकः चन्द्रवशात् कथितः। यस्य निषेकलग्नात् जन्मलग्नात् वा चन्द्रमा द्वादशभावे व्यवस्थितः तस्य वामं चक्षुं हिनस्ति।अत्र भवतः स्मर्तव्यौ अंशौ-

- सिंहे लग्ने चन्द्रेण युते सौराङ्गारकदृष्टे वामाक्षिकाणयोगः भवति।
- **निषेकलग्नात् जन्मलग्नात् वा व्ययगृहतः चन्द्रः वामं नयनं हिनस्ति।**ग्रन्थे कथितश्च -

**"व्ययगृहगतः चन्द्रःवामं हिनस्ति।"**

### *10.12.4. दक्षिणाक्षिकाणयोगः।*

रविः दक्षिण-अक्षिकारकः भवति।सिंहेलग्नेरविशशियुते कुजार्किनिरीक्षिते नयनरहितः भवति।सिंहे लग्ने अर्केणयुते, सौराङ्गरकादृष्टे, दक्षिणाक्षिकाणयोगःभवति। अपि च अन्यः योगः अपि कथितः। निषेकलग्नात् जन्मलग्नात् वा व्यभवनगतः रविः **दक्षिणाक्षिः हिनस्ति।**

- सिंहे लग्ने रवियुते कुजार्किनिरीक्षिते दक्षिणनयनरहिते भवति।
- **निषेकलग्नात् व्ययगृहगतः रविः दक्षिणनयनं हिनास्ति।**

तच्च उक्तं ग्रन्थे यथा-

**"हिनस्ति अपरं रविः।"**

### *10.13. प्रोक्तयोगानाम् अपवादः।*

त्रिकोणगे ज्ञे इत्यादि श्लोकात् प्रभृति अधिकाङ्ग योगः,मूकयोगः, चिरलब्धवाग्योगः, सदन्तयोगः, कुब्जयोगः, पङ्गुयोगः, जडयोगः, वामनयोगः, हीनाङ्गयोगः, नेत्रवैकल्ययोगः,काणयोगः च प्रधानतया नवविधयोगाः गदिताः। तेषाम् अपवादः अथ कथ्यते। नाशुभगदिताः योगः शुभेक्षिताश्चेत् याप्याः भवन्ति।अर्थात् त्रिकोणके ज्ञे इत्यादिना

प्रागभिहिताः अशुभाः योगाः ये सन्ति, तेषु सर्वेषु योगकर्तारः ग्रहाः, यदि शुभग्रहदृष्टाः भवन्ति चेत् तदा ते योगाः याप्याः, असमग्रफलं भवन्ति। पूर्णम् अशुभं न यच्छन्ति।

**"रविशशियुतेसिंहेलग्नेकुजार्किनिरीक्षितेनयनरहितःसौम्यासौम्यैःसबुद्बुदलोचनः।**

**व्ययगृहगतश्चन्द्रोवामंहिनस्त्यपरंरविर्नशुभगदितायोगाःयाप्याःभवन्तिशुभेक्षिताः।। २०।।"**

**पदच्छेदः**=रविशशि-युते सिंहे लग्ने कुज-अर्कि-निरीक्षिते नयन-रहितः सौम्य-असौम्यैः स बुद्बुद-लोचनः ।

व्यय-गृह-गतः चन्द्रो वामं हिनस्ति अपरं रविः न शुभ-गदिता योगा याप्या भवन्ति शुभ-ईक्षिताः।

**अन्वयः**=सिंहे लग्ने रविशशियुते कुजार्किनिरीक्षिते नयनरहितः, सौम्यासौम्यैः स बुद्बुदलोचनः (जायते) व्ययगृहगतः चन्द्रो वामं हिनस्ति, अपरं रविः;अशुभगदिताः योगाः शुभेक्षिताः याप्याः भवन्ति।

**अन्वयार्थः**= रविशशियुते=रविचन्द्रयुते, सिंहे लग्ने=सिहं राशौ आधानलग्ने जन्मकालीन उदयलग्ने वा, कुजार्किनिरीक्षिते =कुजेन शनिना च निरीक्षिते, नयनरहितः=नयनहीनः प्रायः जन्मनः अन्धः, सौम्यासौम्यैः=शुभग्रहैः अशुभग्रहैः च, स बुद्बुदलोचनः=स पुष्पितलोचनो (जायते)। व्ययगृहगतः=द्वादशभवप्राप्तः, चन्द्रो=इन्दुः, वामं=वामं नेत्रं, हिनस्ति=नाशयति। अपरं =अस्मिन् प्रसङ्गे दक्षिणनेत्रम्,रविः=सूर्यः। न शुभगदिताः योगाः=त्रिकोणगे ज्ञे श्लोकप्रभृति कथिताः ये अशुभाः योगाः, शुभेक्षिताः=शुभग्रहेण वीक्षिताः, याप्याः=असमग्रफलं यच्छन्ति।

**भावः**=सिंहे लग्ने रविशशियुते कुजार्किनिरीक्षिते नयनरहितः, शुभाशुभग्रहदृष्ट्या बुद्बुदलोचनः च जायते। व्ययगृहगतः चन्द्रो वामं नयनं, रविः दक्षिणं नयनं;च हिनस्ति। न शुभगदिताः योगाः शुभेक्षिताः याप्याः भवन्ति।

**बोधप्रश्नाः**

12. वामनेत्रकारकः ग्रहः कः?
13. रविः कस्य नेत्रस्य कारकः भवति?
14. रविशशियुते सिंहेलग्ने काभ्यां निरीक्षिते अन्धः भवति?
15. पुष्पिताक्षो कदा भवति?
16. निषेककाले व्ययभवनगते चन्द्रे कस्य नेत्रस्य हानिः भवति?
17. निषेककाले व्यभवनगते रवौ कस्य नेत्रस्य हानिः भवति?

### *10.14.* प्रसवकालनिर्णयः।

तत्काले अर्थात् आधानलग्ने गर्भप्रश्नकाले वा इत्यर्थः। तत्काले यस्मिन् राशौ चन्द्रमा वर्तते, तस्मिन् राशौ चन्द्रमा यत्र व्यवस्थितः इति ज्ञातव्यः।स च राशिः तत्कालमिन्दुसहितराशिः भवति। तत्काले चन्द्रव्यवस्थितः द्वादशांशः ज्ञातव्यः। स च तत्कालमिन्दोः द्विरसांशकराशिः भवति। प्रथमद्वादशांशः, द्वितीयद्वादशांशः एवं क्रमशः द्वादशद्वादशांशाः भवन्ति। तत्कालेन्दुसहितः द्वादशांशः कः राशिः इति ज्ञातव्यः। ततः चन्द्रद्वादशांशं गणयेत्।अर्थात् तत्कालचन्द्रद्वादशांशसंख्यां चन्द्रद्वादशांशराशितः गणयेत्।न तु चन्द्रव्यवस्थितराशितः गणयेत्।दशमेमासि प्राप्ते राशौ चन्द्रसङ्क्रमणकाले जन्मवदेत्।

- तत्काले आधानलग्ने गर्भप्रश्नकाले वा इन्दुसहितः यः द्विरसंशकराशिः वर्तते, तस्यपुरतः तदग्रतः गणनया तत्तुल्यराशिसहिते द्वादशांशसंख्या समानराशिसहिते शशाङ्के दशमेमासि जन्मवदेत्।

अथवा

- **आधानकाले यत्र राशौ चन्द्रमा व्यवस्थितः, तत्र यावत्संख्यो द्वादशभागो वर्तते, तस्मात् द्वादशांशराशेः, तावतसंख्यो य एव पुरतो राशिः तत्रस्थे चन्द्रमसि दशमेमासि प्रसवो वाच्यः।**

उदाहरणेन स्पष्टीक्रियते।–

यथा वैशाखशुक्लपूर्णिमायां गुरौ रत्रिगतघटीषु 11-0एतावन्मितासु निषेकः। तत्कालिकस्पष्टचन्द्रो राश्यादिः 7-9-30-10।तत्कालिकेन्द्वोः द्विरसांशकः ज्ञेयः। अत्र चन्द्रमा वृश्चिराशेःचतुर्थद्वादशांशे वर्तते। वृश्चिके चतुर्थद्वादशांशः कुम्भस्य भवति।ततः तत्तुल्यराशिसहिते पुरतः शशाङ्के आगमने काले प्रसवो वाच्यः। तत्तुल्यराशिसहितः पुरतः इत्यतः कुम्भात् चतुर्थद्वादशांशे वृषभराशिः भवति। दशमे मासि वृषभराशौ चन्द्रागमनकाले जन्मभविष्यति इति ज्ञेयम्।

उदाहरणम्-प्रसवसमयनिर्णयः।

| | | | |
|---|---|---|---|
| | | प्रसवराशिः। | |
| द्वादशांशः। | | | |
| | | | |
| | चन्द्रः। | | |

अत्र जिज्ञासा;"कदा जन्म भविष्यति? "। यद्यपि चन्द्रस्थितिवशात् कथ्यते तथापि चन्द्रः एकस्मिन् राशौ सार्धदिनद्वयं यावत् भविष्यति। तच्च निगद्यते -आधानलग्ने प्रश्नलग्ने वा यावान् भागः उदेति, स्वमानात् यावन्तो कलाः गताः, तावन्तो एव समानकाले जन्म भविष्यति इति वाच्यम्।प्रागुक्ते उदाहरणे वृषभराशौ चन्द्रसङ्क्रमणकाले जायते इति। वृषराशौ

कृत्तिकानक्षत्रस्य चरणत्रयं रोहिणीनक्षत्रस्य चरणचतुष्टयं मृगशिरानक्षत्रस्य पादद्वयं च वर्तते। तदा कस्य नक्षत्रस्य कस्मिन् चरणे जननं भविष्यति इति वक्तव्यम्। अग्रेगणितप्रक्रिया कथ्यते। प्रागुक्ते उदाहरणे तत्कालिकस्पष्टचन्द्रो राश्यादिः 7-9-30-10।

a) अत्र 9 अंशः 30 कलाः - 7.30अंशः त्रिंशत् कलाः विशोधनीयाः।

तदानीम् अंशद्वयम् दशविकलाः अवशिष्यते। अंशद्वयम् अर्थात् कलीकृते (60*2अंशाः=120 कलाः भवन्ति।)120 कलाः भवन्ति।एकस्मिन् राशौ कति अंशाः भवन्ति? त्रिंशत् अंशाः भवन्ति। 30 अंशानां कलीकृते 1800 कलाः भवन्ति। 60?*30=1800कलाः। एकः द्वादशांशः प्रमाणं कति भवति? 2-30 अंशात्मकं भवति। तं कलीकृत्य 150 कलाः भवन्ति। 1800 कलाः /150 कलाः तदानीम् =12 कलाः प्राप्स्यन्ते।

b) 12* प्राग् चन्द्रस्फुटत् प्राप्ते 120 भुक्तकलाः गुणनीयः। 1440 कलाः प्राप्नोति।प्रत्येकस्मिन् राशौ नवचरणाः भवन्ति। राशिमानं कलायां 1800 कलाः भवन्ति। प्रतिराशौ चरणमानम् कियन्तः कलाः भवन्ति? 1800/9=200कलाः भवन्ति।1440 कलायां कति चरणाः अतीताः इति कथयेत्।

c) 1440/200 चरणमानम् =7 चरणाः अतीताः 40 कलाः अवशिष्यते। अनेन भवान् ज्ञातुं शक्यते यत् मृगशिरायाम् प्रथमे चरणे जन्म भविष्यति इति।

**अत्र भवतः स्मर्तव्यः तथ्यः।**

1. **द्वदशांशस्यभुक्तकलाः*12=x।**
2. **x/200=चरणाः भवन्ति।**
3. **दशमराशेः चरणानाम् अनुसारेण नक्षत्रं विजानीयात्।**

अत्र पुनः शङ्का- यस्मिन् दिवसे जननं जायते इति ज्ञातः । परन्तु तस्मिन् दिवसे कदा जननं भविष्यति? दिवसे उत रात्रौ, कस्मिन् घटिकायां गर्भस्थस्य जननं भवति?इति ज्ञातव्यम्। तत् विधानं निगद्यते।

अन्यस्मिन् उदाहरणे 9 राशयः, 10 अंशाः 25 अंशाः 00 कलाः भवन्ति। नवांशः कुत्र वर्तते? मकरात् चतुर्थनवांशः अतः मेषनवांशः भवति।**"मेषराशिः कथं कालबली वर्तते? तच्च स्मरतु गोजास्वकर्कि मिथुनाः समृगाः निशाख्याः"**। अतः मेषराशिः निशाबली राशिः,अतः निशायां जननं कथयेत्।

* **चन्द्रस्पष्टनवांशः यस्मिन् राशौ वर्तते, तस्मिन् राशेः उक्त दिनरात्रि संज्ञाश्रयवशात् जननकालं कथयेत्।**

एकस्य नवांशप्रमाणः कियन् भवति?, 3अंशाः.20 कलाः भवन्ति। नवांशप्रमामणं कलीकृत्य 3* 60 =180+20=200 कलाः भवति। आधानकालिकरात्रिमानं ज्ञातव्यम्।उदाहरणायां रात्रिमानं 28 घटिकाः वर्तते। सम्पूर्णनवांप्रमाणेन 200 कलायां, 28 घटिकाः भवन्ति, तर्हि नवांशभुक्तमान 25कलायां कियन् इति ज्ञातव्यः।

* **रात्रिमानम्*भुक्तनवांशस्य अंशाः/200=घटिकायां मानम्।**

28*25/200=3.30 भवति। अतः रात्रिसार्धघटीत्रयं समये जनानां भविष्यति इति कथयेत्।

**अत्र स्मर्तव्याः तथ्याः-**

* **लग्ननवांशराशिवशात् जन्मदिनरात्रिनिर्णयः कर्तव्यः।**
* **दिनप्रमाणम् उत रात्रिप्रमाणं, भुक्तनवांशं कलीकृत्य च गुण्यः। प्राप्तफलम् 200 तः विभक्ते लब्धिःप्रसवस्य समयः भवति।**

**तत्कालमिन्दुसहितोद्विरसांशकोयस्तत्तुल्यराशिसहितेपुरतःशशाङ्के।**
**यावानुदेतिदिनरात्रिसमानभागस्तावद्गतेदिननिशोःप्रवदन्तिजन्म।।**

**पदच्छेदः**=तत्-कालम्-इन्दु-सहितो द्वि-रस-अंशको यः तत् तुल्य-राशि-सहिते पुरतः शश-अङ्के।यावान् उदेति दिन-रात्रि समान-भागः तावद्-गते दिन-निशोः प्रवदन्ति जन्म ।

**अन्वयः**= तत्कालम्इन्दुसहितोद्विरसांशकोयः तत्तुल्यराशिसहितेपुरतःशशाङ्केयावान्उदेतिदिनरात्रिसमानभागस्तावद्गतेदिननिशोःजन्मप्रवदन्ति ।।

**अन्वयार्थः**= तत्कालम्=तत्कालिकम्,इन्दुसहितो=चन्द्रसहितो,द्विरसांशको=द्वादशांशकः,यः तत्तुल्यराशिसहिते=समानराशिसहिते,पुरतःशशाङ्के=चन्द्रे,यावानुदेतिदिनरात्रिसमानभागस्तावद्गते=अहर्निशिसमानभागः,दिननिशोः=दिननिशोः,जन्मप्रवदन्ति।।

**भावः**= तत्कालम्इन्दुसहितोद्विरसांशकोयः तत्तुल्यराशिसहितेपुरतःशशाङ्केयावानुदेतिदिनरात्रिसमानभागस्तावद्गतेदिननिशोःजन्मप्रवदन्ति।।

**विशेषार्थः-**

तत्कालिकचन्द्रेण यावत्संख्यात्मकद्वादशांशः सहितः तावत्संख्या मेषादौ गणनया यो राशिः प्राप्यते इति ज्ञातव्यः। मेषादितः गणिते राशौ,अग्रतो दशमे मासि चन्द्रे प्राप्यमाने समयो गर्भस्य प्रसवो प्रवदेत्। इति एको पाठः। अत्र प्रसिद्धः अन्यः पाठः वर्तते।

**बोधप्रश्नाः-**

18.श्लोके तत्कालमिन्दुः इति कथितः । तत्कालम् नाम कस्मिन् काले भवति?

19.द्विरसपदस्य कोर्थः?

20.“तत्तुल्य राशिसहिते” इति श्लोके उक्तः तत्तुल्यं नाम केन तुल्यः इति कथितः?

21.प्रसवं दिने उत रात्रौ इति कथं निर्णेतव्यः?

22.प्रसवः घट्यत्मकतया कथं वेत्ति?

### *10.15. दीर्घकालप्रसवयोगः।*

#### *10.15.1. वर्षत्रयेण प्रसवः*

आधानलग्नं प्रश्नलग्नं वामृदुभांशेप्राप्ते अर्थात् मृदोः सौरस्य भांशः मकरकुम्भनवांशके तस्मिन् उदयति, आधानलग्नात् प्रश्नलग्नात् वा सप्तमस्थे मन्दे च यदि भवति, तर्हि अब्दत्रयेण प्रसूतिः वाच्यः।

* यस्य निषेककाले लग्नस्य उदये मृदुभांशे अर्थात् सौरस्य अंशे,आधानलग्नात् शनैश्वरः सप्तमस्थे च तस्य धृतस्य गर्भस्य अब्दत्रयेण सूतिः वदेत्।

**उदयतिमृदुभांशेसप्तमस्थेचमन्देयदिभवतिनिषेकःसूतिरब्दत्रयेण।**

**उदाहरणम्-**


वृषभराशिः लग्नम्। वृषभलग्नाय मकरात् नवांशगणनाप्रारम्भः। लग्नं द्वितीयनवांशके वर्तते। तर्हि लग्नं शन्यंशके वर्तते। लग्नात् सप्तमस्थो शनिःअपि च वर्तते। तदा सूतिका अब्दत्रयेण जननं भवति।

**उदाहरणम्1- अब्दत्रयेण प्रसूतिः।**

| | | | |
|---|---|---|---|
| | | ल-11 | |
| | | | |
| | | | |
| | शनिः । | | |

#### *10.15.2. द्वादशे वर्षे प्रसवः ।*

**उदाहरणम्- द्वादशाब्धे प्रसूतिः।**




एष एव विधिः शशिनि भवेत् चेत् द्वादशे अब्दे प्रसूतिः वाच्या। यस्मिन् कस्मिन् राशौ लग्नगते कर्काटकेनवांशे उदयति सप्तमस्थे चन्द्रे च सति निषेकः भवति चेत् तदा धृतस्य गर्भस्य प्रसवः गर्भधानाकालात् द्वादशाब्दे भवति इति वाच्यः। अस्मिन् चतुर्थे अध्याये निगदितानि योगानि सूतिकालोपि जन्मकालिकग्रहस्थितिवशादपि चिन्तनीयानि।

**"उदयतिमृदुभांशेसप्तमस्थेचमन्देयदिभवतिनिषेकःसूतिरब्दत्रयेण।**

**शशिनितुविधिरेषद्वादशेअब्देप्रकुर्यान्निगदितमिहचिन्त्यंसूतिकालेअपियुक्त्या।।२२।।"**

**पदच्छेदः**=उदयति मृदु-भ-अंशे सप्तमस्थे च मन्दे यदि भवति निषेकः सूतिः अब्द-त्रयेण।शशिनि तु विधिः एष द्वादशे अब्दे प्रकुर्यान् निगदितम् इह चिन्त्यं सूति काले अपि युक्त्या ।

**अन्वयः**= उदयति मृदुभांशे मन्दे सप्तमस्थे च निषेकः सूतिः अब्द त्रयेण भवति एषः विधिः शशिनि तु द्वादशे अब्दे प्रकुर्यान् इह सूतिकाले अपि युक्त्या चिन्त्यं निगदितम्।

**अन्वयार्थः**= उदयति मृदुभांशे=सौरस्य भांशे शनैश्चरराशिनवांशके लग्नस्योदयो, मन्दे =शनैश्चरे, सप्तमस्थे=सप्तमभावस्थे, च निषेकः=आधानम्, सूतिः=प्रसवः,अब्दत्रयेण=वर्षत्रयेण, भवति एष विधिः शशिनि तु द्वादशे=द्वादशे, अब्दे =संवत्सरे, प्रकुर्यान्=प्रसवं कुर्यात्, इह=अस्मिन् आधानाध्याये, सूतिकाले=प्रसूतिकाले,अपि युक्त्या चिन्त्यं =हीनादिकगर्भसंभवायोगादीनाम् गर्भसंभवो वाच्यः, निगदितम्=उक्तम्।

भावः=उदयति मृदुभांशे मन्दे सप्तमस्थे च निषेकः सूतिः अब्दत्रयेण भवति एष विधिः शशिनि तु द्वादशे अब्दे प्रकुर्यात् इह सूतिकाले अपि युक्त्या चिन्त्यं निगदितम्।

**बोधप्रश्नाः**

23. वर्षत्रयेण प्रसवयोगः लिखत।

24. द्वादशे वर्षे प्रसवयोगः लिखत।

**ग्रन्थस्य मूलपाठाः।**



त्रिकोणगेज्ञेविबलैस्तथापरैर्मुखाङ्घ्रिहस्तैर्द्विगुणस्तदाभवेत्।

अवाग्गवीन्दावशुभैर्भसंधिगैःशुभेक्षितश्चेत्कुरुतेगिरंचिरात्।। १७।।

सौम्यर्क्षांशेरविजरुधिरौचेत्सदन्तोऽत्रजातःकुब्जःस्वर्क्षेशशिनितनुगेमन्दमाहेयदृष्टे।

पङ्गुर्मीनेयमशशिकुजैर्वीक्षितेलग्नसंस्थेसन्धौपापेशशिनिचजडःस्यान्नचेत्सौम्यदृष्टः।। १८।।

सौरशशाङ्कदिवाकरदृष्टेवामनकोमकरान्त्यविलग्ने।

धीनवमोदयगैश्चदृकाणैःपापयुतैरभुजाङ्घ्रिशिराःस्यात्।। १९।।

रविशशियुतेसिंहेलग्नेकुजार्किनिरीक्षितेनयनरहितःसौम्यासौम्यैःसबुद्बुदलोचनः।

व्ययगृहगतश्चन्द्रोवामंहिनस्त्यपरंरविर्नशुभगदितायोगाःयाप्याःभवन्तिशुभेक्षिताः।। २०।।

तत्कालमिन्दुसहितोद्विरसांशकोयस्तत्तुल्यराशिसहितेपुरतःशशाङ्के।

यावानुदेतिदिनरात्रिसमानभागस्तावद्गतेदिननिशोःप्रवदन्तिजन्म।। २१।।

उदयतिमृदुभांशेसप्तमस्थेचमन्देयदिभवतिनिषेकःसूतिरब्दत्रयेण।

शशिनितुविधिरेषद्वादशेऽब्देप्रकुर्यान्निगदितमिहचिन्त्यंसूतिकालेअपियुक्त्या।। २२।।

ग्रन्थोक्तमूल-
श्लोकान्
यथावत् स्मर्तुं
प्रयासः विधेयः।

## 10.16 सारांशः।

*पाठेऽस्मिन् गर्भस्थजन्तोः शारीरिकक्षमतायाःयाः विचारे निगदिताः । पाठेऽस्मिन् विशेषक्षमाणां जन्मयोगाः कथिताः। गर्भाधानकालवशात् जायमानाः अनेकविधाः शारीरिकविशेषक्षमाणां विचाराः वर्तन्ते। तत्रादौ अधिकाङ्गयोगः। लग्नात् , ज्ञेत्रिकोणगेअर्थात् पञ्चमेनवमेवास्थिते,अपरेअन्यैःसर्वैः ग्रहैः विबलैः बलरहितैः, तदा निषिक्तः गर्भः मुखाङ्घ्रिहस्तद्विगुणः भवेत्। इतरेषां ग्रहाणां निर्बलत्वे, बुधग्रहस्य त्रिकोणस्थितिः मुखाङ्घ्रिहस्तद्विगुणकारकं भवति। ततः अग्रे मूकयोगः अपि कथितः। वृषभस्थे चन्द्रे पापग्रहाः राशिसन्धौ जातो अवाग् भवति। पापग्रहाः कियन्तो भवन्ति तावन्तो योगस्य बलत्वं शास्त्रेषु कथितम्। एकेन पापेन वाचः अलसता द्वाभ्यां, वचः अल्पतादि। ततः चिरलब्धवाग्योगः लिखितः। प्रागुक्ते मूकयोगे यदि शुभेन ईक्षिते, चिरेण वाग् प्राप्तिः भवति। ततः सदन्तयोगो आख्यातः। बुधस्य राश्यंशकसंस्थितौ रविजरुधुरौ सदन्तं कुरुते।ततः कुब्जयोगः गदितः। आधानसमये जन्मसमये लग्नस्थे कर्कराशौ चन्द्रः मन्दमाहेयदृष्टे कुब्जः भवति। ततः पङ्गुयोगो*

*गदितः। मीनलग्ने शनिशशिकुजैः वीक्षितैः तदानीं जातः पङ्गुः भवति। राशिसन्धौ पापैः चन्द्रे च युते जायते जडः इति आख्यातः।वामनयोगः हीनाङ्गः योगः च वर्णितः। मकरराशेःअन्त्यनवांशकेविलग्नस्थेनवमनवांशकोदयमाने, चन्द्रे, शनौ, रवेःचएतैःअवलोकितेवामनकोगर्भस्थोवाच्यः।* ***मकरराशेः अन्त्यलग्ने, धीः नवमोदयगैः च दृकाणैः पापयुतैः सौरशशाङ्कदिवाकरदृष्टे च क्रमेण अभुजः, अनङ्घ्रिः, अशिरश्च स्यात्।*** *नेत्रवैकल्ययोगाः अग्रेलिखिताः यथा- जात्यन्धयोगः, बुद्-बुदाक्षयोगः,वामाक्षिकाणयोगः, दक्षिणाक्षिकाणयोगः च। सूर्यचन्द्रयोः नेत्रस्य कारकत्वं भवति। तस्मात् दृष्टिवैकल्ये तयोः चिन्तनं कृतम्। सूर्यः दक्षिणाक्षकारकः, चन्द्रः वामाक्षकारकः भवति। सिंहे लग्ने रविशशियुते कुजार्किनिरीक्षिते नयनरहितः, शुभाशुभग्रहदृष्ट्या बुद्बुदलोचनः च जायते। व्ययगृहगतः चन्द्रो वामं नयनम्, रविः दक्षिणं नयनंच हिनस्ति।अपि च प्रोक्तयोगानाम् अपवादं वक्ष्यति। न शुभगदिताः योगाःयदि शुभेक्षिताःतर्हि याप्याःअर्थात् निरस्ताः भवन्ति।*

ततःविषदिताप्रसवकालनिर्णयविज्ञानप्रक्रिया । **आधानकाले यत्र राशौ चन्द्रमा व्यवस्थितः, तत्र यावत्संख्यो द्वादशभागो वर्तते, तस्मात् द्वादशांशराशेः, तावत्संख्यो य एव पुरतो राशिः तत्रस्थे चन्द्रमसि दशमेमासि प्रसवो वाच्यः।द्वदशांशस्य भुक्तकलाः*12=x(फलम्)। (फलम्)x/200=दशमराशिगतनक्षत्रचरणाः भवन्ति।दशमराशेः चरणानाम् अनुसारेण नक्षत्रं विजानीयात्।** एवं दिवसनिर्णीयः, दिनरात्रिसंज्ञया प्रसवकालनिर्णयविज्ञानं विशदितम्। **लग्ननवांशराशिवशात् जन्मदिनरात्रिनिर्णयः कर्तव्यः। ततः सूक्ष्मतया घट्यात्मकतया प्रसवसमयो कथितः। रात्रिमानम्*भुक्तनवांशस्य अंशाः/200=घटिकायायाःमानम्।अथवा दिनप्रमाणम् उत रात्रिप्रमाणं, भुक्तनवांशं कलीकृत्य च गुण्यः। प्राप्तफलम् 200 विभक्ते लब्धिः प्रसवोस्य समयः भवति।**

आधुनिककाले षोडशसंस्कारेभ्यः विशेषेण जनाः महत्त्वं न प्रदीयन्ते। भवान् दैवज्ञः , समाजाय सन्मार्गनिर्देशनं भवतः कर्तव्यं भवति। भवान् मित्रवत् उपदेशं दद्यात्। दर्शनशास्त्राणां ज्ञानम् अपि सम्पादनीयम्।अनेन भवान् समाजस्य समीचीन मार्गनिर्देशकः भवति। आधानकालवशात् गर्भस्थ जन्तोः शारीरिकवैकल्यं ज्ञात्वा, तं विशेषक्षमतायाः बाल इति गणयेत्। परन्तु आधुनिककाले प्रसवानन्तरमेव बालस्य औषधिः लभ्यते। यावन् कालो गर्भस्थः तावन् कालः गर्भस्थस्य औषधिः नैव लभ्यते।तर्हि भवता विशेषक्षमाणां जनानां मानसिकबलं वर्धयेत्। मानसिकबलेन ते स्वजीवने सामञ्जस्यं सम्पादयेयुः।समाजे समाञ्जस्य सम्पादनाय आधुनिकविज्ञानसहाय्यं स्वीकार्यम्। जीवनलक्ष्यप्राप्तये मनोबलम् एव शरीरक्षमतापेक्षया वरीवर्ति। नैकानि उदाहरणानि परिप्रेक्ष्य जनानां मार्गनिर्देशनं कर्तुम् आयासो विधेयः।

## 10.17 शब्दावली।

त्रिकोणगे=पञ्चमे भावे नवमे भावे च। अवाग्-वाग्ररहितः। तत्पर्यायः। अवाक् २। मूकः इत्यमरः। ३।१।१३।

गवि=वृषभे राशौ। भसंधिः=राशिसन्धिः, भं नाम नक्षत्रम् इति अर्थः वर्तते। भं नाम राशिः इत्यर्थः अपि वर्तते। अत्र राशिसन्धिः।सदन्त=दन्तेन सहितः। क्वचित् सत् अन्तः अर्थात् शोभनं मरणम् इत्यपि निगदितम् वर्तते। मन्दमाहेयौ= मन्दश्चमाहेयश्च मन्दमाहेयौ(कुजशनी)।पङ्गुः=एकपादहीनः। कुब्जः=वायुनोन्नतहृदयः। उन्नतपृष्ठश्च। तत्पर्यायः। गडुः २ गडुलः "हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक्।कुरद्धो वायुर्यदा कुर्यात्तदा तं कुब्जमादिशेत्॥"

यमः=शनिः। **जडः=जडं हि गम्यतेऽन्येन नाऽजडं मुनि पुंगवाः। शिवो नैव जडः साक्षात् स्वप्रकाशैकलक्षणः॥**

किंविषीदसिराजेन्द्रकान्ताकस्यविचार्यताम् जडःकिंनुविजानातिदेहोऽयंपाञ्चभौतिकः।।[5]

निर्लेपःपरिपूर्णश्चसच्चिदानन्दविग्रहः।आत्मानजायतेनैवम्रियतेनचदुःखभाक्।।[6]

वामनको=अल्पमूर्तिः। धीः =अस्मिन् सन्दर्भे द्वितीयद्रेष्काणः, द्वितीयद्रेष्काणाधिपः पञ्चमाधिपो भवति। अतः धी शब्देन पञ्चमभावग्रहणम्।नवम=अस्मिन् प्रसङ्गे तृतीयद्रेष्काणः।तृतीय द्रेष्काणाधिपः नवमभावाधिपः भवति। अतः नवम शब्देन अन्तिमद्रेष्काणग्रहणम्।दृकाणैः=द्रेष्काणैः।पापयुतैः=अशुभग्रहयुतैः। अभुजः= न भुजं यस्य सः।भुजहीनःइति अर्थः।

अनङ्घ्रि=न अङ्घ्रिः यस्य सः। पादहीनः।अशिराः=न शिराः यस्य सः।सबुद्बुदलोचनः=स बुद् बद् दृष्टिः।

सूतिः=जननम्। अब्दत्रयेण=वर्षत्रयेण। विधिः=क्रमः। द्वादशेअब्दे= द्वादशे वर्षे।

### 11. बोधप्रश्नोत्तराणि।

1. मुखाङ्घ्रिहस्तद्विगुणयोगे लग्नात् बुधः त्रिकोणस्थः भवेत्।
2. अवाग् योगः भसन्धौ अशुभैः ग्रहैः स्थितैः सञ्जच्छते।
3. मूकयोगे शुभेक्षितैः ग्रहैः दृष्टे तर्हि चिरात् गिरं भवति।
4. बुधस्य राश्यंशकसंस्थितौ रविजरुधिरौ सदन्तं कुरुते।
5. आधानसमये जन्मसमये कर्कराशौ लग्नस्थे चन्द्रेमन्दमाहेयदृष्टे गर्भस्थो कुब्जः भवति।

6. आधानकाले जननकले वा मीनलग्नं, यमः, शशिः, कुजः च वीक्षिन्ते चेत्दृष्टाः गर्भस्थो पङ्गुः पादविकलो जायते।
7. आधानलग्नकाले राशिसन्धौ पापे तत्रैव शशिनि जडो जायते।
8. सौरशशाङ्करदिवाकरदृष्टे मकरान्त्यविलग्ने वामनो जनयति।
9. मकरराशेः अन्त्यलग्नपञ्चमभावदृकाणे कुजयुते सौरशशाङ्कदिवाकरदृष्टे जातः अभुजः स्यात्।
10. मकरराशेः अन्त्यलग्ननवमभावदृकाणेकुजयुते सौरशशाङ्करदिवाकरदृष्टे जातः अनङ्घ्रिः स्यात्।
11. मकरराशेः अन्त्यलग्नद्रेक्काणे कुजयुते सौरशशाङ्कदिवाकरदृष्टे जातः अशिराः स्यात्।
12. वामनेत्रकारकः ग्रहः चन्द्रः।
13. रविः दक्षिणनेत्रस्य कारकः भवति।
14. रविशशियुते सिंहेलग्ने कुजार्किनिरीक्षिते अन्धः भवति।
15. पुष्पिताक्षो भवति।
16. निषेककाले व्ययभवनगते चन्द्रे वामनेत्रस्य हानिः भवति।
17. निषेककाले व्यभवनगते रवौ दक्षिणनेत्रस्य हानिः भवति।
18. श्लोके तत्कालमिन्दुः इति कथितः । तत्कालम् नाम आधनकालः भवति।
19. द्विरस इति पदस्य द्वादशांशः इति अर्थः।
20. "तत्तुल्य राशिसहिते" इति श्लोके उक्तः। तत्तुल्यनाम द्वादशांशतुल्यः इति ज्ञेयः।
21. प्रसवः, आधनकालिकचन्द्रस्पष्टनवांशराशेः कथितसंज्ञोक्त कालः वक्तव्यः।
22. चन्द्रस्पष्टभुक्तनवांशं दिनमानेन उत रात्रिमानेन गुणितः दिवशतेन भक्तेप्रसवः घट्यत्मकतयालभ्यते।
23. यस्य निषेककाले लग्नस्य उदये मृदुभांशे अर्थात् सौरस्य अंशे , आधानलग्नात् शनैश्चरः सप्तमस्थे च तस्य धृतस्य गर्भस्य अब्दत्रयेण सूतिं वदेत्।
24. यस्मिन् कस्मिन् राशौ लग्नगते कर्काटकेनवांशे उदयति सप्तमस्थे चन्द्रे च सति निषेकः भवति चेत् तदा धृतस्य गर्भस्य प्रसवः गर्भाधानाकालात् द्वादशाब्दे वाच्यः।

**13.अभ्यासप्रश्नाः।**

1. अधिकाङ्गयोगः, मूकयोगः, चिरलब्धवाग्योगः, सदन्तयोगः,कुब्जयोगः, पङ्गुयोगः, जडयोगः, वामनयोगः, हीनाङ्गयोगः, नेत्रवैकल्ययोगः, जात्यन्धयोगः, बुद्-

बुदाक्षयोगः, वामाक्षिकाणयोगः, दक्षिणाक्षिकाणयोगः,एतेषां योगानां जातकसङ्ग्रहणं करोतु।

2. जातकेषुइतरग्रहाणां स्थितैः अनुसारम् प्रोक्तयोगानाम्बलाबलस्य अध्ययनम् विधेयः।
3. स्वकल्पितोदहरणेन प्रसवकालनिर्णयगणितम् अभ्यासनीयम्।
4. सारावली, बृहत्पराशरादिषु ग्रन्थेषु अस्मिन् पाठोक्तविषयान् अन्विषतु।
5. आधुनिकभारते प्रागुक्त शारीरिकविशेषक्षमाणां औषधानां प्राप्तिविधानम् अन्वेषयतु।

## पाठः एकादशः

## पितृपरेक्षजन्मात् पितृबन्धनयोगपर्यन्तम्।।

**प्रस्तावना**

गते पाठे भवान् अधिकाङ्गयोगः, मूकयोगः, चिरलब्धवाग्योगः, सदन्तयोगः, कुब्जयोगः, पङ्गुयोगः, जडयोगः, वामनयोगः, हीनाङ्गयोगः, नेत्रवैकल्ययोगः, जात्यन्धयोगः, बुद्-बुदाक्षयोगः, वामाक्षिकाणयोगः, दक्षिणाक्षिकाणयोगः, च ज्ञातवान्। प्रोक्तयोगानाम् अपवादः अपि ज्ञातवान्। प्रसवकालनिर्णयः, दीर्घकालप्रसवयोगः, वर्षत्रयेण प्रसूतिः, द्वादशे वर्षे प्रसूतिः इत्यादिषु विषयेषु भवान् निपुणो जातः।

पाठेऽस्मिन् पितृपरोक्षे जननम्, सर्पजन्मयोगः सर्पवेष्टितजन्मयोगः वा, कोशवेष्टितजन्मयोगः, नालवेष्टितयमलजन्मयोगः, जारजातयोगः, पितृबन्धनयोगः, च ज्ञास्यति। पिता पुत्राय महत् विद्याधनं यच्छति। पुत्रस्य कृतज्ञता, पुत्रस्य औन्नतिः एव पितुः परिश्रमतपसा फलं भवति। अधिकलालनात् दोषः अपि जायते। तथा हि-
**"सर्वथापुत्रदाराणांपिताभर्तृसमोरिपुः। नास्तियस्तानितस्नेहात्लालयत्येवकेवलम्॥**"यद्यपि पिता विषं खादति तथापि पुत्रस्य उपेक्षा न करोति। तथा हि-"पितापिहिविषंखादन्नैवपुत्रैरुपेक्ष्यते॥"एवं सहजतया पितापुत्रयोः सम्बन्धः वर्तते। पिता पुत्रस्य संरक्षणायै कटिबद्धः च भवति।स तु पुत्रजननसमये अत्यन्तः प्रमुदितः भवति।परन्तु क्वचित् सन्दर्भेषु पितृपरोक्षे पुत्रजननं सम्भवति। तादृशयोगान् जन्मकुण्डलीवशात् ज्ञानप्रक्रिया विषदीक्रियते।शास्त्रेषु, लोकेषुसम्भूतघटनानां विचाराणाञ्च विवृतानि भवन्ति। सर्पजन्मयोगः सर्पवेष्टितजन्मयोगः,एतादृशाः एव।कोशवेष्टितजन्मयोगः, नालवेष्टितयमलजन्मयोगः, च आधुनिककाले च श्रूयते। नैतिकतासंरक्षणायै केचनयोगाः ज्ञातव्याः भवन्ति। जारजातयोगः अपि तादृशः। बालस्य जननावसरे पितृशुभाशुभचिन्तनं सत्वरं विधीयते। पितृबन्धनयोगः, पितृपरोक्षे जननं च पितृशुभाशुभेषु अन्यतमौ योगौ भवतः।

संस्कृतसाहित्ये आभाणकमेकं श्रूयते –"नवापि ग्रहाः नोद्धरन्ति निद्रालून् जनान्।" इति अतः जाड्यान् विहाय आनन्देन उत्साहेन च पठनाय एकादशः पाठाय भवते स्वागतम् !

### *उद्देश्यम्*

अस्य पाठस्य अध्यनेन भवान्-

* बालस्य पितृ असन्निधौ जननविषये अवगमिष्यति।
* सर्पजन्मयोगः सर्पवेष्टितजन्मयोगः वा, ज्ञास्यति।
* कोशवेष्टितजन्मयोगः ज्ञास्यति।
* नालवेष्टितयमलजन्मयोगः अधिगमिष्यति।
* जाऱजातयोगः वेत्स्यति।
* पितृबन्धनयोगः विन्दति।

**पितृपरोक्षे जननम्।**

प्राचीनकालेमातृगृहेपतिगृहे वा गुर्व्याः गर्भिण्याः प्रसवः जायते स्म। कदाचित् प्रसवसमये पितुः सन्निधिः स्यात् वा न स्यात्। जातकस्य भावीफलचिन्तनावसरेक्वचित् विषयाः आदौ श्रोतारं पृच्छकं वा उक्त्वा विश्वासः जनयेत। पृच्छकः दैवज्ञस्य वचांसि विश्वसयेत्। तदर्थेदैवज्ञेन आदौ पृच्छकः ज्ञातविषयान् उक्त्वा पृच्छकं विश्वसयेत्। तन्निमित्तं केचनविषयाः अस्मिन् पाठे लिख्यते।पितुः प्रत्यक्षे बालस्य जननं पितोः भाग्यं वर्तते। स्व-आत्मजं दृष्ट्वा आनन्दातिषयो जायते।बालस्य जननावसरे पितुः सन्निधिः असन्नधिः वा अत्यन्तं प्राधान्यम्आवहति।पितुः प्रत्यक्षे बालो जातवान् उत परोक्षे इति ज्ञातुं केचन योगाः पाठेऽस्मिन् विशदतया विवृता।

**तत्राद्यो योगः**

प्रसवलग्नम् इन्दौ अपश्यति सति परोक्षस्य पितुः जातः।तत्र पुनः जिज्ञासा। "कुत्र गतास्य पिता?" इति।सः विचारः अग्रे विव्रीयते।तत्र मध्यात् अर्थात् मध्यलग्नात्, दशमलग्नात् वा भ्रष्टे, अन्यत्र स्थिते दिवाकरेण पितृदेशः कथितः। दशमराशितः निर्गतः रविः, यदि चरभे तर्हिविदेशस्थ पितुः जातः,यदि स्थिरभे तर्हि स्वदेशस्थस्य परोक्षस्य पितुः जातः। मध्यात् भ्रष्टे दिवाकरे उभयराशिस्थे सति मध्यदेशस्थस्य परोक्षस्य पितुः जातः। अतः दिवाकरे मध्यलग्ने दशमराशिस्थिते सति पितृपरोक्षत्वं न वक्तव्यम्।

**पितुर्जातः परोक्षस्य लग्नम् इन्दावपश्यति।विदेशस्थस्य चर भे मध्याद् भ्रष्टे दिवाकरे ।। १।।**

**पदच्छेदः**=पितुः जातः परोक्षस्य लग्नम् इन्दौ अपश्यति ।विदेशस्थस्य चर भे मध्यात् भ्रष्टे दिवा करे । ।(अनुष्टुभ्)

**अन्वयः**=इन्दौलग्नम् अपश्यति सति पितुःपरोक्षे जातः।मध्यात् भ्रष्टे दिवाकरेचर भे तस्य पिता विदेशस्थः।

**अन्वयार्थः**=इन्दौ=चन्द्रे,लग्नम्=जन्मलग्नम्, अपश्यति=न दृष्टःसति, पितुः=जन्मदातुः, परोक्षे=असन्निधौ, जातः=जन्मं प्राप्तवान्।मध्यात् भ्रष्टे=दशमलग्नात् भ्रष्टे, दिवाकरे=रवौ, चरभे=चरराशौ,तस्य पिता=बालस्य पिता,विदेशस्थः=विदेशगतः इति।

**भावः**=चन्द्रः लग्नम् अपश्यति सति पितुः परोक्षे जातः भवति। दशमराशिं विहाय, इतरराशिषु, रविव्यवस्थितराश्यनुगुणं पितुः प्रदेशं वदेत्। यथा चरराशिस्थ रविः विदेशं, स्थिरराशिस्थः रविः स्वदेशं, उभयराशौगतरविः- मार्गं च सूचयति।

बोधप्रश्नाः

1. चन्द्रवशात् पितृपरोक्षजननं कथं जानीयात्?
2. पितृव्यवस्थितप्रदेशं केन ग्रहेण ज्ञातव्यः?

**अन्ययोगः**

चन्द्रः यदि बुधशुक्रयोः मध्ये स्थिते अपि पितृ-असन्निधौ परेक्षे वा जननं जातम्। ततः कुजवशात् चिन्त्यते। जन्मलग्नात् सप्तमभवनगते कुजे पितृ-असन्निधौ पुत्रो जातः इति वदेत्। शनिना अपि चिन्त्यते। जन्मलग्नगते शनौ पितृपरोक्षे जातः इति वाच्यः। अत्रापि पूर्ववत् शङ्का "पिता कुत्र विद्यते?"। तदर्थं पितृकारकरविः व्यवस्थितराशिवशात् कथयेत्। चरराशिगतः सूर्येण पिता विदेशे, स्थिरराशिगतः सूर्येण पिता स्वदेशे, उभयराशिगतसूर्येण पिता मार्गे इति च फलमादिशेत्। परन्तु अत्र अपवादः। मध्यात् भ्रष्टे दिवाकरे एव एतादृशं फलम्। यदि रविः मध्यलग्ने अर्थात् दशमभावगते एषः योगः सङ्गच्छते। अत्र प्राप्ताः सिद्धान्ताः।-

* मन्दे उदयस्थेपि पितृपरोक्षत्वं वक्तव्यम्।
* कुजे अस्तं समागते वा पितृपरोक्षत्वं वाच्यम्।
* क्षपानाथे अर्थात् चन्द्रे शशाङ्कसुतशुक्रयोः बुधशुक्रयोः मध्ये स्थिते अपि पितृपरोक्षत्वं वाच्यम्।
* अत्र योगत्रये अपि मध्यभ्रष्टे दिवाकरे चरस्थिरद्विस्वभावस्थे विदेशस्वदेश मध्यदेशेषु पितुः स्थितिः जन्मकाले वाच्या।

| पितुः परोक्षे जननम् | | |
|---|---|---|
| प्रथमो योगः | लग्नम् चन्द्रः अपश्यति | |
| द्वितीया योगः | शनिः | उदये |
| तृतीयो योगः | कुजः | सप्तमे |
| चतुर्थो योगः | चन्द्रः | बुधशुक्रयोः मध्ये। |
| दशमलग्नं विहाय अन्यत्रस्थिते रवौ, रविः व्यवस्थति राशेः उक्त चरस्थिरोभय संज्ञोक्त देशः कथितः। | | |

**उदयस्थेऽपि वा मन्दे कुजे वास्तं समागते। स्थिते वान्तः क्षपानाथे शशाङ्कसुतशुक्रयोः ।। २।।**

उदयस्थे अपि वा मन्दे कुजे वा अस्तं समागते । स्थिते वा अन्तः क्षपा नाथे शश अङ्क सुत शुक्रयोः । ।(अनुष्टुभ्)

**अन्वयः**=मन्देउदयस्थे, कुजे अस्तं समागते,शशाङ्कसुतशुक्रयोः अन्तस्थितः क्षपानाथः,वा पितृपरोक्षजननं वदेत्।

**अन्वयार्थः**=मन्दे=सौरे,कुजे=कोः जातःअर्थात् मङ्गलः, अस्तं समागते=लग्नात् सप्तमभवनं सम्प्राप्ते,शशाङ्कसुतशुक्रयोः=शशाङ्कस्य सुतः बुधः, शुक्रः,च अनयोः, शशाङ्कसुत-शुक्रयोः इति अर्थः, अन्तः स्थितः=मध्य स्थितः क्षपानाथः=चन्द्रः, वा पितृपरोक्षजननं=पितुः अप्रत्यक्षे जननं वदेत्।

**भावः**=मन्दे उदयस्थे,वा कुजे अस्तं समागते,वा शशाङ्कसुतशुक्रयोः अन्तःअर्थात् मध्यगतः स्थितः क्षपानाथः, एकस्मिन् राशौ अथवा उभयराशौ वा पितृपरोक्षजननं प्रवदेत्।

बोधप्रश्नाः

3. मन्दे कुत्रस्थे पितुः परोक्षे जातः भवति?
4. क्षपानाथशब्दस्य अर्थः कः?
5. शशाङ्कसुतः कः?
6. चन्द्रमा कयोः मध्यगतः पितृपरोक्षजन्मकारकः भवति?

### सर्पजन्मयोगः सर्पजन्मवेष्टितयोगो वा

एषःयोगः द्विमुखः कथितः। तत्र एकमुखं तावत् सर्पजननं, द्वितीयमुखं तु सर्पवेष्टितजननम् इति। "योगस्वरूपं कीदृशम्"? इति जिज्ञासा।**तथा हि–शशाङ्के पापलग्ने वा वृश्चिकेश त्रिभागगे।शुभैः स्वायस्थितैर्जातः सर्पस्तद्वेष्टितोऽपि वा**।अर्थात् शशाङ्के पापलग्ने वा, कुजद्रेष्काणे शुभैः एकादशद्वितीयभवयोः स्थितयोः जाते सर्पः तत् वेष्टितोपि वा जननं कथितम्।अर्थात् चन्द्रे कुजद्रेष्काणे शुभेषु एकादशे, द्वितीये च व्यवस्थिते सर्पः तत् वेष्टितोपि वा जायते। इति एकमुखं योगम्। अपरमुखं तु कुजद्रेष्काणगते पापग्रहाधिपत्ये लग्ने, द्वितीयभवने, एकादशभवने शुभग्रहेषु सत्सु, सर्पः तत् वेष्टितः वा भवति। अत्र पापलग्ने इति शब्दःप्रयुक्तः। पापलग्ने नाम,पापग्रहाः येषां राशीनाम् अधिपाः तेषाम् अन्यतमे लग्ने,इति।

ते च के? मेषः, सिंहः, वृश्चिकः, मकरः, कुम्भः एतेषाम् अन्यतमेषु लग्ने इति अर्थः।वृश्चिकेशत्रिभागगे नाम वृश्चिकराशेः अधिपः वृश्चिकेशः,अर्थात्कुजस्य द्रेष्काणसम्प्राप्ते, शुभैः स्व-आयस्थितयोः,अर्थात् द्वितीयेकादशस्थयोः, सर्पः तत् वेष्टितः अपि वा जायते।कुजस्य

द्रेष्काणाः के? इति जिज्ञासा। तच्च विषदीक्रियते। मेषे प्रथमः, कर्कटके द्वितीयः, सिंहे तृतीयः, वृश्चिके प्रथमः, धनुषि द्वितीयः, मीने तृतीयः, एषाम् अन्यतमे कुजद्रेष्काणः भवति।

उदाहरणे अस्मिन् कर्कराशिस्थः चन्द्रमा कुजद्रेष्काणगतः वर्तते। एकादशे शुक्रः, द्वितीये गुरुः वर्तते। योगोऽयं सङ्गच्छते अतः सर्पवेष्टितजननं च जायते।

**"शशाङ्के पापलग्ने वा वृश्चिकेश त्रिभागगे।शुभैः स्वाय स्थितैर्जातः सर्पस्तद्वेष्टितोऽपि वा ।। ३।।"**

| उदाहरणम्-सर्पवेष्टितयोगः | | | |
|---|---|---|---|
| | | शु | |
| | | | च-5 |
| | | | गु |
| | | | |

| सर्पवेष्टितयोगः। | | | |
|---|---|---|---|
| 1 | सर्पजननयोगः | कुजद्रेष्काणप्राप्तः शशाङ्कः। | शुभाः द्वितीयेकादशभवनगताः। |
| 2 | | कुजद्रेष्काणप्राप्तः पापलग्नम्। | शुभाः द्वितीयेकादशभवनगताः। |
| 3 | सर्पवेष्टितयोगः | कुजद्रेष्काणप्राप्तः शशाङ्कः। | शुभाः द्वितीयेकादशभवनगताः। |
| 4 | | कुजद्रेष्काणप्राप्तः शशाङ्कः। | शुभाः द्वितीयेकादशभवनगताः। |

**पदच्छेदः**

शशाङ्के पापलग्ने वा वृश्चिक ईश त्रिभागगे ।शुभैः स्वायस्थितैः जातः सर्पः तत् वेष्टितो अपि वा।।(नो मेत्रे नमे)

**अन्वयः**=शशाङ्के पापलग्ने वा वृश्चिकेशत्रिभागगेशुभैः स्वायस्थितैः सर्पः तत् वेष्टितो अपि वाजातः।

**अन्वयार्थः**=शशाङ्के=चन्द्रे, पापलग्ने=पापग्रहाणां लग्ने वा, वृश्चिकेशत्रिभागगे=कुजद्रेष्काणे,शुभैः=शुभग्रहैः, स्वायस्थितैः=स्व सर्पः तत् वेष्टितो अपि वाजातः।

**भावः**=वृश्चिकेशत्रिभागगे अर्थात् कुजद्रेष्काणे, शशाङ्के पापलग्ने वा,शुभैः स्वायस्थितैः सर्पः तत् वेष्टितो अपि वा गर्भस्थः जायते।

**बोधप्रश्नाः**

7. वृश्चिकेशः कः?
8. चन्द्रे कस्य त्रिभागगे सर्पवेष्टितजन्मो भवितुम् अर्हति?
9. लग्ने कुजस्य त्रिभागगे, शुभैः कुत्रत्यैः सर्पवेष्टितो अर्हति?

## कोशवेष्टितयमलजन्मयोगः

*रविः चतुष्पादराशौ व्यवस्थिते, द्विस्वभावराशौ व्यवस्थितैः बलान्वितैः शेषैः, एकजरायुःवेष्टितौ यमलौ भवतः। चतुष्पादराशयः मेषः, वृषभः, सिंहः, धनुपरार्धः,मकरपूर्वार्धः, एते चतुष्पादराशयः भवन्ति। इतरैः, अर्थात् चन्द्रः, कुजः, बुधः गुरुः, शुक्रः, शनिः एते ग्रहाः सबलाः स्यात्। एते ग्रहाः द्विस्वभावराशौ व्यवस्थिताः भवेयुः। द्विस्वभावराशयः मिथुनकन्याधनुमीनाः भवन्ति।एवं विधे ग्रहस्थितौ कोशवेष्टितौ भवतः।कोशवेष्टितजननहेतुः कः? अथवा कोशवेष्टितजननकारणं किं स्यात्? इति उत्तरापक्षे सन्देहः। तत् अग्रे पूर्वपक्षे जल्प्यते-* ***द्वितनुस्थैः च यमलौ*** *इति श्लोके लिखितम्। अत्र स्पष्टतया ज्ञायते उभयराशिस्थैः ग्रहैः द्वित्वम् ऊह्यम् ।*

*तथा हि-*

"चापपरार्धहरिगोमकरादिमेषाः मनस्थिताः, बलयुताःच चतुष्पदाख्याः ।

भानौ चतुष्पादगते सूर्यें चतुष्पादराशिगते शेषैः ग्रहैः, वीर्यसमान्वितैः द्वितनुस्थैः, द्विस्वभावराशिगतैः, कोशवेष्टितौ, एकेन क
आवृतौ यमलौ भवतः।

कन्यानृयुग्मधटतौलि शरासनाद्याः लग्नं गताः यदि नराः द्विपदे बलाख्याः।

मृगापरार्धन्त्यकुलीरसंज्ञाः जलाभिधानाः बलिनश्चतुर्थ।।

जलाशयो वृश्चिकनायधेयः ससप्तमस्थानगतौ बली स्यात्।"

उदाहरणे अस्मिन् रविः चतुष्पादराशौ व्यवस्थितः, इतरग्रहाः उभयराशिगतौ सम्प्राप्तः अतः कोशवेष्टितः जातः।

**चतुष्पादगते भानौ शेषैर्वीर्य समन्वितैः।द्वितनुस्थैश्च यमलौ भवतः कोशवेष्टितौ।।४।।**

चतुष्पादगते भानौ शेषैः वीर्यसमन्वितैः।द्वि तनुस्थैः च यमलौ भवतः कोश वेष्टितौ।

**अन्वयः=चतुष्पादगते भानौ शेषैः वीर्य समन्वितैःद्वितनुस्थैश्च यमलौ कोश वेष्टितौभवतः।**

**अन्वयार्थः**=चतुष्पादगते=चतुष्पादराशौ, भानौ=रवौ, शेषैः=इतरैः ग्रहैः, वीर्यसमन्वितैः=बलान्वितैः, द्वितनुस्थैः=द्विस्वभावराशिस्थैः च, यमलौ=यमलौ, कोशवेष्टितौ=जरायुः भवतः ।

**भावः=भानौ चतुष्पादराशिगते शेषैः अन्यैः सर्वग्रहैः, द्विस्वभावराशिस्थैः, बलिभिः च एकजरायुवेष्टितौ यमलौ जायते।**

**बोधप्रश्नाः**

10. कोशवेष्टितयोगे भानुः कुत्रस्थितः स्यात्?

11. इतरैः इति शब्देन कैः सूचितम्?

12. कोशवेष्टितजननकारणं किं स्यात्?


व्याकरणांशाः=**द्वितनुस्थैः** इत्यत्र तृतीया। क्रियासिद्धौप्रकृष्टोपकारकं करणम्। करणे तृतीया। अत्र तृतीयाविवक्षायं द्वितनुस्थाः ग्रहाः कोशवेष्टितजननहेतुकम् इति अभिजानीयात्।

**नालवेष्टितयमलजन्मयोगः**

सद्ये प्रसूतेबालशरीरे नाभिसूत्रं वेष्टितं योगम् एकं विवक्षितम् ।स च ज्ञातव्यः खलु?;मेषे, सिंहे, वृषभे वा लग्नगते, तस्थे लग्नराशौ, सौरे अथावा कुजे स्थिते, राश्यंशसदृशे गात्रे लग्नराशिनवांशसमाने गात्रे अङ्गविभागे नालवेष्टितः नालरूपेण आकारेण आवृतः जन्तुः जायते।तत्काललग्नस्य यः नवांशकः उदयमानः स च यत् राशिसम्बन्धी स चराशिः कालपुरुषस्य यस्मिन्नङ्गे व्यवस्थितः तस्मिन् अङ्गे नालवेष्टितः इति कथयेत्।

**छागे सिंहे वृषे लग्ने तत्स्थे सौरे अथ वा कुजे।राश्यंश सदृशे गात्रे जायते नाल वेष्टितः** ।। ५।।[1]

**उदाहरणम्-जायते नालवेष्टितः**




छागे सिंहे वृषे लग्ने तत्स्थे सौरे अथ वा कुजे ।राशि अंश सदृशे गात्रे जायते नाल वेष्टितः । ।(नो मेत्रे नमे)

**अन्वयः**=छागे सिंहे वृषे लग्ने तत्स्थे सौरे अथवा कुजे राश्यंश सदृशे गात्रे नालवेष्टितः जायते।

**अन्वयार्थः**= छागे=मेषे, सिंहे=सिंहराशौ, वृषे=वृषभराशौ लग्ने=प्रागुक्तेषु अन्यतमे लग्ने, तत्स्थे=तत्रस्थे, सौरे=शनौ अथवा कुजे=भूमिपुत्रे, राश्यंशसदृशे गात्रे नालवेष्टितः जायते।

**भावः**=छागे सिंहे वृषे लग्ने तत्स्थे सौरे अथवा कुजे राश्यंश सदृशे गात्रे नालवेष्टितः जायते। उदाहरणे अस्मिन् मेषलग्नं शनिः प्राप्तः। अतः जातः नालवेष्टितः इति वदेत्।

**बोधप्रश्नाः**

13. **छागः** नाम कः राशिः?

14. **सौरः** नाम कः?

15. नालवेष्टितजन्मः केषु लग्नेषु भवति?

16. लग्नगतौ कौ ग्रहौ नालवेष्टितजन्मकारकौ भवतः?

---

[1]छागसिंहवृषे इत्यपि पाठान्तरम् वर्तते।

17. शरीरस्य कस्मिन् अङ्गेनालवेष्टितो भवति?

**जारजातयोगः**

साधवः एवं प्रवदन्ति,यत् गुरोः अनुग्रहदृष्टिः अपेक्षते। गुरुः सृष्टिस्थितलयकारकः च भवति। धर्मकार्याय गुरोः अनुग्रहं भवति। सुयोधनः एवं कथयति "जानामि धर्मं न च मे प्रवृत्तिः । जानामि अधर्मं न च मे निवृत्तिः इति।" अस्मिन् सन्दर्भे सन्तानः धर्ममार्गेण उत अधर्मेण वा जातः इति जिज्ञासा। लोके सर्वेधर्ममार्गेण न आचरन्ति, इति। निसर्गे अपि सहजताय अधर्मः वर्तते। तन्निमित्तं कथाम् एकां पठ- एकदा एकः काकः स्वनीडे विद्यमान् अण्डान् पालयति। अण्डात् यदा शिशुःबहिरायाति तदा अवगम्यते तेषु सर्वेषु न केवलं स्व अपत्याः, केषुचित् पिकायाः अपि अपत्याः वर्तन्ते। तथैव अत्रापि ग्रहस्थितेः आधारेण जारजातज्ञानविधिम् उल्लिख्यते।

लग्नम् इन्दुं च यदि जीवो न दृष्टः तर्हि जारजातेति जानीहि। अत्र शङ्का "लग्नचन्द्रौ एकराशिस्थौ उत पृथगस्थौ ?" तत् प्रकाश्यते,लग्नचन्द्रौ एकराशिस्थौ, पृथग् राशौ व्यवस्थितौ वा तदा स जारजातः। लग्नचन्द्रयोः अन्यतमयोः एकं यदि जीवदृष्टे न जारजात भवति।रविणा समागतं इन्दुं गुरुदृष्टिः हीनः, तत्र जारजातेऽति विजानीयात्। अत्र समागतः पदेन एकराशिस्थौ निकटस्थौ इति अर्थः। तथा हि- *शशाङ्कं रविणा समागतम्।* पापग्रहौ कुजः, शनिः अनयोः अन्यतमः, यदि रविणा युतः तर्हि परेण जातः इति विजानीयात्। ग्रहौ तौ यदि चन्द्रेण युतौ अपि परजातयोगः भवति।

* लग्नचन्द्रयोः अन्यतमयोः गुरुः अदृष्टे जारजातः भवति। चन्द्रः रविणा युतः, पापेन युतः वा गुरुणा अदृष्टः, रविः पापेनयुतः गुरुणा अदृष्टः, जारजातः।

> **जारजातयोगः**
>
> जन्मसमये यदि लग्नम् इन्दुं च गुरुः न निरीक्षिते तर्हि निश्चयात् परेण जातं प्रवदन्ति। रविणासमागतं शशाङ्कं गुरुः न निरीक्षिते चेदपि परेण जातं प्रवदन्ति। पापयुतः चन्द्रः रविः वा जीवदृष्टिहीने, परेण जातः।

| परजातयोगाः | | |
|---|---|---|
| प्रथमोयोगः | लग्नं चन्द्रं च | गुरुः न वीक्ष्यते |
| द्वितीयो योगः | रविणा युतः चन्द्रः | गुरुणा न वीक्षितः |

| | | |
|---|---|---|
| तृतीयोयोगः | सपापकः रविणा युतः | गुरुणा न वीक्षितः |
| चतुर्थयोगः | सपापकः चन्द्रः युतः | गुरुणा न वीक्षितः |

न लग्नम् इन्दुं च गुरुर्निरीक्षते न वा शशाङ्कं रविणा समागतम्।

स पापकोऽर्केणयुतोऽथ वा शशी परेण जातं प्रवदन्ति निश्चयात् ।। ६।।

पदच्छेदः-न लग्नम् इन्दुं च गुरुः निरीक्षते न वा शशाङ्कं रविणा समागतम् ।स पापकः अर्केण युतो अथ वा शशी परेण जातं प्रवदन्ति निश्चयात् । ।(वंशस्थ)

**अन्वयः**=लग्नम्इन्दुं,शशाङ्करविणासमागतम्,वाच गुरुः न निरीक्षिते,सपापकोऽर्केणयुतोऽथवाशशीपरेणजातंनिश्चयात्प्रवदन्ति।। ६।।

**अन्वयार्थः**=लग्नम्इन्दुं,शशाङ्करविणासमागतम्,वाच गुरुः न निरीक्षिते,सपापकोऽर्केणयुतोऽथवाशशीपरेणजातंनिश्चयात्प्रवदन्ति।। ६।।

**भावः**=लग्नम्इन्दुं, शशाङ्करविणासमागतम्,वाचगुरुःननिरीक्षिते,सपापकोऽर्केणयुतोऽथवाशशीपरेणजातंनिश्चयात्प्रवदन्ति।

**बोधप्रश्नाः**

18. लग्नचन्द्रयोः अन्यतमयोःकः अदृष्टे जारजातः भवति?
19. चन्द्रवशात्जारजातयोगः कीदृशो भवति?
20. रविवशात् जारजातयोगः कीदृशो भवति?

## *पितृबन्धनयोगः*

द्वापरयुगे एकस्मिन् सन्दर्भे, भगवान् श्रीकृष्णस्य जननकाले वसुदेवः बन्धने आसीत्। विधिवैचित्र्यं, नाम एवं साक्षात् लक्ष्मीपतिः कारागृहे अवतरितवान्। जन्मकुण्डलिवशात् पितुः स्थितिः कीदृशी ? इति विज्ञानप्रक्रिया प्रवक्ष्यते।

क्रूरराशयः के? इति आदौ ज्ञातव्यम्। क्रूरग्रहाणाम् आधिपत्यानां येषु राशिषु वर्तते ते क्रूरराशयः भवन्ति। ते मेष-सिंह-वृश्चिक-मकर-कुम्भाः एते भवन्ति। बुधः क्षीणचन्द्रौ च कदाचित् पापौ भवतः। यदि तौ पापौ तयोः राशिः अपि ग्राह्यम्।

एवं क्रूरर्क्षगतौ अशोभनौ। अस्मिन् सन्दर्भे अशोभनौ नाम शनिकुजौ भवेयुः। पितृकारकः सूर्यः। अतः तस्मात् सप्तम-नवम-पञ्चमभावेषु अन्यतमे स्थितौ, तर्हि सद्यःजातस्य पिता बद्धः इति

वेद।*"किम् <u>अशोभनौ</u> इति द्विवचनं प्रयुक्तम्?पापाः न तु द्वावेव, खलु।"*इति उत्तरपक्षः। **क्षीणेन्दु अर्किमहीसुतार्कतनयाः पापाः**भवन्ति, तेषु रविः पितृकारकत्वात् असिद्धो जातः। क्षीणेन्दुः बुधः च सर्वदा पापिनौ नभवतः। अतः शनिकुजौ भवतः इति सिद्धान्तपक्षः। अत्र भवतः ध्येयः तथ्यः-

* क्रूरक्षेत्रगतौ अशोभनौ सूर्यात् द्यूननवात्मजस्थितौ सप्तम-नवम-पञ्चम भावगतौ यदि भवतः तदानीं जातस्य पिता बद्धः इति वदेत्।

*"क्व अस्ति पिता बद्धः?"*सूर्यस्थितराशिवशात् विदेशगः स्वे पथि वा पिता बद्धः वक्ष्यः। चरराशौ रविः चेत् विदेशगः पिता बद्धः, स्थिरराशौ रविः चेत्स्वदेशगः, उभयराशौ रविः चेत्पथि पिता बद्धः। तथा हि-

**क्रूरर्क्ष गतावशोभनौ सूर्याद् द्यून नवात्मजस्थितौ।बद्धस्तु पिता विदेशगः स्वे वा राशिवशाद् अथो पथि।।** ७।।

क्रूर ऋक्ष गतौ अशोभनौ सूर्यात् द्यूननव आत्मज स्थितौ।बद्धः तु पिता विदेशगः स्वे वा राशि वशात् अथो पथि।।(वैतालीया)

**अन्वयः**=क्रूरर्क्ष गतावशोभनौ सूर्यात् द्यूननवात्मजस्थितौ।विदेशगः पिता बद्धस्तु स्वे वा राशिवशाद् अथो पथि।। ७।।

**अन्वयार्थः**= क्रूरर्क्ष=क्रूरराशयः,गतौ=प्राप्तौ, अशोभनौ=पापग्रहौ, सूर्याद् द्यून=सूर्यात् सप्तमस्थनगतौ,नवात्मजस्थितौ=नवमभावः आत्मजस्थितौ। विदेशगः=विगतः देशगः, पिताबद्धः तु=पिता बद्धः,स्वे=द्वितीये, वा राशिवशात्=राशिवशात्,अथो पथि=मार्गे।।

**भावः**=क्रूरग्रहराशिषुस्थितौ अशोभनौ शनिकुजौ सूर्यात् पञ्चम सप्तम नवमभावस्थितौ, तदा पिता बद्धः भवति।सूर्याक्रान्ताराशिवशात् अथो पथि।

**बोधप्रश्नाः**

**उदाहरणम्-पिताबद्धः**

| | | | |
|---|---|---|---|
| | श | | |
| कु | | | |
| | | | र |
| | | | |

21. श्लोकेऽस्मिन् अशोभनौ नाम कौ?
22. सूर्यात् कुत्र अशोभनौ स्थितौ,योगकारकौ भवतः?
23. यदि रविः चरराशौ चेत्, तर्हि पिता क्व गतः इति कथयेत्?
24. रविः उभयस्थः तर्हि कः देशः वदेत्?

## *ग्रन्थस्यमूलपाठः*

**पितुर्जातः परोक्षस्य लग्नम् इन्दावपश्यति।विदेशस्थस्य चर भे मध्याद् भ्रष्टे दिवा करे ।। १।।**

**उदयस्थेऽपि वा मन्दे कुजे वास्तं समागते।स्थिते वान्तः क्षपा नाथे शशाङ्क सुत शुक्रयोः ।। २।।**

**शशाङ्के पाप लग्ने वा वृश्चिकेश त्रि भागगे।शुभैः स्वाय स्थितैर्जातः सर्पस्तद्वेष्टितोऽपि वा ।। ३।।**

**चतुष्पाद गते भानौ शेषैर्वीर्य समन्वितैः।द्वि तनुस्थैश्च यमलौ भवतः कोश वेष्टितौ ।। ४।।**

**छागे सिंहे वृषे लग्ने तत्स्थे सौरे अथ वा कुजे।राश्यंश सदृशे गात्रे जायते नाल वेष्टितः ।। ५।।**

**न लग्नम् इन्दुं च गुरुर्निरीक्षते न वा शशाङ्कं रविणा समागतम्।**
**स पापकोऽर्केणयुतोऽथ वा शशी परेण जातं प्रवदन्ति निश्चयात् ।। ६**

**क्रूरऋक्ष गतावशोभनौ सूर्याद् द्यून नवात्मज स्थितौ।**
**बद्धस्तु पिता विदेशगः स्वे वा राशि वशाद् अथो पथि ।। ७।।**

## *सारांशः*

पाठेऽस्मिन् सप्तश्लोकाः विषदतया विवृता। प्रसवकाले जन्मदातुः सानिध्यम् असानिध्यं वा ज्ञानप्रक्रिया आदौ विषदिता।प्रसवलग्नम् इन्दौ अपश्यति सति, परोक्षस्य पितुः जातः।दशमलग्नात् वा भ्रष्टे, अन्यत्र स्थिते दिवाकरेण पितृदेशःकथितः। मन्दे उदयस्थेपि, कुजे अस्तं समागते वा, क्षपानाथे चन्द्रे शशाङ्कसुतशुक्रयोः बुधशुक्रयोः मध्ये स्थिते अपि पितृपरोक्षत्वं वाच्यम्। प्रागुक्तत्रिषु योगेषु अपि दशमभावत् इतरभावगतेरवौ, चरस्थिरद्विस्वभावस्थे क्रमशः विदेशस्वदेशमार्गाःजन्मकाले पितुः स्थितिः, प्रवदेत्।भानौ चतुष्पादगते, सूर्ये चतुष्पादराशिगते शेषैः ग्रहैः, वीर्यसमान्वितैः द्वितनुस्थैः, द्विस्वभावराशिगतैः, कोशवेष्टितौ, एकेन कोशेन आवृतौ यमलौ भवतः।लग्नचन्द्रयोः अन्यतमयोः गुरुः,चन्द्रः, रविणा युतः, पापेन युतः वा गुरुणा अदृष्टः, रविः पापेनयुतः गुरुणा अदृष्टः, जारजातः।क्रूरक्षेत्रगतौ अशोभनौ सूर्यात् द्यूननवात्मजस्थितौ सप्तम-नवम-पञ्चम भावगतौ यदि भवतः तदानीं जातस्य पिता बद्धः इति वदेत्। सूर्यस्थितराशिवशात् विदेशगः स्वे पथि वा पिता बद्धः वक्ष्यः। चरराशौ रविः चेत् विदेशगः पिता बद्धः, स्थिरराशौ रविः चेत्स्वदेशगः, उभयराशौ रविः चेत्पथि पिता बद्धः।

## *शब्दावली*

मध्याद्भ्रष्टे=मध्यलग्नात् इतरत्र इति अर्थः।

समागते=सम् उपसर्ग पूर्वक आगते इति। संयुते अथवा सन्निकटे इति आह।

क्षपानाथे=क्षपायाः नाथः। नक्षत्राणाम् अधिपः चन्द्रः। रात्रिनाथः।

वृश्चिकेशत्रिभागगे=कुजत्रिभागगे।

वीर्यसमन्वितैः। द्वितनुस्थैः।तनुः शरीरस्य पर्यायः। द्विशररम् इति। अर्थात् द्विस्वभावराशिः।

छागे=मेषराशौ इति।

राश्यंशसदृशे=

सपापकः=सहितः पापके।

क्रूरर्क्षे=क्रूरराशौ।

द्यून=सप्तम

नव=नवमभावः

आत्मज=पञ्चमभावः

स्वे

पथि=मार्गः

**अभ्यासप्रश्नाः**

1. रविवशात् किमर्थम् पितुः प्रदेशः चिन्त्यते? रवेः कारकं किम्?
2. अधः लिखित अंशानाम् सम्बन्धम् विचिन्त्य लिखत
    a. लग्नगते शनेः दृष्टिः, दशमभावः।
    b. पितृकारकभावः दशमभावः। पितृपरोक्षस्य जननं, लग्नगतः शनिः, दृष्टिः च।
3. अस्तगते कुजस्य चतुर्थ दृष्टिः, एवं सप्तमदृष्टिः च केषु भावेषु भवति।
4. क्रूरदृक्, मन्दः, च ग्रहयोः अन्वर्थनामो भवति किम्?
5. सर्पद्रेष्काणाः के भवन्ति इति ग्रन्थेषु अन्विषत?
6. वृश्चिकेशः कुजः।
7. चन्द्रे कुजस्य त्रिभागगे सर्पवेष्टितजन्मो भवितुम् अर्हति।
8. लग्ने कुजस्य त्रिभागगे, शुभैः स्वायस्थितैः सर्पवेष्टितो अर्हति।
9. मकरपूर्वार्धः, धनुउत्तरार्धः यद्यपि सम्पूर्ण चतुष्पादराशयः न भवन्ति। सम्पूर्णतया चतुष्पादराशयः के?
10. सम्पूर्णतया चतुष्पादलग्नं नालवेष्टितजननञ्च। अनयोः सम्बन्धः कल्पयितुं साध्यं किम्?
11. अधोलिखित श्लोकस्य व्याखानं कुरु।

    पूर्वजन्मकृतं कर्मतत् दैवमिति कथ्यते।तस्मात् पुरुषकारेण यत्नं कुर्यात् अतन्द्रितः।
12. प्रसूतिचिकित्सालयं गत्वा पञ्जिकातः समयादिकं स्वीकृत्य, नालवेष्टित, कोशवेष्टित, जातकसङ्ग्रहणं करणीयम्।

****श्रीपादराजं शरणं प्रपद्ये****

**प्रस्तावना -**

## *प्रिय अध्येता!*

द्वादशतम पाठाय प्रसवदेशज्ञानाय भवते स्वागतम्!

गते पाठे पितृपरोक्षेजननम्, सर्पजन्मयोगःसर्पवेष्टितजन्मयोगःवा, कोशवेष्टितजन्मयोगः,नालवेष्टितयमलजन्मयोगः, जारजातयोगः, पितृबन्धनयोगःपितृपरोक्षेजननम्, एषु विषयेषु ज्ञातवान्।

आत्मीयकर्मबन्धितः जीवः,शरीरं प्राप्य स्वकर्मसूत्रानुसारः भुवि निपतति। प्रसूतिप्रदेशविषये यद्यपि जनाः महत्वं न प्रदर्शयन्ति तथापि अलौकिकमहत्वं वर्तते। जन्तुः पूर्वजन्मार्जितस्वकर्मानुसारं गृहपरिवारादिषु प्रसूते इति गीताचार्यः कथयति। भगवत् गीतायाम् अर्जुनःपृच्छति। यथा हि-"अयतिः श्रद्धयोपेता योगाच्चलितमानसः।अप्राप्य योगसंसिद्धिं कां गतिं कृष्णगच्छति।।?"तदानीं श्रीकृष्ण उवाच-"शुचीनां श्रीमतां गेहे योगभ्रष्टो**भिजायते।**"अथवा योगीनाम् एव **कुले भवति** धीमताम्"।। अत्र सिद्धः असौ जन्म-कर्मणोः परस्परं सम्बन्धः विद्यते। पाठेऽस्मिन् विभिन्नप्रदेशेषु जायमान जन्मयोगाः वराहमिहिराचार्येण चर्चिताः। ते च- नौकायां प्रसवः, जले प्रसवः,बन्धनगारे प्रसवः,गर्ते प्रसवः,क्रीडाभवनेप्रसवः, देवालयेप्रसवः, सोषरभूमिषु प्रसवः, इत्यादयः।अवसरे अस्मिन् किञ्चित् विचार्यते। भारतवर्षस्यश्रेष्ठतांविष्णुपुराणे२/३कर्मभूः इति कथितः-तथा हि-

उत्तरंयत्समुद्रस्यहिमाद्रेश्चैवदक्षिणम्।वर्षंतद्भारातंनामभारतीयत्रसन्ततिः॥१॥
नवयोजनसाहस्रोविस्तारोऽस्यमहामुने।कर्मभूमिरियंस्वर्गमपवर्गंचगच्छताम्॥२॥
महेन्द्रोमलयःसह्यःशुक्तिमानृक्षपर्वतः।विन्ध्यश्चपारियात्रश्चसप्तात्रकुलपर्वताः॥३॥
अतःसम्प्राप्यतेस्वर्गोमुक्तिमस्मात्प्रयान्तिवै।तिर्यक्त्वंनरकंचापियान्त्यतःपुरुषामुने॥४॥
इतःस्वर्गश्चमोक्षश्चमध्यंचान्तश्चगमते।नखल्वन्यत्रमर्त्यानांकर्मभूमौविधीयते॥५॥
पुरुषैर्यज्ञपुरुषोजम्बूद्वीपेसदेज्यते।यज्ञैर्यज्ञमयोविष्णुरन्यद्वीपेषुचान्यथा॥२१॥
अत्रापिभारतंश्रेष्ठंजम्बूद्वीपेमहामुने।यतोहिकर्मभूरेषाह्यतोऽन्याभोगभूमयः॥२२॥

भगवतः अवतारेषु एव अनेकाः विशेषाः दृश्यन्ते। आदर्शपुरुषस्य जन्म कोसलायां, लीलापुरुषस्य जन्म कारागारे, भक्तवत्सलः स्तम्भे, एवं प्रसवप्रदत्ता मातृसमानभूः विचारे अध्ययनाय स्वागतम् ते! ।

**उद्देश्यम्**

पाठस्यास्य अध्ययनेन जन्मकालाधारेण भवान् प्रसवप्रदेशनिर्धारणे सक्षमः भविष्यति। तेषु प्रधानविषयाः-

* नौकायां प्रसवः योगः ज्ञास्यति।
* जले प्रसवयोगःज्ञातुं सक्षमः भविष्यति।

* बन्धनगारे प्रसवयोगो निपुणः भविष्यति।
* गर्ते प्रसवयोगः ज्ञातुं समर्थः भविष्यति।
* क्रीडाभवनादिषु प्रसवज्ञाने पटुः भविष्यति
* स्मशानादिषु प्रसवज्ञाने कुशलः भविष्यति।
* प्रसवदेशज्ञाने सर्वविधा क्षमता प्राप्स्यति।

## नौकायां प्रसवः

अथ नौकायां प्रसवः येगः विवृतः। पौर्णम्यां सम्पूर्णकलायुतश्चन्द्रः भवति। तादृशः सम्पूर्णेन्दौ,अर्थात् पूर्णशशिनि, जन्मभवेयुः। स च स्वराशिगः अर्थात् स्वक्षेत्रगतः, कर्कटं सम्प्राप्तः भवेयुः।अपि चसौम्यःअर्थात् बुधः, लग्नगतः भवेयुः। शुभः अर्थात् जीवः, सुखं चतुर्थभवनं प्राप्तः भवेयुः,एवं व्यवस्थितौप्रसवकाले स्त्री पोतगतां प्रसूयते। तथा हि-

**पूर्णेशशिनिस्वराशिगेसौम्येलग्नगतेशुभेसुखे|लग्नेजलजेअस्तगेअपिवाचन्द्रोपोतगताप्रसूयते|**

**|८||**

सम्पूर्णचन्द्रः, कर्कटराशिगः भवेत्। कर्कटराशिः जलराशिः भवति।तत्र इन्दुः प्राप्तः स्यात्। लग्नगतः बुधः, भवेयुः। श्लोकेस्मिन् शुभे इति कथितः। शुभे इति बहुवचनं न घटते। अतः ग्रहेषु शुभः गुरुः भवति। स च पाताललग्नगतः अर्थात् चतुर्थभवनं सम्प्राप्तः, एवं विधे ग्रहस्थितौ नौकायां जन्मजायते।

अत्र शङ्का-"शुभे सुखम् इत्यत्र, तत् कथं जीवो व्याख्यातः? शुभग्रहौजीवशुक्रौ च वर्तेते।" इति, अत्र युक्तिःउक्तः-"सौम्ये लग्ने" इति उक्तत्वात्;यदि लग्नप्राप्तः बुधः, तर्हि तस्मात् चतुर्थस्थानं शुक्रस्य अवस्थानं न सम्भवति।युक्तः जीवः एव।

लग्नेजलजे, इत्यादि।कीदृशः लग्नम्?"जलजे" अर्थात् जलचरराशिलग्नगे, तस्मात् अस्तगतः अर्थात् सप्तमभवनगतः चन्द्रः, पोतगतां प्रसूयते। इति अपरः योगः। जलचरराशयः के?पृच्छायांकर्कटमकरपश्चिमार्धमीनाः भवन्ति।एषु जलराशिषु अन्यतमं लग्नं भवेयुः। अत्र पूर्णः अपूर्णः वा चन्द्रः अस्तगतः नौकायां जन्मकथयेत्।

नौकायां जननयोगः-स्वराशिगे पूर्णे इन्दौ लग्नं प्राप्ते बुधे, चतुर्थभवने गुरौ, नौकागतः प्रसूयते। जलराशौ लग्ने अस्तगे सप्तमे वा चन्द्रे च पोतगता प्रसूयते।

**उदाहरणम्-नौकायां जन्मतयोगः**

| | | | |
|---|---|---|---|
| | | गु | |
| ल बु | | | च |
| र | | | |
| | | | |

**पदच्छेदः**

पूर्णेशशिनिस्वराशिगेसौम्येलग्नगतेशुभेसुखे।लग्नेजलजे अस्तगेअपिवाचन्द्रोपोतगताप्रसूयते।

**अन्वयः**=स्वराशिगे पूर्णेशशिनिसौम्येलग्नगतेशुभेसुखे;लग्नेजलजेअस्तगेअ पिवाचन्द्रोपोतगताप्रसूयते।

**अन्वयार्थः**=स्वराशिगे=आत्मीयराशौ इति अस्मिन् सन्दर्भे कर्कटः, पूर्णेशशिनि=सम्पूर्णे बलवत् चन्द्रे,सौम्ये=बुधे, लग्नगते=लग्नं

प्राप्ते,शुभे=गुरौ,सुखे=चतुर्थे;लग्ने=मूर्तौ,जलजे=जलराशौ,अस्तगे=सप्तमे, अपिवाचन्द्रोपोतगता=नौकगताप्रसूयते=प्रसवः भवति।

**भावः**=स्वराशिगेपूर्णेइन्दौलग्नप्राप्तेबुधे, चतुर्थभवनेगुरौ, नौकागतःप्रसूयते।जलराशौलग्नेअस्तगेसप्तमेचन्द्रेचपोतगताप्रसूयते।

**उदाहरणम्-सलिले सूतिः2**

उदाहरणे अस्मिन् कर्काटकराशौ स्थितः पूर्णचन्द्रः, मकरराशौ रविः च भवति। कुम्भलग्नात् चतुर्थभवनगते गुरौ च वर्तते। लग्नगतः बुधः च वर्तते। अतः पोतगता प्रसूयते।

**बोधप्रश्नः=**

1. रविः चन्द्रात् कस्मिन् भावे व्यवस्थितः भवति?
1. चन्द्रः कस्मिन् राशौ व्यवस्थितः भवेत्?
2. जलराशौ लग्ने अस्तगे सप्तमे वा कः व्यवस्थितः च पोतगता प्रसूयते?

## *3. जले प्रसवयोगः*


अस्ति जले प्रसवःक्वचित्। सः योगः कीदृशः?इति जिज्ञासायाम् अग्रे विव्रियते। अपाम् उदयम् अप्योदयम्। अर्थात् जलराशीनाम् उदयम् इत्यर्थः। तेषु कर्कमीने च सम्पूर्णतया जलचरराशी भवतः। मकरपश्चार्धं जलचरराशिः च भवति। एषु राशिषु अन्यतमं लग्नम् अप्योदयम् इति कथितम्। जलराशिलग्नगम्, आप्यगः जलराशिगतःसम्पूर्णः शशिः,तदा सलिलसमीपे सूतिः इति ।एवम् एको योगः। यदि समवेक्षते तदा सलिले सूतिः स्यात् न संशयः।अथवा जलराशिलग्नगतं, सम्पूर्णः शशी ईक्षते, तदा सलिले प्रसूतिरिति उक्तः। जलराशिः उदयगतः, दशमः, चतुर्थः, वा स्थितः चन्द्रः अपि पोतगता प्रसूयते। मेषूरणबन्धुलग्नश्चेदपि सलिले सूतिः स्यात् न अत्र संशयः लेशः। तथा हि-

**आप्योदयम् आप्यगः शशी सम्पूर्णः समवेक्षते अथवा।**
**मेषूरणबन्धुलग्नगः स्यात् सूतिः सलिले न संशयः || ९||**

अत्र भवता स्मर्तव्यः तथ्यः-

→ जलराशौ स्थितः पूर्णचन्द्रःजलराशिलग्नम् ईक्षितः प्रसवः तु सलिले एव।
→ जलोदयात् दशमः, चतुर्थः वा स्थिते सम्पूर्णेन्दुः सलिलप्रसवः इच्छति।

**उदाहरणम्-सलिले सूतिः1**




**पदच्छेदः**

आपः उदयम्आप्यगःशशीसम्पूर्णःसमवेक्षतेअथवा।मेषूरणबन्धुलग्नगःस्यात्सूतिःसलिलेनसंशयः ।

**अन्वयः=**आपः उदयम्आप्यगःशशीसम्पूर्णःसमवेक्षते,अथवा मेषूरणबन्धुलग्नगः,सूतिःसलिलेनसंशयःस्यात्।

| | | | |
|---|---|---|---|
| ल | | | च |
| | | | |
| | | | |
| र | | | |

**अन्वयार्थः=**आप्योदयम्=जलराश्युदयलग्नमिति।आप्यगः=जलराशौ व्यवस्थितः चन्द्रः,
शशीसम्पूर्णः=पूर्णबिम्बप्राप्तचन्द्रः,समवेक्षते=सम्यक् दृष्टः,अथवा
मेषूरणबन्धुलग्नगः=दशमचतुर्थभवनगतेन्दुः,सूतिःसलिले=जले प्रसवो नसंशयः=कारयतिस्यात्।

**भावः=**आप्यराशयोदयेशशिचन्द्रश्चाप्यगे, तदा सूतिः सलिले, जलोदयलग्नं सम्पूर्णचन्द्रःदृष्टेतदापि जले सूतिः कथयेत्।
जलराश्युदयगते चतुर्थदशमौ वा यदि चन्द्रः स्थितः तर्हि जलसूतिः कथयेत्।
बोधप्रश्नाः

4. जलराशौ स्थितः पूर्णचन्द्रःकम् ईक्षितः सलिलप्रसवम् जनयति?
5. जलोदयात् क्व स्थितः सम्पूर्णेन्दुः सलिलप्रसवम् इच्छति?

उदाहरणे प्रथमे जलचरराशौ कर्कलग्नगते पूर्णचन्द्रे लग्नम् ईक्षिते सलिले प्रसवयोगः घटते।उदाहरणद्वितीये जलोदयलग्नात् चतुर्थभवनप्राप्तेन्दौ सलिलप्रसवः वदेत्।

## *बन्धनगारे प्रसवः*

देवानामपि पूज्यो नित्यं लक्ष्म्यासेवितः, धर्मसेवातत्परः कारगारे प्रसूतः श्रीकृष्णः। यस्मिन् समये श्रीकृष्णजन्म तस्मिन्एव समयेमाया अपि जाता। बन्धनागारे प्रसवयोगः कीदृशः स्यात् इति जिज्ञासायाम् अग्रे व्याचक्षते।

## *गुस्यां जननम्*

**उदाहरणम्-गुस्यां जननम्**

| | | | |
|---|---|---|---|
| | शनि | ल च | |
| | | | |
| | | | |
| | | कुजः | |

उदयोडुपयोः अर्थात् लग्नचन्द्रयोः, एकराशिस्थयोः व्यवस्थितयोः, द्वादशस्थः यमः सौरः वा भवेयुः, शनिः पापनिरीक्षितः अर्थात् पापग्रहः दृष्टःतदा गुस्यां बन्धनागारे प्रसूयते। तथा हि-
**"उदयोडुपयोर्व्ययस्थिते गुस्यां पापनिरीक्षिते यमे |"**उदयो अर्थात् लग्नं भवति। उडुपः अर्थात् नक्षत्राणाम् अधिपः, स चन्द्रः भवति। लग्नचन्द्रयोः द्वदशभावगतः शनौ पापदृष्टः कारागारे जन्मेति वदेत्। तथा च होराकृष्णीये-

**"होराद्वादशराशौ षष्ठे वा भवति बन्धनं रविजे"**

उदाहरणेस्मिन् चन्द्रः उदये व्ययस्थितः द्वादशभवनप्राप्तः शनिः पापेन दृष्टः विद्यते।अतः गुस्यां जननं भवेत्।

**उदाहरणम्-अवटे जननम्**

| | | | |
|---|---|---|---|
| | | चन्द्रः | |
| | | | |
| | | | |
| | लश | | |

## *गर्ते प्रसवः*

अलिकर्कियुते विलग्नगे अर्थात् वृश्चिककर्कटयोः; अन्यतरस्थे विलग्नगे, शनैश्चरे स्थिते, शीतकरेक्षिते अर्थात् चन्द्रेण दृष्टे,अवटे अर्थात् रन्ध्रे प्रसवं वदेत्। शनिः वृश्चिककर्कयोः अन्यतमस्थः विलग्नगः तस्मिन् चन्द्रदृष्टिः अवटे प्रसवं कथयेत्। तथा हि-

**अलिकर्कियुते विलग्नगे सौरे शीतकरेक्षिते अवटे।।**

अलिकर्कियुते इत्यादि प्रष्टुः कूपादिपातः अपि ऊह्यः। शनैश्चरस्य गूढनिवाससूचकत्वात् तदुदयेन सरीसृपात्मकस्य चन्द्रस्य दृष्ट्यापि अवट ऊह्यः। अतः एव निरूपणप्रकारम् अपि अनेन सूचितः। वृश्चिककर्कयोः अन्यतमलग्नप्राप्तः, शनौ इन्दुदृष्टःअवटे प्रसवः साधयति।

**उदयोडुपयोर्व्ययस्थिते गुप्त्यां पापनिरीक्षिते यमे|**

**अलिकर्कियुते विलग्नगे सौरे शीतकरेक्षिते वटे|| १०|**

**पदच्छेदः=**उदयउडुपयोःव्ययस्थितेगुप्त्यांपापनिरीक्षितेयमे।अलिकर्कियुतेविलग्नगेसौरे शीतकरईक्षितेअवटे।।(वैतालीया)

**अन्वयः=**उदयोडुपयोर्व्ययस्थिते यमे पापनिरीक्षिते गुप्त्याम्अलिकर्कियुते विलग्नगे सौरे शीतकरेक्षिते अवटे (जन्म प्रवदेत्।)

**अन्वयार्थः=**उदयोडुपयोः=लग्नचन्द्रयोः, व्ययस्थिते=द्वादशभवनगते, यमे=शनौ, पापनिरीक्षिते=पापग्रहेणदृष्टे, गुप्त्याम्=कारागारे, अलिकर्कियुते=वृश्चिकर्केषु अन्यतमे लग्ने, विलग्नगे=लग्नप्राप्ते, सौरे=शनौ, शीतकरेक्षिते=चन्द्रेण अवेक्षिते,अवटे=गर्ते (जन्म प्रवदेत्।)

**भावः=**उदयोडुपयोर्व्ययस्थिते शनौ, पापनिरीक्षिते गुप्त्याम्अलिकर्कियुते विलग्नगे, सौरे शीतकरेक्षिते अवटेजन्म प्रवदेत्।)

उदाहरणेस्मिन्वृश्चिकलग्ने प्राप्ते शनौ चन्द्रः दृष्टः , चन्द्रः अवटे प्रसवो जनयति।

**बोधप्रश्नाः**

6. बन्धनयोगः केन ग्रहेण चिन्त्यः?
7. श्लोकेअस्मिन् यमशब्दस्यार्थः कः?
8. चन्द्रः कुत्रदृष्टः अवटे प्रसवो वदेत्?

## *क्रीडाभवनादिषु प्रसवः*

मन्दे अब्जगते अर्थात् जलराशिस्थे, तथाभूते विलग्नगे, बुधदृष्टे क्रीडाभवनेप्रसवः। लग्नगतः मन्दः अर्थात् विलग्नगः शनिः, अब्जगतः अर्थात्जलराशिगतः,बुधेन दृष्टः चेत् रतिगृहेषु प्रसवः भवति।उदाहरणे अस्मिन् मीनलग्ने शनिः बुधेन दृष्टः। अतः क्रीडाभवने प्रसूतिः वदेत्।


## *देवालये प्रसवः*

जलराशिलग्नस्थः शनिः, सूर्येण दृष्टः तदा देवालये प्रसवः भवति। लग्नगः मन्दः अर्थात् शनौ, अब्जगतः अर्थात् जलराशिगतः, सूर्येण दृष्टः देवालयविशेषु जन्मेति वदेत्। उदाहरणे अस्मिन् जलराशिलग्नगे शनौ, सप्तमस्थितः सूर्येणदृष्टे, तेन सुरालये प्रसवः भविष्यति।


## *सोषरभूमिषु प्रसवः*

जलराशिलग्नस्थः शनिः, इन्दुना दृष्टे सोषरभूमिषु प्रसवः भवति।लग्नगः मन्दः अर्थात् शनौ, अब्जगतः अर्थात् जलराशिगते, चन्द्रेण दृष्टः सोषरभूमिषु जन्मेति वदेत्। उदारणेस्मिन् मकरराशिप्राप्तं लग्नं, सप्तमगतः चन्द्रेण दृष्टः अतः सोषरभूमिषु जनयति।


**उदाहरणम्-सोषरभूमिषु प्रसूतिः**




**उदाहरणम्-सुरालये प्रसूतिः**




**उदाहरणम्-क्रीडाभवने प्रसूतिः**




अब्जगतः अर्थात् जलराशिगतः विलग्नगः मन्दः, बुधसूर्येन्दुनिरीक्षितः क्रमात् क्रीडाभवने, सुरालये, सोखरभूमिषु, च प्रसूयते। सोषरभूमिः नाम सबालुका प्रदेशः सिकताः।

**श्लोकः**

| | |
|---|---|
| **बुधः** | क्रीडाभवनम् |
| **सूर्यः** | सुरालयः |
| **चन्द्रः** | सोखरभूमिः |
| **मन्दे अब्जगते विलग्नगते** | |

**मन्दे अब्जगते विलग्नगे बुधसूर्येन्दु निरीक्षिते क्रमात्।**
**क्रीडाभवने सुरालये सोखरभूमिषु च प्रसूयते॥ ११॥**

**पदच्छेदः**
मन्देअब्जगतेविलग्नगेबुधसूर्यइन्दुनिरीक्षितेक्रमात्
।क्रीडाभवनेसुरालयेसोखरभूमिषुचप्रसूयते ।
।(वैतालीया)

**बोधप्रश्नाः**

9. शनिः जलचरराशिलग्नगतः बुधेन दृष्टश्चेत् कीदृशभूमौ प्रसवम् इच्छति?
10. शनिः जलचरराशिलग्नगतः रविणा दृष्टश्चेत् तदा कीदृशभूमौ प्रसवम् इच्छति?
11. जलोदयलग्नं शनिं चन्द्रदृष्टौ प्रसवप्रदेशवर्णनं कुरुत।

## 12-8 श्मशानादिषु प्रसवः

| | नृ लग्नप्राप्तं शनिं सूर्यादिग्रहाः दृष्टे प्रसवप्रदेशः | |
|---|---|---|
| 1 | रविः | देवालये, राजभवने, गोकुले वा |
| 2 | चन्द्रः | रम्यप्रदेशे |

**उदाहरणम्-श्मशाने प्रसवः**

| | | | |
|---|---|---|---|
| कु | | | |
| | | | |
| | | | |
| | | | ल श |

ग्रहवशात् प्रसवक्षेत्रं निर्दिष्टम्। नृलग्नगं नरराशिलग्नस्थितंमन्दं कुजः, सितेन्दू,गुरुः, रविः, ज्ञः च पृथग् दृष्टः चेत् प्रसवप्रदेशभेदः जायते। नरराशयः के? इति पृच्छायां कथ्यते। मिथुनकन्यातुलाधनुपूर्वार्धाकुम्भाःनरराशयः भवन्ति। नरराशिप्राप्तः मन्दं, रविः, सितेन्दू, कुजः, बुधः, गुरुः, च यदि पश्यन्ति तर्हि प्रसवप्रदेशप्रभेदान् अग्रे लिख्यते।

i. **स्मशानजन्मयोगः**-नृलग्नगं नरराशिलग्नगतं मन्दं, कुजः निरीक्षते श्मशाने प्रसवं करोति।

ii. **रम्यप्रदेशजन्मयोगः**-नृलग्नगं शनिं, सितेन्दू प्रेक्ष्य रम्ये अर्थात् मनोहरे भूभागे प्रसवं कुरुतः।

iii. **अग्निशालाजन्मयोगः**–नृलग्नगं मन्दं,गुरुः प्रेक्ष्य अग्निहेत्रक्षेत्रे प्रसवं जनयति।

iv. **देवालयजन्मयोगःगोशालायं वा** –नृलग्नगं मन्दं, रविः गुरुः प्रेक्ष्य अग्निहोत्रक्षेत्रे प्रसवं जनयति।

v. **शिल्पालये** -नृलग्नगं मन्दं,ज्ञः प्रेक्ष्य शिल्पालये प्रसवं करोति।

**नृलग्नगं प्रेक्ष्यकुजः श्मशाने रम्ये सितेन्दूगुरुरग्निहोत्रे|रविर्नरेन्द्रामरगो कुलेषु शिल्पालये ज्ञः प्रसवं करोति || १२||**

नृलग्नगंप्रेक्ष्यकुजःश्मशानेरम्येसित-इन्दूगुरुःअग्नि-होत्रे ।रविःनरइन्द्रअमरगोकुलेषुशिल्पआलयेज्ञःप्रसवंकरोति ।

अन्वयः=**नृलग्नगं प्रेक्ष्यकुजः श्मशाने सितेन्दूरम्ये गुरुः अग्निहोत्रेरविः नरेन्द्राम् अमरगोकुलेषु, ज्ञः शिल्पालये प्रसवं करोति |१२|**

अन्वयार्थः=नृ लग्नगं=नरराशिलग्नगतम्, प्रेक्ष्य=दृष्ट्वा, कुजः=भूमिपुत्रः, श्मशाने=शवदहनभूमिः, सितेन्दू=शुक्रचन्द्रौ, रम्ये=मनोरमे, गुरुः=जीवः, अग्निहोत्रे=यस्मिन् भुवि अग्निहोत्रं भविष्यति तस्मिन् भूमौ इत्यर्थः।रविः=सूर्यः।नरेन्द्राम्=राजेन्द्रम्, अमरगोकुलेषु=देवमन्दिरेगवां मन्दिरे गोशालायां वा, ज्ञः=बुधः, शिल्पालये=शिल्पमन्दिरे, प्रसवं करोति |१२|

भावः=नृ लग्नगं प्रेक्ष्यकुजः श्मशाने प्रसवः जनयति। सितेन्दूरम्ये प्रदेशे प्रसवकारकौ भवतः। गुरुः अग्निहोत्रप्रदेशे,रविः राजभवने देवालये गोकुले वा प्रसवः कारयति। ज्ञः शिल्पालये प्रसवं करोति |१२|

बोधप्रश्नाः

12. श्मशानस्थनंकस्य ग्रहस्य भवति?

13. काभ्यां विहारस्थाननिर्णयः कर्तव्यः?

14. शिल्पविद्यादि केन ऊह्यम्?

| | | |
|---|---|---|
| 3 | कुजः | श्मशाने |
| 4 | बुधः | शिल्पालये |
| 5 | गुरुः | अग्निहोत्रप्रदेशे |
| 6 | शुक्रः | रम्यप्रदेशे |

## 12-9पुनः प्रसवदेशज्ञानं त्रयोदशः श्लोकः-

अस्ति राशिवशात् जन्मस्थाननिर्णयस्य आकांक्षा। प्रसवप्रदेशज्ञानविधिः द्विप्रकारकः विवक्षितः।तत्रादौ श्लोकः पठेत् –

**राश्यंशसमानगोचरे मार्गे जन्मचरे स्थिरे गृहे|**

**स्वक्षांशगते स्वमन्दिरे बलयोगात् फलम् अंशकर्क्षयोः|| १३|।**

अत्र श्लोकस्य प्रथमपादे राश्यंशसमानगोचरे इत्याह। लग्नराशेः लग्नराशिनावंशकस्य वा समानं प्रदेशं कथयेत् इति अर्थः। आदौ राशिस्वरूपश्लोकं स्मरतु, तत्तु मत्स्यौ घटी नृमिथुनं सगदं सवीणं चापीनरोश्वजघनो मकरो ...स्वचराश्च सर्वे इति।अनेन राशिस्वरूपः प्रदर्शितः। तत्र यस्मिन् प्रदेशे यो यो राशिरूपः प्राणी सञ्चरति तत्र यो मार्गः पन्थाःवा कथिताः तस्मिन् जन्म।राशिस्वरूपप्राणी कुत्र सञ्चरति? “अरण्ये केदारे शयनभवने श्वभ्रसलिले गिरौ चार्थः...” इत्यादिषु श्लोकेषु कथितः। यथा वृषभः राशिः, वृषभः ग्रामवासी, स्थिरराशिः अतः जन्म स्वदेशे ग्रामे इति कथयेत्।

* लग्नराशेः लग्ननवांशकराशेः वा समाने गोचरे प्रदेशे जन्मवदेत्।तस्मात् श्लोके “**मार्गे जन्म चरे, स्थिरे गृहे**”इति च कथितः। चरराशिलग्ने चरराशिलग्ननवांशके वा यदि जन्मतर्हि मार्गे जन्म कथयेत्।स्थिरराशिलग्ने स्थिरराशिनवांशके गृहे जन्मवदेत्।उभयराशिलग्ने उभयराशिनवांशकोदये वा समानप्रदेशः अर्थात् मार्गगृहयोः समीपे जन्मवदेत्।

* तत्र लग्नराशिः तन्नवांशे वा चरे चेत् मार्गे, स्थिरे चेत् गृहे जन्मवदेत्।अग्रे **स्वक्षांशगते स्वमन्दिरे** इति वक्ष्यति। चरस्य स्थिरस्य द्विस्वभावस्य वा राशेः लग्नगतस्य स्वक्षांशः उदयो भवति तदा स्वमन्दिरे जन्म वक्तव्यम्। पूर्वं राशिवशात् ग्रामे, अरण्ये, सलिले, इत्यादिषु प्रसवप्रदेशे ज्ञातः। ततः मार्गे, मन्दिरे , समीपे वा इति कथनीयम्। पुनः ततः स च प्रदेशः स्वमन्दिरे, इतरत्र वा प्रसवः इति वदेत्। तदर्थम् एवम् आह आत्मीयनवांशगते उदये आत्मीयप्रदेशे स्वमन्दिरे वा जन्म प्रवदेत्।

* आत्मीयनवांशगते लग्ने सति आत्मीयगृहे वा जन्म वदेत्। तत्र सन्देहः,यदि एवं स्यात्,राश्यंशसमानगोचरे मार्गे जन्म इत्यत्र, किं लग्नराशिसमानगोचरे

प्रसवदेशः कथनीयः उत किं लग्नराशेः नवाशंसमान सूतिकाप्रदेशः कथनीयः ? इति। क्रियतां तदर्थम् अयं निश्चयात्मकसमाधानम्-" **बलयोगात् फलम् अंशकर्क्षयोः**" इति।बलयोगात् इत्याह, अंशकं ऋक्षं च अनयोः बलयोगात् फलेन प्रसवस्थानं ज्ञानम्। लग्नराशेः नवांशकराशेः च यः बलवान् तत्समानगोचरेषु मार्गगृहसमीपेषु प्रसवो वक्तव्यः। अत्र पूर्वोक्तयोग अभावे राश्यंशसमानगोचरमार्गादिषु प्रसवः वक्तव्यः। तेषां सम्भवे योगोक्तप्रदेशेष्वेव प्रसवो वक्तव्यः।

* अत्र लग्नराशिनवांशयोः मध्ये अंशकर्क्षयोः बलयोगात् फलम्। लग्नराशेः बलवत्वे राशि उक्तप्रदेशलक्षणं वदेत्। नवांशराशेः बलवत्वे तदुक्ते प्रदेशलक्षणं वदेत्।

**श्लोकः-राश्यंशसमानगोचरे मार्गे जन्मचरे स्थिरे गृहे|स्वर्क्षांशगते स्वमन्दिरे बलयोगात् फलम् अंशकऋक्षयोः || १३||**

पदच्छेदः=राशिः अंशसमानगोचरेमार्गेजन्मचरेस्थिरेगृहे।स्वऋक्षअंशगतेस्वमन्दिरेबलयोगात्फलम्अंशकऋक्षयोः ।

अन्वयः**=राश्यंशसमानगोचरे मार्गे जन्मचरे स्थिरे गृहे। स्वर्क्षांशगते स्वमन्दिरेअंशकर्क्षयोःबलयोगात्फलम्** (आदेशयेत्)।

अन्वयार्थः**=राश्यंशसमानगोचरे=**राशेः अंशः राश्यंशःतस्य यः समान गोचरः राश्यशसमानगोचरः तस्मिन् राश्यंशसमानगोचरे**, मार्गे=**पन्थे,जन्म=बालस्य जनन।चरे=चरराशौ, स्थिरे=स्थिरराशौ, गृहे=भवने,प्रवदेत्|स्वर्क्षांशगते=स्व राश्यंशगते, स्वमन्दिरे =आत्मीयभवने, अंशकर्क्षयोः=लग्नराशेः नवांशकराशिः-लग्नराशिः अनयोः, बलयोगात् =अंशकं-ऋक्षयोः, फलम्=भावीफलम् (आदेशयेत्)।

भावः= राश्यंशसमानगोचरे मार्गे जन्मचरे स्थिरे गृहे। स्वर्क्षांशगते स्वमन्दिरे अंशकर्क्षयोः बलयोगात् फलम् आदेशयेत्।

**बोधप्रश्नाः**

15. चर-स्थिर-उभयराशिवशात् सूतिकाप्रदेशः लिखत।
16. कर्कराशौ प्रथमेनवांशे उदये गुर्वी गर्भिणी कुत्र प्रसवति?
17. बलयोागात् इत्यस्मिन् पदे कयोः बलयोगः कथितः?

## 12-10ग्रन्थस्य मूलपाठः

क्रूरर्क्ष गतावशोभनौ सूर्याद् द्यूननवात्मजस्थितौ |बद्धस्तु पिता विदेशगः स्वे वा राशिवशात् अथो पथि || ७||

पूर्णे शशिनि स्वराशिगे सौम्ये लग्नगते शुभे सुखे |लग्ने जलजे अस्तगे अपि वा चन्द्रो पोत गता प्रसूयते || ८||

आप्योदयम् आप्यगः शशी सम्पूर्णः समवेक्षते अथवा|मेषूरण बन्धुलग्नगः स्यात् सूतिः सलिले न संशयः || ९||

उदयोडुपयोर्व्यय स्थिते गुप्त्यां पाप निरीक्षिते यमे|अलिकर्कि युते विलग्नगे सौरे शीतकरेक्षिते वटे || १०||

मन्दे अब्जगते विलग्नगे बुधसूर्येन्दु निरीक्षिते क्रमात्|क्रीडा भवने सुरालये सोखरभूमिषु
च प्रसूयते || ११||

नृ लग्नगं प्रेक्ष्य कुजः श्मशाने रम्ये सितेन्दू गुरुरग्निहोत्रे |रविर्नरेन्द्रामरगो कुलेषु
शिल्पालये ज्ञः प्रसवं करोति || १२||

राश्यंशसमानगोचरे मार्गे जन्मचरे स्थिरे गृहे |स्वर्क्षांशगते स्वमन्दिरे बलयोगात् फलम्
अंशकऋक्षयोः || १३||

## 12-11सारांशः

पाठेऽस्मिन् अनेकविधप्रसवयोगः कथितः। आदौ चन्द्रवशात् नौकायां जननयोगः कथितः। स्वराशिगे पूर्णे इन्दौ लग्नं प्राप्ते बुधे, चतुर्थभवने गुरौ, नौकागतः प्रसूयते। जलराशौ लग्ने अस्तगे सप्तमे वा चन्द्रे च पोतगता प्रसूयते। जलराशौ स्थितः पूर्णचन्द्रः जलराशिलग्नम् ईक्षितः प्रसवः तु सलिले एव।जलोदयात् दशमः, चतुर्थः वा स्थिते सम्पूर्णेन्दुः सलिलप्रसवः इच्छति।लग्नचन्द्रयोः द्वदशभावगतः शनौ पापदृष्टः कारागारे जन्मेति वदेत्।अलिकर्कियुते विलग्नगे अर्थात् वृश्चिककर्कटयोः; अन्यतरस्थे विलग्नगे, शनैश्चरे स्थिते, शीतकरेक्षिते अर्थात् चन्द्रेण दृष्टे,अवटे अर्थात् रन्ध्रे प्रसवं वदेत्।मन्दे अब्जगते अर्थात् जलराशिस्थे, तथाभूते विलग्नगे, बुधदृष्टे क्रीडाभवने प्रसवः।जलराशिलग्नस्थः शनिः, सूर्येण दृष्टः तदा देवालये प्रसवो भवति।जलराशिलग्नस्थः शनिः, इन्दुना दृष्टे सोषरभूमिषु प्रसवः भवति।नरराशिलग्नस्थितं मन्दं, कुजः, सितेन्दू, गुरुः, रविः, ज्ञः च दृष्टिवशात् क्रमशः श्माशाने ,अग्निहोत्रप्रदेशे,रम्ये , ,नरेन्द्रामरगोकुलेषु शिल्पालये प्रसवः करोति।लग्नराशेः लग्ननवांशकराशेः वा समाने गोचरे प्रदेशे जन्मवदेत्।तत्र लग्नराशिः तन्नवांशे वा चरे चेत् मार्गे, स्थिरे चेत् गृहे जन्मवदेत्।आत्मीयनवांशगते लग्ने सति आत्मीयगृहे वा जन्म वदेत्।अत्र लग्नराशिनवांशयोः मध्ये अंशकर्क्षयोः बलयोगात् फलम्। लग्नराशेः बलवत्वे राशि उक्तप्रदेशलक्षणं वदेत्। नवांशराशेः बलवत्वे तदुक्ते प्रदेशलक्षणं वदेत्।

एवं प्रसवप्रदेशः निर्णयः।

अग्रिमेऽध्याये मात्रात्यक्तयोगः, पित्रादिगृहे प्रसवः, तरुशालादिषु प्रसवः एवम् अनेकविधविचाराणाम् पाठः वर्तते।

शब्दावली

प्रसवगृहम् -गर्भागारंवासगृहम्अरिष्टंसूतिकागृहम्॥

**क्रूरर्क्ष**=क्रूरग्रहाणां भवनम्। **सुखे**=चतुर्थे भवने।

**जलजे**=जलराशौ।**अस्तगे**=सप्तमभवने इति अर्थः।**पोतगता=नौकागता।**

**मेषूरण**=दशमभवनम्। **र्नरेन्द्रा=नराणाम् इन्द्रः नरेन्द्रः। अमरगो** =देवालये।

**गोकुलेषु =गोशालायां।आलये=भवने।**

बोधप्रश्नोत्ताराणि

1. रविः चन्द्रात् सप्तमे भावे व्यवस्थितः भवति।
2. चन्द्रः कर्काटके राशौ व्यवस्थितः भवेत्।
3. जलराशौ लग्ने अस्तगे सप्तमे वा  चन्द्रे व्यवस्थिते च पोतगता प्रसूयते।
4. जलराशौ स्थिते पूर्णचन्द्रे जलराशिलग्नम् ईक्षिते सलिलप्रसवः जायते।
5. जलोदयात् चतुर्थदशमौ स्थिते सम्पूर्णेन्दुः सलिलप्रसवः इच्छति।
6. बन्धनयोगो शनिना ग्रहेण चिन्त्यम्।
7. अस्मिन् श्लोके यमशब्दस्यार्थ शनिः।
8. चन्द्रः अलिकर्कियुते दृष्टे अवटे प्रसवो वदेत्।
9. शनिः जलचरराशिलग्नगतः बुधेन दृष्टश्चेत् कीदृशभूमौ प्रसवम् इच्छति।
10. शनिः जलचरराशिलग्नगतः रविणा दृष्टश्चेत् तदा देवालयभूमौ प्रसवम् इच्छति।
11. जलोदयलग्नं शनिं चन्द्रदृष्टौ प्रसवप्रदेशवर्णनं कुरुत।
12. श्मशानस्थनंकुजस्यग्रहस्य भवति।
13. इन्दुसिताभ्यां विहारस्थाननिर्णयः कर्तव्यः।
14. शिल्पविद्यादि बुधेन ऊह्यम्।
15. तत्र लग्नराशिः तन्नवांशे वा चरे चेत् मार्गे, स्थिरे चेत् गृहे जन्मवदेत् उभये चेत् भवनसमीपे प्रवदेत् ।
16. कर्कराशौ प्रथमेनवांशे उदये गुर्वी गर्भिणी आत्मीयगृहे प्रसवति।
17. बलयोागात् इत्यस्मिन् पदे लग्नम्-लग्नांशकयोः  बलयोगः कथितः।

ॐश्रीपादराजं शरणं प्रपद्ये........